१०. 18a अगस्त्यश्चैव पद्धोमं] A, अगस्त्यस्यैव तद्धोमं C^1, D^1, अगस्त्यस्यैव तु तद्धोमं (*v.f.*) C^2, अगस्त्यश्चैव सोमं (*v.f.*) D^2, अगस्त्यैव पतिर्धामं G.

११. 18c °मध्यं] A, G, °मध्य C, D^2, °मध्ये D^1 ; 18d पूतं कृष्णमृगोद्भवम्] Eds., प्रतिकृष्णमृगोद्भवात् A^1,

तत्रजाः स्थापने योज्या आचार्यप्रवराः स्मृताः[१]।

[४. शैवाचार्या द्विभेदाः]

[२]भौतिको नैष्ठिकश्चैव शैवाचार्यो द्विधा स्मृतः[३]॥ १९॥
[४]भौतिकश्च सपत्नीको नैष्ठिकश्च विपत्निकः[५]।
भौतिकं चोत्तमं विद्धि लिङ्गस्थापनकर्मणि॥ २०॥
नैष्ठिको मध्यमो ज्ञेयो भौतिको ब्रह्मचारि वा[६]।
शिवेन दीक्षितश्चैव शिवद्विज इति स्मृतः[७]॥ २१॥
स्थापको देशिकश्चैव तस्य पर्यायवाचकः।
स्थापनं चोत्सवं दीक्षामादिशैवेन कारयेत्॥ २२॥

[५. प्रतिष्ठाचार्यलक्षणं]

[५.१. शुभलक्षणानि]

क्रियायां निपुणः सम्यक्शैवाचारसमन्वितः[८]।
[९]हेयोपादेयतत्त्वज्ञः शैवतन्त्रपरायणः॥ २३॥
सुशीलः सात्विको वाग्मी समयाचारपारगः।
जटी वाथ शिखी मुण्डी श्मश्रुलोमादिविवर्जितः॥ २४॥
दीक्षितश्च विरोगश्च सर्वसङ्गविवर्जितः[१०]।
पदवाक्यप्रमाणज्ञो मन्त्रमुद्राक्रियान्वितः॥ २५॥

पुनः कृष्णमृगोद्भवान् A^2, G, पूतकृष्णमृगोद्भवान् C, D.

१. 19a तत्रजाः स्थापने योज्या] Eds, तत्र स्थापनने पूज्या A^1, तत्र स्थापने पूर्या (*v.f.*) A^2, तत्रजं स्थापने योज्य C, तत्रजा स्थापने योज्य D, तत्र स्थापनके पूज्य G ; 19b आचार्यप्रवराः स्मृताः] A^2, आचार्यप्रवरं स्मृता A^1, आचार्यं च परिस्मृताः C, आचार्यं च परा स्मृता D, आचार्यप्रवरस्मृताः G.

२. C^1 place 19cd-22cd entre 25cd et 26ab.

३. 19d शैवाचार्यो द्विधा] A, G, शैवाश्च द्विविधाः स्मृताः C^1, शैवश्च द्विविधाः स्मृतः C^2, शैवाश्च द्विषधा स्मृताः D.

४. A^2 fait précéder 20ab par un demi-vers composé de 20a suivi de 19d.

५. 20a भौतिक°] A (etc.), भूतिक° C^1 ; सपत्नीको] A (etc.), सपलीको G ; 20b विपत्निकः] A^1, D^1, G, विपत्तिकः A^2, D^2 विवर्तकः C.

६. 21b ब्रह्मचारि वा] A (etc.), ब्रह्मचारिणः C^2.

७. 21d °द्विज इति स्मृतः] A^1, C, D, °द्विजा इति स्मृताः A^2, G.

८. 23a सम्यक्°] A^1, सौम्यः A^2, G, सद्यः C, D.

९. G omet 23d-25c.

१०. 25a विरोगश्च] A, शिरोग्रीव° C, D^2, शिरोगीव° D^1.

शिवशास्त्रैकचित्तस्तु पशुशास्त्रविवर्जितः[१]।
[२]वास्तुविद्याकृताभ्यासः शल्योद्धारविशारदः[३]॥ २६॥
ईदृशः स्थापने योग्यः ; प्रतिष्ठा यदि विद्यते[४]।
यजमानादयः सर्वे चिरं जीवन्ति सुस्थिताः॥ २७॥

[५.२. अशुभलक्षणानि]

आलस्यो निर्दयः स्तब्धोऽशुद्धो नैपुण्यवर्जितः[५]।
व्यसनी वामनः कुब्जः चपलः कुनखः शठः[६]॥ २८॥
सन्न्यासी तार्किको भ्रष्टः स्वशास्त्रसमयच्युतः[७]।
गुरुदेवद्विजादीनां निन्दकः श्यामदन्तकः[८]॥ २९॥
कृतघ्नः पिशुनो दीनः खल्वाटो दन्तुरस्तथा[९]।
पत्तिरङ्गोपजीवी च मोहनो नास्तिको भिषक्[१०]॥ ३०॥
हीनाङ्गश्चाधिकाङ्गश्च शिपिविष्टोऽथ वातकः[११]।
परापवादशीलश्च पशुशास्त्रानुरञ्जकः[१२]॥ ३१॥
एभिस्तु लक्षणैर्युक्तः प्रतिष्ठायामनर्हकः[१३]।

[६. मूर्तिपलक्षणम्]

मूर्तिपानामहं वक्ष्ये लक्षणं शृणु चानल॥ ३२॥

---

१. 26b पशुशास्त्रविवर्जितः] A^2, C, D, G, पशुपाशास्त्रवर्जितः A^1.

२. A^2 omet 26cd-28ab.

३. 26c °कृताभ्यासः] A^1, C^1, G, °क्रमाभ्यासः C^2, D.

४. 27a ईदृशः स्थापने योग्यः] A^1, G, lacune C^1, ईशस्थापनयोग्यश्च C^2, D^1, ईशस्थापनो योग्यश्च D^2.

५. 28a आलस्यो] C, D, कुलस्यो A^1, अलसो G ; स्तब्धो] A^1, D^2, G, सर्वो C^1, सर्पो C^2, तस्थो D^1.

६. 28c व्यसनी] A^1 (etc.), व्यसनीः A^2 ; 28d कुनखः] A, G, कुनखी C, D^1, खनकी D^2

७. 29a सन्न्यासी] C^2, G सन्यासी A^1, C^1, D, सन्याती A^2 ; भ्रष्टः] A^2, भ्रष्ठ A^1, ऽम्यष्ठः C^1, ऽम्बष्ठस् C^2, G, °पष्ठ D.

८. 29c गुरुदेव°] A (etc.), गुरुजनो (?) G ; °द्विजादीनां] A^2, D^2, °द्विजातीनां A^1 (etc.) ; 29d श्यामद°] A, श्थाव° C, D, श्याव° G.

९. 30a दीनः] A (etc.), हीनः C^2 ; 30b दन्तुर°] A^1, C, G, दत्तुर° A^2, दन्तर° D.

१०. 30c पत्ति°] A, पत्नी° C, D, G ; जीवी च] A^2, C, D, G, जीवीव A^1 ; 30d मोहनो] A, C, D, होमनो G.

११. 31b वातकः] A^1, C^1, वादकः A^2, वान्तकः C^2, D, वाचकः G.

१२. 31d °शास्त्रानु°] A, G, °शास्त्राणि C^1, D, °शास्त्रेण C^2.

१३. 32a युक्तः] A^2, C, D, युक्तं A^1 ; 32b °यामनर्हकः] C^2, °कर्मनिर्हतम् A^1, °कर्मनिर्हताः A^2, °कर्मणि नार्हकः (*v.f.*) C^1, °कर्मणि नार्हतः (*v.f.*) D, °कर्मणी नार्हति (*v.f.*) G.

आचार्यारम्भशास्त्रेषु निपुणो गतसंशयः[१]।
तदभिप्रायतत्त्वज्ञश्चाचार्यस्यानुकूलवान्[२] ॥ ३३ ॥
मूर्तिज्ञो मूर्तिधारश्च सर्वकर्मसु पेशलः।

[७. सद्योजातादिमुखोद्भवाः शैवागमाः]

कामिकं योगजं चिन्त्यं कारणं चाजितं तथा[३] ॥ ३४ ॥
पञ्च तन्त्रा इमे ज्ञेयाः सद्योजातमुखोद्भवाः।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान्सुप्रभेदकम् ॥ ३५ ॥
एतानि पञ्च तन्त्राणि वामदेवमुखोद्भवाः[४]।
[५]नारसिंहं च निश्वासं तथा स्वायंभुवानलम्[६] ॥ ३६ ॥
रौरवं च इमे पञ्च अघोरस्य मुखोद्भवाः[७]।
वीरभद्रं च मकुटं विजयं चन्द्रसंहिता[८] ॥ ३७ ॥
मुखबिम्बं च पञ्चैते पुरुषस्य मुखोद्भवाः[९]।
[१०]प्रोद्गीतं ललितं तन्त्रं सिद्धं सन्तानसंज्ञकम् ॥ ३८ ॥
शर्वोक्तं वातुलं तन्त्रं किरणं पारमेश्वरम्[११]।
अष्टतन्त्रा इमे वह्ने ईशानमुखसंभवाः[१२] ॥ ३९ ॥

---

१. 33b गतसंशयः] A, G, शतसंशयाः C, D^1, शतसंशयन् D^2.

२. 33d °कूलवान्] C^2, D, °कूलवित् A^2, G, °कूल्यवित् A^1, °कूकवान् C^1.

३. 34d चाजितं] A^1, त्वजितं A^2, C, D, G.

४. 36a एतानि] A^1, एते वै A^2, C, D, G ; तन्त्राणि] A, C^1, D^1, मुख्यानि C^2 ; 36b °भवाः] A^2, C, D, G, °भवात् A^1.

५. C^2 : tous les termes de 36cd au masculin.

६. 36d °भुवानलम्] G, °भुवानिलम् A, °भुवोऽनलम् C^1, °भुवोनलः C^2, D.

७. 37a च इमे पञ्च] A, G, चन्द्रबिम्बं च C, विमलं च D^1, च बिम्बं च D^2 ; 37b मुखोद्भवाः] A (etc.), मुखोत्तथा D^1.

८. 37c वीरभद्रं च] A (etc.), वीरभद्रस्य G.

९. 38b मुखोद्भवाः] A (etc.), मुखोत्तथा D^1.

१०. A^1 et A^2 omettent 38d-39a.

११. 39a वातुलं] C^2, D, G, lacune C^1 ; 39b पारमेश्वरम्] A^2, C, D, पारमैश्वरम् A^1, परमेश्वरम् G.

१२. 39c अष्ट°] A, C^1, G, अष्टौ C^2, D.

[८. पुनः पञ्चगोचरलक्षणम्]

[८.१. शिवगोचरः]

कौशिको नमुचिर्दक्षो मनुर्वल्मीकनन्दनः[१]।
पराशरोऽप्यथ व्यासो बोधायनसनातनौ[२]॥ ४०॥
शिवगोचरिणश्चैते भ्रातरः कौशिकस्य तु[३]।

[८.२. शिखागोचरः]

काश्यपश्चाङ्गिराः स्थूलः शाण्डिल्यो यदुकस्तथा॥ ४१॥
[४]आपस्तम्बोऽशनो भूतिः शङ्कुकर्णो विराजकः[५]।
शिखागोचरवर्गाश्च भ्रातृभावेन निश्चिताः[६]॥ ४२॥

[८.३. ज्योतिर्गोचरः]

भारद्वाजश्च शङ्खश्च मार्कण्डेयश्च रैव्यकः[७]।
भृगुः शुक्रस्तथा कृष्णः पिङ्गलो देवलः पशुः[८]॥ ४३॥
ज्योतिर्गोचरिणश्चैते भारद्वाजस्य भ्रातरः[९]।

[८.४. सावित्रीगोचरः]

गौतमो गालवो गार्ग्यो वसिष्ठो माधवो नदः[१०]॥ ४४॥
गौलको ऋष्यशृङ्गश्च कात्यायनबृहस्पती ।
सावित्रीगोचराश्चैते भ्रातरो गौतमस्य तु॥ ४५॥

---

१. 40a °दक्षो] G, °दक्ष° A, D, lacune C.

२. 40c पराशरोऽप्यथ व्यासो] A, G, पराशरेऽथवाशासौ C^1, पराशरो यवारासौ C^2, पराशरोऽथवा रासौ D^1, पराशरे वारासे D^2 ; 40d °सनातनौ] A^1, °सनातनः A^2, G, °सनागिरः C, °सनागिनम् D^1, °सनागिनः D^2.

३. 41a °गोचरिण°] A, D, G, °गोगरित° C^1, °गोचरित° C^2.

४. C^1 : le début de 41d est suivi de 46b-46cd puis reprise à 43a jusqu'à la fin du chapitre (y compris 46b-46cd).

५. 42a ऽशनो] A, G, धनो C^2, शनौ D.

६. 42c शिखागोचरवर्गाश्च] A^2, G, शिवगोचरवर्गाश्च A^1, शिवगोचरसन्तानो C^2, D.

७. 43a °द्वाजश्च] A^1, C, °द्वाजोऽथ A^2, D ; 43b रैव्यकः] C^1, रैप्यकः A^1, C^2, D^2, G, रैत्वकः A^2, रैव्यकम् D^1.

८. 43c कृष्णः C, D, कृष्ण° A, G.

९. 44a ज्योतिर्गोचरिणश्चैते] A^2, ज्योतिर्गोचरिणश्चैव A^1, lacune C^1, ज्योतिज्योतिष्माश्चैते C^2, ज्योतिज्योपरिणश्चैते D, ज्योतिर्गोवरहश्चैते G ; 44b भ्रातरः] A^2, G, भारत A^1, भारतः C, D.

१०. 44c गार्ग्यो] A^1, C, D, भर्गो A^2, गार्गो G ; 44d माधवो नदः] A, माधवोन्दवः C, D^2, माधवो भवः D^1.

[८.५. व्योमगोचरः]

अगस्त्यः कपिलो वत्सः कुत्सो वै मुद्गलस्तथा[१]।
पौलस्त्यवायनौ श्वेतश्चम्बको नीललोहितः[२]॥ ४६॥
व्योमगोचरवर्गाश्च भ्रातृभावेन निर्दिशेत्[३]।

[९. वैवाह्यम्]

एतेषां सङ्करं ज्ञात्वा वैवाह्यं कुरु देशिक[४]॥ ४७॥
आचार्यलक्षणं प्रोक्तं पूजाविधिमथ शृणु॥ ४८॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देशिकलक्षणपटलः द्वाविंशतितमः[५]॥

15496

---

१. 46a कपिलो] A, D, G, कौतुको C^1, कौशिको C^2 ; 46b कुत्सो] A^1, कौत्सो A^2, C^2, D^2, G, कौसो C^1, D^1.

२. 46c पौलस्त्यवायनौ] A^1, पौलस्त्यो वायनो A^2, पौलकस्राश्च यः C^1, पौलस्ताश्वयः C^2, पौलस्थाश्वलायः D^1, पौलस्थाश्वलायः D^2, पौलस्त्यवायनेश्वेतः G.

३. 47a व्योमगोचरवर्गाश्च] A^2, C, D, व्योमगोचरवर्गश्च A^1, दिव्याङ्गोचरवर्गाश्च G ; 47b भ्रातृ A, C^2, G, भ्रातुर् C^1, द्रातृ D^1.

४. 47c एतेषां] A, C, D^1, येतेषां D^2.

५. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देशिकलक्षणपटलः त्रयोविंशतितमः।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देशिकलक्षणविधिर्द्वाविंशतिः।
D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देशिकलक्षणपटलः त्रयोविंशतिः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे देशिकलक्षणपटलः।

[त्रयोविंशतितमः पटलः]
[शिवार्चनविधिः[१]]

अथातः संप्रवक्ष्यामि शिवार्चनविधिक्रमम्।
सर्वपापहरं पुण्यं सर्वरोगनिवारणम्॥ १॥
महापातकनाशार्थं सर्वयज्ञफलप्रदम्।

[१. पञ्चशुद्धयः]

आत्मशुद्धिर्भवेत्पूर्वं स्थानशुद्धिर्द्वितीयकम्[२]॥ २॥
तृतीयं द्रव्यशुद्धिस्तु चतुर्थं लिङ्गशोधनम्।
पञ्चमं मन्त्रशुद्धिस्तु उच्यन्ते पञ्चशुद्धयः[३]॥ ३॥

[२. आत्मशुद्धिः]

[२.१. देहशुद्धिः]

विधिस्नानं पुरा कृत्वा देहशुद्धिं ततः कुरु।
पादप्रक्षालनं कृत्वा आचम्य विधिना बुधः[४]॥ ४॥
उत्तराभिमुखो भूत्वा रुचिरासनसंस्थितः।
अस्त्रमन्त्रमनुस्मृत्य दिग्विरेचनमारभेत्[५]॥ ५॥
प्राणायामत्रयं कृत्वा प्रत्येकं दशमात्रकम्[६]।
तद्ग्राह्यमात्मतत्त्वं तु रेचकं बिन्दुमध्यगम्[७]॥ ६॥
यथा व्योमगतश्चात्मा तथा कुर्याद्धृदा पुनः[८]।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, G.

२. 2d स्थानशुद्धिर्द्वि°] A^2, C^2, G, स्थानशुद्धिद्वि° A^1, C^1, D^1, स्थानुशुद्धिर्द्वि° D^2, स्थानुशुद्धिं द्वि° F^1.

३. 3c °शुद्धिस्तु] A (etc.), शुद्धिः स्याद्° C^2 ; 3d उच्यन्ते] G, उच्यते A, C^1, D, F^1, एवं ताः C^2.

४. 4d बुधः] A, G, पुनः C, D, ततः F^1.

५. 5c °मन्त्रमनुस्मृत्य] A (etc.), °मन्त्रं समाहृत्य C^2 ; 5d दिग्विरेचन°] A, F^1, G, दिशि रोचन° C, दिशि रेचन° D.

६. 6a प्राणायामत्रयं] C, D^2, G, प्राणायामं ततः A, F^1, प्राणायामत्रं (*v.f.*) D^1 ; 6b °मात्रकम्] C^2, D, F^1, °मात्रतः A, C^1, G.

७. 6c तद्ग्राह्यमात्मतत्त्वं] A, तत्सङ्ग्राह्यात्मतत्त्वं C, D, तत्रस्थस्यात्मतत्वं F, तद्ग्राह्य आत्मतत्त्वं G ; 6d बिन्दु°] A (etc.), विषु° F^1.

८. 7a व्योमगतश्चा°] D^2, व्योमगतं चा° A, C, D^1, व्योमगतत्वा° G ; 7b °द्धृदा पुनः] NRB (in *Ajita*, t.I, p. 203), °द्धृता पुनः A, C, D, °द्धृतात्मनः F^1.

[१]कृत्वा कायं दहेत्पश्चात्सह सूर्याभिमण्डले[२] ॥ ७ ॥
फट्कारेण तु मन्त्रेण पञ्चग्रन्थींस्तु छेदयेत्[३] ।
भस्मीभूतं विचिन्त्य स्वमानीय प्राणमाश्रितम्[४] ॥ ८ ॥
शून्यं सर्वं निरालम्बमप्रमेयमगोचरम्[५] ।
अधोर्ध्वान्तस्थममृतं स्रवन्तं चिन्तयेत्सदा[६] ॥ ९ ॥
प्रणवेन समायुक्तं श्वेतपद्मोपरि स्थितम् ।

[२.२. मन्त्रन्यासः]

कृत्वा शिवतनुं ध्यायेदष्टत्रिंशत्कलामयम्[७] ॥ १० ॥
शिवाङ्गं चैव पञ्चाङ्गं यथास्थानेषु विन्यसेत्[८] ।

[२.२.१. करन्यासः]

पूर्वं कृत्वा करन्यासमङ्गन्यासमतः परम्[९] ॥ ११ ॥
हस्तपृष्ठतलौ चैव शिवास्त्रेणैव शोधयेत्[१०] ।
[११]शक्तिद्वयं शिवं चैव द्वयोः संकल्प्य हस्तयोः ॥ १२ ॥
कृत्वा मन्त्रात्मकं कायमष्टत्रिंशत्कलामयम् ।
अङ्गुष्ठादिकनिष्ठान्तं सृष्टिन्यासमिति स्मृतम् ॥ १३ ॥
[१२]कनिष्ठाद्यङ्गुष्ठान्तं हि संहारन्यासमुच्यते ।

---

१. F^1 donne cette version de 7cd : कृत्वा कायहे (?) पश्चाद्भवचरुर्थां त्रिकोणके।

२. 7c पश्चात्स°] A^2, D, G, पश्चा स° A^1, C^1 ; 7d सह सूर्याभिमण्डले] A^1, हनुर्यमभिमण्डले A^2, lacunaire C, D, G.

३. 8b °ग्रन्थींस्तु] A (etc.), °ग्रन्थस्तु D^1.

४. 8cd भस्मी°] A (etc.), तस्मिन् F^1 ; विचिन्त्य स्वमानीय] A^1, विचिन्त्यत्कमानीयं A^2, विचिन्त्यास्मान्निय C, विविन्त्यस्ममानिय D^1, विविन्त्यस्ममानि यत् D^2, प्रचिन्त्याथ प्रणीतं F^1, विचिन्त्य च आनीय G ; 8d प्राणमा°] A, G, प्रमाणमा° C, D, प्रणवा° F^1.

५. 9a सर्वं] C, lacune G, सर्व° A, D, F^1 ; 9b °मप्रमेयं] A (etc.), °प्रशमेयम् F^1.

६. 9c अधोर्ध्वान्त°] NRB (in *Ajita* t.I p.203), अधोर्ध्वान्त° A^1, अथाध्वान्त° A^2 (etc.) ; 9d स्रवन्तं] A^2, सुवन्तं A^1, स्रव++ C^1, सृ ++ C^2, स्रवं (*v.f.*) D, स्रवतिश्° F^1, भावयंश्° G.

७. 10c शिवतनुं] C, D, F^1, G, शैवमनु° A.

८. 11a पञ्चाङ्गं] A (etc.), विद्याङ्गं F^1 ; 11b यथा] A (etc.), तत्तत्° F^1.

९. 11d °न्यासमतः] A, D^1, F^1, G, lacune C^1, °न्यासं ततः C^2.

१०. 12a °पृष्ठतलौ] A^1, C^2, G, °पृष्ठतले A^2, °पृष्ठौ तलौ C^1, °पृष्ठा तलौ D^1, °पृष्ठौ तलौ D^2, पृष्ठतलं F^1.

११. F^1 omet 12d-26a.

१२. D^1 omet 14b-15a.

ईशानादि च सद्यान्तं सृष्टिन्यासमिदं परम्[१] ॥ १४ ॥
सद्यादीशानपर्यन्तं संहारक्रममेव हि[२] ।
दक्षिणाङ्गुष्ठमादि स्यात्कनिष्ठान्तं तथोत्तरे ॥ १५ ॥
दशबीजं न्यसेद्विद्वान्स्थितिन्यासमिदं परम् ।
मध्यादिदेशिन्यन्तं हि शिवाङ्गं विन्यसेत्क्रमात्[३] ॥ १६ ॥
नेत्रं हस्ततले न्यस्य अस्त्रं तर्जन्यां विन्यसेत्[४] ।
विद्याङ्गमेवं विन्यस्य शिवं पर्वणि विन्यसेत्[५] ॥ १७ ॥
गृहस्थः सृष्टिमार्गेण करन्यासं तु कारयेत् ।
सपत्नीकवनस्थश्चेत् संहारन्यासमाचरेत्[६] ॥ १८ ॥
करन्यासः समाख्यातश्चाङ्गन्यासमतः शृणु ।

[२.२.२. अङ्गन्यासः]

मूर्धादि सृष्टिरत्रोक्तं पादादि संहृतिर्भवेत्[७] ॥ १९ ॥
[८]अष्टत्रिंशत्कलान्यासं मकुटादिक्रमान्न्यसेत् ।
[९]ईशानं पञ्चधा कल्प्य चतुर्धा पुरुषं न्यसेत् ॥ २० ॥
अघोरं अष्टधा कल्प्य हृद्ग्रीवांसौ स्वनुक्रमात्[१०] ।
जठरे नाभौ पृष्ठे च उरसीति क्रमान्न्यसेत्[११] ॥ २१ ॥
मेढ्रे गुदे च ऊर्वोश्च जान्वोर्वै जङ्घयोरपि[१२] ।

---

१. 14c ईशानादि च] A (etc.), ईशानादीनि G.

२. 15b °क्रममे°] A, D^2, °त्रयमे° C^1, °क्रियमे° C^2, °न्यासमे° G ; हि] A^1 (etc.), च A^2.

३. 16c मध्यादिदेशिन्यन्तं हि] A, G, मध्यादिदिशिन्यान्तं हि C^1, मध्यमादिदिशिन्यान्तं C^2, मध्यमादिदेशिन्यान्तं हि (*v.f.*) D.

४. 17b तर्जन्यां] NRB (in *Ajita* t.I p.207), तर्जनि A (etc.).

५. 17c विद्याङ्गमेवम्] A (etc.), विद्यामेवं तु G.

६. 18c सपत्नीक°] A, अपत्नीको C, D, सपलिको G ; वन°] D, G, वनप्र° (*v.f.*) A, C ; 18d संहार°] A, C^1, G, संहृति C^2, D.

७. 19c °रत्रोक्तं] C, °दं प्रोक्तं A, G, °रत्र (?) D^1, °रक (?) D^2.

८. C^2 et D omettent 20ab-20cd.

९. C^1 omet 20cd.

१०. 21a कल्प्य] A, D, G, कृत्वा C ; 21b °वांसौ] D, °वादौ A^1, °वासौ A^2, C, °वास° G.

११. 21c नाभौ] A^2 (etc.), नाभि° A^1 ; 21d उरसीति] C, ऊरुम्सति° A^1, उरुसन्धि° A^2, उरुस्वीति D, तुरसेति G.

१२. 22a ऊर्वोश्च] C, D, ऊर्वा च A^1, उरौ च A^2, पदोर्वोश्च G.

स्फिक्कटयोश्च तथा पार्श्वद्वयोर्वामं तु विन्यसेत्[१] ॥ २२ ॥
पादयोश्च तथा पाण्योर्नासौ बाह्वोः शिरःक्रमात्[२] ।
अष्टधा कल्पयेत्सद्यं क्षुरिकां दक्षिणे कटौ[३] ॥ २३ ॥
[४]प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत्[५] ।
आत्मानं पूजयेद्विद्वान्गन्धपुष्पादिभिः क्रमात्[६] ॥ २४ ॥
आत्मशुद्धिक्रमः प्रोक्तः स्थानशुद्धिक्रमं शृणु[७] ।
[८]...

[३. द्रव्यशुद्धिः]

पाद्यपात्रं शरावं च शङ्खमाचमनार्थकम्[९] ॥ २५ ॥
[१०]वर्धनीं जलभाण्डं च पुष्पपात्रार्घ्यपात्रकान्[११] ।
[१२]क्षालयेदस्त्रमन्त्रेण हृदयेन निरीक्षयेत्[१३] ॥ २६ ॥
कवचेनावकुण्ठ्याथ तथैवोन्मीलनं कुरु[१४] ।
शिवाम्भसा तु संपूर्य शङ्खं वै वर्धनीं तथा[१५] ॥ २७ ॥

---

१. 22c स्फिक्कटयोश्च] G, सिक्कटयोश्च (*v.f.*) A^1, स्फिक्कायोश्च A^2, कटयान्तं च C^1, कटयान्तश्च C^2, कटयोन्तश्च D ; 22d द्वयोर्वामं तु] Eds., द्वयोर्वामस्तु A (etc.).

२. 23b नासौ] A (etc.), नाभौ G ; बाह्वोः] C, G, बाहौ A^1, बाह्वौ A^2, बाह्वो D ; शिरः] A, C^1, D, G, तथा C^2.

३. 23c सद्यं] A, D^1, G, सद्यः C^1, सद्य C^2, सव्यं D^2 ; 23d क्षुरिकां] C, D, क्षुरिको A^1, G, क्षुरिका A^2 ; कटौ] A (etc.), करौ C^1.

४. 24ab = *Raurava* Kp.59.53cd.

५. 24a प्राकृतं] A^1 (etc.), प्रागुक्तं A^2.

६. 24c विद्वान्°] A, C^1, G, धीमान्° C^2, D.

७. 25b स्थान°] A^2, C, D, G, स्नान° A^1 ; °शुद्धिक्रमं शृणु] A, G, °शुद्धिमतः परम् C, D.

८. Lacune générale concernant la *sthānaśuddhi*.

९. 25c °पात्रं] A, C^2, °पात्र° C^1, D ; 25d °नार्थकम्] C, D, °नार्घ्यकम् A, G.

१०. A^1 omet 26ab.

११. 26a वर्धनीं] C^1 , वर्धनी° A^2 (etc.) ; भाण्डं] A^2 (etc.), गान्धं G ; 26b पुष्पपात्रर्घ्यपात्रकान्] A^2 (etc.), पत्रपात्रर्घ्यपातकान् C^2.

१२. 23.26cd = 50.17ab.

१३. 26c °येदस्त्र°] A^2(etc.), °येद्गुरुं A^1.

१४. 27a °कुण्ठ्याथ] Eds., °कुण्टया च A^1, °कुण्टयाथ A^2 (etc.) ; 27b तथै°] A, C, D^1, G, तेनै° D^2, F^1.

१५. 27c शिवाम्भसा] A^1 (etc.), अम्भसा (*v.f.*) A^2, lacune C^1 ; 27d वर्धनीं]A^1, C, D, G, वर्धनी A^2, +द्वनिं F^1 ; तथा] A, F^1, G, ततः C, D.

तोयमध्ये न्यसेद्ब्रह्मपाणिमन्त्रं हृदा सह[१]।
निधाय दक्षिणं हस्तं व्योमव्यापि जपेद्गुरुः[२] ॥ २८ ॥
दर्शयेत्सुरभीमुद्रां शूलमुद्रां च दर्शयेत्[३]।
पात्राणि च हृदा प्रोक्ष्य शङ्खतोयेन सर्वशः[४] ॥ २९ ॥
क्षीरं दधिघृतादींश्च गन्धपुष्पं च धूपकम्[५]।
वर्धनीतोयमादाय प्रोक्षयेत्पुरुषेण तु ॥ ३० ॥
द्रव्यशुद्धिर्भवेदेवं लिङ्गशुद्धिं ततः शृणु[६] ।

[४. लिङ्गशुद्धिः]

घण्टां तु ताडयेद्धीमान्घण्टामन्त्रमनुस्मरन्[७] ॥ ३१ ॥
[८]अपनीय पटं विद्वान्हृदयं मन्त्रमुच्चरन्[९]।
नालिगेहं ततः प्राप्य लिङ्गशुद्धिं समाचरेत्[१०] ॥ ३२ ॥
पूर्वसंध्यार्चितं पुष्पमीशानेन विसर्जयेत्[११]।
कनिष्ठानामिकामध्ये पुष्पं सङ्गृह्य देशिकः[१२] ॥ ३३ ॥
अङ्गुष्ठतर्जनीभ्यां तु पुष्पं पर्युषितं त्यजेत्[१३]।
विसर्जनस्य तत्काले पुष्पं मूर्धनि दापयेत्[१४] ॥ ३४ ॥

---

१. 28a तोयमध्ये] A, G, तोलमध्ये C^1, तोलमध्यं C^2, D, lacune F^1 ; ब्रह्म°] A, C^2, D, G, ब्रह्मा C^1, F^1, G ; 28b सह] C, D, F^1, सदा A.

२. 28c निधाय] A (etc.), वीतायां F^1 ; 28d जपेद्गुरुः] F^1, जगद्गुरुः A^1, C^2, D^2, जगद्गुरुम् A^2, C^1, D^1, G.

३. 29a °मुद्रां] A, C^2, मुद्रां तु (*v.f.*) C^1, D, मुद्रां च (*v.f.*) F^1, G ; 29b दर्शयेत्] A, G, देशिकः C, D, F^1.

४. 29c च हृदा] C^2, G, हृदिना A, C^1, D, F^1 ; 29d सर्वशः] A (etc.), सर्वतः C^2.

५. 30a °घृतादींश्च] C^1, D, G, °घृटादी च A, °घृतं चैव C^2, F^1 ; 30b धूपकम्] A (etc.), दीपकम् C^2.

६. 31b ततः] A, D^2, lacune C^1, अथ C^2, अत D^1, F^1 ; शृणु] A (etc.), कुरु G.

७. 31d घण्टामन्त्रम्] A (etc.), स्वाह्य(?)मन्त्रम् F^1.

८. F^1 remplace 32ab par : सुरभिशूलमुद्रां च दर्शयेद्देशिकोत्तमः।

९. 32a पटं] A, C, पटान्° D, पदं G ; विद्वान्हृ°] C, D, विद्याद्धृ° A, G ; 32b हृदयं मन्त्रमुच्चरन्] A, G, हृदा मन्त्रम्समुच्चरन् C, हृदयमन्त्रं समुच्चरन् (*v.f.*) D.

१०. 32c नालिगेहं] A^2, C^1, D^2, G, बाहिगेहं A^1, नालिकेरं C^2, D^1, नालिगेवं F^1.

११. 33a °र्चितं] C (etc.), °र्पितं A ; 33b °शानेन विसर्जयेत्] A^1, °शानेन विवर्जयेत् A^2, G, °शमन्त्रेण वर्जयेत् C, D, F^1.

१२. 33d सङ्गृह्य] C, D, G, सङ्ग्राह्य A, F^1.

१३. 34b पुष्पं पर्युषितं त्यजेत्] G, वामहस्ते विसर्जयेत् A, C, D, तत्पुष्पं तु विसर्जयेत् F^1.

१४. 34c विसर्जनस्य] A (etc.), सर्जने तु F^1 ; 34d मूर्धनि दापयेत्] A^2, C^2, मूर्धनि पातयेत् A^1, मूर्धानि

न शून्यमस्तकं लिङ्गं भवेत्तत्र कदाचन[१]।
ऐशान्यां दापयेन्मालां चण्डेशाय हृदा बुधः[२]॥ ३५॥
लिङ्गं प्रक्षाल्य चास्त्रेण पीठं पाशुपतेन तु[३]।
लिङ्गशुद्धिर्भवेदेवं मन्त्रशुद्धिं ततः शृणु[४]॥ ३६॥

[५. मन्त्रशुद्धिः]

ओंकारदीपिता मन्त्रा नमस्कारान्तयोजिताः[५]।
अर्चने तु प्रयोक्तव्या मन्त्राश्चामोघशक्तयः[६]॥ ३७॥
पञ्चशुद्धिं च यो वेत्ति स पूजां कर्तुमर्हति[७]।

[६. आसनपूजा]

आसनं कल्पयेत्तत्र शास्त्रदृष्टेन कर्मणा॥ ३८॥
सितपद्मासनं ध्यात्वा मूलं नालं सकर्णिकम्[८]।
[९]पार्थिवाण्डमधःकन्दं नालमाप्यादिरेव च[१०]॥ ३९॥
प्रधानतत्त्वपर्यन्तं नालं कण्टकसंयुतम्[११]।

धापयेत् C^1, D^1, मूर्धे निधापयेत् D^2, मिर्ध्नि च दापयेत् F^1, मूर्ध्नि तु पातयेत् G.

१. 35a शून्य°] A^1, C, D^1, F^1, G, शून्यं A^2, D^2.

२. 35c ऐशान्यां दापयेन्मालां A, C^2, D, G, +++ जापयेन्मालां C^1, ईशाने स्थाप्य निर्माल्यं F^1 ; 35d बुधः] C^1, पुनः A (etc.).

३. 36a चास्त्रेण] A (etc.), वस्त्रेण F^1.

४. 36d °शुद्धिं ततः शृणु] A, °शुद्धिरतः परम् C, D^1, °शुद्धिमतः परम् D^2, °शुद्धिमत शृणु F^1, °शुद्धिः ततः शृणु G.

५. 37a ओंकारदी°] Eds., ओंकारान्दी A (etc.), अङ्कारान्दी° C^1 ; °दीपिता मन्त्रा] C^1, D^2, °दीपितान्मन्त्रान्° A, C^2, °दीपितामन्त्रं D^1, °दिहृदा मन्त्रं F^1, °दीपितन्मन्त्रान्° G ; 37b °कारान्तयोजिताः] D, °कारान्तयोजितान् A, C^2, G, °कारं तयोजिता C^1, °कारान्तमुच्यते F^1.

६. 37c प्रयोक्तव्या] Eds., प्रयोक्तव्यं A, C, D, G, प्रकर्तव्यं F^1 ; 37d मन्त्राश्चामोघशक्तयः] A, F^1, मन्त्रं चक्रेव शक्तयः C^1, मन्त्रचक्रे च शक्तयः C^2, मन्त्रश्च केव शक्तयः D, मन्त्रांश्चामोघशक्तिकान् G.

७. 38b स पूजां कर्तुमर्हति] A^2, C^1, G, पूजां कर्तुमर्हति (*v.f.*) A^1, स्तम्भपूजं च कारयेत् C^2, संपूजां कर्तुमर्हसि D.

८. 39a °सनम्] A (etc.), °सिनं D^2 ; 39b °कर्णिकम्] A^2 (etc.), °कर्णकम् A^1.

९. C^1 : lacune 39cd ; les vers 24.52-130 sont intercalés entre 39ab et 40ab.

१०. 39c पार्थिवाण्डम्] A (etc.), पात्रपाण्डम् F^1 ; अधःकन्द°] F^1, अथ स्कन्दं A, अयः कन्दं C^2, D^2, अतः कन्दं D^1 ; 39d नालमाप्यादिरेव च] A^2, G, नालमाप्यादिरेवं च A^1, नमा पाद वाच च (*v.f.*) C^2, नालमापादवा व च (?) D, नालमापादमेव च F^1.

११. 40a प्रधान°] A, C^2, प्रधानं C^1, D, G ; 40b नालं कण्टकसंयुतम्] A, C^1, D, G, नालं कन्दकमुच्यते C^2, नालकर्णकसंयुतम् F^1.

धर्मं ज्ञानं च वैराग्यमैश्वर्यं पादमेव च[१] ॥ ४० ॥
आग्नेय्यां धर्मं विन्यस्य ज्ञानं निर्ऋतिगोचरे।
वैराग्यं वायुदिग्भागे ऐश्वर्यं त्वीशगोचरे[२] ॥ ४१ ॥
अधर्मादीलिकांस्तत्र शक्रादीनि क्रमान्न्यसेत्[३]।
गुणत्रयेण संछाद्य मध्यपादस्तु केशवः[४] ॥ ४२ ॥
विद्येश्वरदलच्छन्नं शक्तिकेसरसंयुतम्[५]।
मायातत्त्वं बृहद्ग्रन्थिं शुद्धविद्याब्जशोभितम्[६] ॥ ४३ ॥
विद्यातत्त्वमयीं तस्य कर्णिकोपरि चिन्तयेत्[७]।
बीजानि शक्तयः प्रोक्ता दलानि तु विद्येश्वराः[८] ॥ ४४ ॥
[९]मन्त्राणि केसराणीव ; रत्नबीजेन कल्पयेत्[१०] ।
तस्य नालं तु वैडूर्यं शातकुम्भं तु कर्णिका[११] ॥ ४५ ॥
स्फटिकं कर्णिकाबीजं कुन्दवर्णमयं दलम्[१२]।
केसराणि तथा पीतं मूलाग्रं मौक्तिकामयम्[१३] ॥ ४६ ॥

---

१. 40c धर्मं] C, धर्म° A, D, F^1, धर्मो G ; 40d पादमेव] A, C^1, D^1, F^1, G, पाद एव C^2, D^2.

२. 41c वायुदिग्भागे] A, C^2, D, G, वायुके भागे C^1, वायुदेशं तु F^1 ; 41d ऐश्वर्यं त्वीश°] A, C^1, G, ऐश्वर्यमीश° C^2, D, F^1.

३. 42a °दीलिकांस्तत्र] F^1, °दीनिकांस्तत्र A^1, °दीनिकास्तत्र A^2, G, °दलकास्तत्र C, °दिलिकास्तत्र D^1, दलिकास्तत्र D^2 ; 42b शक्रादीनि क्रमान्न्यसेत्] G, चक्रादीनि क्रमान्न्यसेत् A, शक्रादीनिह विन्यसेत् C, शकादीन्यह विन्यसेत् D^1, शकादीनि विन्यसेत् D^2, शक्रादिरिभि विन्यसेत् F^1.

४. 42d केशवः] C, D, F^1, केशव A^1, G, केशवम् A^2.

५. 43a °च्छन्नं] A, D, F^1, G, °च्छिन्नं C.

६. 43c मायातत्त्वं] A, C, D^1, G, मायासूत्रं D^2, मायातत्वा° F^1 ; बृहद्°] A (etc.), प्राहृद्° C^1.

७. 44a विद्यातत्त्वमयीं] F^1, lacune A (etc.) ; तस्य] A (etc.), तये F^1 ; 44b कर्णिकोपरि चिन्तयेत्] A (etc.), ककोपरि विन्यसेत् F^1.

८. 44c प्रोक्ता] A^1, C, D, F^1, प्रोक्ताः A^2, प्रोक्त° G ; 44d दलानि] A (etc.), नालानि F^1 ; विद्येश्वराः] Eds., परमेश्वर A^1, परमेश्वरः A^2, C, D^1, G, परमेश्वरम् D^2, F^1.

९. F^1 donne la version suivante de 45ab : मात्राणि केसराणां स्युस्तद्बीजेन तु कल्पयेत्।

१०. 45a केसराणीव] C, D, केसराणी च A, केसराणि च G ; 45b रत्न° D^2 , रक्त° A (etc.).

११. 45d शातकुम्भं तु कर्णिका A, C^1, F^1, G, शातकुम्भाभिकर्णिकाम् C^2, शान्तिकुम्भं तु कर्णिकाम् D.

१२. 46b कुन्दवर्ण°] A^2 (etc.), कुन्दपूर्ण° A^1.

१३. 46c केसराणि] A^1 (etc.), केसराणां A^2 ; 46d मूलाग्रं मौक्तिका°] A (etc.), शूलाग्रं मूर्तिका° F^1, कुलाग्रं मौक्तिक° G.

मण्डलत्रयमत्रैव कल्पयेत्तु परिक्रमात्[१]।
वामादिशक्तयश्चाष्टौ दले प्रागादि विन्यसेत्[२] ॥ ४७ ॥
मध्ये मनोन्मनीं न्यस्त्वा आदिशक्तिमनूपमाम्[३]।
मुकुलीं प्रथमं बध्वा पद्ममुद्रां ततः परम्[४] ॥ ४८ ॥
शशकर्णं विशेषेण कर्णिकायां तु दर्शयेत्[५]।
पूजयित्वा यथान्यायं स्वनामाद्येन वै बुधः ॥ ४९ ॥

[७. आवाहनादि]

आवाहयेत्ततो देवं मन्त्रमूर्तिमयं शिवम्[६]।
बध्वा पञ्चमुखीं मुद्रां पञ्चमूर्धसु दर्शयेत्[७] ॥ ५० ॥
पूर्ववद्ध्याययेल्लिङ्गे देवदेवं सदाशिवम्।
सद्येनावाहयेद्देवं स्थापयेद्गुह्यकेन तु ॥ ५१ ॥
सांनिध्यं स्यादघोरेण पुरुषेण निरोधनम्[८]।
स्वागतं पञ्चमेनैव

[८. पाद्यादि]

पूजयित्वा यथाविधि ॥ ५२ ॥
[९]पादौ पाद्यं हृदा दद्यादागतस्य शिवस्य तु[१०]।

---

१. 47a मण्डलत्रयमत्रैव] A, C, D^2, G, मण्दलमन्त्रैव D^1, मण्डले मन्त्रैव F^1 ; 47b तु परिक्रमात्] A, G, उपरि क्रमात् C, D, F^1.

२. 47c चाष्टौ] A (etc.), चाष्ट° C^2 ; 47d दले प्रागादि विन्यसेत्] C, दले प्रागादिषु न्यसेत् A, G, दलेषु प्रागादि विन्यसेत् (*v.f.*) D, प्रश्चादि दिवि विन्यसेत् F^1.

३. 48b आदिशक्तिम°] A (etc.), आदिशक्तेर° F^1 ; °नूपमाम्] A^1, C, °नोपमाम् A^2, D, F^1, °नौपमाम् G.

४. 48c मुकुलीं] A^2, G, मुकुली A^1, मुकुलं C, D, माकुलं F^1 ; बध्वा] A^2 (etc.), बध्य A^1.

५. 49a शशकर्णं] A, C, G, शशकर्णि D, F^1.

६. 50b मन्त्रमूर्ति°] A (etc.), अष्टमूर्ति° F^1.

७. 50c पञ्चमुखीं] A, C^2, पञ्चमुखी C^1, D, F^1, G ; 50d °मूर्धसु दर्शयेत्] A, G, °मूर्धसु दापयेत् C, °मूर्धा सुदर्शयेत् D, °मुद्रा सुविन्यसेत् F^1.

८. 52b निरोधनम्] A, G, निरोधयेत् C, D, F^1.

९. Les manuscrits C omettent 53ab.

१०. 53a हृदा] A, पुरा D, F^1, G ; 53b दद्यादागतस्य] A (etc.), दद्याद्दाशस्य तु F^1.

[१]वक्त्रेष्वाचमनं दद्याच्छिरस्यर्घ्यं च दापयेत्[२] ॥ ५३ ॥
गन्धं पुष्पं च धूपं च दीपं वै हृदयेन तु[३] ।
शिवाङ्गैश्चैव विद्याङ्गैर्महाव्योमेति मन्त्रकैः ॥ ५४ ॥
शिवमन्त्रैर्हृदा चैव जलेनैवाभिषेचयेत्[४] ।
गव्यैर्गन्धोदकेनैव पुष्पतोयेन सेचयेत् ॥ ५५ ॥
पाद्यमाचमनं चार्घ्यं हृदयेन प्रकल्पयेत् ।
वस्त्रोपवीतं गन्धं च मकुटं कुण्डलं तथा[५] ॥ ५६ ॥
हारकेयूरमालां च हृदयेन प्रदापयेत् ।
धूपं दीपं हृदा दत्वा पञ्चमावरणं न्यसेत्[६] ॥ ५७ ॥

[९. पञ्चावरणम्]

[९.१. गर्भावरणम्]

सद्यं पश्चिमतो न्यस्त्वा वामदेवं तथोत्तरे[७] ।
अघोरं दक्षिणे न्यस्त्वा पुरुषं पूर्वतो न्यसेत्[८] ॥ ५८ ॥
[९]ईशानमीशदिग्भागे न्यस्त्वा वै साधकोत्तमः ।
हृदयं वह्निदिग्भागे ऐशान्यां तु शिरो न्यसेत् ॥ ५९ ॥
नैर्ऋत्यां तु शिखां न्यस्त्वा कवचं वायुदेशके[१०] ।
[११]नेत्रमीशानके न्यस्त्वा दिक्षु चास्त्रं न्यसेद्बुधः ॥ ६० ॥
ब्रह्माङ्गानि ततो न्यष्ट्वा स्वस्वबीजेन देशिकः ।

---

१. F^1 fait précéder 53cd d'un demi-vers composé de 53c et 53b.

२. 53d °स्यर्घ्यं च] Eds., °सार्घ्यं नि° A, D, F^1, °सार्धं नि° C^1, °सार्घ्यं नि° C^2, °स्यर्घ्याणि G ; दापयेत्] A, वेदयेत् C, D, रोधयेत् F^1, दपयेत् G.

३. 54a गन्धं] C, G, गन्ध° A, D, F^1.

४. 55a शिवमन्त्रैर्हृदा] F^1, शिवमन्त्रं हृदा A (etc.).

५. 56c °वीतं गन्धं] A, D, F^1, °वीतगन्धं C, G.

६. 57c धूपं] A, C^1, धूप° C^2, D, F^1, G ; 57d पञ्चमावरणं] A, G, पश्चादावरणान् C, F^1, पश्चादावाह्यान् D.

७. 58a सद्यं] A (etc.), सद्यः C^1 ; न्यस्त्वा] A (etc.), दत्वा C^1.

८. 58c दक्षिणे] A, C^2, F^1, G, दक्षिणतो (*v.f.*) C^1, D.

९. C, D^2, F^1 omettent 59ab-59cd. F^1 intercale avant 60ab : कर्णीकायां न्यसेदीशमाग्नेयां हृदये न्यसेत् ।

१०. 60a शिखां] A (etc.), शिवं C^1 ; 60b कवचं वायुदेशके] A, G, कवचं वायुदेशतः C, D, नेत्रमीशानगोचरे F^1.

११. C et D donnent cette version de 60cd : ऐशान्यां तु शिरो न्यस्त्वा नेत्रमीशानगोचरे ।

गर्भावरणमेवं स्याद्द्वितीयावरणं शृणु[१] ॥ ६१ ॥

[९.२. विद्येश्वरावरणम्]

[२]अनन्तेशश्च सूक्ष्मश्च शिवोत्तमैकनेत्रकः[३]।
[४]दिक्ष्वेतान्विन्यसेद्धीमानेकरुद्रं त्रिमूर्तिकम्[५] ॥ ६२ ॥
[६]आग्नेयादिषु कोणेषु श्रीकण्ठं च शिखण्डिनम्।
[७]द्वितीयावरणं प्रोक्तं तृतीयावरणं शृणु॥ ६३ ॥

[९.३. गणेश्वरावरणम्]

उमामुत्तरतो न्यस्त्वा वृषभं पूर्वतो न्यसेत्।
याम्यायां गणराजं च वारुणे नन्दिकेश्वरम्[८] ॥ ६४ ॥
षण्मुखं च महाकालं भृङ्गीशं चण्डमूर्तिनम्[९]।
आग्नेयादिषु कोणेषु पूजयित्वा यथाविधि॥ ६५ ॥

[९.४. लोकेशावरणम्]

[१०]इन्द्रादिलोकपालांश्च ऐन्द्रादिषु प्रकल्पयेत्।
ब्रह्माणं नैर्ऋते न्यस्त्वा विष्णुमीशानदेशके[११] ॥ ६६ ॥
[१२]गन्धपुष्पादिना पूज्य स्वस्वमन्त्रमनुस्मरन्।
चतुर्थावरणं प्रोक्तं पञ्चमावरणं शृणु॥ ६७ ॥

---

१. 61d द्वितीयावरणं शृणु] A, G, अस्त्रं दक्षिनतो यजेत् C, D, F^{1}.

२. C^{1} remplace 62ab par : अनन्तरेशश्च सूक्ष्मश्च शिवोत्तमश्चैव त्रिनेत्रकः।

३. 62a शिवोत्तमैक°] C^{2}, D, शिवोक्तश्चैक° A, शिवोत्तमश्चैक° (*v.f.*) F^{1}, G.

४. C^{2} omet 62cd-63cd.

५. 62c दिक्ष्वेतान्°] A, D, G, दिक्ष्वेता C^{1}, दिग्विदिक्षु F^{1} ; 62d °रुद्रं त्रिमूर्तिकम्] A^{1}, C^{1}, °रुद्रत्रिमूर्तिकौ A^{2}, °नेत्रं त्रिमूर्तिकम् D, G, °रुद्रं त्रिमूर्तिनम् F^{1}.

६. C^{1} et D omettent 63b-64a ; F^{1} intercale avant 63ab un demi-vers fait de 60b et 59d et donne cette version de 63ab : श्रीकण्ठश्च शिखण्डी च पूजयित्वा यथाविधिः।

७. A et F^{1} intercalent entre 63ab et 63cd : … पूजयित्वा विदिक्षु वै।

८. 64c °राजं] A, C^{2}, D, G, °नाथं C^{1}, F^{1}.

९. 65b भृङ्गीशं चण्डमूर्तिनम्] A (etc.), भृङ्गीं च त्रिमूर्तिनम् F^{1}.

१०. F^{1} donne la version suivante de 66ab : इन्द्रादिलोकपालादीनैन्द्रादि च प्रकल्पयेत्।

११. 66c नैर्ऋते] A (etc.), निर्ऋतौ C^{2} ; न्यस्त्वा] A (etc.), पूज्य G ; 66d °देशके] A^{2}, G, °देशिके A^{1}, °देशतः C, D, F^{1}.

१२. C^{1} et C^{2} omettent 67ab et suivent cet ordre : 66cd, 68cd-69cd, 67cd-68ab, 67a, 69d-70ab, etc.

[९.५.अस्त्रावरणम्]

वज्रादिपद्मपर्यन्तं पूर्वादिषु प्रकल्पयेत्।
गन्धपुष्पादिनाभ्यर्च्य स्वस्वनाम्ना तु देशिकः[१] ॥ ६८ ॥

[१०. घण्टाताडनादि]

तत्काले ताडयेद्घण्टां पटं तत्रापनीय च[२] ।
धूपदीपौ हृदा दत्वा घण्टारवसमन्वितम्[३] ॥ ६९ ॥
पुनराचमनं दत्वा दर्पणं दर्शयेत्ततः।
नैवेद्यं दापयेत्पश्चादुपदंशसमन्वितम्॥ ७० ॥
गुलखण्डसमायुक्तमाज्ययुक्तं दधिप्लुतम्।
हृदा चाचमनं दत्वा दिग्बन्धं च ततः परम्[४] ॥ ७१ ॥
हृदा निवेदयेच्छम्भोर्दिग्बन्धं च ततः कुरु[५]।

[११. चण्डयागादि]

पुनराचमनं दत्वा चण्डेशाय निवेदयेत्[६] ॥ ७२ ॥
चण्डस्याचमनं दत्वा निर्माल्यं च विसर्जयेत्[७]।
ताम्बूलं दापयेत्तत्र मुखवाससमन्वितम्[८] ॥ ७३ ॥
अग्निकार्यं ततः कुर्यात्पञ्चब्रह्मशिवाङ्गकैः[९]।
शिवमन्त्रं जपेत्पश्चाद् ; यथावित्तानुसारतः[१०] ॥ ७४ ॥
प्रदक्षिणं नमस्कारमात्मनोऽर्पणमेव च[११]।

---

१. 68c °भ्यर्च्य] A, G, पूज्य C, D, F^1.

२. 69a तत्काले] A (etc.), तत्काले ये (*v.f.*) D^1 ; 69b पटं] A (etc.), पदं D^1.

३. 69c °दीपौ] C, D, G, °दीपैर् A, °दीपं F^1 ; 69d घण्टारवसमन्वितम्] A (etc.), घण्टमन्त्रमनुस्मरन् C.

४. 71c हृदा चाचमनं] A (etc.), हृदा अचमनं F^1 ; 71d दिग्बन्धं च ततः परम्] A, G, तत्बन्धं च ततः पुनः C^1, बन्धं तु ततः पुनः (*v.f.*) C^2, दिग्बन्धं तु ततः पुनः D^1, दिग्बलं तु ततः पुनः D^2, दिशाबन्धं ततः कुरु F^1.

५. 72a निवेदये°] A (etc.), निवेशये° C^1.

६. 72c दत्वा च°] A, F^1, दद्याच्च° C, D, G ; 72d निवेदयेत्] A (etc.), निवेशयेत् D.

७. 73a दत्वा] A, D^2, F^1, दद्यान् C, D^1, G.

८. 73c तत्र] F^1, तस्मै A (etc.) ; 73d मुखवास°] F^1, पुरुषेण A, C^2, G, पुरुषे तु C^1, D.

९. 74a कुर्यात्°] A (etc.), कृत्वा G.

१०. 74d वित्तानुसारतः] A^1, शक्तिसमन्वितः A^2, शक्तिविशेषतः C, D, F^1, G.

११. 75ab °रमात्मनोऽर्पणमेव] A^2, C, D, °रात्मनार्पणमेव A^1, °रमात्मनोपन्नमेव F^1, °रमात्मनार्पणमेव G.

पूजाफलं च तत्सर्वमुदकेन प्रदापयेत्[१] ॥ ७५ ॥
संहितां च ततः कृत्वा गन्धपुष्पादिना बुधः[२] ।

[१२. शिवार्चनफलम्]

एवं यः पूजयेन्नित्यं स पुण्यां गतिमाप्नुयात्[३] ॥ ७६ ॥
कुलैकविंशमुद्धृत्य शिवलोके महीयते[४] ।
शिवलिङ्गार्चनं प्रोक्तं पीठपूजामथ शृणु[५] ॥ ७७ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाविधिपटलस्त्रयोविंशतितमः[६] ॥

---

१. 75c तत्सर्व°] A (etc.), तत्पूर्व° G ; 75d उदकेन प्र°] A, उदकेनैव C, D, F^1, G.

२. 76a कृत्वा] A, C^2, lacune C^1, पूज्य D, G, कुर्यत्पूज्य (?) F^1 ; 76b बुधः] A (etc.), न्ययः D^1.

३. 76d स पुण्यां गतिमा°] A (etc.), पुण्यां गतिमवा° C^1.

४. 77a °द्धृत्य] A, G, °त्तार्य C, D, °त्तिर्य (?) F^1 ; 77b शिवलोके] G, शिवकाले A, रुद्रलोके C, D, शिवलोक° F^1.

५. 77d °पूजामथ] A, C^2, D^1, F^1, °पूजां ततः C^1, G, °पूजामयं D^2.

६. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाविधिपटलश्चतुर्विंशतितमः ।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे शिवलिङ्गार्चनाविधिस्त्रयोविंशाः पटलः ।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाङ्गपटलश्चतुर्विंशः ।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनापटलश्चतुर्विंशः ।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाविधि द्वात्रिंशत् पटलः ।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाविधिपटलः ।

[चतुर्विंशतितमः पटलः]

[पत्रच्छेदविधिः[१]]

अतः परं प्रवक्ष्यामि पत्रच्छेदविधिं क्रमात्[२] ।

[१. पत्रच्छेदसामान्यविषयः]

[१.१. पत्रच्छेदस्य फलं]

पत्रच्छेदविधानेन पूजिता परमेश्वरी[३] ॥ १ ॥
धनधान्यसमृद्ध्यर्थं सर्वरोगनिवारणम् ।
पत्रच्छेदमिदं लोके सर्वप्राणिसुखावहम्[४] ॥ २ ॥

[१.२. मण्डलभेदाः]

नन्दी सद्यमुखोद्भूतं वल्ली वाममुखोद्भवम्[५] ।
अघोरे फेनं संभूतं प्रकीर्णं पुरुषोद्भवम्[६] ॥ ३ ॥
सती वामी च ज्येष्ठा च रौद्री चैवाधिदेवताः[७] ।
चतुर्णां भेदवर्णानां षष्ट्युत्तरशतत्रयम्[८] ॥ ४ ॥
प्रत्येकं नवतिर्ज्ञेयं तेषां सारं तिथिर्भवेत्[९] ।

[१.३.शस्त्राणि]

अनुलोमक्रमं योग्यं प्रतिलोमं न कारयेत्[१०] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, F^1, G.

२. 1b क्रमात्] A, C, G, क्रमम् D, परम् F^1.

३. 1d पूजिता परमेश्वरी] A (etc.), पूजयेत्परमेश्वरम् F^1.

४. 2c पत्रच्छेदमिदं लोके] C^1, पुत्रदं जयदं लोके A, D^1, lacune C^2, पत्रदं मधदं लोके D^2, पुत्रजाति लोकेऽस्मिन् (*v.f.*) F^1, पत्रदं जयदं लोके G ; 2d °सुखावहम्] A (etc.), °हितावहम् F^1.

५. 3a नन्दी सद्य°] F^1, नन्दी वल्ली A, C, D^1, नन्दी वल्लि° D^2, नन्दि वल्ली G ; मुखोद्भुतम्] A (etc.), मुखोत्सव्य भूतं (*v.f.*) F^1 ; 3b वल्ली वाममुखोद्भवम्] C, D^2, वल्लि येममुखोद्भवम् A, वल्लिकामवाममुखोद्भवम् (*v.f.*) D^1, वल्यकासमुखोद्भवाः F^1, lacune G.

६. 3c अघोरे फेनं] Eds., अघोरे नव° A, C, D^1, अघोरे नेव D^2, अघोरे लिन° F^1, अघोरेण च G.

७. 4a सती] A^1(var.), D, F^1, सद्या A^1, सदी A^2, lacune C^1, +ती C^2, सदि G ; वामा] Eds, वामी A (etc.) ; ज्येष्ठा च] A, ज्येष्ठी च C, D^1, F^1, G, ज्येष्ठीश° D^2 ; 4b °देवताः] A^2, °देवता A^1, C, D, G, °दैवताः F^1.

८. 4c चतुर्णां भेदवर्णानां] A (etc.), चतुसांभेदमादीनां F^1 ; 4d षष्ट्युत्तर°] A, G, षडुत्तर° C, D^2, साध्युत्तर° D^1, षष्टोत्तर° F^1.

९. 5b तिथिर्भवेत्] C, D, चधिर्भवेत् (?) A^1, च दिग्भवेत् A^2, तु न्तिमी भवेत् F^1, चधीर्भवेत् G.

१०. 5c योग्यं] A (etc.), योगं D^2.

एकपत्रं कुठारी च नाराचं सूचि नालि च[१]।
क्षुरं व्रीहिमुखं चैव त्रिशिखं वृत्तबिन्दुकम्[२] ॥ ६ ॥
औलिकं कर्तरी चैव शस्त्रनामानि कथ्यते[३]।
नानादेवीविकल्पे तु एकपत्रं प्रयोजयेत्[४] ॥ ७ ॥
छेदो कुठारिका प्रोक्ता नाराचमभिवर्धने[५]।
सूचिका प्रोतकरणे पीडे चैव तु नालिका[६] ॥ ८ ॥
[७]क्षुरं तु सकलच्छेदो रेखा व्रीहिमुखोद्भवा[८] ।
[९]त्रिशिखं त्रिवृदावृत्तं सुषिरे वृत्तबिन्दुकम् ॥ ९ ॥
औलिर्वल्लीक्रियायुक्तः चोत्कृत्ये कर्तरी भवेत्[१०]।
शस्त्रेषु योगमेवं स्यात्फलकावृक्षमुच्यते[११] ॥ १० ॥

[१.४. फलकालक्षणम्]

चूतं वा पनसं वापि शाल्मली च शिरीषका[१२]।

---

१. 6a कुठारी] A (etc.), कुमारी G ; 6b नाराचं] A (etc.), lacune C ; सूचि नालि च] A, C^1, चिनालिका च C^2, सूचि नालिका D, G, सूचिका नली F^1.

२. 6c क्षुरं] A (etc.), कूक F^1 ; व्रीहि°] A, C, D^1, G, ब्रहि° D^1, रामि° F^1 ; 6d त्रिशिखं] A, C, ति शिवं D^1 ; वृत्तबिन्दुकम्] A, C, D^1, प्रबिन्धुकम् (*v.f.*) D^2, वृत्तबिम्बकम् F^1, वृत्तछिद्रकम् G.

३. 7a औलिकं] C, D, G, औनलीकं A^1, औलूकं (*v.f.*) A^2, देलिकं F^1 ; कर्तरी चैव] C^2, D, F^1, G, करीं चैव A, कर्तरीं चैव C^1 ; 7b कथ्यते] A (etc.), कल्पयेत् F^1.

४. 7c °देवी°] A (etc.), °भेद° F^1 ; °विकल्पे] A, D^1, च कल्पे C ; 7d प्रयोजयेत्] A, F^1, G, प्रपूजयेत् C, D.

५. 8a छेदो कुठारिका] G, छेद्या कुठारिका A, C, D^1, छेन्य कुठारिकाः D^2, छेदो कुठारिकः F^1 ; 8b °वर्धने] A, C, D^1, G, °वर्धते D^1, °वर्त्तते F^1.

६. 8c प्रोत°] F^1, G, प्रोक्त° A (etc.) ; पीडे] Eds, पीठे A (etc.) ; 8d तु नालिका] A, G, तु नासिका C, D^1, तु नाडिका D^2, सुकालिते F^1.

७. C et D^2 omettent 9ab-9cd.

८. 9a क्षुरं तु सकलच्छेदो] A, D^1, G, क्षीरं तु सुखं छेद्य F^1 ; 9b रेखा व्रीहिमुखोद्भवा] A, D^1, G, रेखास्या व्रीहिका क्रमात् F^1.

९. F^1 omet 9cd-11cd.

१०. 10a वल्लीक्रियायुक्त°] A, G, lacune C^1, वल्लीकयायुक्त° C^2, D^2, वल्लीक्रियायुक्ता D^1 ; 10b चोत्कृत्ये] A^1, C^1, G, चोत्कृत्ते A^2, व्योत्कृत्यै C^2, D.

११. 10c शस्त्रेषु योगमेवं] Eds., शास्त्रेषु योगमेवं A, शस्त्रो योगं तु मेवं C^1, शस्त्रो योगस्तु एवं C^2, शास्त्रो योगमेवं D, शास्त्रे च योगमेवं G ; 10d °फलका°] A, D, G, °फलथा C^1, °फला या C^2.

१२. 11a वापि] A, C^2, lacune C^1, वाथ D, G ; 11b शल्मली च शीरिषका] A^2, वापि शल्मी च शीर्षका A^1, शल्मली +शी+र्षकम् C^1, वाथ शललीशीर्षकम् C^2, शल्मली च शीर्षकम् D, शमी वह्नि च शीर्षका G.

चम्पकं चन्दनं चैव प्रोच्यन्ते दारवः क्रमात्[१] ॥ ११ ॥
विस्तारं पिण्डिकोत्सेधं भवेदध्यर्धमायतम् ।
दर्पणोदरसंकाशं चतुष्पादसमन्वितम् ॥ १२ ॥
हेमरौप्यसरत्नाढ्यां कुर्यात्तु फलकां स्थिराम्[२] ।
लयं स्यात्पत्रकरणं पुष्पादि च तथैव च[३] ॥ १३ ॥
सर्वगन्धैश्च पिष्टैश्च फलकां लिप्य सर्वतः[४] ।
[५]मृदा गन्धोदकेनैव तथालिप्य प्रपूजयेत् ॥ १४ ॥
फलका पार्वती ज्ञेया पूजया सकलं व्रजेत्[६] ।

[१.५. दीपः]

ब्राह्मणस्य सिता रम्भा क्षत्रियस्य महेन्द्रवत्[७] ॥ १५ ॥
गन्धा रम्भा तु वैश्यानां कृष्णा रम्भा चतुर्थके[८] ।
सर्वेषामपि वर्णानां नालिकेराम्रपत्रकम्[९] ॥ १६ ॥
घृतवर्तिप्रदीपे तु सम्यक्पत्रान्प्रदीपयेत्[१०] ।

[१.६. फलकाबन्धादि]

[११]उत्तराभिमुखो भूत्वा फलकाबन्धमाचरेत् ॥ १७ ॥
छेदयेद्विधिरूपं तु न्यस्तव्यं फलकोपरि[१२] ।

---

१. 11c चम्पकं] A, C, चर्मकं C^2, D ; 11d प्रोच्यन्ते] A^1, G, प्रोच्यते A^2, C, D.

२. 13a °रौप्यसरत्नाढ्यां] A, G, °रूप्यसरथ्या (?) C, °रूप्यसरत्नाढ्यां D^1, °रूप्यसरक्ताढ्याः D^2, °रूपसुरत्नाध्यं F^1 ; 13b स्थिराम्] A (etc.), स्थिताम् F^1.

३. 13c °पत्रकरणं] C, D, G, °पत्राकारं (*v.f.*) A, °पत्रकरं (*v.f.*) F^1 ; 13d पुष्पादि] A (etc.), lacune C^1, पुष्पाणि F^1.

४. 14b सर्वतः] A^1, C, D, सर्वदा A^2, G, सर्वशः F^1.

५. F^1 donne la version suivante de 14cd : सोप्रहिः सोदकैर्युक्तैरथवा लिप्य पूजयेत्।

६. 15a °का पार्वती ज्ञेया] A^2, C^1, D^2, F^1, G, °कां पार्वतीं ज्ञेयम् A^1, °कां पार्वती ज्ञेया C^2, D^1 ; 15b पूजया सकलं] A (etc.), पूजयेत्कलशं F^1 ; व्रजेत्] A (etc.), त्यजेत् D^1.

७. 15d महेन्द्रवत्] A, G, महेन्द्रका C, D, महेन्द्रका F^1.

८. 16a गन्धा रम्भा तु] A^2 (var.), गजा रम्भा तु A, C^1, D^2, G, गरजम्भा तु C^2, गज रम्भानु D^1, भजराभा F^1 ; 16b कृष्णा रम्भा] A, D^2, F^1, G, अष्टरम्भा C, D^1.

९. 16d नालिकेराम्र°] A, द्वि +केरग्र° C, द्विकेरग्र° D, नालिकेराग्र° F^1.

१०. 17b °दीपयेत् A, D, F^1, G, °दीपिते C^1, °दीप्यते C^2.

११. D^2 omet 17cd-18cd.

१२. 18a °येद्विधिरूपं तु] A, G, °येद्विविधं रूपं C^1, D^1, °येद्विविधं रूपं C^2, °येद्विधिं रूपं तु F^1.

तत्तद्वर्णानुसारेण हृदयेन प्रकल्पयेत्[१] ॥ १८ ॥

[१.७. द्रव्याणि]

[१.७.१. पुष्पाणि]

द्रोणं वै नन्द्यावर्तं च श्रियावर्तं च मल्लिका[२]।
श्वेतावर्तं मालती च पुन्नागं शङ्खपुष्पकम्[३] ॥ १९ ॥
श्वेतपुष्पं च मन्दारं मालती बहुकर्णिका[४]।
एवं श्वेतं समाख्यातं रक्तपुष्पं ततः शृणु[५] ॥ २० ॥
रक्तपुष्पं तथा युक्तं बन्धूकं दाडिमी जपा[६]।
रक्तोत्पलं पलाशं च कुमुदं रक्तमेव च ॥ २१ ॥
लाङ्गली करवीरं च पाटली च चतुर्दली[७]।
एवं रक्तं समाख्यातं पीतवर्णमतः शृणु[८] ॥ २२ ॥
धातकी कर्णिकारं च चम्पकारग्वधं तथा[९]।
स्वर्णकुल्ली च कूष्माण्डं मदयन्ती च धूर्धुरम्[१०] ॥ २३ ॥
[११]सौर्यकश्च यशोनस्थः कृष्णवर्णमथ शृणु[१२]।
नीलोत्पलाञ्जनी चैव कृष्णं स्याद्गिरिकर्णिका[१३] ॥ २४ ॥

---

१. 18c तत्तद्वर्णा°] A, F^1, G, रक्तवर्णा° C, तकु (?) वर्णा° D^1.

२. 19a नन्द्यावर्तं च] A, C, D^1, G, नन्दिकावर्तं D^2, F^1.

३. 19c श्वेतावर्तं] A^2, C, D, G, श्वेतपत्रं A^1, श्वेतार्क° F^1 ; मालती च] A (etc.), मालादि च C, मालती चैव F^1.

४. 20a °पुष्पं] A (etc.), °पद्मं F^1.

५. 20c श्वेतं] A, C, G, श्वेता D, श्वेत° F^1.

६. 21a °पुष्पं] A (etc.), °पद्मं F^1 ; युक्तं] A (etc.), केशं F^1 ; 21b बन्धूकं] C^2, D, G, बन्धुकं A, बधूकं C^1, बन्धूक° F^1.

७. 22b चतुर्दली] A (etc.), चतुर्दश F^1.

८. 22d पीतवर्णमतः] A^1, C, D, रक्तपुष्पं ततः A^2, पीतवर्णमथा F^1, पीतवर्णं ततः G.

९. 23a धातकी] A (etc.), यतकि C^2 ; 23b चम्प°] A, D^1, चण° C ; °कारग्वधं] A^1, C^1, G, °कारश्वथं A^2, D^1, F^1, °करश्वतं C^2, D^2.

१०. 23c स्वर्णकुल्ली च] A, G, सुवर्णकुल्ली C, D, स्वर्णाङ्गुलिका F^1 ; 23d मदयन्ती] A (etc.), मदृयस्त D^2 ; धूर्धुरम्] A^1, C^1, D^1, धुर्धुरम् A^2, धुर्धुरः C^2, धूर्द्दरा (*v.f.*) F^1.

११. D^1 donne cette version de 24a : पीतवर्णमशोकं च.

१२. 24a सौर्यकश्च] A^1, सौर्यकं च A^2, सौरिकं च C, सौर्यं च D, शणर्यं च G ; यशोनस्य] A, शोनकृ + C^1, D^2, शोनक्र + C^2, lacune D^1, शोनस्य G.

१३. 24c °लाञ्जनी] Eds, °लं च नी A, C^1, G, °लत्मानि C^2, D^1, °लात्मनि D^2, °लाजनी F^1 ; 24d कृष्णं

कृष्णलक्ष्मी च कल्हारं विष्णुक्रान्ती तथैव च[१]।
एवं कृष्णं समाख्यातं पत्राणामधुनोच्यते[२]॥ २५॥

[१.७.२. पत्राणि]

बिल्वपत्रं च धुर्धूरं तुलसी धातकी तथा[३]।
पलाशं पद्मपत्रं च आपामार्गं तपस्विनी[४]॥ २६॥
[५]नन्दीपत्रं मुनिपत्रं पत्रमेरण्डकस्य तु[६]।

[१.७.३. पुष्पपत्रसामान्यविधिः]

स्नपनाङ्गानि यद्द्रव्यं पूजाङ्गानि तथा पुनः[७]॥ २७॥
उक्तं वाप्यथवानुक्तं पुष्पपत्रं सगन्धकम्[८]।
गृहीत्वा तु विशेषोऽयमिष्टसिद्धमनोरमम्[९]॥ २८॥

[१.८. वर्णबन्धः]

एवं पत्रं समाख्यातं वर्णबन्धमतः शृणु[१०]।
फलकायास्तु विस्तारं षोडशांशैर्विभाजयेत्[११]॥ २९॥
अभितोऽर्कपदान्सर्वान्द्व्यंशं कृत्वा विशेषतः[१२]।

स्या॰] F^{1}, कृष्णसा॰ A^{1}, कृष्णस्या॰ A^{2}, C, D, कृष्णा स्या॰ G.

१. 25a कल्हारं] A^{2}, C, D^{1}, कह्लारं A^{1} ; 25b ॰क्रान्ती तथैव] A, C, ॰क्रान्तिं तथैव D^{1}, ॰क्रन्ति तथैव D^{2}, F^{1}, ॰क्रान्तिस्तथैव G.

२. 25c कृष्णं] A, C, G, कृष्ण॰ D^{1} ; पत्राणाम॰] A, C, G, पत्रमन्त्रा॰ D, पत्रं वै F^{1}.

३. 26b तथा] A, G, पुनः C, D, F^{1}.

४. 26c पलाशं] F^{1}, G, पलाश॰ A (etc.) ; ॰पत्रं] A, F^{1}, G, ॰पत्रौ C, D.

५. F^{1} omet 27ab-28cd.

६. 27a मुनि॰] A, C, मुनी॰ D, G.

७. 27c स्नपनाङ्गानि] A, C, G, स्नपनादङ्गानि (*v.f.*) D.

८. 28a वाप्यथवानुक्तं] A, G, बाह्योऽथवा युक्तः C^{1}, वा ह्यथवा युक्तः C^{2}, वा ह्यथवा युक्तं D ; सगन्धकम्] A, G, सगन्धिकम् C, D.

९. 28d ॰मिष्टसिद्ध॰] A^{1}, ॰मिष्टसिद्धिं A^{2}, G, श्लिष्टसिद्ध॰ C, D^{2}, शिष्टसिद्ध॰ D^{1} ; मनोरमम्] A (etc.), मनोरमाम् G.

१०. 29a पत्रं] A (etc.), पुत्रं D^{2} ; 29b वर्णबन्ध॰] F^{1}, G, पर्णगन्ध॰ A, D^{2}, पञ्चगन्ध॰ C, वर्णगन्ध॰ D^{1}.

११. 29c फलकायास्तु] C, F^{1}, फलकास्तासु A, फलकावस्तु॰ D, फलकास्तु सु॰ G ; 29d षोडशांशैर्विभाजयेत्] A (etc.), षोडशांशं विभावयेत् F^{1}.

१२. 30a अभितोऽर्कपदा॰] C, F^{1}, अभितोऽर्कपिता॰ A^{1}, अभितोऽत्पिता॰ (*v.f.*) A^{2}, अतितोऽर्कपदा॰ D, अंभितो त्वक्पिता॰ G ; 30b ॰द्व्यंशं] A, C, G, ॰ह्यंशं D, ॰द्वंशं F^{1}.

अभितो रक्तमालाख्ये भूतमाला परांशके[१] ॥ ३० ॥
नन्दिजातेस्तु भूतं स्याद् वल्लिजातेस्तु पत्रकम्[२]।
[३]हंसमाला च फेनस्य शफरं स्यात्प्रकीर्णके[४] ॥ ३१ ॥
तन्मध्ये पद्मपुष्पं स्यान्नानापत्रसमन्वितम्[५]।
मालिका मण्डपं चैव प्रासादं गोपुरं सह[६] ॥ ३२ ॥
वृषं गजाश्वरूपं च व्याघ्रसिंहालिरूपकम्[७]।
[८]पक्षिरूपं तथा सर्पं भूतविद्याधराणि च ॥ ३३ ॥
रूपाण्येतानि संछेद्य न्यस्तव्यानि तु मध्यमे[९]।

[२. नन्दिजातिः]

[२.१. नन्दिजातेः प्रथमो भेदः]

प्राक्सूत्रं द्वादशं चैव द्विगुणं सोमसूत्रकम्[१०] ॥ ३४ ॥
मध्ये नवपदं कृष्णं तत्र शङ्खनिधिर्भवेत्।
अभितः षोडशं रक्तं श्यामं स्याद्द्वादशद्वयम्[११] ॥ ३५ ॥
द्वात्रिंशत्पीतवर्णं स्याच्छ्वेतं रक्तं सुकृष्णकम्[१२]।

---

१. 30c रक्तमालाख्ये] C^1, रक्तमालां द्वे A^1, रत्नमालाह्ये A^2, C^2, D^1, G, रक्तमावाह्ये D^2, रक्तबाह्ये तु F^1 ; 30d परांशके] A^1, C, D, G, परांशुके A^2, पराङ्गके F^1.

२. 31a नन्दिजातेस्तु] Eds, नन्दिजाते तु A, C, D^2, G, नन्दिजातेन D^1, नदिजातेस्तु F^1 ; 31b वल्लिजातेस्तु] Eds, वल्लिजाते तु A (etc.), विलिजाते तु D^2, lacune F^1, वल्ली जाते तु G.

३. C^1 place 33cd entre 31ab et 31cd ; D^2 omet 31cd-32cd.

४. 31c °माला च फेनस्य] Eds., °माला च देवस्य A (etc.), °माले च फेनं स्याच् F^1 ; 31d शफरं स्यात्प्रकीर्णके] A, G, शरपत्रं स्यात्प्रकीर्तितम् C, D^1, चबरं स्यात्प्रकीर्णके F^1.

५. 32a तन्मध्ये] A (etc.), मध्ये तु F^1 ; 32b °पत्र°] A, G, °वर्ण° C, D^1, F^1.

६. 32c मालिका मण्डपं चैव] A^1, C^1, D^1, G, कालिकामन्तु पञ्चैव A^2, मालिकामण्डपे F^1 ; 32d प्रासादं गोपुरं] A^1, C^1, G, प्रासादाङ्गैः पुरं A^2 ; सह] C^2, F^1, G, सदम् A, सदा C^1, सहः D^1.

७. 33a वृषं] A, C^1, वृषभं (*v.f.*) C^2, D, F^1, G ; गजाश्वरूपं] A, C, G, गजाश्च रूपं D, गजरूपं च F^1 ; 33b व्याघ्र°] A (etc.), व्याघ्रं C^1 ; सिंहालि°] A (etc.), सिंहौ च D^2, सिंहाल° F^1.

८. C^2 omet 33cd (que C^1 place avant 31cd).

९. 34a संछेद्य] A^1, C, D, G, संवेद्य A^2, तच्छाद्य F^1.

१०. 34c चैव] A, C^1, G, तत्र C^2, D, F^1.

११. 35c अभितः] A (etc.), भिते (*v.f.*) D^1 ; रक्तं] (A (etc.), वृत्तं F^1 ; 35d स्याद्द्वादशद्वयम्] A (etc.), श्यामद्वयं भवेत् F^1.

१२. 36b °छ्वेतं रक्तं] C^1, D, °छ्वेतरक्तः A^1, °छ्वेतरक्तं A^2, C^2, G, °च्छ्यामं कृष्ण° F^1 ; सुकृष्णकम्] A, C^1, D, तु कृष्णकम् C^2, G, सुवर्णकम् F^1.

तत्पार्श्वयोः पदाः शेषाः पद्मं मध्ये सुरक्तकम्[१] ॥ ३६ ॥
भूतमाला तथांशोर्ध्वे तस्योर्ध्वे च चतुर्दली[२]।

[२.२. नन्दिजातेर्द्वितीयो भेदः]

दक्षिणोत्तरसूत्रं स्यात् षट्सूत्रं स्यात्तु तुर्यकम्॥ ३७॥
मध्ये पद्मनिधिं पीतं रन्ध्रं रक्तसमन्वितम्[३]।
[४]शेषं शफरबन्धं स्याच् छ्यामरक्तं सिताञ्जनम्[५] ॥ ३८ ॥

[२.३. नन्दिजातेस्तृतीयो भेदः]

पूर्वाग्रमष्टसूत्रं स्याद्द्वादशं दक्षिणोत्तरे[६]।
मध्ये नवपदं पद्मं रन्ध्रं रक्तसमन्वितम्[७] ॥ ३९ ॥
[८]...

[२.४. नन्दिजातेश्चतुर्थो भेदः]

[९]...
तद्बाह्येऽष्टपदं श्याममष्टावष्टौ पदान्तकम्[१०]।
तत्पार्श्वयोर्द्वयोः पीतं पञ्चपञ्चपदं तथा[११] ॥ ४० ॥
तत्पार्श्वे कृष्णवर्णं तु शफराकृतिरावृतम्[१२]।
शफरं भूषयेद्विद्वान्पूर्ववर्णानुरूपतः[१३] ॥ ४१ ॥

---

१. 36c पदाः शेषाः] Eds., पादशेषा° A (etc.), पदा शेषा D^2, F^1 ; 36d पद्मं मध्ये] Eds, पद्ममध्ये A (etc.) ; सुरक्तकम्] A^1, G, सुरत्नकम् A^2, F^1, तु रक्तकम् C, D.

२. 37a तथांशोर्ध्वे] C, तथांशार्धे A (etc.) ; 37b तस्योर्ध्वे] A (etc.), तस्यार्धं F^1, तस्यार्धे G.

३. 38a मध्ये पद्मनिधिं पीतं] F^1, मध्यमे पद्ममाकुम्भं A, G, मध्ये पद्मनिधिः कुम्भ°. C, D ; 38b रन्ध्रं] F^1, पीतं A (etc.) ; रक्त°] A (etc.), रत्न° D.

४. C : lacune de 38d à 47c.

५. 38c शेषं शफरबन्धं] A, D, G, शेषांशाः फलबन्धं C^1, शेषांशं फलबन्धं C^2, शेषं शसरबन्धं F^1 ; 38d °छ्यामरक्तं सिताञ्जनम्] A, °छामं रक्तसितात्मनः D, °यामं रक्ता हिताञ्जनम् F^1.

६. 39a °मष्टसूत्रं] A (etc.), °मिक्षुसूत्रं D^2.

७. 39c पद्मं] D^1, G, पद्म° A, C, D^2 ; 39d रन्ध्रं रक्त°] Eds, रन्ध्रं रत्न° A, C, G, पद्मरन्ध्र° D^1, lacune F^1.

८. Lacune correspondant à la fin de la description d'un diagramme à nombre impair de cases.

९. Lacune correspondant au début de la description d'un diagramme à nombre pair de cases.

१०. 40b श्याममष्टावष्टौ पदान्तकम्] A (etc.), श्यामं रक्तमष्टपदान्तरम् F^1.

११. 40c तत्पार्श्वयो°] A^2, D, G, अपार्श्वयो° A^1, तत्पर्श्वयो° F^1 ; 40d तथा] A (etc.), ततः D^2.

१२. 41a तु] A (etc.), स्याच् F^1 ; 41b शफरा°] Eds, सासिरा° A, G, साधिरा° D, चबरा° F^1.

१३. 41c भूष° A (etc.), पूज° G.

[२.५. नन्दिजातेः पञ्चमो भेदः]

पूर्वाग्रं दशसूत्रं स्यादुदक्सूत्रं चतुर्दश।
नवपदे तु तन्मध्ये गौरीं कुर्यात्सुभूषिताम्[१] ॥ ४२॥
[२]घनवर्णां तदाकारां रन्ध्रं रक्तेन भूषितम्[३]।
तद्बाह्ये षोडशं श्वेतं शुक्लैः षोडशभिर्युतम्॥ ४३॥
चतुर्विंशच्च तद्बाह्ये कृष्णरक्तविमिश्रकम्।
[४]शेषं शफरबन्धं स्यात् पूर्ववत्कृष्णसंकरम्[५] ॥ ४४॥

[२.६. नन्दिजातेः षष्ठो भेदः]

पूर्वाग्रं पञ्चसूत्रं स्यादुदगग्रं तथैव च[६]।
मध्ये चतुष्पदे काली योगिन्यौ द्वौ समायुतौ[७] ॥ ४५॥
श्यामाभा सा महाकाली रन्ध्रं रक्तसमन्वितम्[८]।
द्विगुणीकृत्य रेखां तु रन्ध्रं रक्तसमन्वितम्॥ ४६॥
रक्तपद्मं महाकोणे रन्ध्रं पीतसमन्वितम्[९]।
शेषं शफरबन्धं स्याच् छ्यामरक्तादिमिश्रितम्[१०] ॥ ४७॥

[२.७. नन्दिजातेः सप्तमो भेदः]

प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च[११]।
नवपदे तु तन्मध्ये प्रासादं लिङ्गसंयुतम्॥ ४८॥

---

१. 42c नवपदे तु] A (etc.), नवपदेषु F^1 ; 42d °भूषिताम् A (etc.), °भूतकम् F^1.

२. D^1 donne la version suivante de 43ab : सवन्तदाकारं रब्रं रत्नेन भूषितः। ; D^2 : यनं तदाकारं रन्ध्रं रत्नेन भूषितम्।

३. 43a घनवर्णां] A (etc.), घनवन्तं G ; तदाकारां] G, तसाकारं A (etc.), तटाकारा F^1 ; 43b रक्तेन] G, रते वि° A (etc.), रत्नेन F^1.

४. F^1 omet 44cd.

५. 44d संकरम्] A^1, D, G, सूकरम् A^2.

६. 45b °दुदगग्रं] A (etc.), °दुत्तरायं F^1, °दुदक्सूत्रं G.

७. 45d °युतौ] A^1, D, °युता A^2, °युतम् F^1, G.

८. 46a महाकाली] A (etc.), तथा काली F^1, महाकालं G ; 46b रन्ध्रं रक्त°] A^2, D, रन्ध्रं रत्न° A^1, रक्तं रन्ध्र° F^1.

९. 47a रक्तपद्मं] A, G, रत्नपद्म° D^1, रत्नं पद्मं D^2 ; 47b पीत°] A (etc.), बीज° F^1.

१०. 47c शेषं] A^2, D, F^1, G, शेषा A^1 ; शफर°] A (etc.), सबर° F^1.

११. 48a प्रागग्रं] A^2, C, G, प्रागग्र° A^1, D, पूर्वाग्रं F^1 ; 48b च] A, C, G, हि D, F^1.

अभितः श्यामलाकारं तद्बाह्ये रक्तमेव च[१]।
मिश्रं स्याच्छ्वेतपीताभ्यां द्वात्रिंशत्पदमुत्तमम्[२]॥ ४९॥

[२.८. नन्दिजातेरष्टमो भेदः]

पूर्वाग्रं सप्तसूत्रं स्यादुदगग्रं तथैव च।
चत्वारि पदमध्ये तु कुर्याद्गरुडमुत्तमम्॥ ५०॥
गरुडं श्वेतवर्णं स्याच्छुभ्रं विमलसंयुतम्[३]।
[४]तद्बाह्ये द्वादशे हंसं प्राकारं भूतरक्तकौ[५]॥ ५१॥

[२.९. नन्दिजातेर्नवमो भेदः]

[६]क्षेत्रं षोडशधा कृत्वा मध्ये चैव चतुष्पदे।
कुर्यान्मनोन्मनीं मध्ये रन्ध्रं रक्तसमन्वितम्॥ ५२॥
चतुर्दिक्षु पदे द्वे द्वे कुर्याच्छफरिबन्धनम्[७]।
[८]श्वेतपद्मं महाकोणे रन्ध्रं रक्तसमन्वितम्[९]॥ ५३॥

[२.१०. नन्दिजातेर्दशमो भेदः]

प्रागग्रं द्वादशं सूत्रं विंशतिर्दक्षिणोत्तरम्।
मध्ये नवपदे भूतं रन्ध्रं पीतसमन्वितम्॥ ५४॥
अभितः षोडशं रक्तं तद्बाह्ये श्वेतमेव च[१०]।
[११]द्वात्रिंशत्तु पदं बाह्ये पीतरक्तादिमिश्रकम्॥ ५५॥

---

१. 49a °लाकारं] C, G, °लाकारा A, °लाकार° D, °लाकारां F^1 ; 49b रक्त°] A, C, F^1, रत्न° D, रेण° (?) G.

२. 49c °पीताभ्यां] A, D, F^1, G, °पीतार्धं C^1, °पीताभं C^2.

३. 51b °च्छुभ्रं विमल°] Eds., °दग्रं विभव° A, G, °दभ्रं विमल° C, D^1, °दभ्रं विहल° D^2, °द्रन्ध्ररक्त° F^1.

४. F^1 omet 51cd-52cd.

५. 51c °रक्तकौ] A^1, C, D, °रत्नकौ A^2, G.

६. C^1 : 52ab lacunaire ; dans ce manuscrit les vers 52d-130cd sont déplacés au milieu du chapitre 23.

७. 53a द्वे द्वे] A^2, C, D, G, च द्वे A^1, बाह्ये F^1 ; 53b °च्छफरि] D^2, G, °च्छबरि° A, D^1, °च्च परि° C, °घबर F^1.

८. F^1 omet 53cd-57cd.

९. 53c °पद्मं] A, G, °पद्मे C, D.

१०. 55b श्वेत°] C^1, स्वेन° A^1, G, स्येन° A^2, श्येन C^2, D^2, श्लेन D^1.

११. C^1 : lacune 55d-58a.

तस्य बाह्यावृतं रक्तं शेषं शफरबन्धनम्[१]।

[२.११. नन्दिजातेरेकादशो भेदः]

[२]षट्सूत्रं प्राङ्मुखं ज्ञेयं दशसूत्रं तथोत्तरम्[३] ॥ ५६ ॥
मध्ये नवपदं कृष्णमश्विनौ द्वौ प्रकल्पयेत्।
अभितः षोडशं रक्तं शेषं शफरबन्धनम्॥ ५७ ॥
शफरं भूषयेद्धीमान्पूर्वोक्तविधिना सह[४]।

[२.१२. नन्दिजातेर्द्वादशो भेदः]

कृत्वा षोडशधा क्षेत्रं मध्ये चैव चतुष्पदम्[५] ॥ ५८ ॥
मध्ये चैव महालक्ष्मी रन्ध्रं रक्तसमन्वितम्[६]।
[७]अभिषेकोन्मुखौ नागावङ्ग्योः पार्श्वयोः स्थितौ[८] ॥ ५९ ॥
छत्रचामरदीपैश्च गजबृन्दैश्च सेविताम्[९]।

[२.१३. नन्दिजातेस्त्रयोदशो भेदः]

प्रागग्रं द्वादशं सूत्रं विंशतिर्दक्षिणोत्तरम्॥ ६० ॥
मध्ये नवपदं कृष्णं कालाग्निस्तस्य मध्यतः।
अभितः षोडशं रक्तं श्यामं वै तस्य मध्यतः[१०] ॥ ६१ ॥
चतुर्विंशति तद्बाह्ये पीतं चतुर्दलीयुतम् ।
[११]द्वात्रिंशच्च पदे बाह्ये कृष्णं चतुर्दलीयुतम्[१२] ॥ ६२ ॥

---

१. 56b शफर°] A, D^2, G, शफरी° D^1.

२. C^2 : lacune 56cd-58a ; D^1 omet 56cd-57ab.

३. 56d तथोत्तरम्] A (etc.), G, दक्षिणोत्तरम् (*v.f.*) D^2.

४. 58b पूर्वोक्त°] A (etc.), पूर्वोक्तं C^1.

५. 58c क्षेत्रं] A, G, क्षेत्रे C, D, कृत्वा F^1 ; 58d मध्ये चैव] A (etc.), मध्यमे च C.

६. 59a महालक्ष्मी] A, G, मलाक्षीरं C, D ; 59b रन्ध्रं] A, G, श्वभ्रं C, रग्रं D^1, रभ्रं D^2 ; रक्त°] A, C, G, रत्न° D^1.

७. F^1 donne cette version de 59cd : अभिषेको मुखी हस्तमुभाभ्यां पार्श्वयो स्थितम्।

८. 59c अभिषेकोन्मुखौ] Eds, अभिषेकमुखा A, G, अभिषेकोन्मुखा C, D ; 59cd नागावङ्ग्योः] Eds., नागा ह्यङ्ग्योः C^1, नागाप्यङ्ग्योः A, G, नागान्युगवो C^2, नागाभ्यागवो D.

९. 60a दीपैश्च] A (etc.), पिच्छैश्च F^1 ; 60b सेविताम्] Eds, सेवितम् A (etc.), lacune F^1.

१०. 61d श्यामं वै तस्य] A, F^1, G, श्यामलं श्वेत° C, D.

११. C, D, et F^1 omettent 62d-63a.

१२. 62c पदे] A, पदं C, G, D^1, पद° F^1.

चत्वारिंशत्पदं बाह्ये नानावर्णसमायुतम्[१]।
शेषं शफरबन्धं स्यात्कृष्णवर्णादिसंयुतम्[२]॥ ६३॥

[२.१४. नन्दिजातेश्चतुर्दशो भेदः]

चतुर्दशं स्यात्प्राक्सूत्रमुदक्सूत्रं तथैव च।
मध्ये नवपदं पीतं तस्य मध्ये गणाधिपः[३]॥ ६४॥
अभितः षोडशं श्वेतं तस्य मध्ये चतुर्दली ।
तस्य बाह्ये चतुर्विंशज्झपाया रक्तमेव च[४]॥ ६५॥
द्वात्रिंशच्च भवेच्छ्यामं शेषं शफरबन्धनम्[५]।

[२.१५. नन्दिजातेः पञ्चदशो भेदः]

प्रागग्रं द्वादशं सूत्रमुदगष्टदशं पुनः ॥ ६६॥
मध्ये नवपदं कृष्णं वृषभं तस्य मध्यतः[६]।
[७]तद्बाह्ये षोडशं रक्तं श्यामवर्णं ततो बहिः[८]॥ ६७॥
शेषं पीतादिसंयुक्तमावृतं पीतमेव च।
एते पञ्चदश प्रोक्ता नन्दिजातेर्महानल[९]॥ ६८॥
एकैकं षट्सुभेदेन नन्दिजातिर्विधीयते[१०]।
नन्दिजातिः समाख्याता वल्लिजातिमतः शृणु॥ ६९॥

[३. वल्लिजातिः]

[३.१. वल्लिजातेः प्रथमो भेदः]

प्रागग्रं दशसूत्रं स्यादुदगग्रं तु विंशतिः।

---

१. 63a चत्वारिंशत्पदं] Eds., चत्वारिंशच्छतं A (etc.) ; 63b °वर्ण°] C, D, F^1, °वस्त्र° A, G.

२. 63c शेषं शफर°] A, F^1, G, शेषं शपरि° C^1, शेषांशं परि° C^2, शेषां शबरि° D.

३. 64d गणाधिपः] F^1, यथाविधि A, C^1, G, lacune C^2, गणी धीमः (?) D.

४. 65d °झपाया°] A, F^1, G, °झपता° C, °झपचा° D.

५. 66b शेषं शफर°] A, G, शेषं शपरि° C^1, D^1, शेषांशं परि° C^2, शेषं शबरि° D^2, शेषं शबर° F^1.

६. 67b वृषभं] F^1, लभते A, C^2, D, G, lacune C^1.

७. F^1 donne le texte suivant pour 67cd-68ab : बाह्ये षोडश्रक्तं स्याच्छामरक्तं ततोपरि। कृष्णं ततो पीताद्या विहि . . संयुतम्।

८. 67d ततो बहिः] C, D, तथैव च A^1, तथैव हि A^2, G.

९. 68c °दश प्रोक्ता] A^1, C, F^1, G, °दशाः प्रोक्ता A^2, °दशप्रोक्त° D ; 68d °जातेर्म°] Eds., °जाले म° A, C, D^2, G, °जाते म° D^1, °जातम° F^1.

१०. 69a षड्सुभेदेन] A^1, षड्वट्भेदेन A^2, D, G, षड्विभेदेन C^1, षोडषड्भेदो F^1.

[१]तन्मध्ये नवकं पीतं तस्य मध्ये दिवाकरम्[२] ॥ ७० ॥
पद्महस्तं तु रक्ताङ्गं मण्डलेनैव मण्डितम्[३] ।
षोडशं जपया रक्तं पीतं बाह्ये प्रकल्पयेत्[४] ॥ ७१ ॥
प्राकारं वल्लिजातं स्याच्छेषं शफरबन्धनम्[५] ।

[३.२. वल्लिजातेर्द्वितीयो भेदः]

षड्भिः षड्भिस्तथा सूत्रैः पदं वै पञ्चविंशतिः ॥ ७२ ॥
मध्ये नवपदं कृष्णं वल्लिजातिसमन्वितम् ।
तद्बाह्ये षोडशं रक्तं श्वेतवल्लिसमायुतम्[६] ॥ ७३ ॥

[३.३. वल्लिजातेः तृतीयो भेदः]

प्रागग्रं ग्रहसूत्रं स्याद्रुद्रसूत्रमुदग्भवेत्[७] ।
मध्ये चतुष्पदं रक्तं श्रीभूमिसहितं भवेत् ॥ ७४ ॥
अभितो द्वादशं श्वेतं कृष्णवर्णं ततो बहिः ।
प्राकारं वल्लिजातिः स्याच्छेषं शफरबन्धनम्[८] ॥ ७५ ॥
शफरीं भूषयेद्विद्वाञ्चतुर्वर्णेन तत्क्रमात्[९] ।

[३.४. वल्लिजातेश्चतुर्थो भेदः]

प्राङ्मुखं तु चतुःसूत्रमुदग्मुखं तथैव च[१०] ॥ ७६ ॥

---

१. F^{1} omet 70cd-72cd.

२. 70d दिवाकरम्] A, D, G, दिवाकरः C.

३. 71a पद्म॰] C, D, G, पञ्च॰ A.

४. 71c जपया] Eds., जपाया A, D, G, जपवा C ; रक्तं A^{2} (etc.), रक्त॰ A^{1} ; 71d प्रकल्पयेत्] A, G, प्रकल्पितम् C, D.

५. 72a वल्लिजातं] A, G, वल्लीजातिः C^{1}, वल्लिजाति C^{2}, D ; 72b ॰च्छेषं शफर॰] A, G, ॰च्छेषां शपरि C^{1}, ॰च्छेषांशं परि॰ C^{2}, lacune D.

६. 73d ॰वल्लि॰] A, C^{1}, F^{1}, ॰वल्ली C^{2}, D, G.

७. 74a ग्रहसूत्रं] C^{1}, D, दशसूत्रं A, C^{2}, F^{1}, G ; 74b ॰रुद्र॰] A, C, D^{2}, G, ॰मृद्र॰ D^{1}, उदक् F^{1}.

८. 75c प्राकारं] C^{2}, D, प्रागग्रं A, G, lacune C^{1}, F^{1} ; वल्लिजातिः स्या॰] C^{2}, D^{2}, वल्लिजतं स्या॰ A, G, lacune C^{1}, F^{1}, वल्याजाति स्या॰ D^{1} ; 75d ॰च्छेषं शफर॰] A, F^{1}, G, ॰च्छेषां शपरि॰ C^{1}, ॰च्छेषांशं परि॰ C^{2}, ॰च्छेषं सबरी॰ D.

९. 76a ॰येद्विद्वान्॰] A (etc.), ॰येद्धीमान्॰ F^{1} ; 76b ॰वर्णेन] A, C, G, ॰चूर्णेन D, वर्गेन F^{1}.

१०. 76d तथैव च] A, तु तथैव च (*v.f.*) C^{1}, तथैव हि D, F^{1}, G.

मध्यमे च महद्रत्नं तन्मध्ये चन्द्रमा भवेत्[१]।
श्वेतवर्णदलाकारं श्वेतमण्डलमण्डितम्[२] ॥ ७७॥
अष्टश्वभ्रमही स्थाप्य श्वेतरक्तं तु रक्तकम्[३]।

[३.५. वल्लिजातेः पञ्चमो भेदः]

पूर्वाग्रं पञ्चसूत्रं स्यादुदगग्रं तथैव च[४] ॥ ७८॥
मध्यमे तु महाशास्ता श्यामवर्णं सपत्निकम्[५]।
रन्ध्रं रक्तं द्वयोः पार्श्वे सुवस्त्रौ पीतवर्णकौ[६] ॥ ७९॥
शेषं वल्लिसमं श्वेतं रन्ध्रं रक्तादिसंयुतम्[७]।

[३.६. वल्लिजातेः षष्ठो भेदः]

चत्वारिसूत्रं प्रागग्रमुदक्सूत्रं तु षड्भवेत्॥ ८०॥
[८]मध्यमे मण्डपाकारं तस्य मध्ये सरस्वती[९] ।
उभयोः पार्श्वयोश्चैव ऋषीन्सप्त प्रकल्पयेत्[१०] ॥ ८१॥
नानावर्णसमायुक्तं वल्लीसूत्रं च कारयेत्[११]।
रन्ध्रं रक्तसमायुक्तमृषयः श्यामवर्णकाः[१२] ॥ ८२॥

---

१. 77a मध्यमे च] A, G, मध्यमेव C^1, D, मध्यमे वा C^2, मध्यममेह F^1 ; महद्रत्नं] D, महारक्तं A, G, महः रत्नं C^1, महारत्नं C^2, निवृत्तं F^1; 77b चन्द्रमा भवेत्] F^1, पद्ममारभेत् A, G, वन्दमारभेत् C, D.

२. 77c °वर्णदला°] A^2, °पर्णदला° A^1, °वर्णं दला° C, D, G, °वर्णं तदा° F^1.

३. 78a अष्टश्वभ्रमही] A^1, G, अष्टश्वभ्रमहीः A^2, अष्टश्वमाभितः C^1, अष्टाश्वानभितः C^2, अष्टाश्वमहित D, अष्टाश्रमभितो F^1 ; 78b श्वेतरक्तं] A^1, C, D, G, श्वेतरूपं A^2, श्वेतसूत्रं F^1.

४. 78d च] A, F^1, हि C, D, G.

५. 79a °शास्ता] A, F^1, G, °शस्तां C^1, D, °शास्त्रं C^2 ; 79b सपत्निकम्] A, C^1, D^2, G, सपत्नीकम् C^2, सपत्तिकम् D^1, सुवर्णकम् F^1.

६. 79c रन्ध्रं] A, F^1, G, रक्तं C^1, रभ्रूं C^2, रमं (?) D^1, रभ्रं D^2 ; रक्तं] Eds., रक्त° A (etc.) ; द्वयोः] A, C^1, D^2, G, द्वये C^2, द्वयो D^1, °मयं F^1 ; 79d सुवस्त्रौ पीतवणकौ] A, G, lacune C^1, वस्तौ द्वौ पीतवणकौ C^2, D, द्वस्तबीजसमन्वितम् F^1.

७. 80a शेषं वल्लिसमं] A^2, C^2, D, G, शेषं समं (*v.f.*) A^1, ++ वल्लिसमं C^1, शेषं बलिमयं F^1.

८. F^1 omet 81ab-82cd.

९. 81b तस्य मध्ये] A^1, C^2, D, G, तन्मध्ये तु A^2, C^1.

१०. 81d ऋषीन्सप्त A, D, G, ऋत्विक्सप्त C.

११. 82a °युक्तं] A, C, G, °युक्तां D ; 82b वल्लीसूत्रं च] A, वल्लिं सर्वत्र C, D, वल्लिवस्त्रं तु G.

१२. 82d °क्तमृषयः श्यामवर्णकाः] Eds., °क्तं वृसयश्या° A, °क्तं वृषश्च वर्णकम् C^1, °क्तं वृषाः श्यामवर्णकम् (*v.f.*) C^2, °क्तमृषयश्च श्यामवर्णकम् (*v.f.*) D^1, °क्तं वृषग्वत्वर्णकम् (?) D^2, °क्तं वृषयवर्णकम् G.

[३.७. वल्लिजातेः सप्तमो भेदः]

पूर्वाग्रं वसुसूत्रं स्यात्तावदेव तु सौम्यकम्[१]।
मध्ये नवपदं कृष्णं यज्ञमूर्तिविभूषितम्[२] ॥ ८३॥
[३]दीपचामरछत्रैश्च भूषितं सुविशेषतः[४]।
[५]अभितः षोडशं रक्तं शेषं शफरबन्धनम्[६] ॥ ८४॥

[३.८. वल्लिजातेरष्टमो भेदः]

षट्सूत्रं चैव प्रागग्रमुत्तराग्रं चतुर्दशम्[७]।
मध्ये नवपदं रक्तं श्वेतपद्मविभूषितम्[८] ॥ ८५॥
अभितः षोडशं कृष्णं तदूर्ध्वे तु चतुर्दली[९]।
उभयोः पार्श्वयोर्भित्तिः श्यामवर्णसमन्विता[१०] ॥ ८६॥
शेषं शफरबन्धं स्यात्तत्तद्वर्णानुभूषितम्[११]।

[३.९. वल्लिजातेर्नवमो भेदः]

चतुरश्रीकृतं क्षेत्रं मध्ये वृत्तसमन्वितम्[१२] ॥ ८७॥
तन्मध्ये तु गजारूढं कुमारं परिकल्पयेत्।
विद्याधरौ तु तत्पार्श्वे चामरासक्तहस्तकौ[१३] ॥ ८८॥
श्वेतादिवल्लिकायुक्तं रक्तवर्णादिसंयुतम्।

---

१. 83a पूर्वाग्रं वसुसूत्रं] A, D^1, G, दूर्वाग्रं वाथ सूत्रं C, दूर्वाग्रं वसुसूत्रं D^2 ; 83b सौम्यकं] A (etc.), योग्यकम् F^1.

२. 83c कृष्णं] A^2, C, D^2, F^1, G, कृष्ण° A^1, रक्तं D^1 ; 83d यज्ञमूर्ति°] A (etc.), यज्ञमुर्त्या F^1.

३. A^2, C^1, F^1 omettent 84ab dont C^2 donne cette version : उपचारविचित्रैश्च भूष +++++।

४. 84a °छत्रैश्च] A^1, G, °चर्मैश्च D^1, °चित्रैश्च D^2.

५. C^2 omet 84d-86a.

६. 84c A^1 et A^2 ajoutent कृष्णं avant रक्तं ; 84d शफर°] A, F^1, G, शपरि° C^1, शबरि D.

७. 85a प्रागग्रं A, G, पूर्वाग्रं C^1, D, F^1.

८. 85c रक्तं] A (etc.), रत्नं D^2 ; 85d पद्म°] A, F^1, G, पद्मे C^1, पद्मो D^1.

९. 86b तदूर्ध्वे] A (etc.), तन्मध्ये F^1 ; °दली] C, D, F^1 °दलम् A, G.

१०. 86c उभयोः] A, G, तद्द्वयोः C, D, F^1 ; °भित्तिः] A, C^1, G, चैव C^2, °भिश्च D, °विथ्यां F^1 ; 86d वर्णसमन्विता] D^2, वर्णं समन्वितम् A, C^1, F^1, G, वर्णं समन्विताः C^2, वर्णसमनितौ D^1.

११. 87a शफर°] A, F^1, शपरि° C^1, D^1, शफरि° C^2, G, शबरि D^2.

१२. 87c चतुरश्री°] F^1, चतुर्दली A (etc.) ; °कृतं क्षेत्रं] F^1, °कृते क्षेत्रे C, D, G, °कतत्क्षेत्रे A^1, °कन्तक्षेत्रे A^2.

१३. 88c °धरौ तु] A, °धरेण C, °धरेण तु D, °धरस्तथा (*v.f.*) F^1, °धारा तु G ; तत्पार्श्वे] A, D^1, F^1, G, तद्बाह्ये C ; 88d चामरासक्त°] A, C^1, D^1, G, चामरा सप्त° C^2, चमरां सक्त° D^2, चामरस्य गृ° F^1.

[३.१०. वल्लिजातेर्दशमो भेदः]

चतुर्दशं स्यात्प्रागग्रमुदगग्रं तथैव च॥ ८९॥
मध्ये नवपदं कृष्णं ब्रह्मा मध्ये तु संस्थितः[१]।
अभितः षोडशं श्यामं तन्मध्ये तु चतुर्दली ॥ ९०॥
तद्बाह्ये चाष्टदिक्ष्वष्ट वसवः परिकल्पिताः[२]।
द्विपदं श्वेतरक्ताभ्यामन्वितं परितः क्रमात्[३]॥ ९१॥
आवृत्यैकपदं श्यामं तन्मध्ये तु चतुर्दली[४]।
शेषं वल्लिसमायुक्तं रक्तादिसर्ववर्णभाक्॥ ९२॥

[३.११. वल्लिजातेरेकादशो भेदः]

प्रागग्रमृषिसूत्रं स्यादुदगग्रं तथैव च[५]।
[६]चक्रं चतुष्पदं मध्ये छत्रचामरसंयुतम्[७]॥ ९३॥
वासवं श्यामवर्णं तु तद्रन्ध्रं पीतमेव च[८]।
अभितो द्वादशं श्वेतं शेषं शफरिबन्धनम्[९]॥ ९४॥

[३.१२. वल्लिजातेर्द्वादशो भेदः]

चतुर्भिः पूर्वगं सूत्रमुदक्सूत्रं तथैव च।
चतुरश्रस्य मध्ये तु दुर्गादेवीं प्रकल्पयेत्[१०]॥ ९५॥
श्यामवर्णयुता देवी तद्रन्ध्रं रक्तमेव हि[११]।

---

१. 90b ब्रह्मा] A (etc.), ब्रह्म G ; °स्थितः] C, F^1, °स्थितम् A, D, G.

२. 91a °दिक्ष्वष्ट] A (etc.), °दिग्भागे F^1 ; 91b वसवः परिकल्पिताः] A, G, वसवः परिकल्पयेत् C, D, अष्टौ वस्वः प्रकीर्तितौ F^1.

३. 91c द्विपदं] A, C, D^2, F^1, द्विपद्मं D^1, द्विपदा G ; 91d °मन्वितं] A^2, °मन्वितः A^1, C^2, D^2, G, मण्डितः D^1, द्विपदः F^1.

४. 92a आवृत्यैक°] A, G, lacune C^1, आपत्यक° C^2, आवृत्यक° D, अदित्येक° F^1.

५. 93a प्रागग्रमृषि°] F^1, प्रागग्रं रक्त° C^2, D, प्रागग्ररक्त° A, C^1, G ; 93b तथैव च] A, C^1, D, F^1, तथैव हि C^2, G.

६. G omet 93cd-95ab.

७. 93c चक्रं चतुष्पदं] A, चतुश्चतुष्पदं C^1, चक्रं चतुष्पदे C^2, D, शक्तिं चतुर्दष्पद° F^1.

८. 94a वासवं] A (etc.), वसवं F^1 ; 94b तद्रन्ध्रं] A, C, D^2, तदन्ध्रं D^1.

९. 94d शफरि°] A (etc.), शपरि° C^1.

१०. 95c मध्ये तु] A (etc.), तन्मध्ये F^1.

११. 96a °युता देवी] D^2, °युता देवीं A, C, °युतां देवीं D^1, F^1, G.

सितसिंहाष्टकैर्युक्तं रन्ध्रं रक्तविभूषितम्[१] ॥ ९६ ॥

[३.१३. वल्लिजातेस्त्रयोदशो भेदः]

[२]पूर्वाग्रमष्टसूत्रं स्यादुदक्सूत्रं चतुर्दश।
रक्तपद्मं तु तन्मध्ये रन्ध्रं कृष्णसमन्वितम्[३] ॥ ९७ ॥
तद्बाह्ये षोडशं रक्तं तस्य मध्ये तु वल्लिका[४]।
प्राकारं वल्लिकायुक्तं शेषं शफरिबन्धनम्[५] ॥ ९८ ॥

[३.१४. वल्लिजातेश्चतुर्दशो भेदः]

क्षेत्रं तु चतुरं कृत्वा पूर्वाग्रं पञ्चसूत्रकम्।
चतुष्पदे तु तन्मध्ये चण्डेशं परिकल्पयेत्॥ ९९ ॥
चण्डेशः पीतवर्णः स्यात्तद्रन्ध्रं रक्तमेव च[६]।
धेनुं कुर्याच्चतुष्कोणे शेषं वाल्ल्यादिभिर्युतम्[७] ॥ १०० ॥

[३.१५. वल्लिजातेः पञ्चदशो भेदः]

चतुर्दशं स्यात्प्राक्सूत्रं विंशतिर्दक्षिणोत्तरम्।
मध्ये नवपदं कृष्णं तस्य मध्ये ह्युमा भवेत्॥ १०१ ॥
तद्बाह्ये षोडशं रक्तं तद्बाह्ये श्वेतमेव च[८]।
तद्बाह्ये श्यामवर्णं तु तस्य बाह्येऽञ्जनं तथा[९] ॥ १०२ ॥
प्राकारं वल्लिकाबन्धं शेषं शफरिबन्धनम्[१०]।

---

१. 96c सित°] A^1, C, D, G, एतैः A^2, सितं F^1 ; 96d °विभूषितम्] A, C, G, °समन्वितम् D, F^1.

२. C et D omettent 97ab-97cd.

३. 97c °पद्मं] A (etc.), °वर्णं F^1.

४. 98b तस्य मध्ये] A, C^1, D^1(?), G, तत्तद्मध्ये C^2, F^1, तन्मध्ये (*v.f.*) D^2 ; वल्लिका] A (etc.), मल्लिका F^1.

५. 98c प्राकारं] C, D, F^1, प्रागग्रं A, G ; 98d शेषं] A, C, F^1, G, विशेषं (*v.f.*) D ; शफरि°] A (etc.), सपरि° C^1.

६. 100a चण्डेशः पीत°] C^2, चण्डेशं पीत° A, C^1, F^1, G, चण्डेषमपि तद्° D ; वर्णः] C^2, वर्णं A, D, F^1, G, रन्ध्रं C^1.

७. 100c चतुष्कोणे] A^2, C^2, F^1, G, चतुष्केन A^1, अतुष्कोणं C^1, D ; 100d वल्ल्यादिभिर्युतम्] F^1, बाल्यादिभिर्युतम् A, C^1, वाल्यादिभिर्युतम् C^2, पक्वादिभिर्यगम् D^1, बिल्वादिभिर्युगम् D^2, पाल्यादिभिर्युतम् G.

८. 102a रक्तं] A, F^1, G, कान्तं C, D.

९. 102d बाह्येऽञ्जनं] C^2, F^1, G, बाह्ये जनं A, C^1, D.

१०. 103b शफरि°] A (etc.), सपरि° C^1.

एवं वल्ली समाख्याता दशपञ्चकसङ्ख्यया[१] ॥ १०३ ॥
षट्षड्भेदं तु वैकैकं फेनकं चाधुनोच्यते[२] ।

[४. फेनकजातिः]

[४.१. फेनकजातेः प्रथमो भेदः]

प्रागग्रं द्वादशं सूत्रं द्विगुणं दक्षिणोत्तरम्[३] ॥ १०४ ॥
मध्ये नवपदं रक्तं मण्डलं पीतवर्णकम्[४] ।
[५]तद्बाह्यैकावृतं श्यामं चतुर्दलसमन्वितम् ॥ १०५ ॥
तद्बाह्यैकावृतं रक्तं दिग्विदिक्षु सितं भवेत्[६] ।
नानावर्णं तु तद्बाह्ये हंसमाला च तद्बहिः ॥ १०६ ॥
शेषं शफरिबन्धं स्यान्नानावर्णसमन्वितम् ।

[४.२. फेनकजातेर्द्वितीयो भेदः]

द्वादश स्यादुदक्सूत्रं प्राक्सूत्रं वसुसङ्ख्यया ॥ १०७ ॥
वामा नीलनिभा मध्ये रन्ध्रं रक्तसमन्वितम्[७] ।
[८]षोडश बाह्यतो रक्तं तन्मध्ये पीतमेव च ॥ १०८ ॥
तत्पार्श्वयोर्द्वयोर्ग्रन्थिः पीतवर्णसमन्वितः[९] ।
[१०]पूर्वे च पश्चिमे चैव रक्तं पञ्चपदं तथा[११] ॥ १०९ ॥

---

१. 103c एवं वल्ली समाख्याता] C^2, D, F^1, एवं वल्या समाख्यातं A, +वल्लिका समाख्याता C^1, एवं वल्ल्या समख्यातम् G.

२. 104a षट्षड्भेदं] A, D, G, षड्भेदकं C, F^1 ; वैकैकं] A^1, D^1, चैकैकं A^2, C, D^2, G ; 104b फेनकं] A (etc.), कालिकं F^1 ; चाधुनो°] A, C^1, F^1, त्वधुनो° C^2, D, G.

३. 104c द्वादशं सूत्रं] A (etc.), दशसूत्रं स्याद्° F^1.

४. 105b मण्डलं] C^2, तद्दलं A, C^1, D, G, नवपदं F^1.

५. C^2 et F^1 omettent 105cd.

६. 106b दिग्विदिक्षु] C, D^2, F^1, G, द्वि विदिक्षु A^1, दिवि दिक्षु A^2, द्विश्विदिक्षु D^1 ; सितं] A, C^1, D, G, समं C^2, F^1.

७. 108a वामा नीलनिभा] G, वामनीलनिभा° A, वामिनीलं निभा C^1, वमे नीलनिभा C^2, वामिनीलग्निका D^1, वामिनीलाग्नेहो D^2, वामी नीलीनिभा F^1.

८. F^1 omet 108cd-110ab.

९. 109b °योर्ग्रन्थिः] C^2, °योर्ग्रन्थि° A, C^1, D, G.

१०. D^1 place une première fois 111b-111cd entre 109ab et 109cd.

११. 109c पूर्वे च] A (etc.), पूर्वे वा G ; 109d तथा] A (etc.), ततः D^2.

अल्पपद्मं तथा शेषं मध्ये रक्तसमन्वितम्[१]।
[२]शेषं वै बुद्बुदाकारं पञ्चवर्णसमन्वितम्॥ ११०॥

[४.३. फेनकजातेस्तृतीयो भेदः]

चतुःसूत्रं तु प्रागग्रं षट्सूत्रं दक्षिणोत्तरम्[३]।
बुद्बुदां महतीं मध्ये कृष्णं स्यात्परितः क्रमात्[४]॥ १११॥
[५]वामाष्टकं स्यात्तन्मध्ये योजयेच्छुभ्रं बुद्बुदम्[६]।
शेषं शफरिबन्धं स्यात् तत्तद्वर्णानि भूषयेत्[७]॥ ११२॥
अभ्यन्तरावृतं श्यामं श्वेतं रक्तं तु पीतकम्[८]।

[४.४. फेनकजातेश्चतुर्थो भेदः]

पूर्ववत्सूत्रविन्यासं मध्यमे रौद्रिका भवेत्॥ ११३॥
पदेष्वष्टसु परितः शक्तयश्चाष्ट विन्यसेत्[९]।
शक्तयः पीतवर्णाश्च श्यामवर्णं तु रन्ध्रकम्[१०]॥ ११४॥
[११]शेषं शफरिबन्धं स्याद्भूषणैर्भूषणार्हकैः[१२]।

[४.५. फेनकजातेः पञ्चमो भेदः]

पूर्वाग्रं द्वादशं सूत्रं षोडशं दक्षिणोत्तरम्॥ ११५॥

---

१. 110a अल्प॰] A^1, C, D^1, कल्प॰ A^2, G.

२. C^2 omet 110cd.

३. 111a चतुःसूत्रं तु] A (etc.), चत्वारिसूत्रं F^1.

४. 111c बुद्बुदां] A (etc.), lacune C^1, बुद्बुदौ F^1.

५. D^2 omet 112b-113c.

६. 112a वामाष्टकं स्या॰] A^1, पादाष्टकं स्या॰ A^2, G, पादाष्टकस्य C, D, पाद्याष्टकस्य F^1 ; 112b छुभ्रं] Eds, अभ्र॰ A, G, अल्प॰ C, D^1, अम्ब॰ F^1

७. 112c शफरि॰] A (etc.), शपरि॰ C^1 ; 112d ॰वर्णानि] A, C^2, G, ॰वर्णानु॰ C^1, D^1, वर्णं तु F^1.

८. 113a अभ्यन्तरा॰] A, C^1, F^1, G, असतेरा॰ C^2 ; 113b श्वेतं] A, C, G, शेषं D^1 ; तु पीतकम्] F^1, विनान्तरम् A, G, द्विनान्तकम् C, दिनान्तकम् D^1.

९. 114a पदेष्वष्टसु परितः] C^2, पदेष्वष्टासुरितरः A, पदेष्वष्टपरितः (*v.f.*) C^1, D, पदेष्वष्टेषु परितः F^1, lacune G ; 114b शक्तयः चाष्ट] A (etc.), शक्तींश्चाष्टौ C^2.

१०. 114c ॰वर्णाश्च] A (etc.), ॰वर्णस्यात् F^1 ; 114d ॰वर्णं तु रन्ध्रकम्] C^2, F^1, ॰वर्णाश्च रन्ध्रका A^1, ॰वर्णाश्च रन्ध्रकाः A^2, C^1, G, ॰वर्णाश्च रन्ध्रकम् D.

११. A et G omettent 115b-117a ; F^1 donne cette version de 115b : भूषं यद्भूषणान्तकम्.

१२. 115a शफरि॰] A (etc.), शबरि॰ C^1 ; 115b : भूषणैर्भू॰] C^1, D^1, भूषयेद्भू॰ C^2, D^2,.

मध्ये नवपदे मोटीं कल्पयेच्छ्यामवर्णकाम्[१]।
शुक्लं तु षोडशे बाह्ये रन्ध्रं रक्तसमन्वितम्॥ ११६॥
तद्बाह्ये कृष्णवर्णं स्यात्तन्मध्ये तु चतुर्दली[२]।
नानावर्णं तु तद्बाह्ये प्राकारं पक्षिभिर्युतम्॥ ११७॥
शेषं शफरिबन्धं स्यात्कृष्णवर्णादिसंयुतम्[३]।

[४.६. फेनकजातेः षष्ठो भेदः]

पूर्वसूत्राश्च चत्वारो दक्षिणोत्तरगास्तु षट्[४]॥ ११८॥
तन्मध्ये तु चतुष्कोणे कूटाकारं तु कारयेत्[५]।
चतुर्दिक्षु चतुः शाला पार्श्वयोः पञ्जरं भवेत्[६]॥ ११९॥
षड्डन्तिमध्यमे कुर्यान्नानावर्णेन भूषयेत्[७]।

[४.७. फेनकजातेः सप्तमो भेदः]

पूर्वाग्रं दशसूत्रं स्याद्द्विगुणं दक्षिणोत्तरम्॥ १२०॥
मध्ये नवपदं रक्तं ज्येष्ठादेवीं प्रकल्पयेत्[८]।
आवृतं षोडशं कोष्ठं कृष्णं मध्ये चतुर्दली[९]॥ १२१॥
चतुर्विंशतिरक्ताङ्गा त्रिवृत्तं रक्तमेव च[१०]।
अल्पपद्मं तथा शेषं हंसमालापरीवृतम्॥ १२२॥

[४.८. फेनकजातेरष्टमो भेदः]

प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च।
मध्ये नवपदं रक्तं मध्यमे नन्दिकेश्वरम्[११]॥ १२३॥

---

१. 116a मोटीं] C^1, D^2, F^1, मोगी C^2, मोदी D^1 ; 116b °वर्णकाम्] C^2, °वर्णकम् C^1, D, °सन्निभम् F^1.

२. 117b °दली] A (etc.), °दलीम् C^2.

३. 118a शफरि°] A (etc.), शबरि° C^1 ; 118b °वर्णादि°] C, D, F^1, °वर्णानि A, G.

४. 118c °सूत्राश्च चत्वारो A (etc.), °सूत्रचतुर्भिः स्याद्° F^1.

५. 119b कूटाकारं] A, C, G, कूट ++ D, कूटशालां F^1.

६. 119d पञ्जरं] A, C^1, F^1, G, पद्मकं C^2, D.

७. 120a षड्डन्ति° A (etc.), षट्सन्धि° F^1.

८. 121a रक्तं] A (etc.), पद्मं F^1.

९. 121c आवृतं] F^1, सूत्रं तु A (etc.).

१०. 122b त्रिवृत्तं] A, D, G, त्रिविधं C, lacune F^1.

११. 123d मध्यमे] A, तन्मध्ये C, D, G, lacune F^1 ; नन्दिकेश्वरम्] A (etc.), नदिकेश्वरः C^2.

बाह्ये षोडशपद्मं तु तद्रन्ध्रं श्याममेव च।
नानावर्णं तु तद्बाह्ये तद्बाह्ये हंसमालिका[१] ॥ १२४॥

[४.९. फेनकजातेर्नवमो भेदः]

पूर्वाग्रमष्टसूत्रं स्याद्द्वादशं दक्षिणोत्तरम्।
मध्ये नवपदं कृष्णं तस्य मध्ये स्मरं न्यसेत्[२] ॥ १२५॥
[३]अभितः षोडश श्वेतं परितः पक्षिपङ्क्तिका[४]।
शेषं हि बुद्बुदाकारं सर्ववर्णसमन्वितम्॥ १२६॥

[४.१०. फेनकजातेर्दशमो भेदः]

चतुष्षष्टिपदे मध्ये क्षेत्रज्ञं परिकल्पयेत्[५]।
अभितो द्वादशं रक्तं नानावर्णं ततो बहिः[६] ॥ १२७॥
[७]हंसमाला तु तद्बाह्ये रन्ध्रं रक्तसमन्वितम्।

[४.११. फेनकजातेरेकादशो भेदः]

अष्टौ वै पूर्वसूत्रं स्याद्द्विगुणं दक्षिणोत्तरम्[८] ॥ १२८॥
मध्ये नवपदं ग्राह्यं रक्तपद्मसमन्वितम्।
[९]आवृतं बुद्बुदाकारं रन्ध्रं रक्तसमन्वितम्[१०] ॥ १२९॥
चतुर्माला तु तद्बाह्ये शेषं शफरिबन्धनम्[११]।

[४.१२. फेनकजातेर्द्वादशो भेदः]

ऐन्द्राग्रं द्वादशं सूत्रमुदक्सूत्रं तथैव च[१२] ॥ १३०॥

---

१. 124c तद्बाह्ये] A (etc.), तत्रैव F^1.

२. 125d स्मरं] F^1, सुरान्° A (etc.),

३. F^1 omet 126ab-127ab.

४. 126a अभितः] A, G, अतितः C, अदितः D.

५. 127a °पदे] A, G, °पदं C^1, D ; 127b क्षेत्रज्ञं] A, D, G, क्षेत्र + C^1, क्षेत्रं (*v.f.*) C^2.

६. 127d ततो बहिः] C, D, F^1, तथैव हि A, G.

७. A et G omettent 128b-130a ; F^1 s'interrompt après 128a (fin du manuscrit).

८. 128c अष्टौ] C^2, अष्ट C^1, अष्टो D.

९. C^1 et D^1 omettent 129cd.

१०. 129d रक्तसमन्वितम्] Eds, रक्तपद्मसमन्वितम् (*v.f.*) A (etc.).

११. 130a चतुर्माला] C^1, चतुर्मालां C^2, सकृन्माला D ; 130b शफरि°] A (etc.), शपरि° C^1.

१२. 130c ऐन्द्राग्रं] C^1, D, ऐन्द्राग्नि° A, G ; 130c °दक्सूत्रं] A (etc.), °दगग्रं G.

मध्ये नवपदं कृष्णमगस्त्यो मुनिसङ्गमे[१]।
अभितः षोडशं रक्तं चतुर्विंशतिकं पदम्[२]॥ १३१॥
मध्ये चतुर्दली चैव तद्बाह्ये फेनकं भवेत्[३]।

[४.१३. फेनकजातेस्त्रयोदशो भेदः]

पञ्चविंशद्विभज्याथ द्विगुणीकृतसूत्रकम्[४]॥ १३२॥
[५]मध्ये नवपदं रक्तं तन्मध्ये तु यमो भवेत्[६]।
अभितोऽष्टपदं कृष्णं तस्य मध्ये चतुर्दली॥ १३३॥
आवृतं बुद्बुदाकारं तस्य मध्ये तु रक्तकम्[७]।

[४.१४. फेनकजातेश्चतुर्दशो भेदः]

पञ्चविंशत्पदं मध्ये कृष्णरूपं प्रकल्पयेत्[८]॥ १३४॥
अभितश्चाष्टवसवस्तद्रन्ध्रं पीतवर्णकम्[९]।
तद्बाह्ये षोडशं कृष्णं तस्य मध्ये चतुर्दली ॥ १३५॥

[४.१५. फेनकजातेः पञ्चदशो भेदः]

प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च।
मध्ये नवपदं रक्तं चामुण्डां तां प्रकल्पयेत्[१०]॥ १३६॥
योगिनीं भैरवीं चैव तद्बाह्ये षोडशे पदे।
शेषं पक्षिवदाकारं नानावर्णसमन्वितम्[११]॥ १३७॥
एवं फेनं समाख्यातं पञ्चदश च सङ्ख्यया[१२]।

---

१. 131b मुनि°] A (etc.), गुरु° A^2 ; °सङ्गमे] A, °मध्यमे C, D, G.

२. 131c अभितः] A^2 (etc.), अभितेः A^1 ; 131d विंशतिकं पदम्] A, C^1, G, विंशति वामकं पदम् C^2, D.

३. 132b फेनकं] A, C, G, भेनकं D.

४. 132c पञ्चविं°] A, D, G, चतुर्विं° C^1.

५. D^1 et D^2 omettent 133ab-134ab.

६. 133b तन्मध्ये तु] A, C^1, G, तस्य मध्ये C^2.

७. 134a °कारं तस्य] A^2, C, G, °कारस्तस्य A^1.

८. 134c पञ्चविंशत्पदं मध्ये] C^2, D, G, विंशत्पदममध्ये तु A, C^1 ; 134d कृष्ण°] A, G, विष्णु° C, D.

९. 135a °श्चाष्टवसव°] A^2, C^2, D, G, °श्चाष्टवंश° A^1, lacune C^1 ; 135b तद्रन्ध्रं] A^1, D, G, तद्रुद्रं A^2, तदर्धं C^1, तदृधं C^2 ; पीतवर्णकम्] A^2, C, D, G, पीतवतिर्णखम् A^1.

१०. 136d चामुण्डां] A, G, चामुण्डीं C, D.

११. 137c पक्षिव°] A^2, C^2, पक्षव° A^1, G, यक्षव° C^1, पषिप° D^1, पार्ष्णप° D^2.

१२. 138a फेनं समा°] G, फेनसमा° A, फलकमा° C, D.

षट्षड्भेदं तु प्रत्येकं प्रकीर्णकमथ शृणु[१] ॥ १३८ ॥

[५. प्रकीर्णकजातिः]

[५.१. प्रकीर्णकजातेः प्रथमो भेदः]

प्राक्सूत्रं दशकं कृत्वा उदक्सूत्रं चतुर्दश[२]।
मध्ये नवपदं कृष्णं गङ्गादेवीं तु मध्यमे ॥ १३९ ॥
तद्बाह्ये षोडशं श्यामं चतुर्विंशतिपद्मकम्।
रन्ध्रं रक्तादिसंयुक्तमावृतं रक्तवल्लिका[३] ॥ १४० ॥
प्राकारं मर्कटोपेतं शेषं शफरिबन्धनम्[४]।

[५.२. प्रकीर्णकजातेर्द्वितीयो भेदः]

पूर्वाग्रं तु तदृक् कुरु दक्षिणाग्रं तथैव च[५] ॥ १४१ ॥
मध्ये नवपदं लिङ्गं नानावर्णसमन्वितम्।
[६]...(?)

[५.३. प्रकीर्णकजातेस्तृतीयो भेदः]

ऋतुसूत्रं तु पूर्वाग्रमुत्तराग्रं तथैव च[७] ॥ १४२ ॥
[८]नवके दक्षिणामूर्तिः पार्श्वयो ऋषयस्तथा।
नानावर्णं यथान्यायं फलके चित्रयेद्बुधः[९] ॥ १४३ ॥

[५.४. प्रकीर्णकजातेश्चतुर्थो भेदः]

ऐन्द्रादिद्वादशं सूत्रमुदगग्रं तथैव च[१०]।
मध्ये नवपदं कृष्णं तन्मध्ये नारसिंहकम्[११] ॥ १४४ ॥

---

१. 138d प्रकीर्णकमथ] A, G, प्रवर्णक्रमतः C, D.

२. 139b °दश] A^2, G, °दशी A^1, lacune C^1, °दशः C^2, °दशम् D.

३. 140c रन्ध्रं] A^2, C, G, रन्ध्र° A^1, रक्त° D^1, lacune D^2.

४. 141a मर्कटोपेतं] A (etc.), मकुटोपेतं A (etc.) ; 141b शफरि°] A (etc.), शबरि° C^1.

५. 141c तदृक्कुरु] C^1, तु उदक्सूत्रं A, C^2, D^1, G, तदुदक्सूत्रं D^2.

६. Lacune probable correspondant à la fin de la description du diagramme.

७. 142c ऋतुसूत्रं] A^2, C^1, D, G, ऋतुसङ्गं A^1, चतुःसूत्रं C^2.

८. Les manuscrits D omettent 143ab-144ab.

९. 143d चित्रयेद्बु°] Eds, चित्रयोर्बु° A (etc.).

१०. 144a ऐन्द्रादि°] A (etc.), ऐन्द्राग्निं G.

११. 144d °सिंहकम्] A, D, G, °सिंहराट् C.

अभितः षोडशं रक्तं तन्मध्ये सिंहमेव च ।
चतुर्विंशतिकं श्यामं श्वेतपद्मं तु तद्बहिः ॥ १४५॥
शेषं शफरिबन्धं तु रन्ध्रं रक्तादिभिर्युतम्[१]।

[५.५. प्रकीर्णकजातेः पञ्चमो भेदः]

चतुःसूत्रं तु पूर्वाग्रं वसुभिर्दक्षिणोत्तरम्॥ १४६॥
मध्ये नवपदं श्यामं तन्मध्ये श्वेतसिंहकम्।
शेषं शफरिबन्धं स्याद्रन्ध्रं रक्तादिवर्णभाक्[२] ॥ १४७॥

[५.६. प्रकीर्णकजातेः षष्ठो भेदः]

[३]प्राङ्मुखं दशसूत्रं स्यादुत्तराग्रं चतुर्दशम्[४]।
मध्ये नवपदं कृष्णं किन्नरद्वयसंयुतम्॥ १४८॥
अभितः षोडशं पीतं तस्य मध्ये चतुर्दलम्।
तद्बाह्ये तु चतुर्विंशज्जपाया रक्तमेव च ॥ १४९॥
शेषं शफरिबन्धं स्याद्रन्ध्रं रक्तादिवर्णभाक्।

[५.७. प्रकीर्णकजातेः सप्तमो भेदः]

प्राङ्मुखं दशसूत्रं स्यात्तद्वदेवोदगग्रकम्॥ १५०॥
सितपद्मं तु तन्मध्ये रन्ध्रं रक्तसमन्वितम्।
व्यूढतैकं तथा कृष्णं तस्य मध्ये चतुर्दली[५] ॥ १५१॥
नानावर्णं च तद्बाह्ये तद्बाह्ये मर्कटान्वितम्[६]।
[७]शेषं शफरिबन्धं स्यान्नानावर्णसमन्वितम्[८] ॥ १५२॥

[५.८. प्रकीर्णकजातेरष्टमो भेदः]

क्षेत्रं तु चतुरं कृत्वा उदक्सूत्रं तु षड्भवेत्।

---

१. 146a शफरिबन्धं तु] A (etc.), शबरिबन्धं स्यात् C^1 ; 146b रक्तादिभिर्यु] A, C^1, G, रकादिसंयु° C^2, D.

२. 147c शफरिबन्धं स्याद्°] C^2, शफरिबन्धं तु A, D, G, शबरिबन्धं स्याद्° C^1 ; 147d रन्ध्रं] A^2, C, D, G, रन्ध्र° A^1.

३. A, C^1 et G omettent 148ab-150ab.

४. 148b उत्तराग्रं चतुर्दशम्] D, रन्ध्रं रक्तादिवर्णभाक् C^2.

५. 151c व्यूढतैकं] A^1, C, D, व्यग्रद्धतैकं A^2, व्यूढदैकं G.

६. 152a च तद्बाह्ये] A^1, C^1, lacune A^2, चतुर्बाह्यं C^2, D ; 152b मर्कटान्वितम्] D, मकुटान्वितम् A, C.

७. A et G omettent 152cd-154cd.

८. 152c शफरि°] D, शबरि° C.

पूर्वाग्रसूत्रं चत्वारि मध्ये मेरुं प्रकल्पयेत्॥ १५३॥
[१]नानादेवसमायुक्तं नानाविद्याधरैर्युतम्[२]।
उभाभ्यामपि पार्श्वाभ्यां मर्कटेन समन्वितम्॥ १५४॥
नानावृक्षसमायुक्तं नानाकदलिकायुतम्[३]।

[५.९. प्रकीर्णकजातेर्नवमो भेदः]

पूर्वाग्रमृतुसूत्रं स्यादुत्तराग्रमथाष्टकम्[४]॥ १५५॥
मध्ये नवपदं श्वेतं तन्मध्ये भैरवं कुरु[५]।
रक्तवर्णाम्बरोपेतं श्वेतभारणसंयुतम्[६] ॥ १५६॥
परितः कटकं रूपं शेषं पद्मसमन्वितम्[७]।

[५.१०. प्रकीर्णकजातेर्दशमो भेदः]

[८]पूर्वाग्रं दशसूत्रं स्यादुदगग्रं तथैव च[९] ॥ १५७॥
मध्ये नवपदं पद्मं तद्रन्ध्रं श्याममेव च[१०]।
अभितः षोडश रक्तं नानावर्णं ततो बहिः[११] ॥ १५८॥
मर्कटं परितः कुर्यान्नानावर्णसमन्वितम्।

[५.११. प्रकीर्णकजातेरेकादशो द्वादशश्च भेदाः]

[१२]प्रागग्रमष्टसूत्रं स्यादुदगग्रं तथैव च॥ १५९॥
[१३]...

---

१. C^2 et D^1 omettent 154b-155a.

२. 154a °देव°] D, °देश° C.

३. 155b °कायुतम्] A, C^1, G, °संयुतम् C^2, D.

४. 155c °ग्रमृतु°] C, D, °ग्रं रुद्र° A, °ग्रं वसु° G.

५. 156b कुरु] C^1, D, शृणु A, G.

६. 156c वर्णाम्बरोपेतं] C^2, D, वर्णाययोपेतं A, C^1, G.

७. 157a कटकं A, G, मर्कटं C, D ; 157b शेषं] C, D, G, शेष° A.

८. A, C^2 et G omettent 157d-161c ; C^1 omet 158ab-159cd.

९. 157c पूर्वाग्रं] A (etc.), पराग्रं D^2.

१०. 158b तद्रन्ध्रं] Eds, तदप्रं D^2, तदग्रं D^1.

११. 158c षोडश रक्तं] D^2, षोडशांर... D^1.

१२. D^1 s'achève ici (chapitre et manuscrit).

१३. lacune correspondant à la fin de la description du diagramme à 49 cases et du début de la description d'un diagramme à nombre impair de cases.

मध्ये चतुष्पदं श्यामं तन्मध्ये नागदैवतम्।
अभितो द्वादश श्यामं तन्मध्ये तु चतुर्दली॥ १६०॥
अभितो मर्कटं बन्धं नानावर्णसमन्वितम्।

[५.१२. प्रकीर्णकजातेस्त्रयोदशो भेदः]

पूर्वाग्रं दशसूत्रं स्याद्द्वादशं दक्षिणोत्तरम्॥ १६१॥
मध्ये नवपदं कृष्णं बहिः पञ्च चतुर्दली ।
नानावर्णं तु तद्बाह्ये तद्बाह्ये रक्तमेव च॥ १६२॥
[1]शेषं शफरिबन्धं स्यान्नानावर्णसमन्वितम्[2]।

[५.१३. प्रकीर्णकजातेश्चतुर्दशादिभेदाः]

दक्षिणोत्तरतः सूत्रं षट् स्युः प्राग्दश एव च[3]॥ १६३॥
तन्मध्ये तु महापद्मं रन्ध्रं रक्तसमन्वितम् ।
शेषं शफरिबन्धं स्यात्पीतवर्णादिसंयुतम्[4]॥ १६४॥
एवं प्रकीर्णमाख्यातं पञ्चदश च सङ्ख्यया।
प्रत्येकं षद्कं प्रोक्तं स्यात्प्रकीर्णकमुदाहृतम्[5]॥ १६५॥

[६. पत्रच्छेदकालः]

मेषादिमिथुनान्तं तु नन्दिजात्यादि बन्धयेत्[6]।
कर्कटादिकन्यकान्तं वल्लिजात्यादिना यजेत्॥ १६६॥
तुलादिधनुःपर्यन्तं फेनजात्या सुपूजयेत्[7]।
मृगादिमीनपर्यन्तं पूजयेत्तु प्रकीर्णकम्॥ १६७॥

[७. पुनः पत्रच्छेदफलम्]

पत्रच्छेदविधानेन यो नरः पूजयेच्छिवम्।

---

१. C[1] et D[2] omettent 163b-164c.

२. 163a शफरि॰] A, D[2], G, शबरि॰ C.

३. 163c ॰त्तरतः सूत्रं] A, G, ॰त्तरसूत्रं षट् C[2] ; 163d षट् स्युः प्राग्दश] Eds, षट्प्राग्दश (*v.f.*) A[1], G, षठप्राग्दश A[2], प्राक्सूत्रं दश C[2].

४. 164c शफरि॰] A, G, सबरि॰ C[2].

५. 165c षद्कं प्रोक्तं] Eds, षद्कपोतं A (etc.) ; 165d ॰कमुदाहृतम्] G, ॰कुमुदाहृतम् A, C[2], ॰सुमुदाहृतम् C[1], ॰कुमुदंहृतम् D[2].

६. 166a मेषादिमिथुना॰] A, शेषादिमधुना॰ C, D[2], G ; 166b ॰जात्यादि] A (etc.), ॰जात्या तु C[1].

७. 167b फेनजात्या] A, C[1], G, मेनजात्या C[2], अभोजाक्या D[2].

सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ १६८॥
पत्रच्छेदविधिः प्रोक्तश्चार्धयामं ततः शृणु[१]॥ १६९॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिपटलः [चतुर्विंशतितमः][२]॥

---

१. 169b °श्चार्धयामं ततः] A (etc.), °मग्निकार्यमतः D^2, °मर्चनाङ्गविधिं G.

२. A^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिपटलः।
A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिपटलः पञ्चविंशतिः।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिः चतुर्विंशः पटलः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिः पञ्चविंशतिमः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पत्रच्छेदविधिपटलः समाप्तः।

[पञ्चविंशतितमः पटलः]
[अर्धयामार्चनम्[१]]

[१. अर्धयामार्चनफलम्]

अर्धयामार्चनं वक्ष्ये सर्वकर्मार्थसाधनम्।
सर्वमङ्गलसंयुक्तं सर्वदेवहितावहम्[२] ॥ १॥
सर्वदेवान्तरन्ते तु संहताकृति जायते।
जायते जातिषट्के तु इच्छाज्ञानक्रियावहम्[३] ॥ २॥
वाहनं संहितामन्त्रैरासनं मूर्तिमूलवत्[४] ।
क्रियाद्वैतं न कर्तव्यं भावाद्वैतं समाचरेत्[५] ॥ ३॥

[२. शाङ्करीपूजा]

[२.१. शाङ्करीस्वरूपम्]

क्रियानिर्वहतेरस्तु भावशुद्धं तु शाङ्करी[६] ।
शाङ्करी उत्पलाभाक्षी एतद्रूपमिहोच्यते[७] ॥ ४॥
तद्रूपं रक्तवर्णं तु श्वेतमेकाननं शिवम्।
शिवपादुकसंयुक्तं शिवाकारं त्रिलोचनम्॥ ५॥
इन्दुवक्त्रं जटाजूटं कपर्दिं च चतुर्भुजम्[८] ।
हरिणीटङ्कसंयुक्तं हंसहंसायुधद्वयम्[९] ॥ ६॥
अभयसहितवामं वरदं सर्वरक्षितम्[१०] ।

१. Manuscrits utilisés : A^1, A^2, G.

२. 1c °मङ्गल°] A^1, मङ्गल्य° A^2, G.

३. 2c जायते जातिषट्के] A^2, G, जायते +++षट्के A^1.

४. 3a वाहनं संहितामन्त्रै°] G, वाहनं सहिता त्वेता° (*v.f.*) A^1, आसनं सहितात्यै° (*v.f.*) A^2.

५. 3d भावा°] A^1, G, +वा° A^2.

६. 4b शाङ्करी] A^2, शङ्करी A^1, शाङ्करि G.

७. 4c उत्पलाभाक्षी] A^1 (var.), उपशा भाक्षी A^1, उशभाक्षी (*v.f.*) A^2, इ +शभाक्षी G ; 4d एतद्] G, तद् (*v.f.*) A.

८. 6a °जूटं] A^1, G, °चूडं A^2.

९. 6d हंसहंसायुधद्वयम्] A, हंसं हंसं युवद्वयम् G (lire sans doute हस्तहस्ता°).

१०. 7a अभयसहित°] Eds, उभयोरहिता A (etc.).

[२.२. पादुकालिङ्गम्]

आसनं च तिरोभावं भाविताभावरूपकम्[१] ॥ ७ ॥
भावनालिङ्गभावे तु पादुकारूपमर्चयेत्[२] ।
पादुका पिङ्गलाक्षी सा सौषुम्नान्तःस्थदेहवत्[३] ॥ ८ ॥
देहिवर्तहृत्पद्मे हि देहिदेहमनोरथम्[४] ।
अर्चयित्वा तदूर्ध्वे तु आसनं तत्र योजितम्[५] ॥ ९ ॥
आसनाकाररूपेषु आसनावरणादिषु ।
त्रिनेत्रं चतुर्भुजं शान्तं जटामकुटमण्डितम् ॥ १० ॥
वरदाभयकं द्वन्द्वे हरिणीटङ्कधारिणम् ।
पद्मासनं हृदोल्लासमर्धयामे प्रपूजयेत्[६] ॥ ११ ॥
पादुकालिङ्गमेवोक्तं प्रभया उमया सह[७] ।
तद्विशेषविधिं स्नायादलङ्कृत्य तु धारिकाम्[८] ॥ १२ ॥
विन्यसेत्संहितामन्त्रैरर्चनावरणादिकम्[९] ।
पायसान्नमपूपैश्च नालिकेरफलादिभिः ॥ १३ ॥
नैवेद्यं धूपदीपं च उपचाराणि दापयेत् ।
लिङ्गे च प्रतिमोत्सवं च प्रतिमान्ते तु लिङ्गवत्[१०] ॥ १४ ॥
प्रतिमं पादुकाद्वन्द्वे प्रतिमासु विशेषतः[११] ।
प्रतिमां प्राणशक्तिं च पूजां कृत्वा न रोपयेत्[१२] ॥ १५ ॥

---

१. 7d भाविताभावरूपकम् A^1, ++भावितारूपकम् A^2, G.

२. 8a भावना° A, भावनं G ; 8b °र्चयेत्] A, °र्चनम् G.

३. 8d सौषुम्नान्तः] A^1, सौषम्नान्त° A^2, G ; °देहवत्] A, देवहम् G.

४. 9a हृत्पद्मे] Eds, हृदद्मे A (etc.) ; 9b देहि] G, देही A ; देह°] Eds, देहा° A (etc.).

५. 9d योजितम्] A^2, योजितः A^1,G.

६. 11c हृदोल्लास°] A^2, G हृदोलास° A^1.

७. 12b प्रभया] Eds, प्रमाया A^1, प्रमा (*v.f.*) A^2, प्र +मा G.

८. 12c °विशेषविधिं] G , °विशेषं विधि° A^1, °विश्लेषं विधिं A^2 ; 12d धारिकाम्] A, धारिणम् G.

९. 13b °नावरणा°] A^1, G, °नावाहना° A^2.

१०. 14c प्रतिमोत्सवं च] (*v.f.*) A^2, प्रतिमोत्स्वं च A^1, प्रतिमोत्सेधं चG ; 14d प्रतिमान्ते] A^2, G, प्रतिमन्ते A^1.

११. 15a प्रतिमं पादुकाद्वन्द्वे] A, प्रतिमां पादुकं च द्वे G ; 15b प्रतिमासे] A, प्रतिमासं G.

१२. 15c प्रतिमां] G, प्रतिमं A ; 15d पूजां कृत्वा] Eds, पूजाकृत्या A (etc.).

[३. शयनालयकार्याणि]

[३.१. आगमने द्वारदेवतापूजा]

द्वाराग्रे फल्लकं न्यस्त्वा कलानारी कलेश्वरः[१]।
कलामरावती प्रज्ञा कला रक्तारुणो वयः[२] ॥ १६ ॥
द्वात्रिंशल्लक्षणैर्युक्ता स्नात्वा शुद्धवती च सा[३]।
अथवा तत्पराशक्तिं सङ्ग्रहेद्द्विजसत्तमः[४] ॥ १७ ॥
खड्गखेटकधारा च छत्रचामरधारका[५]।
चक्रं च दर्पणं पाशं वज्रं शक्तिं तथाङ्कुशम्[६] ॥ १८ ॥
दण्डं पद्मद्वयं चैव पात्रं गण्डूषपात्रकम्[७]।
धारयेद्द्विविधाश्चैव फल्लके पञ्जराग्रकम्[८] ॥ १९ ॥
ऊर्ध्वे ब्रह्मा च विष्णुश्च द्वाराग्रे सुस्थितेऽपि च।

[३.२. मङ्गलः]

शङ्खघोषसमायुक्तं जयशब्दादिमङ्गलैः ॥ २० ॥
फल्लकेशं ततोद्धृत्य ब्राह्मणान्स्वस्तिवाचकैः[९]।
श्रुतिवाचपुराणाद्यावृत्तं पञ्चाङ्गमेव च[१०] ॥ २१ ॥
शङ्खघोषसमायुक्तं वीणाकाहलझल्लरी।
दुन्दुभिः पटहैस्तालैर्धवलैर्जयघण्टकैः[११] ॥ २२ ॥

---

१. 16a द्वाराग्रे] G, द्वाराग्र° A ; फल्लकं] Eds, फलकान् A (etc.) ; 16b कला नारी] A^2, कला नारं A^1, कलानाथं A^1 (var.), कलं नारि G ; कलेश्वरः] A^2, कलेश्वरम् A^1, G.

२. 16c कलामरावती] A^1, कला +मावति A^2, कला काममती G ; 16d °रुणो वयः] G, °रुणे वयम् A.

३. 17a °युक्ता] Eds, °युक्तं A, °युक्तः G ; 17b च सा] A, य सा G.

४. 17d सङ्ग्रहेद्द्विजसत्तमः] A^2, G सगृहे द्विजसत्तमा A^1.

५. 18a °धारा च] Eds, °धाराश्च A (etc.) ;18b छत्र°] A^1 (var.), A^2, G, चन्द्र° A^1 ; °धारका] A^1, °धारकाः A^2.

६. 18c चक्रं च] Eds, चकर्ष° A, चकर्षं G ; 18d वज्रम्] A^2, G, वज्र° A^1 ; शक्तिं त°] G, शक्तिस्त° A.

७. 19a दण्डं पद्मद्वयं] A^2, G, दण्डि+++द्वयं A^1.

८. 19d पञ्जराग्रकम्] A^2, G, पञ्चराग्रकम् A^1.

९. 21a फल्लकेशं] Eds, फलकेशं A^1 (etc.) ; ततोद्धृत्य] Eds, नते घृत्य A^1, नते घृत्यं A^2, ततो हृत्य G.

१०. 21c श्रुतिवाच°] Eds, श्रवणश्च A^1, श्रन्नव च (?) A^2, श्रुतौ वाच° G ; 21cd °पुराणाद्या°] A^1, °पुराणार्या° A^2, °पुराणार्य° G.

११. 22cd तालैर्धवलै°] A^1, G, तालैर्द्धवजै° A^2.

बहुनादसदाघोषैः स्वाहान्तं हृदि योजितम्[१]।
वस्तुदेवस्तुतिर्याम्ये घोरहृद्रूपसंपुटम्[२] ॥ २३ ॥
गीतं वाद्यं तदन्ते तु योजयेन्नृत्तमेव च।
विनोदगानक्रीडा च भ्रमरी वायुवेगवत् ॥ २४ ॥
शिखाकुसुमवृष्टीषु विग्रहेद्वायुरन्तवत्[३]।
वल्लकी सप्ततन्त्री च कैलासं सहरक्षसः[४] ॥ २५ ॥
वादयेत्स्वच्छनादैश्च वेणुनादैश्च तोषयेत्।
संव्रजेद्भैरवीनृत्तं तत्र गानं तु दासिका[५] ॥ २६ ॥
वामादेरीशपर्यन्तं वाद्यगीतं च नृत्तकम्[६]।
ईशादेरिन्द्रपर्यन्तं शक्योल्लासं तु सेवितम् ॥ २७ ॥
नानानृत्तसमायुक्तं नानागानैर्निषेवितम्[७]।

[३.३. पूजा]

द्वाराग्रे फल्लके स्थिते पाद्यमाचमनं ददेत्[८] ॥ २८ ॥
अन्यथा भोगनिष्ठोऽपि प्रविशेच्छयनालयम्[९]।
योगासनोपरिष्टात्तु विन्यसेत्परमेश्वरम्[१०] ॥ २९ ॥
पादुकां वा विशेषेण विन्यसेत्तु दृढीकृतम्।
अर्चयेदासनोर्ध्वे तु शक्तिशक्त्यन्तरान्तवत्[११] ॥ ३० ॥
आवाहिन्या तदावाह्य धूपदीपादिकं ददेत्।

---

१. 23a °सदा°] A^1, °समा° A^2, G^2 ; 23b स्वाहान्तं हृदि योजितम्] A^1, वाहान्तं हृदयोजितम् A^2, स्वाहान्तं हृदये जितम् G.

२. 23d घोरहृद्रूप°] G, घोररुद्रूप° A.

३. 25a °वृष्टीषु] A^1, G, °ब्रह्मीषु A^2.

४. 25d सहरक्षसः] G, हसरक्षसः A^1, हंसरक्षसः A^2.

५. 26c भैरवीनृत्तं] A^1, G, भैरवीन्नृत्तं A^2.

६. 27b वाद्य°] A^1, वास्य° A^2, वाद्यं G.

७. 28b °गानैर्निषेवितम्] G, °गानेनिषेवितम् A^1, °गाननिषेवितम् A^1 (var.) A^2.

८. 28c फल्लके स्थिते] Eds, फलके स्थित्वा A^1, G, फलकैः स्थित्वा A^2.

९. 29a भोगनिष्ठो] Eds, भोगरिष्टो A^1, G, भोगनिष्टो A^2.

१०. 29c योगासनो°] A, मो आसनो° G.

११. 30c शक्ति°] A, शक्तिं G.

शङ्खोदकं पुरः स्नाप्य हृदयादीन्समर्चयेत्[१] ॥ ३१ ॥
[२]प्रोक्षयेद्धृदयेनैव देहन्यासान्तरीयुतम्[३]।
अन्तर्मण्डलमध्यस्थं ज्वालामालाविभूषितम्[४] ॥ ३२ ॥
ज्वालोज्ज्वलितसंकाशं तस्योर्ध्वे रविकोटिभिः[५]।
तस्योपरि निधातव्यं सोमास्कन्देश्वरं शिवम्[६] ॥ ३३ ॥

[३.४. ध्यानम्]

स्वाधिष्ठानविशुद्ध्यन्तस्तत्रान्तरे विभावयेत्[७]।
कलापात्रान्तगन्धस्थां शक्तिं सौदामिनीप्रभाम्[८] ॥ ३४ ॥
तालस्तत्र च देवेषु पत्रमध्ये पदद्वयम्[९]।
भावयेत्परमं नित्यं लक्षसोमायुतं परम्[१०] ॥ ३५ ॥
भ्रूमध्ये द्वयपत्रस्थं तस्योपरि स्थितं शिवम्।
मूलादिब्रह्मरन्ध्रान्तं शिवतत्त्वान्तवर्त्मनि[११] ॥ ३६ ॥
शङ्खोदकेन संप्रोक्ष्य श्लीं पं शुं हुं फटिति स्य च[१२]।
जातिकेतककल्हारैर्मरुद्वन्द्वे च मल्लिका[१३] ॥ ३७ ॥
षड्वक्त्रं प्रपदं पुष्पैरेकैकं कुसुमार्चनम्[१४]।

---

१. 31c स्नाप्य] Eds, स्थाप्य A^1 (etc.).

२. A^1 place une première version de 34cd avant 32ab.

३. 32b देह°] A^2 (var.), G, दह° A^1, A^2.

४. 32c °मध्यस्थं] Eds, °मध्यस्थ A^1, G, °मध्यस्था A^2.

५. 33a ज्वालोज्ज्वलित°] Eds, ज्वालाज्वलित° A, ज्वालाज्ज्वलित° G.

६. 33c निधातव्यं A (etc.) (lire éventuellement च ध्यातव्यं).

७. 34a स्वाधिष्ठान°] G, स्वरादिषु A ; 34b °त्रान्तरे] Eds, °त्रान्तर A.

८. 34c °पात्रान्त°] A^2, °पात्रन्त° A^1, G ; °स्थां] Eds, °स्थं A^1 (etc.) ; 34d शक्तिं सौदामिनीप्रभाम्] Eds, शक्तिसौदामिनीप्रभम् A^1 (etc.).

९. 35a देवेषु] Eds, वैषेषु A^1 वेषेषु A^2, G (?).

१०. 35d °युतं] A^2, G, °युतौ A^1.

११. 36d °तत्त्वान्तवर्त्मनि] A, °तत्त्वात्मवर्त्मनि G.

१२. 37d पं शुं हुं फटिति स्य च] (*v.f.*) A^1, पशुं हुं फटिति च (*v.f.*) A^2. पशुं हुं फट् ति स्य च G.

१३. 37d °मरुद्वन्द्वे] A^2, G, °माभ्रद्वन्द्वे A^1.

१४. 38a प्रपदं] A, प्रपदौ G ; पुष्पैरेकै° Eds, पुष्पौ एकै° A (etc.).

ज्ञानशक्त्यासनान्ते तु आसनं परिकल्पयेत्[१] ॥ ३८ ॥
अनाहताकौ वर्ध्यत्वा आधारान्ते विनिर्गतम्[२]।
नित्यं निरञ्जनं शुद्धमनावृत्ते तु वर्जितम्[३] ॥ ३९ ॥

[३.५. शिवागृहे पूजा]

शिवागृहं च ते गत्वावाहस्थापनसंनिधौ[४]।
निरोधनं कृत्वा ++ विन्यसेद्धृदि रूपवत्[५] ॥ ४० ॥
नखारोपादुकादन्ते शिवाग्रे कलशाग्रके[६]।
द्वादशं दर्पकव्युक्तं सौकारं हृदयादिषु ॥ ४१ ॥
अर्चयेद्धूपदीपं च पुनः पुष्पाक्षतानि च[७]।
अकारं च मुकारं च मिकारे बिन्दुनादकम्[८] ॥ ४२ ॥
ब्रह्मवर्णकला जप्त्वा सर्वपुष्पाणि चार्चयेत्[९]।
वल्लकीनादशक्तोऽपि अर्चयित्वा नमः क्रमात्[१०] ॥ ४३ ॥
वह्निरन्तरदन्तै तु पद्मम‍ं यान्ति रान्तव[११]।

[३.६. शिवकामेश्वर्यादिपूजा]

शिवकामेश्वरीं ध्यात्वा शिवकामेश्वरं शिवम् ॥ ४४ ॥
शिवभावमिति ध्यायेदुपचारादि दापयेत्।
क्षीरोदनमपूपाद्यैर्नालिकेरफलादिकम् ॥ ४५ ॥

---

१. 38c ज्ञानशक्त्यासनान्ते] A¹, G, ज्ञानं शक्त्यासनं ते A¹.

२. 39a अनाहताकौ वर्ध्यत्वा] A¹, अनाहताकौवद्ध्यात्वा A², अनाहताकारवध्यात्वा (*v.f.*) G ; 39b विनिर्गतम्] A², G, विनीतम् (*v.f.*) A¹.

३. 39d शुद्धमनावृत्ते] A¹, शुद्धमनावृन्ते A², शुद्धमाद्यन्तेन G.

४. 40a शिवागृहं च ते] A¹, ++शिवागृहं A², शिवाकारगृहं G.

५. 40c निरोधनं कृत्वा ++] A¹, निरोधनारोधनं कृत्वा (*v.f.*) A², शिरोधनारोधनं कृत्वा G ; 40d °धृदि] Eds, °ध्यति° A (etc.).

६. 41a °पादुकादन्ते] A¹, °पादकादन्ते A², °पादुरद्यन्ते G.

७. 42b °क्षतानि च] Eds, °क्षतार्चयेत् A (etc.).

८. 42c मुकारं] A¹, मकारं A², उकरं G ; 42d मिकारे] A¹, मकारो A², G ; °नादकम्] A¹, G, °नादिकम् A².

९. 43b °णि चार्चयेत्] A², °णिरर्चयेत् A¹, G.

१०. 43c °शक्तो] A², G, °शक्नो A¹ ; 43d नमः] A², G, नमो A¹.

११. 44a °दन्तै] A¹, °दन्ते A², G ; 44b पद्मम‍ं यान्ति रान्तव] A¹, पद्मम्यान्तरान्तवधः A², पद्ममायान्तरं तवत् G.

दापयेद्देवदेवीं च ताम्बूलं च लकारवत्।
ताम्बूलान्ते जलं दद्यादिक्षुसारोद्भवादिषु[१] ॥ ४६ ॥
दापयेन्मुखवासं तु कर्पूरादिसमायुतम्।
धूपदीपं हृदा दद्यात्कर्पूरागरुचूर्णवत्[२] ॥ ४७ ॥
अर्घ्यं दत्वा त्रिधा प्रोक्तं मुखवासैः पुनः पुनः।
दर्शयेत्तु कलाशक्तौ स्वायुधानुपचारवत्[३] ॥ ४८ ॥
दर्शयेद्देवदेवेशे पुरतः पादुकाद्वयम्[४]।
विन्यसेच्छङ्खतोये तु प्रोक्षयेच्छक्तिकाद्वयम् ॥ ४९ ॥

[३.७. निर्गमने द्वारदेवतापूजा]

द्वाराग्रे दक्षिणे वामे विन्यसेत्स्तोत्रशब्दवत्।
शिशुं सम्बद्धिगीतेषु कुमारस्यायुतोक्तवत्[५] ॥ ५० ॥
शङ्खोदकं पुनर्दद्यात्पश्चिमद्वारपूर्ववत्।
कवाटं दक्षिणे वामे परब्रह्माणि लक्ष्मि च[६] ॥ ५१ ॥
अभ्यर्च्य सुमना शक्त्यै शङ्खघोषरवारवत्[७]।
तुल्यबन्धनसम्बद्धौ शङ्खपद्मद्वयौ निधौ ॥ ५२ ॥
द्वाराधिष्ठितसंतृप्त्यै वेद्यशेषं निवेदयेत्।
कलाशक्तिमुखे नासि नासिबन्धनतुल्यवत्[८] ॥ ५३ ॥

[४. प्रभाते कार्याः]

प्रभाते देशिकः शुद्धो भानुपूजान्तरेषु च[९]।
देवमुद्धृत्य हस्ताग्रे गर्भगेहं प्रवेशयेत् ॥ ५४ ॥

---

१. 46c जलं] A², G, इदं A¹.
२. 47d °कर्पूरागरु°] A¹, °कर्पूरं गन्ध° A², G.
३. 48d स्वायुधानुपचारवत्] Eds, स्वयुधो उपचारवत् A¹, स्वस्वयुधोपचारवत् A², G.
४. 49a °देवेशे] A², G, °देवेशो A¹.
५. 50c °गीतेषु] A², G, °गन्तेषु A¹.
६. 51d परब्रह्माणि लक्ष्मि च] A, परब्रह्माभिलक्ष्य च G.
७. 52a सुमना शक्त्यै] Eds, सुमना भक्त्यै A, सुमनो भक्त्यैः G.
८. 53c नासि] A, नासी G ; 53d नासि°] A, नासी° G.
९. 54b भानुपूजान्तरेषु] Eds, भानुः पूजान्तरेषु A¹, भानुर्भूजान्तरेषु A², G.

अर्धयामविधिः प्रोक्तो वेदिविधिरथोच्यते[१]।

[५. नैवेद्यविधिः]

[५.१. परमान्नम्]

वसुद्रोणं गवां क्षीरं चतुर्द्रोणं च तण्डुलम्[२]॥ ५५॥
शिवद्रोणं गुलोपेतं मरीचीजीरकद्वयम्[३]।
मुष्टिमात्रसमं प्रोक्तं परमान्नमिति स्मृतम्[४]॥ ५६॥

[५.२. दिव्यान्नम्

कलाद्रोणं गवां नीतं पयसा शुक्लवस्त्रवत्[५]।
शोधयेत्तत्र मध्ये तु शुद्धमासीहृदन्तवत्॥ ५७॥
युगद्रोणं तथा प्रोक्तं द्रोणपूर्णं तु शर्करा।
कदलीफलशताष्टौ द्रोणार्धं घृतशुद्धवत्॥ ५८॥
संपादयेद्धरप्रीतिं दिव्यान्नमिह चोच्यते।

[५.३. पायसान्नम्]

कपिलाक्षीरसद्रोणं द्रोणार्धं शालिकोद्भवम्[६]॥ ५९॥
सैन्धवं च त्रिमुष्टिस्तु संपयेदीश्वरप्रियम्।
पायसान्नमिति प्रोक्तं सारभूतमथोच्यते॥ ६०॥

[५.४. सारभूतम्]

अपूपं रससुखी च तिलमोदकमेव च[७]।
गोधूमादौशिकं मुद्गं महिनाथा तु तेन च[८]॥ ६१॥
वलयं नागभूतेषु सेन्द्रवृत्तसमावृतम्[९]।

---

१. 55b तत्र वेदिविधोच्यते] A^1, G, तत्र वेदीविधिरुच्यते (*v.f.*) A^2.

२. 55c क्षीरं च°] G, क्षिरैश्च° A.

३. 56a गुलोपेतं] A, गुलोत्पन्ने G.

४. 56c मुष्टिमात्रसमं] G, मुष्टिमात्रं सह A^1, अष्टमात्रं +ह A^2.

५. 57a गवां नीतं] G, गवाण्णीलं A.

६. 59d शालिकोद्भवम्] G, शोलिकोद्भवम् A^1, शोलकोप्लभम् A^2.

७. 61a रससुखी] A^1, G, +स+ली A^2; च] Eds, चैव (*v.f.*) A (etc.).

८. 61d महि°] A, अहि° G ; तु तेन] A^1, कृतेन A^2.

९. 62b सेन्द्रवृत्तसमावृतम्] A^1, सेन्दुवृत्तसमायुतम् A^2, सेन्द्रवृत्ते समयुतम् G.

इड्डुलीमोदकस्थूलैर्विदध्यादर्धयामके[१] ॥ ६२ ॥
कलानालीजलैर्युक्तं इक्षुसारो मुखत्रयम्[२] ।
वेदयित्वोपचाराद्यैस्ताम्बूलमुखवासकैः ॥ ६३ ॥
दधिक्षीरमधुद्राक्षा वेदयेत्सुमनोरमे[३] ।

[६. क्षेत्रपालार्चनम्]

[६.१. क्षेत्रपालनैवेद्यम्]

लाजं कपित्थसंयुक्तं कृसरान्नं गुलान्नवत्[४] ॥ ६४ ॥
शुद्धान्नं क्षेत्रपालस्य इक्षुसारोदकं ददेत्[५] ।
क्षेत्रपालप्रियं दद्यात्पूजान्ते क्षेत्रमर्चयेत् ॥ ६५ ॥

[६.२. क्षेत्रपालध्यानम्]

क्षेत्रेशं क्षेत्रसिद्धिं च क्षेत्रज्ञं शिवरूपकम् ।
क्षेत्रपालं सदा ध्यात्वा पूजान्ते क्षेत्रं भावयेत् ॥ ६६ ॥
एकवक्त्रं त्रिनेत्रं च शिरोमुण्डितमेव च ।
योगपद्मासनस्थं च पद्महस्तं भयानकम् ॥ ६७ ॥
[६]वामोरुमूलहस्तस्थं शिरोमालाविभूषितम् ।
श्यामलं शुक्लवस्त्राढ्यं शिरोमालाविभूषितम्[७] ॥ ६८ ॥
एवं ध्यात्वा समभ्यर्च्य शृणुष्वेव हुताशन ।
वशकेशमहामन्त्रं धूपदीपानि दापयेत्[८] ॥ ६९ ॥
आयुरारोग्यमैश्वर्यं सर्वशत्रुविनाशनम् ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धयामार्चनपटलः [पञ्चविंशतितमः][९] ॥

---

१. 62d °विदध्या°] G, °विदद्या° A ; °यामके] A², G, °यज्ञके A¹.

२. 63a °जलैर्युक्तं] A², G, °जलेऽप्युक्तं A¹.

३. 64a °द्राक्षा] A², °द्राज्यौ A¹, °द्राज्यं G.

४. 64c कपित्थसंयुक्तं] A², G, कपित्थं संसक्तं A¹ ; 64d कृसरान्नं] G, कृसरान्न° A.

५. 65a °पालस्य] A, °पालं स्याद् G ; 65b ददेत्] A, भवेत् G.

६. A¹ répète 66cd avant 68ab.

७. 68d °विभूषितं] A, °विराजितम् G.

८. 69c वशकेशमहामन्त्रं] A, वक्ष्याम्यहं महामन्त्रं G ; 69d °दीपानि] A, °दीपौ च G.

९. A : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धयामार्चनपटलः ।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धयामार्चनविधिपटलः समाप्तः ।

[षड्विंशतितमः पटलः]
[अर्चनाङ्गविधिः[१]]

अथातः संप्रवक्ष्यामि अर्चनाङ्गविधिक्रमम्[२]।

[१. पञ्चदशार्चनाङ्गानि]

स्नानं वस्त्रं च गन्धं च पुष्पं चैव यथाक्रमम्॥ १॥
पाद्यमाचमनं चार्घ्यं धूपदीपं निवेद्यकम् ।
बलिं नित्योत्सवं चैव शुद्धनृत्तं तथैव च[३] ॥ २॥
गीतवाद्यसमायुक्तं पञ्चाधिकदशं भवेत्[४]।

[२. अर्चनादिभेदाः]

दीपान्तमर्चनं प्रोक्तं हविष्यन्तं तु पूजनम्[५] ॥ ३॥
बल्यन्तं शान्तिकं प्रोक्तं नृत्तान्तं सर्वसिद्धिदम्।

[३. अर्चनाङ्गलक्षणानि]

[३.१. स्नानम्]

वाप्यां वापि तटाके वा कूपे वा तोयसंग्रहम्[६] ॥ ४॥
[७]जलभण्डेन संपूर्य वस्त्रपूते हृदा भवेत्।
उशीरं चन्दनं चैव कोष्ठं वै पिष्टकेन तु ॥ ५॥
तत्तोयं पूरयेन्मन्त्री शिवमन्त्रैः शिवाङ्गकैः[८]।
तत्तोयेनाभिषेकं तु पञ्चब्रह्मशिवाङ्गकैः[९] ॥ ६॥

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 1a अथातः सं°] A^1, अतः परं A^2, F^1, G.

३. 2c बलिं नित्योत्सवं चैव] A, G, बलिनित्योत्सवं चैव F^1. .

४. 3a गीत°] A, F^1, गीतं G ; 3b पञ्चाधिकदशं] A, G, पञ्चाधिकशतं F^1.

५. 3c दीपान्तमर्चनं] A, दीप्यान्तमाचमनं (*v.f.*) F^1 ; 3d पूजनम्] A, F^1, भोजनम् G.

६. 4c वाप्यां] A, G, नद्यां F^1 ; 4d तोयसंग्रहम्] A, G, योतसंग्रहम् F^1.

७. A et G omettent 5ab-5cd.

८. 6a °मन्त्री] G, °मन्त्रं A, F^1 ; 6b शिवाङ्गकैः] A^1, F^1, शिवाङ्+कैः A^2.

९. 6c तत्तोयेनाभिषेकं] Eds, तत्तोयमभिषेकं A (etc.).

[३.२. वस्त्रम्]

हस्तैर्द्वादशभिर्युक्तं विस्तारं पञ्चतालकम्[१] ।
सुश्लक्ष्णं सूक्ष्मवस्त्रं च युग्मवस्त्रं तु दापयेत्[२] ॥ ७ ॥
वस्त्रयुग्मेति मन्त्रेण वस्त्रमाच्छादयेच्छिवम् ।

[३.३. गन्धम्]

चन्दनागरुकुष्ठं च कर्पूरं गन्धमालिपेत्[३] ॥ ८ ॥

[३.४. पुष्पम्]

राजसं सात्विकं चैव तामसं चैव मिश्रकम्[४] ।
रक्तोत्पलं रक्तपद्मं करवीरं तिलं भवेत् ॥ ९ ॥
राजसानि च पुष्पाणि प्रातःकाले प्रदापयेत्[५] ।
नन्द्यावर्तं श्रियावर्तं श्वेतार्कं श्वेतलोध्रकम्[६] ॥ १० ॥
श्वेतपद्मं च मन्दारं द्रोणपुष्पं च माधवीम्[७] ।
मध्याह्ने सात्विकं ह्येतत् पुष्पं दद्याच्छिवस्य तु[८] ॥ ११ ॥
मल्लिका धूर्धुरं चैव चम्पकं कृष्णमल्लिका[९] ।
कनकानि कदम्बानि रात्रौ ददाति शङ्करे[१०] ॥ १२ ॥
नन्द्यावर्तं द्विकर्णी च रक्तोत्पलं च धातकी[११] ।

---

१. 7a हस्तैर्द्वादशभिर्युक्तं] A, G, हस्ते द्वादशसंयुक्तं F^1.

२. 7c सुश्लक्ष्णं] A, G, सुलक्षणं F^1.

३. 8c चन्दनागरुकुष्ठं] A^2, G, चन्दनागरुकाष्ठं A^1, चन्दनागरुकोष्ठं F^1.

४. 9a सात्विकं] A, G, शान्तिकं F^1 ; 9b चैव मिश्रकम्] A, G, मिश्रकं भवेत् F^1.

५. 10a च पुष्पाणि] A, G, व पुष्पाणि F^1 ; 10b प्रदापयेत्] A, निवेदयेत् F^1, च दापयेत् G.

६. 10c श्रियावर्तं] A^2, F^1, G, शिलावर्तं A^1 ; 10d श्वेतार्कं] A^2, F^1, G, lacune A^2 ; श्वेतलोध्रकम्] A, वै त्रिसन्धिषु F^1, G.

७. 11b माधवीम्] F^1, माधुरम् A^1, माधवी A^2, G.

८. 11c ह्येतत्] A, G, चैव F^1.

९. 12a धूर्धुरं] A^1, G, धुर्धुरं A^2, धूर्धूरकं F^1 ; 12b चम्पकं] A, G, व++प F^1.

१०. 12c कनकानि A, G, कर्णिकादीनि (*v.f.*) F^1 ; 12d ददाति शङ्करे] A^2, G, ददति शङ्करे A^1, देशा निशाकरे F^1.

११. 13a नन्द्यावर्तं द्विकर्णी च] A^2, G, नन्द्यावर्तं द्विकीर्णी च A^1, नन्द्यावर्तद्विकर्णी च F^1 ; 13b च धातकी] A, G, चार्धरात्रिकम् (*v.f.*) F^1.

द्रोणं च श्वेतपद्मं च जाती च गिरिकर्णिका[१] ॥ १३ ॥
नन्द्यावर्तं श्रियावर्तं मन्दारं शतपत्रिका[२]।
श्वेतार्कं मालती चैव पुन्नागं कुरवं तथा[३] ॥ १४ ॥
एवमादीनि पुष्पाणि सात्विकानि विनिर्दिशेत् ।
रक्तोत्पलं तथा पद्मं बृहती दूरपाटली[४] ॥ १५ ॥
एवमादीनि पुष्पाणि राजसानि विनिर्दिशेत्।
कर्णिका धूर्धुरं चैव शिरीषं केतकी तथा[५] ॥ १६ ॥
[६]लाङ्गली च विहीती च बन्धूकं जपवासती[७]।
किंशुका मदयन्ती च कुमुदानि विवर्जयेत्[८] ॥ १७ ॥
[९]अतिपक्वमपक्वं च मुकुलं च विवर्जयेत्।
कृष्णवर्णानि पुष्पाणि तामसानि विनिर्दिशेत्[१०] ॥ १८ ॥
तामसेषु च पुष्पेषु श्रीमन्नीलोत्पलं वरम्[११]।
केशकीटोपविद्धानि त्यजेत्पर्युषितानि च[१२] ॥ १९ ॥
लूतसूत्रावृतानि च स्वयं पतितमेव च[१३]।

---

१. 13d जाती च गिरिकर्णिका] A, G, जाति च कर्णिका (*v.f.*) F^1.

२. 14b शतपत्रिका] A, G, शतपत्रकम् F^1.

३. 14c श्वेतार्कं मालती A, श्वेतार्कं मालतीं G, श्वेतार्कमालिका F^1 ; 14d कुरवं] A, G, करेवं F^1.

४. 15d बृहती] A^1 (etc.), प्रभूतं F^1 ; दूरपाटली] Eds, ढूरपाटली] A^1, धुर्धुरपाटली (*v.f.*) A^2, G, धूरपाटलम् F^1.

५. 16c धूर्धुरं] A^1, G, धुर्धुरं A^2, धूर्धूरकं (*v.f.*) F^1 ; 16d शिरीषं केतकी] A, G, चम्पकं कुरवं F^1.

६. F^1 insère entre 16cd et 17ab : एवमादीनि पीतानि मिश्रकाणि विनिर्दिशेत्। करजं वाकुलं चैव शिरीषं केतकं तथा॥

७. 17a लाङ्गली च विहीती च] A, G, लाकुली च वितीति+ F^1 ; 17b बन्धूकं जपवासती] A^1, बन्धूकं जपसासती A^2, +धूकजपसासिकम् F^1, बन्धूकं जपलात्पती G.

८. 17c मदयन्ती] A^1, F^1, G, मदयन्द्री A^2 ; 17d विवर्जयेत्] A, G, च वर्जयेत् F^1.

९. A^2 omet 18ab.

१०. 18c °वर्णानि पुष्पाणि] A, G, °वर्णं तु ये पुष्पा F^1 ; 18d तामसानि विनिर्दिशेत्] A^2, तामसां निविनिर्दिशेत् A^1, तामसानि विवर्जयेत् F^1.

११. 19a तामसेषु च पुष्पेषु] A, G, तानि वर्णानि पुष्पाणि F^1 ; 19b वरम्] A, G, परम् F^1.

१२. 19d पर्युषितानि] A^1, F^1, G, पर्यूषितानि A^2.

१३. 20a °सूत्रावृतानि] A^2, G, °सूतावृतानी A^1, °सूत्रवृतानी F^1.

वर्जयेत्तान्प्रयत्नेन सर्वशास्त्रेषु निश्चितम्[१] ॥ २० ॥
शमीबिल्वमपामार्गं कुशदूर्वासहा तथा[२]।
नागनन्दी रुद्रपर्णी धातकी तुलसी तथा[३] ॥ २१ ॥
भद्री चैव महाभद्री द्रोणपत्रं तथैव च[४]।
पत्रजातिषु सर्वेषु बिल्वपत्रं प्रशस्यते[५] ॥ २२ ॥
त्रैवर्णं पुष्पमेवोक्तं पाद्यार्घ्याचमनं शृणु[६]।

[३.५. पाद्यम्]

सर्वदूर्वा सिता सिद्धा सिता दूर्वा च जाति च[७] ॥ २३ ॥
शङ्खपुष्पं च पद्मं च पाद्यं वै परिकल्पयेत्[८]।

[३.६. आचमनम्]

एलालवङ्गकर्पूरफलत्रयमुरं तथा[९] ॥ २४ ॥
सरित्रपत्रसंयुक्तं तथा चाचमनं तथा[१०]।

[३.७. अर्घ्यम्]

आपःक्षीरकुशाग्रैश्च साक्षतैर्यवतण्डुलैः[११] ॥ २५ ॥
तिलैः सिद्धार्थकैर्युक्तमर्घ्यमष्टाङ्गमुच्यते[१२]।

---

१. 20d सर्वशास्त्रेषु निश्चितम्] A, G, यथाशास्त्रस्य निश्चयात् F^1.

२. 21a शमीबिल्व°] F^1, शिरीबिल्वी° A^1, शिदीबिल्व° A^2, शिरिबिल्व° G ; 21b °दूर्वासहा तथा] Eds, °द्वायस एव च A, °दूर्वस एव च F^1, lacune G.

३. 21c °पर्णी] A, G, °पाणी F^1.

४. 22b °पत्रं] A^1, F^1, °भद्रं A^2, G.

५. 22d प्रशस्यते] F^1, विनिर्दिशेत् A, G.

६. 23a त्रैवर्णं] A^2, F^1, G, त्र्यैवर्णं A^1; 23b पाद्यार्घ्याचमनं] A, G, पाद्यमाचमनं F^1.

७. 23c सर्वदूर्वा सिता सिद्धा] A^1, सर्वदूर्वा सितसिद्धां A^2, सदूर्वा सितसिद्धार्थं F^1, G ; 23d सिता दूर्वा] A^1, सितदूर्वा A^2, F^1, G.

८. 24a पद्मं] A, G, पद्मी F^1 ; 24b वै परिकल्पयेत्] A, F^1, चैव प्रकल्पयेत् G.

९. 24c °कर्पूर°] A, F^1, °कर्पूरं G ; 24d °फलत्रयमुरं] A, G, °फलं तु मुखं F^1.

१०. 25a सरित्रपत्रसंयुक्तं] A^1, G, सरित्रपसंयुक्तं A^2, त्रित्रपत्रसमायुक्तं F^1 ; 25b चाचमनं तथा] A, G, चैवाचमनं भवेत् (*v.f.*) F^1.

११. 25c आपः°] Eds., आपु° A^1, आप° A^2 (etc.) ; °कुशाग्रैश्च] A^1, G, °कुशाग्रैश्चा° A^2, °क्षीरकुशाग्रस्य (*v.f.*) F^1 ; 25d साक्षतै°] Eds, चाक्षतै° A^1, °क्षतै° (*v.f.*) A^2, अक्षतै° F^1, lacune G ; °तण्डुलैः Eds, °तण्डुलम् A (etc.).

१२. 26a तिलैः] F^1 तिल° A, G ; °कैर्युक्तम्] A, G, °कैश्चैव F^1.

[३.८. धूपः]

अगरु चैकभागं स्यान्निर्यासं द्विगुणं भवेत्[१] ॥ २६ ॥
चन्दनं द्विगुणं हीषत् कृत्वा कर्पूरसंयुतम्[२] ।
शीतारी नाम धूपं तु मधुना च परिप्लुतम् ॥ २७ ॥
एवं धूपं वरं श्रेष्ठमुत्तमं धूपमिष्यते[३] ।
गुग्गुलुं घृतसंयुक्तं मध्यमं धूपमिष्यते[४] ॥ २८ ॥
कोष्ठं वा चन्दनं वापि मधुना घृतसंयुतम् ।
अधमं धूपमेवोक्तं त्रिविधं धूपमिष्यते[५] ॥ २९ ॥

[३.९. दीपः]

गोघृतं चैव तैलेन कर्पूरावर्तितं शुभम्[६] ।
चतुस्त्रिद्व्यङ्गुलायामा दीपज्वाला भविष्यति[७] ॥ ३० ॥
दीपप्रियो महादेवो देवदेवः सदाशिवः[८] ।

[३.१०. नैवेद्यम्]

[९]शाल्यन्नमुत्तमं विद्यादलाभे व्रीहिरेव च[१०] ॥ ३१ ॥
यववेणुप्रियङ्गुं च हविस्तत्र निवेदयेत्[११] ।
प्रस्थं प्रतिपलं चैव सोपदंशं निवेदयेत्[१२] ॥ ३२ ॥

---

१. 26c °भागं स्यान्°] A, G, °भागस्यां F^1.

२. 27a चन्दनद्विगुणं हीषत्] A, चन्दनत्रिगुणं मीषत् F^1, चन्दनं द्विगुणं चेषत् G ; 27b कृत्वा] A, G, तु वा F^1 ; °संयुतम्] F^1, G, °संयुक्तम् A.

३. 28a एवं धूपं वरं] A^1, G, एवं धूपपरं A^2, एतधूपवरं F^1.

४. 28c गुग्गुलुं] A^1, गुल्गुल° A^2, गुत्गुलुं F^1, गुल्गुलु° G.

५. 29c °वोक्तं] A, G, °वाग्नि° F^1 ; 29d त्रिविधं] A, G, स्त्रिविधं F^1.

६. 30a गोघृतं चैव तैलेन] A, गोघृतेन च कर्पूरा] F^1, गोघृतं चैव मेलेन G ; 30b कर्पूरावर्तितं] A, +++वर्त्तितं F^1, कर्पूरावर्तिता G.

७. 30d दीपज्वाला भविष्यति] A^2, G, द्वीपज्वाला भविष्यति A^1, दीपज्वाला भविष्यते F^1.

८. 31a महादेवो] A^1, G, महादेव° A^2, मयाप्येवं F^1 ; 31b देवदेवः सदाशिवः] A, G, देवदेवं सदाशिवम् F^1.

९. G omet 31c (fin)-33c (début).

१०. 31c शाल्यन्न°] A^2, F^1, शाल्यान्न° A^1, शाल्य° (?) G ; 31d °रेव च] A, °रन्यतः F^1.

११. 32a °प्रियङ्गुं च] A^1, °प्रियङ्गुश्च A^2, °प्रियङ्गं च F^1.

१२. 32d सोपदंशं] A, उपदंशं F^1.

[३.११. नित्योत्सवादिवाद्यान्तम्]

नित्योत्सवं त्रिसन्ध्यं च शुद्धनृत्तं तथैव च[१]।
गीतवाद्यसमायुक्तं पूजयेद्दशपञ्चकैः ॥ ३३॥

॥ [२]इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाङ्गविधिपटलः [षड्विंशतितमः][३]।

१. 33a त्रिसन्ध्यं] F[1], त्रिसन्धिं A.

२. F[1] insère entre 33d et le colophon : अर्चनाङ्गविधिं प्रोक्तं मुद्राणां लक्षणं शृणु ।

३. A, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्चनाङ्गविधिपटलः।
F[1] : इति दीप्त++प्रतिष्ठायाद्विसप्तती चार्चनाङ्गपटलः।

[सप्तविंशतितमः पटलः]
[घृतस्नानविधिः[१]]

अतः परं प्रवक्ष्यामि घृतस्नानविधिं परम्।

[१. घृतस्नानफलम्]

आयुरारोग्यदं चैव पुत्रश्रीकीर्तिवर्धनम्[२] ॥ १॥
राजा विजयमाप्नोति सर्वराष्ट्रविवर्धनम्।

[२. मण्डपः]

प्रासादस्याग्रतः कुर्यान्मण्डपं चाष्टहस्तकम्॥ २॥
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्।
पूर्णकुम्भयुतं चाग्रे वितानध्वजशोभितम्[३] ॥ ३॥
दर्भमालासमायुक्तं मुक्तादामैर्विभूषितम्[४]।
पुष्पमालासमायुक्तं स्तम्भैश्च परिवेष्टितम्[५] ॥ ४॥
दर्पणोदरसंकाशम् अष्टमङ्गलशोभितम्[६]।
गोमयालेपनं कृत्वा सूत्रपातं तु कारयेत्[७] ॥ ५॥

[३. मण्डलम्]

त्रयोदशानि सूत्राणि प्राङ्मुखोदङ्मुखक्रमात्।
शताधिकानि चत्वारि चत्वारिंशत्पदं भवेत्[८] ॥ ६॥
मध्यमं षोडशपदं बाह्यमेकावृतं त्यजेत्।
अष्टद्वाराणि संकल्प्य चतुर्विंशत्पदं भवेत्[९] ॥ ७॥

---

१. Manuscrits utilisés : A¹, A², F¹, G.

२. 1c °रोग्यदं चैव] A, F¹, °रोग्यमैश्वर्यं G.

३. 3c °कुम्भयुतं] A, G, °कुम्भोदकं F¹.

४. 4b °दामैर्विभूषितम्] A, F¹, °दामैरलङ्कृतम् G.

५. 4d स्तम्भैश्च] Eds, स्तम्भानां A (etc.) ; परिवेष्टितम्] A, G, परिवेष्टनम् F¹.

६. 5b अष्टमङ्गलशोभितम्] A, G, मङ्गलाष्टकसंयुतम् F¹.

७. 5d सूत्रपातं तु] G, सूत्रं च तन्तु A, सूत्रपादं तु F¹.

८. 6cd चत्वारि चत्वा°] A, G, च चतुश्चत्वा° F¹.

९. 7c संकल्प्य] A, G, संप्रोक्ष्य F¹ ; 7d विंशत्पदं] A, G, विंशच्छतं F¹.

दिशासु द्वादशपदं विदिशासु नवो भवेत्[१]।
एवं कृते पदे सम्यक् स्थण्डिलं कारयेद्बुधः ॥ ८ ॥

[४. स्थण्डिलम्]

चतुःप्रस्थोत्तमं व्रीहिस्त्रिप्रस्थं मध्यमं भवेत्[२]।
द्विप्रस्थमधमं प्रोक्तं तदर्धं तण्डुलं भवेत् ॥ ९ ॥
तदर्धं तिलमेवं तु लाजदर्भैः समन्वितम्[३]।

[५. कुम्भस्थापनादि]

शातकुम्भं शतं चैवं बिम्बप्रभसमन्वितम्[४] ॥ १० ॥
तन्तुना चित्रितान्कुम्भान् त्रिद्विरेकक्रमेण तु[५]।
क्षालयेद्धृतिमान्मन्त्री साधयेत्तु विशेषतः[६] ॥ ११ ॥
[७]कपिलागोघृतेनैव वेदप्रस्थं प्रपूरयेत्।
सकूर्चं सापिधानं च सवस्त्रं पल्लवैर्युतम्[८] ॥ १२ ॥
स्थण्डिलं चार्चयेत्पश्चात्स्थापयेत्तु विचक्षणः।
शतरुद्राधिदैवत्यमेकैकं चार्चयेत्क्रमात्[९] ॥ १३ ॥
प्रणवादिचतुर्थ्यन्तं स्वनामाद्येन पूजयेत्[१०]।
गन्धपुष्पादिना पूज्य पश्चाद्धोमं समाचरेत् ॥ १४ ॥

[६. होमः]

चतुर्दिक्षु चतुर्होमं कुर्यादध्ययनं तथा।
समिदाज्यचरुं लाजान्सर्षपांश्च यवांस्तिलान्[११] ॥ १५ ॥

---

१. 8b विदिशासु नवो] (*m.c.*) A, G, दिशासु नवमं F^1.

२. 9a चतुःप्रस्थोत्तमं] Eds., चतुःप्रस्थुत्तमं A^1, चतुप्रस्थमुत्तमं (*v.f.*) A^2, F^1, G.

३. 10b लाजदर्भैः] A^2, F^1, G, लाजं दर्भैः A^1.

४. 10c शतं चैवं] A, G, दृढं चैव F^1 ; 10d बिम्बप्रभ°] A^1, F^1, G, हि च प्रभ A^2.

५. 11b त्रिद्विरेकक्रमेण तु] A, सूत्रेणैकेन तन्तुना F^1, त्रिद्विरेखः क्रमेण तु G.

६. 11c °तिमान्°] A^1, G, °दिना A^2, °दया F^1 ; 11d विशेषतः] A, G, विचक्षणम् F^1.

७. Le passage 12ab-13ab ne se trouve que dans F^1.

८. 12d पल्लवै°] Eds., पालवै° F^1.

९. 13d °क्रमात्] A, G, °बुधः F^1.

१०. 14b स्वनामा°] A, F^1, स्वनाम्ना° G.

११. 15c लाजान्स°] A^2, F^1, G ; लाजास° A^1.

समिधः सद्यमन्त्रेण आज्यं वामेन हूयते[१]।
चरुं वै हृदयेनैव लाजं घोरास्त्रमन्त्रतः[२]॥ १६॥
सर्षपं पुरुषेणैव ईशानेन यवं हुनेत्।
तिलं वै कवचेनैव प्रत्येकाष्टशतं हुनेत्॥ १७॥
शतमर्धं तदर्धं वा हूयते क्रमशः पुनः।
द्रव्यान्ते व्याहृतिं हुत्वा स्विष्टं पूर्णाहुतिं तथा[३]॥ १८॥

[७. दक्षिणा]

आचार्यं पूजयित्वा तु वस्त्रहेमाङ्गुलीयकैः।
मूर्तिपान्पूजयेत्पश्चात्तदन्तेऽध्यायिनां ददेत्[४]॥ १९॥

[८. स्नानम्]

ततो गर्भगृहं गत्वा लिङ्गशुद्धिं समाचरेत्।
गन्धपुष्पादिना पूज्य कुम्भमुत्थापयेद्बुधः॥ २०॥
महाव्योमेति मन्त्रेण स्नापयेत्परमेश्वरम्।
[५]गन्धोदकाभिषेकं तु अर्चयित्वा यथाविधि[६]॥ २१॥
फलभक्ष्यादिनैवेद्यं व्यूहे व्यूहे प्रति प्रति।
प्रभूतं च हविर्दद्यात्स्नपनान्ते विचक्षणः[७]॥ २२॥
ताम्बूलं दापयेत्पश्चान्मुखवाससमन्वितम्।

[९. घृतस्नानफलम्]

विसृज्य सर्वपापानि शिवलोके महीयते[८]॥ २३॥
कल्पकोटिसहस्राणि महाभोगसमन्वितः।

---

१. 16a समिधः] A, समिधा F^1, G.

२. 16c वै हृदयेनैव] F^1, चैव हृदेनैव A, चैव हृदा चैव G ; 16d लाजं घोरास्त्रमन्त्रतः] A, G, लाजा घोरास्त्रमेव च F^1.

३. 18c द्रव्यान्ते] A, G, मख्यान्ते F^1 ; 18d तथा] A, G, ततः F^1.

४. 19d ऽध्यायिनां ददेत्] G, ऽध्यायिनां ददत् A^1, ध्यायिन्ददेत् (*v.f.*) A^2, स्थयनां ददेत् F^1.

५. F^1 intercale entre 21ab et 21cd : शुद्धिं कृत्वा तु धूपान्ते उष्णोदकमथाचरेत्।

६. 21d अर्चयित्वा] A, G, अर्चयेत्तु F^1.

७. 22c प्रभूतं च] A, G, प्रभूतेन F^1.

८. 23c विसृज्य] A, G, विधूय F^1.

पुण्यक्षयात्परिभ्रष्टो राजा भवति धार्मिकः[१] ॥ २४ ॥
घृतस्नानविधिः प्रोक्तः क्षीरस्नानविधिं शृणु[२] ॥ २५ ॥

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे घृतस्नानविधिपटलः [सप्तविंशतितमः][३] ॥

---

१. 24c पुण्यक्षयात्प°] G, पुष्यक्षयात्प° A, पुण्यक्षयाप° F^1.

२. 25b क्षीरस्नान°] A, G, जलधारा° F^1.

३. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आज्यस्नानविधिपटलः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां घृतस्नानं नाम पञ्चाशत्पटलः।
G : इति दीप्तशास्त्रे क्रियापादे घृतस्नानविधिपटलः।

[अष्टाविंशतितमः पटलः]
[क्षीरस्नानविधिः[१]]

[२]अतः परं प्रवक्ष्यामि क्षीरस्नानविधिक्रमम्।
आयुरारोग्यफलदं सर्वव्याधिविनाशनम्॥ १॥
पुत्रपौत्रविवृद्ध्यर्थं लोकशान्तिकरं परम्[३]।

[१. त्रिविधस्नानम्]

सङ्कीर्णं च विकीर्णं च संयोगं च त्रिधा भवेत्॥ २॥
पूर्वं क्षीरं परिग्राह्य स्नापयेद्विधिना सह[४]।
एतत्सङ्कीर्णमित्युक्तं विकीर्णं च ततः शृणु[५]॥ ३॥
[६]शिवागारं समानीय स्रावयेद्गां नवे घटे[७]।
धारोष्णेन समायुक्तं स्नापयेल्लिङ्गमूर्धनि[८]॥ ४॥
[९]एतद्विकीर्णसंज्ञेयं संयोगं च ततः शृणु।
याज्ञिकं वृक्षमादाय चतुष्पादानि कल्पयेत्[१०]॥ ५॥
लिङ्गोपरि दशाङ्गुल्यं चतुष्पादाद्युच्चकं स्मृतम्[११]।
तन्मध्ये पद्ममालिख्य तन्मध्ये सुषिरं भवेत्[१२]॥ ६॥
तन्मध्ये तु न्यसेद्धीमान्कुम्भं न्यस्त्वा सरत्नकम्।

---

१. Manuscrits utilisés : A[1], A[2], F[1], G, J. "NRB" renvoie aux leçons des vers 10-15 et 17-18ab cités par N.R. Bhatt (*Ajitāgama* t. I p. 387 note 13.)

२. A et G omettent 1ab-7ab.

३. 2b लोक°] F[1], लोकं J.

४. 3a पूर्वं] F[1], पूर्णं J ; 3b स्नापयेद्वि°] Eds, स्थापयेद्वि° F[1], J.

५. 3c एतत्सङ्कीर्णमित्युक्तं] J, क्षीरस्नानं भवेदेतद्° F[1].

६. F[1] donne cette version de 4ab : शिखया गां समानीय स्रुवे त्वां स्थापयेद्घटे।

७. 4b स्रावयेद्गां] Eds, स्रावये स्वा° J.

८. 4c धारोष्णेन] F[1], धाराष्णो स J.

९. F1 omet 5cd-6ab et donne cette version de 5ab : एतद्विकीर्णं सज्य फलका वृत्तं च चतुरश्रकम्।

१०. 5c याज्ञिकं वृक्ष°] Eds, याज्ञिकैर्वृक्ष° J.

११. 6a °द्युच्चकं] Eds, °द्युच्चवं J.

१२. 6c भवेत्] F[1], कुरु J.

[१]एतत्संयोगमित्युक्तं शान्तिहोमसमन्वितम्॥ ७॥

[२. गोस्तुतिः]

[२.१. पञ्च गावः]

गावः शिवपुरात्पञ्च क्षितिं प्राप्ताः शिवार्चने[२]।
नन्दा भद्रा च सुमना सुरभी च सुशीलका[३]॥ ८॥
कपिला कृष्णा धूम्रा च रक्ता श्वेता तथैव च।
नन्दादिसुमनान्तं स्याद्वर्णमेतत्प्रकीर्तितम्[४]॥ ९॥
देवानां यजनार्थाय सर्वलोकहिताय च[५]।
गोमातरः स्मृता भूमौ स्नानार्थं तु शिवाज्ञया[६]॥ १०॥

[२.२. गोषु देवादिस्थितिः]

गोषु देवाः स्थिता नित्यं गोभिर्यज्ञः प्रवर्तते[७]।
ब्रह्मविष्णू स्थितौ नित्यं शृङ्गमूले व्यवस्थितौ[८]॥ ११॥
शृङ्गाग्रे तु स्थितास्तीर्थाः स्थावरं जङ्गमं तथा[९]।
ललाटे षण्मुखः प्रोक्तो ग्रीवामध्ये स्थितो हरः[१०]॥ १२॥
कम्बलाश्वतरौ नागौ नासापुटसमाश्रितौ[११]।

---

१. A^1 place une première fois 8cd entre 7ab et 7cd.

२. 8a गावः] A^2, F^1, G, भवः A^1, गंवत् (?) J ; शिवपुरात्प°] A, G, J, शिवपुरं प° F^1 ; 8b पञ्च क्षितिं] A, पञ्च क्षीरं, F^1, पञ्च क्षिति G, पञ्चार्चित° J ; प्राप्ताः] A, F^1, प्राप्ता G, J ; शिवार्चने] A, G, J, शिवेन वा F^1.

३. 8c च सुमना] A^1 (var.), F^1, J, सुमनसा A^1 (etc.), lacune G ; 8d सुशीलका] A (etc.), सुशीलिका J.

४. 9c सुमनान्तं स्याद्°] F^1, सुमनान्तः स्याद्° A, सुमनान्ता स्याद्° G, सुमनान्तस्य J.

५. 10a देवानां] A (etc.), देवता J ; 10b सर्वलोक°] A, G, देवानां च F^1.

६. 10c गोमातरः स्मृता भूमौ] Eds, गावो माता स्मृता भूमौ A^1, गावो माता +तौ भूमौ A^2, गोमाता स्थिता भूमौ (*v.f.*) F^1, गावो मातरः स्मृता भूमौ (*v.f.*) G, गावो माता स्थिता शुभ्रा J ; 10d शिवाज्ञया] A, G, J, शिवाय च F^1.

७. 11a गोषु] A^1, F^1, J, गोष्ठ° A^2, G ; देवाः स्थिता] F^1, J, देवाः शिवा A, G ; नित्यं] A (etc.), नित्या J ; 11b °यज्ञः] NRB, °यज्ञं A, F^1, G, °यज्ञा J.

८. 11c ब्रह्मविष्णू स्थितौ] NRB, ब्रह्मा विष्णुः स्थितौ A, G, ब्रह्मविष्णुस्थितं F^1, ब्रह्मं विष्णुं स्थितं J ; 11d व्यवस्थितौ] A, G, गवां भवेत् F^1, स्थितं भवेत् J.

९. 12a शृङ्गाग्रे तु] A (etc.), शृङ्गाग्रेषु J ; स्थितास्तीर्थाः] A, G, स्थितं नित्यं F^1, स्थिततीर्थं J ; 12b स्थावरं जङ्गमं तथा] A, G, स्थावरत्वं चराचरम् F^1, स्थावरं जङ्गमं परम् J.

१०. 12c षण्मुखः प्रोक्तो] A^2, G, षण्मुखं प्रोक्तं A^1, F^1, J ; 12d ग्रीवामध्ये] A, G, J, शृङ्गमध्ये F^1 ; स्थितो हरः] A^2, G, J, स्थितौ हरः A^1, हरस्थितः F^1.

११. 13a कम्बलाश्वतरौ] A^2, F^1, G, कम्बलाश्च तरौ A^1, + बलाश्च करौ J.

कर्णयोरश्विनीदेवौ चन्द्रार्कौ चक्षुषोः स्थितौ[1] ॥ १३ ॥
दन्तेषु मरुतो देवा जिह्वायां वरुणः स्थितः[2]।
सरस्वती च हुंकारे यमयक्षौ च गण्डयोः[3] ॥ १४ ॥
खुरमध्येषु गन्धर्वाः खुराग्रेषु च पन्नगाः[4]।
खुराणां पश्चिमाग्रेषु अप्सरोगण एव च[5] ॥ १५ ॥
दशरुद्रान्दशानाड्यां स्थापयेत्सर्वसन्धिषु[6]।
श्रोणीतटस्थाः पितर उरःस्थिता उमा भवेत्[7] ॥ १६ ॥
क्षीरपाने गवां नित्यं राशयो लाङ्गूले तथा[8]।
आदित्यरश्मयो वाले गोमूत्रे जाह्नवी तथा[9] ॥ १७ ॥
ऋषयश्च तथा सर्वे रोमकूपे व्यवस्थिताः।
उदरे पृथिवी देवी भाविता नाभ्यवस्थिता[10] ॥ १८ ॥
चत्वारः सागराः पूर्णा गवामेव पयोधराः[11]।

[३. क्षीरस्नानगुणः]

यद्वीर्यं जगति किञ्चित् तज्ज्ञेयं क्षीरसंभवम्[12] ॥ १९ ॥
तस्मात्सर्वप्रयत्नेन क्षीरस्नानं समाचरेत्।

---

१. 13c °रश्विनी°] A, F^1, J, °रश्विनौ G ; 13d चक्षुषोः] A (etc.), चक्षुषी J.

२. 14a देवा] A, G, देवो F^1, lacune J.

३. 14c च] A^1, G, तु A^2, lacune J.

४. 15a °मध्येषु] F^1, J, °मध्ये च A, G.

५. 15c पश्चिमाग्रेषु] F^1, G, J, पश्चिमाग्रे तु A ; 15d अप्सरो°] F^1, स्वरेषु A, अप्सरसां (*v.f.*) G, स्वराणां J ; गण एव च] A (etc.), गणस्तथा J.

६. 16a दशानाड्यां] A^1, दशानाडि A^1, J, दशानाडिश्च (*v.f.*) A^2, G, दशानाड्य F^1.

७. 16d उरःस्थिता] Eds, उत्तरस्थ A, G, ऊरस(?)स्थ F^1, उरुस्तस्या J.

८. 17b राशयो लाङ्गूले तथा] J, राशयोरङ्गुलिस्थिताः A^1, ईशानयोऽङ्गुलिकाः स्थिताः (*v.f.*) A^2, नां ललाङ्गुलिमाश्रिता F^1, राशयोरङ्गुलस्थिताः G, राशयस्त्वङ्गुलास्तथा J.

९. 17c °रश्मयो] A^2 (etc.), °रश्मयोर् A^1 ; वाले] A, G, वाला F^1, J ; 17d गोमूत्रे] A (etc.), गोमूत्रं F^1.

१०. 18c उदरे] F^1, J, उत्तरे A, G ; 18d नाभ्य°] A (etc.), नाव्य° J.

११. 19a चत्वारः सागराः] Eds, चत्वारामपराः A, चत्वारसागरात् F^1, चत्वार अपरा G, सत्वारः सागरा° J ; पूर्णा] F^1, G, J, पूर्णं A^1, पूर्णाः A^2 ; 19b गवामेव पयोधराः] G, गवां ये च पयोधरा A^1, गवां ये च पयोधराः A^2, गावाह्येषु पयोधराः F^1, गवां ये च पयोधरा J.

१२. 19c यद्वीर्यं जगति] F^1, यदपीडं जगत्° A^1, यदवीर्यं जगत्° A^2, G, J ; 19d तज्ज्ञेयं] A^2, G, J, तदज्ञेयं (*v.f.*) A^1, F^1.

[४. सङ्कीर्णस्नानम्]

[१]सङ्कीर्णं संप्रवक्ष्यामि स्थापकेन समन्वितम् ॥ २०॥

[४.१. मण्डलं स्थण्डिलं च]

प्रागग्रं वसुसूत्रं स्यादुदगग्रं तथैव च।
पदमेकोनपञ्चाशत्तालमात्रेण कल्पयेत्॥ २१॥
मध्ये नवपदं पद्मं तद्बाह्ये षोडशं हरेत्[२]।
बाह्यैकावरणं दिक्षु पदमेकं परित्यजेत्॥ २२॥
एवं कृत्वा विशेषेण स्थण्डिलं शालिभिः कुरु।
प्रत्येकमाढकेनैव शालिभिश्चोत्तमं भवेत्[३] ॥ २३॥
त्रिप्रस्थं मध्यमं ज्ञेयं द्विप्रस्थमधमं भवेत्।

[४.२. कुम्भः कलशाश्च]

द्वात्रिंशत्प्रस्थसंपूर्णमुत्तमं कुम्भमुच्यते[४] ॥ २४॥
चतुर्विंशत्प्रस्थं मध्यं द्रोणपूर्णं तु कन्यसम्[५]।
स्थण्डिलस्योत्तरे पार्श्वे साधयेत्कलशान्क्रमात्॥ २५॥
ऊर्ध्वाधो दर्भयुक्तांस्तु त्रिसूत्रेण च वेष्टयेत्।
हृदयेनैव संप्रोक्ष्य अस्त्रेणैव समुद्धरेत्॥ २६॥
पयसा पूरितं कुम्भं स्थण्डिलोपरि विन्यसेत्।
वारुणं मन्त्रमुच्चार्य मध्यमे तु पदे न्यसेत्[६] ॥ २७॥
सकूर्चान्सापिधानांश्च सवस्त्रान् रत्नसंयुतान्।
अभितः कलशानष्टौ पूरयेत्क्षीरपूरितान्[७] ॥ २८॥
अभितः कलशानष्टौ लोकपालाधिदैवतान्।

---

१. A, G et J terminent le chapitre avec 20ab suivi du colophon.

२. 22b षोडशं] Eds, षड्दं F^1.

३. 23d °श्चोत्तमं] Eds, °श्चोत्तरं F^1.

४. 24d °णमुत्तमं] Eds, °णं मध्यमं F^1.

५. 25a °प्रस्थं] Eds, °कुम्भकं (*v.f.*) F^1.

६. 27d पदे] Eds, पदं F^1.

७. 28d स्थाप°] Eds, पूर° F^1.

आग्नेयादि पदे स्थाप्य वासवादि तथैव च[१] ॥ २९ ॥

[४.३. पूजादिस्नानान्तम्]

गन्धपुष्पादिना पूज्य हृदयेनैव मन्त्रतः ।
पूर्वोक्तविधिना धीमान्शान्तिहोमं समाचरेत्[२] ॥ ३० ॥
दिशास्वध्ययनं कुर्यात्पश्चात्स्नानं समाचरेत् ।
महाव्योमेति मन्त्रेण स्नापयेल्लिङ्गमूर्धनि ॥ ३१ ॥

[४.४. सङ्कीर्णस्नानफलम्]

सङ्कीर्णमाचरेदेवं पुत्रपौत्रविवर्धनम्[३] ।
जयदं रोगशान्त्यर्थं सर्वसिद्धिकरं परम् ॥ ३२ ॥
मारिज्वरग्रहव्याधेः सद्य एव स मुञ्चति ।
सप्ताहं त्रियहं वापि चतुर्दशं चैकविंशकम्[४] ॥ ३३ ॥

[५. नानाविधस्नानानि]

एवमेव पयस्नानमेवमिक्षुरसेन तु ।
पञ्चगव्योदकानां च एवं कुर्याद्विशेषतः ॥ ३४ ॥
स्नपनं कारयेदन्ते पूर्वोक्तविधिना सह ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ३५ ॥
क्षीरस्नानविधिः प्रोक्तो घृतस्नानविधिं शृणु ॥ ३६ ॥

॥ इति दीप्तशास्त्रे क्षीरस्नानविधिपटलः [अष्टाविंशतितमः][५] ॥

---

१. 29d वासवादि] Eds, वसवादि F^1.

२. 30d शान्तिहोमं] Eds, धान्तिहोमं F^1.

३. 32a °चरेदेवं] Eds, °चरेद्देवं F^1.

४. 33d चैकविंशकम्] Eds, चैकवंशकम् F^1.

५. A, G, J : इति दीप्तशास्त्रे क्षीरस्नानविधिपटलः ।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां क्षीरस्नानपटलः ।

[एकोनत्रिंशत्तमः पटलः]

[राजरक्षाविधिः[१]]

राजरक्षाविधिं वक्ष्ये शृणु वह्ने यथाक्रमम्।

[१. राजरक्षाफलम्]

आयुरारोग्यबलदं पुत्रश्रीकीर्तिवर्धनम्[२] ॥ १ ॥
रक्षार्थं मङ्गलार्थं च महापुण्यपवित्रकम्[३]।
देवाश्च ऋषयश्चैव यक्षगन्धर्वकिन्नराः ॥ २ ॥
पितृणां च तथा सर्वे तथा मातृगणा अपि[४]।
नित्यं सर्वप्रयत्नेन रक्षां कुर्यात्समाहितः[५] ॥ ३ ॥

[२. रक्षाकालः]

रक्षाकाले प्रयोक्तव्यं शृणु वह्ने विशेषतः[६]।
[७]स्नानान्ते तु त्रिसन्ध्यायां भोजने चैव सूतके[८] ॥ ४ ॥
युद्धे च गमने चैव अश्वारोहणकालके[९]।
गजारोहणकाले च दुःस्वप्नदर्शनेऽपि च[१०] ॥ ५ ॥
एतेषु विधिना काले रक्षां कुर्याद्विशेषतः ।
ज्वरग्रहपिशाचाश्च असुरा यातुधानकाः[११] ॥ ६ ॥
कुमारग्रहभूताश्च कूष्माण्डा शकुनी तथा[१२]।

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 1c °बलदं] A, G, °फलदं F^1.

३. 2b महापुण्यपवित्रकम्] A^1, lacune A^2, जयार्थं च पवितम् F^1, जयार्थं सर्वसिद्धिदम् G.

४. 3a पितृणां च तथा सर्वे] A, G, मरुपितृगणांश्च+ F^1 ; 3b मातृगणा अपि] Eds, मातृगणानपि A (etc.).

५. 3c °प्रयत्नेन] A, G, °सुयत्नेन F^1 ; 3d कुर्युः] Eds, कुर्यात्° A (etc.) ; समाहिताः] A^2, समाहितः A^1 (etc.).

६. 4b विशेषतः] A, G, यथा क्रमम् F^1.

७. F^1 remplace 4 cd par : स्नानान्ते तु कर्त ...। त्रिसन्ध्यायां भोजने चैव सुत्त++++के।

८. 4c स्नानान्ते तु] Eds (*cf.* F^1), स्नानं तत्र A^1, स्नानन्तु (*v.f.*) A^2, स्नानानां तु G ; 4d सूतके] G, युक्तके A.

९. 5a युद्धे] F^1, युक्ते A, G ; 5b °रोहणकालके] A, G, °रोहणमेव च F^1.

१०. 5c °रोहणकाले च] A^1, °रोहणकाले तु A^2, G, °रोहणमेवं तु F^1 ; 5d दुःस्वप्नदर्शनेऽपि च] A^1, दुस्वप्न+++पि च A^2, दुस्वप्नं दर्शयेऽपि वा F^1, दुःस्वपनदर्शने G.

११. 6d °धानकाः] A, G, °धानकः F^1.

१२. 7b शकुनी तथा] Eds., सक्थिनी तथा A^1, साकिनी तथा A^2, सकरीनपि F^1, याकनी तथा G.

ब्रह्मराक्षस उच्छिष्टपूतना पापराक्षसी[१] ॥ ७ ॥
नित्यपीडां न कुर्वन्ति तस्माद्रक्षां समारभेत्।

[३. त्रिपुण्ड्रम्]

[३.१. गोमयविधिः]

गोमयं चैव संग्राह्य रक्षार्थं चैव देशिकः[२] ॥ ८ ॥
कपिलागोमयं ह्येवं नानागोमयमेव वा[३]।
आहार्यं नैव जीर्णायां मार्यया क्षीरवर्जिता[४] ॥ ९ ॥
रोगार्ता नवसूता च न योग्या गोमयग्रहे[५]।
संग्राह्य हृदयेनैव शोषयेच्छिरसा पुनः[६] ॥ १० ॥
शिवमन्त्रेण दग्ध्वा तु सद्योजातेन ग्राहयेत्[७]. ।
राजते पात्रे संकल्प्य कवचेन सुरक्षयेत्[८] ॥ ११ ॥
[९]दक्षिणेन करेणैव वामहस्ते तु विन्यसेत्[१०]।
पञ्चब्रह्मशिवाङ्गैश्च व्योमव्यापि जपेत्सकृत्[११] ॥ १२ ॥
भस्माधारे तु वामेन हेमपात्रे तु निक्षिपेत्[१२]।
उत्तमं हेमपात्रं तु मध्यमं राजतं तथा ॥ १३ ॥

---

१. 7c °राक्षस उच्छिष्ट°] A^2, G, °राक्षस उच्छिष्ठ° A^1, °रक्षसरेश्यष्ट° F^1 ; 7d पाप°] F^1, G, प्रेत° A^1, lacune A^2.

२. 8d रक्षार्थं चैव] F^1, रक्षाबन्धं च A, G.

३. 9b नाना°] Eds, जाना° A^1, शाणा A^2, जरा° F^1, G.

४. 9c आहार्यं नैव] Eds, नाहारं नव° A^1, नाहा+++ A^2, नाहाराह्न च (?) F^1, नाहारे न च G ; 9d मार्यया] A^1, अमर्यायां (*v.f.*) A^2, नमल्यां F^1, मार्यायां G.

५. 10a °सूता] A^1, F^1, G, °सूत्रा A^2 ; 10b गोमयग्रहे] A, G, गोमयं ग्रहेत् F^1.

६. 10d हृदयेनैव] A, F^1, तद्रसेनैव G.

७. 11a दग्ध्वा तु] A^2, G, दध्वा तु A^1, दग्धे वा F^1

८. 11c पात्रे] A^2, F^1, G, पात्र A^1 ; 11d कवचेन सुरक्षयेत्] A^1, G, कवचेना सुरक्षयेत् A^2, कवचेन सुरक्षितम् F^1.

९. 29.12ab = 56.6cd.

१०. 12a दक्षिणेन] Eds. (*cf.* 56.6cd), दक्षिणे तु A^1 (etc.).

११. 12c °शिवाङ्गै°] A, F^1, °षडङ्गै° G ; 12d व्योमव्यापि जपेत्सकृत्] A^2, G, व्योमव्यापि शिवेत्सकृत् A^1, व्योमव्यापिं सकृज्ञपेत् F^1.

१२. 13a तु वामेन] Eds, तु वामं तु A^1 (etc.) ; हेमपात्रे] Eds, हेमपत्रं A^1 (etc.).

एवं संस्कृत्य विधिवत् त्रिपुण्ड्रं धारयेद्बुधः[१]।

[३.२. त्रिपुण्ड्रधारणस्थानं मन्त्राश्च]

ईशानं शिरसि न्यस्त्वा मुखे तत्पुरुषं न्यसेत्[२]॥ १४॥
अघोरं हृदि विन्यस्य गुह्ये वामं प्रकल्पयेत्[३]।
सद्योजातं तु पादाभ्यां पुनरङ्गानि विन्यसेत्[४]॥ १५॥
जठरे नाभिबाह्वोश्च कट्यामुरसि वा पुनः[५]।
अस्त्रेणैव तु मन्त्रेण धारयेत्साधकोत्तमः[६]॥ १६॥
ऊर्वोर्जान्वोस्तथा गुह्ये पृष्ठे चैव तु पादयोः[७]।
जङ्घयोः स्फिग्द्वयोश्चैव पार्श्वयोरुभयोरपि॥ १७॥
प्रासादेन तु मन्त्रेण विन्यसेत्तु विचक्षणः।
एवमेव विधानज्ञै रक्षयेत्तु विशेषतः॥ १८॥
अस्त्रमन्त्रं समुच्चार्य दशदिक्षु समन्ततः।

[३.३. अङ्गुलीनामधिदेवताः]

मध्यमानमिका चैव तर्जनी च त्रिपुण्ड्रके॥ १९॥
मध्यमा रुद्रदैवत्यानामिका ब्रह्मदैवता[८]।
तर्जनी विष्णुदैवत्या अङ्गुलीनां विधीयते[९]॥ २०॥
नृपस्य पुण्ड्रं कुर्वीत सर्वपापक्षयावहम्[१०]।

---

१. 14a संस्कृत्य] F^1, सत्कृत्य A^2, G, सकृत्य A^1 ; 14b धारये॰] G, कारये॰ A, F^1.

२. 14c ईशानं] A, G, ईशेन F^1 ; न्यस्त्वा] A, G, न्यसो F^1 ; 14d तत्पुरुषं न्यसेत्] A^2, G, तत्पुरुणं न्यसेत्] A^1, तत्पुरुषेन तु F^1.

३. 15a अघोरं हृदि विन्यस्य] A, G, अघोरविधिवन्नस्य F^1 ; 15b गुह्ये वामं] F^1, गुह्यं वामे A, वामं गुह्ये G.

४. 15c सद्योजातं तु पादाभ्यां] A, G, सद्योजातेन पादेन F^1 ; 15d पुनरङ्गानि] A^2, G, पुनस्तु अङ्गानि (*v.f.*) A^1, पुनरङ्गेषु F^1.

५. 16a जठरे] Eds., जठरं A (etc.) ; ॰बाह्वोश्च] Eds., ॰बाह्योश्च A, G, बांहोश्च F^1 ; 16b कट्यामुरसि] A, G, कटये मुरस F^1.

६. 16d धारये॰] A, F^1, साधये॰ G ; ॰धकोत्तमः] A^1, G, ॰थकोत्तमः A^2, lacune F^1.

७. 17b गुह्ये पृष्ठे] A, G, गुह्यपृष्ठे F^1 ; पादयोः] A^2, G, पादयेत् A^1, नोपयेत् F^1.

८. 20a मध्यमा] A, G, मध्यमं F^1 ; 20b ॰दैवता] F^1, ॰दैवतम् A, ॰देवता G.

९. 20d अङ्गुलीनां] A, G, स्यादङ्गुलीनां (*v.f.*) F^1.

१०. 21a नृपस्य पुण्ड्रं] A, नृपाणां पुण्ड्रं F^1, नृपस्य त्रिपुण्ड्रं (*v.f.*) G.

त्रिपुण्ड्रस्थानं वक्ष्यामि त्रिपुण्ड्रदेवतां तथा[१] ॥ २१ ॥

[३.४. त्रिपुण्ड्रस्थानं देवताश्च]

[२]शिरःस्थाने स्वयं ब्रह्मा ललाटे स्कन्द एव च[३]।
कण्ठे विनायकप्रीतिरश्विनौ श्रोत्रयोरपि[४] ॥ २२ ॥
हृदये ईश्वरप्रीतिर्बाह्वोर्वै विष्णुरेव च[५]।
नाभौ वसुन्धरा चैव पृष्ठे च पितरस्तथा ॥ २३ ॥
एतान्देहे तु संकल्प्य रक्षां कुर्यात्तु साधकः[६]।

[४. वर्णन्यासः]

वर्णन्यासं ततः कुर्याच्छास्त्रदृष्टेन कर्मणा ॥ २४ ॥
अकारादिक्षकारान्तं कादिपादान्तमेव च[७]।
अकारं मूर्ध्नि देशे तु आकारं तु ललाटके[८] ॥ २५ ॥
इकारं दक्षिणे नेत्रे ईकारं वामनेत्रके[९]।
उकारं दक्षिणे कर्णे ऊकारं वामकर्णके ॥ २६ ॥
ऋकारं दक्षिणे नासौ ॠकारं वामनासिके[१०]।
ऌकारं दक्षिणे गण्डे ॡकारं वामगण्डके ॥ २७ ॥
ए ऐ ओष्ठद्वये न्यस्य ओ औ दन्तद्वयोरपि[११]।
अं अः जिह्वाद्वये चैव स्वरान्षोडशकान्न्यसेत्[१२] ॥ २८ ॥

---

१. 21c °स्थानं] F^1, G, °स्थानं च (*v.f.*) A ; 21d त्रिपुण्ड्रदेवतां] A^2, त्रिपुण्ड्रं देवतां A^1, G, त्रिपुण्ट्रदेवतयस् (*v.f.*) F^1.

२. 22ab-23cd sont très proches de 56.20ab-21cd.

३. 22a ब्रह्मा] A^2, F^1, G, ब्रह्म A^1 ; 22b स्कन्द] A, G, स्कन्दम् F^1.

४. 22c कण्ठे] A^1, F^1, G, कर्णे A^2 ; 22d °श्विनौ] G, °श्विन्यां A, F^1 ; श्रोत्रयोरपि] A^2, F^1, G, श्रौतयोरपि A^1.

५. 23a हृदये] A, F^1, हृदयं G ; °प्रीतिर्बा°] G, °प्रीतिं बा° A^1, °प्रीतिबा° A^2, F^1.

६. 24a एतान्देहे] G, एते देहे A, F^1.

७. 25a °रान्तं] A, G, °रान्ते F^1.

८. 25c मूर्ध्नि] A^2, मूध्नि A^1, F^1, मूर्ध° G.

९. 26a नेत्रे] A^1, F^1, G, नेत्रं A^2.

१०. 27a नासौ] F^1, नासे A, G ; 27b °नासिके] A, °नासके F^1, G.

११. 28b दन्त°] A, G, वास्य F^1.

१२. 28c द्वये चैव] A, G, द्वयोश्चैव F^1.

कवर्गं दक्षिणे हस्ते चवर्गं वामहस्तके।
टवर्गं दक्षिणे पादे तवर्गं वामपादके॥ २९॥
पफौ च दक्षिणे पार्श्वे बभौ वै वामपार्श्वके[१]।
मकारं नाभिदेशे तु यकारं पृष्ठतो न्यसेत्॥ ३०॥
सप्तधा तु कलां न्यस्त्वा यकारं त्वक्प्रदेशके[२]।
रकारं रक्तमेवोक्तं लकारं मांसदेशतः[३]॥ ३१॥
वकारं मेदसो न्यस्य शकारमस्थिदेशतः[४]।
मज्जादेशे षकारं तु सकारं शुक्लदेशतः[५]॥ ३२॥
हकारं प्राणदेशे तु ळकारं वृषणे न्यसेत्[६]।
क्षकारं मेढ्रदेशे तु क्रमेणैव तु विन्यसेत्[७]॥ ३३॥
नृपाणां रक्षणार्थाय दशायुधसमावृतम्[८]।
एवं कृत्वा तु विधिवद्भस्मरक्षां समाचरेत्[९]॥ ३४॥

[५. नीराजनम्]

नीराजनं प्रकर्तव्यं राज्ञामपि विशेषतः[१०]।
[११]पादप्रक्षालनं कृत्वा आचम्य विधिना बुधः[१२]॥ ३५॥
सर्वतोभद्रनामानि सिंहासनोपरि स्थितम्[१३]।

---

१. 30a पफौ च] A, पफौ तु F¹, पफौ G ; पार्श्वे] A, F¹, पार्श्वे तु G.

२. 31a कलां] A, कला F¹, कलान्° G ; 31b यकारं त्वक्प्रदेशके] G, यकारं चित्प्रदेशे A¹, यकारं च प्रदेशतः A², यकारस्त्वप्रदेशिकः F¹.

३. 31c रकारं] A², F¹, G, नकारं A¹ ; 31d °देशतः] A², F¹, G, °देशकः A¹.

४. 32a वकारं] F¹, G, मकारं A ; 32b शकार°] F¹, G, सकार° A.

५. 32d °देशतः] A, G, °देशता F¹.

६. 33b वृषणे] A¹, F¹, G, वृषणं A² ; न्यसेत्] A, G, भवेत् F¹.

७. 33c क्षकारं] A², F¹, G, षकारं A¹.

८. 34b °समावृतम्] A, F¹, °समान्वितम् G.

९. 34c कृत्वा तु विधिवद्भस्म°] A, G, विधिवद्कृत्वा भस्म° F¹.

१०. 35b राज्ञामपि] F¹, राज्ञापि च A, राज्ञानपि G.

११. 29.35cd = 23.4cd.

१२. 35d बुधः] A, G, सह F¹.

१३. 36a सर्वतो°] A, F¹, सर्वत्र° G.

सन्ध्याकाले च सायाह्ने देवानामपि पार्थिवे[१] ॥ ३६ ॥
नराणां दर्शने चैव पद्मनाभिस्थलोदिते[२] ।
पुष्पमर्घ्यं च लवणं निम्बपत्रं निवेदयेत्[३] ॥ ३७ ॥
कार्पासबीजसंयुक्तं नवदीपसमन्वितम्[४] ।
सन्ध्याकाले विसृज्याथ तद्दोषशमनाय च[५] ॥ ३८ ॥
स्वर्णपात्रेषु संयोज्य एकैकं तु पृथक्पृथक्[६] ।
गणिकाभिरलङ्कृत्य आनयेत्तु समाहितः[७] ॥ ३९ ॥
गेयनृत्तादिमङ्गल्यैः शङ्खभेर्यादिनिस्वनैः ।
आलयं त्रिः परिभ्राम्य एकैकं तु समाचरेत्[८] ॥ ४० ॥
कार्पासबीजलवणं दीपपात्रे विनिक्षिपेत्[९] ।
तदन्ते भस्म दातव्यं दर्पणं दर्शयेद्बुधः[१०] ॥ ४१ ॥
वाद्यध्वनिसमायुक्तं प्राकारस्य बहिर्नयेत्[११] ।
दिने दिने तु संयोज्य रक्षां कुर्यात्तु भूपतिः[१२] ॥ ४२ ॥

[६. रक्षाफलम्]

अपमृत्युविनाशं च महामृत्युविनाशनम्[१३] ।
तस्मात्सर्वमयं देवं सर्वकल्याणकारणम् ॥ ४३ ॥

---

१. 36d देवानामपि पार्थिवे] Eds, … पार्थिवे A^1, … पार्थिवे A^2, सायाह्नेऽपि च पार्थिवे F^1, देवानामपि राजरक्षां च पार्थिवे (*v.f.*) G.

२. 37b °स्थलोदिते] A^1, F^1, G, °स्थलोपरि A^2.

३. 37cd लवणं निम्बपत्रं] A, G, +स्मं च लवणं च F^1.

४. 38a °युक्तं] A, G, °युक्ता F^1.

५. 38c विसृज्याथ] G, सर्जयित्वा A^1, विसर्जयित्वा (*v.f.*) A^2, विजस्तित्वा F^1 ; 38d °दोषशमनाय] A, F^1, °दोषमनाय च (*v.f.*) G.

६. 39a स्वर्णपात्रेषु] A, F^1, स्वर्णपात्रेण G ; संयोज्य] A, F^1, संयोगो G.

७. 39d °तु समाहितः] A, सुसमाहिता F^1, °तु समाहितम् G.

८. 40c आलयं त्रिः] A, F^1, आलयादि G.

९. 41a °लवणं] A, G, °लवणैर्° F^1.

१०. 41c भस्म] A^2, F^1, विस्म A^1, भस्मा G.

११. 42b बहिर्°] F^1, बलिं A, G.

१२. 42c दिने दिने] A^2, F^1, G, दिने दिनं A^1.

१३. 43a °विनाशं च] A^2, F^1, G, °विनाशांश्च A^1.

भवेद्रक्षा समायुक्ता राज्ञां कीर्तिविवर्धनम्[१]।
एवं रक्षा तु विधिवत्सर्वैश्वर्यसमन्वितम्[२]॥ ४४॥
नित्यं समाचरेद्राजा पृथिव्यामेकराड् भवेत्[३]।
तस्मात्सर्वप्रयत्नेन विधिना सम्यगाचरेत्॥ ४५॥
राजापि विजयेन्मृत्युमिति शास्त्रेषु निश्चितम्[४]॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे राजरक्षाविधिपटलः [एकोनत्रिंशत्तमः][५]॥

---

१. 44a °युक्ता] A, F^1, °युक्तं G.

२. 44c रक्षा] A^1, F^1, राक्षां A^2, G.

३. 45a राजा] A^2, राज्यं A^1, G, रात्र F^1.

४. 46a राजापि] A^2, राजा (*v.f.*) A^1, G, न तस्य जायेत् F^1 ; 46b शास्त्रेषु] A, G, शास्त्रस्य F^1.

५. A, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे राजरक्षाविधिपटलः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां राजरक्षाविधिः सप्तमषष्टिपटलः।

[त्रिंशत्तमः पटलः]
[सकलप्रोक्षणविधिः[१]]

अतः परं प्रवक्ष्यामि सकलप्रोक्षणं परम्।
सर्वरोगविनाशार्थं सर्वदोषविनाशनम्॥ १॥
वर्षार्थं च जयार्थं च प्रोक्षणं सम्यगाचरेत्।

[१. एकाहादिपक्षान्तं पूजाहीने बिम्बे]

पूर्वं प्रतिष्ठितं बिम्बं पूजाहीनं च संभवेत्[२]॥ २॥
एकाहं द्वियहं वापि त्र्यहं चतुरहं तु वा[३]।
पञ्चाहं वा दशाहं वा द्वादशं पक्षमेव वा॥ ३॥
समुद्रे पर्वते चैव गोष्ठे च कुशमूलतः।
तीर्थेषु च मृदं ग्राह्य पञ्चमृद्भिस्तु लेपयेत्[४]॥ ४॥
गोमूत्रं गोमयं क्षीरं दधिसर्पिस्तु पञ्चमम्।
यथाक्रमेण संग्राह्य स्नापयेद्विधिपूर्वकम्[५]॥ ५॥
पवमानं समुच्चार्य पञ्चगव्याभिषेचनम्।
मूलेन लिप्य तोयेन शोधयेदस्त्रमन्त्रतः[६]॥ ६॥
पुण्याहं तत्र कुर्वीत शान्तिहोमं तु कारयेत्।
युग्मवस्त्रं प्रदातव्यं गन्धादिना समर्चयेत्[७]॥ ७॥
पञ्चवर्णहविर्दद्याद्गुलखण्डसमायुतम्[८]।
निवेदयेद्भृदा चैव ताम्बूलं च प्रदापयेत्[९]॥ ८॥

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 2c पूर्वं] A (etc.), सर्व॰ G ; 2d पूजाहीनं] F^1, पूजाहीने A (etc.) ; संभवेत्] A (etc.), संभवे G.

३. 3a एकाहं] A^1, F^1, G, एकाह॰ A^2 ; 3b चतुरहं] A^2, F^1, G, चतुरं (*v.f.*) A^1.

४. 4c तीर्थेषु] A, G, तीर्थे वै F^1 ; ग्राह्य] A^2, F^1, G, ग्राह्यं A^1 ; 4c ॰मृद्भिस्तु] F^1, ॰ब्रह्मैस्तु A, G.

५. 5d स्नापयेद्वि॰] Eds., स्थापयेद्वि॰ A (etc.).

६. 6c मूलेन] A, G, आलेन F^1 ; लिप्य] A, F^1, दिव्य॰ G.

७. 7c युग्मवस्त्रं प्र॰] Eds., युग्मानि वस्त्रं A, युग्मानि च प्र॰ F^1, युग्मवस्त्राणि G ; 7d गन्धादिना] Eds., गन्धादीनि A, G, गन्धादीनां F^1.

८. 8a ॰हविर्द॰] A, G, ॰भवं द॰ F^1.

९. 8c निवेदयेद्भृदा] A^1, F^1, G, निवेदयेद् व्रतं A^2.

दक्षिणां गुरवे दद्याद् यथावित्तानुसारतः[१]।

[२. पक्षादूर्ध्वं पूजाहीने बिम्बे]

पक्षादूर्ध्वं तु मासं वा त्रिषण्मासान्तमेव वा[२]॥ ९॥
कालान्तरगते काले पूजाहीने तु संभवे।
प्रतिष्ठा क्रिया यत्सर्वं तत्पूर्वमिति चोदितम्[३]॥ १०॥
रत्नन्यासाक्षिमोक्षं च प्रदक्षिणयनं विना[४]।
जलाधिवासनं नोक्तं अन्यत्सर्वं समापयेत्[५]॥ ११॥

[२.१. अधिवासः]

कुम्भाधिवासनं होमं कौतुकं बन्धयेत्क्रमात्।
हेमसूत्रकृतं श्रेष्ठं तन्तुसूत्रमथापि वा[६]॥ १२॥
विश्वेत्ता तेति मन्त्रेण बन्धयेदस्त्रसंयुतम्[७]।
बृहत्सामेति मन्त्रेण भस्म दद्यात्स बिम्बके[८]॥ १३॥
रक्ताम्शुकैः परिच्छाद्य दर्भैस्तु कवचेन तु[९]।
गन्धादिना समभ्यर्च्य स्वबीजेनैव मन्त्रतः॥ १४॥
दिशास्वध्ययनं कुर्युश्चत्वारो वेदपारगाः[१०]।
रात्रौ जागरणं कुर्याद्धोमाध्यायपरायणः[११]॥ १५॥

[२.२. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः शिष्यैः स्नानं कुर्याद्विधानतः।

---

१. 9b °वित्ता°] A^2, F^1, G, °वृत्ता° A^1.

२. 9c पक्षादूर्ध्वं] A^2, F^1, पक्षमृद्धं A^1, पक्षमर्धं A^1 (var.) ; 9d त्रिषण्मासान्तमेव] G, त्रिषन्मासं तु मेव° A, सण्मासाहं तुं एव F^1; वा] Eds, च A (etc.).

३. 10c प्रतिष्ठा क्रिया यत्सर्वं] F^1, प्रतिष्ठा क्रिया च यत्सर्वं (*v.f.*) A^1, G, प्रतिष्ठायां यदिक्सर्वं A^2.

४. 11b प्रदक्षिणयनं] A^1, प्रदक्षिणशयनं (*v.f.*) A^2, G, प्रदक्षिशयनं F^1.

५. 11d समापयेत्] A, G, समासतः F^1.

६. 12d तन्तुसूत्रं] A, G, ऊर्ध्वत्रम् (*v.f.*) F^1.

७. 13a विश्वेत्ता तेति] G, विश्वेक्तातेति A^1, विश्वेक्तानेति A^2, वीश्वेत्त तु (*v.f.*) F^1.

८. 13c बृहत्सामेति] A, प्रहसायेति] F^1 ; 13d भस्म A^2, G, भस्मं A^1, F^1 ; बिम्बके] A (etc.), बिम्बकान् F^1.

९. 14a परिच्छाद्य] A, G, परिन्धानं F^1 ; 14b कवचेन] A^2, F^1, G, वचनेन A^1.

१०. 15b °पारगाः] F^1, °पारगान् A, G.

११. 15d °ध्यायपरा°] A^1, °ध्ययनपरा° (*v.f.*) A^2, F^1, °द्योन परा° G.

नववस्त्रं तु संछाद्य आर्द्रवस्त्रं विसर्जयेत्[१] ॥ १६ ॥
भस्मस्नानं ततः कुर्यान्न्यासकर्म समाचरेत्[२]।
सूक्ष्मवस्त्रं प्रदातव्यं सोष्णीषं सोत्तरीयकम् ॥१७॥
कर्पूरागरुसंमिश्रं गन्धचन्दनचर्चितम्।
पञ्चाङ्गभूषणैर्भूष्य गन्धमाल्यैरलङ्कृतम्[३] ॥ १८ ॥
दक्षिणां तस्य दातव्यां प्रणिपत्य क्षमापयेत्[४]।
दशनिष्कं पञ्चनिष्कं निष्कत्रयमथापि वा ॥ १९ ॥
निष्कमात्रं तदर्धं वा यथावित्तानुसारतः।
दशभागैकभागं स्यान्मूर्तिपानां तु दक्षिणा ॥ २० ॥
तदर्धाध्ययने दद्याद्दैवज्ञस्य तदर्धकम्[५]।

[२.३. आसनादि]

आसनं कल्पयेद्विद्वान् स्नानवेद्युपरि न्यसेत्[६] ॥ २१ ॥
मुहूर्तनाडिका युक्ता सर्वातोद्यसमायुता[७]।
गेयं नृत्तसमायुक्तं स्वस्तिवाचकमुच्चरन् ॥ २२ ॥
कुम्भमुत्थाप्य वामेन आचार्यो मूर्तिपैः सह।
शङ्खध्वनिसमायुक्तं पिञ्छचामरसंयुतम्[८] ॥ २३ ॥
धूपदीपसमायुक्तं स्तोत्रमङ्गलवाचकैः[९]।
सर्वातोद्यसमायुक्तं प्रासादं च प्रदक्षिणम्[१०] ॥ २४ ॥
बिम्बस्य दक्षिणे पार्श्वेऽप्याचार्योऽप्युत्तरं मुखम्[११]।

---

१. 16c संछाद्य] A, G, सङ्ग्राह्य F^1.

२. 17b कुर्यान्न्यास°] A^1, F^1, G, कुर्यान्नास° A^2.

३. 18c °भूष्य] A, G, °पूज्य F^1,

४. 19a तस्य] A, G, तस° F^1 ; 19b क्षमापयेत्] A, G, क्षमाभवेत् F^1.

५. 21b तदर्धकम्] G, तदर्धकः A^1, तदर्धतः A^2, F^1.

६. 21d स्नान°] A^2, F^1, G, स्नानं A^1.

७. 22a °नाडिका°] F^1, G, °रसिका° A ; 22b °समायुता] A, °समन्वितम् F^1, G.

८. 23d पिञ्छ°] A^1, F^1, G, पिच्छ° A^2.

९. 24a °युक्तं] A, G, °युक्तैः F^1.

१०. 24c °युक्तं] A, G, °युक्त° F^1.

११. 25b उत्तरं] A, उत्तरा° F^1, G.

शङ्खतोयं कुशेनैव न्यस्त्वा देवं यथाक्रमम्[१] ॥ २५ ॥
आकाशाद्यादिभूतं च स्थितिमार्गं न्यसेत्क्रमात्[२] ।
सद्योजातं न्यसेत्पादे पुनरङ्गानि विन्यसेत् ॥ २६ ॥

[२.४. अभिषेकः]

अभिषेकं ततः कुर्यात्प्रासादेन तु मन्त्रतः[३] ।
विद्येश्वरस्य कुम्भानि स्वनाम्ना चाभिषेचयेत्[४] ॥ २७ ॥
स्नपनं तत्र कुर्वीत यथाविभवविस्तरैः ।
युग्मवस्त्रं प्रदातव्यं सोत्तरीयोपवीतधृक्[५] ॥ २८ ॥
गन्धादिना समभ्यर्च्य पञ्चवर्णहविर्ददेत् ।
ताम्बूलं दापयेत्पश्चान्मुखवाससमन्वितम् ॥ २९ ॥
तदन्ते चोत्सवं कुर्यात्सर्वालङ्कारसंयुतम् ।
सकलप्रोक्षणं कुर्याद्यागं पाशुपतस्य तु[६] ॥ ३० ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सकलप्रोक्षणविधिपटलः [त्रिंशत्तमः][७] ॥

---

१. 25c कुशेनैव] A, +शेनैव F^1, कुशेकेन G ; 25d देवं] A^1, F^1, G, तोयं A^2.

२. 26a आकाशाद्यादिभूतं च] A, G, आकाशशक्त्याभिभूतं F^1.

३. 27b प्रासादेन तु] A, G, प्रासादेनैव F^1.

४. 27c विद्येश्वरस्य] A, G, विद्येश्वरैव F^1 ; 27d °नाम्ना चाभि°] A^2, G, °नाम्ना वाभि° A^1, °नात्रभि(?) (*v.f.*) F^1.

५. 28d °पवीतधृक्] F^1, ऽपि च तादृदृक् A^1, ऽपि च तादृक् A^2, lacune G.

६. 30c प्रोक्षणं] F^1, °स्थापनं A, G.

७. A, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सकलप्रोक्षणविधिपटलः ।
F^1 : इति दीप्तशास्त्रे सकलप्रोक्षणविधिपञ्चशत्पटलः ।

[एकत्रिंशत्तमः पटलः]
[कालपरीक्षाविधिः[१]]

अतः परं प्रवक्ष्यामि कालनिर्देशलक्षणम्।

[१. शुभाशुभायने]

अयनं दक्षिणं नेष्टमिष्टं वै चोत्तरायणम्[२]॥ १॥
मेषे च मिथुने चैव मकरे कर्कटे तथा।
[३]दक्षिणायनकाले तु तुलावृश्चिकयोरपि॥ २॥
उमा दुर्गा च चामुण्डा भद्रकाली च कोट्टवी[४]।
श्रिया शास्तृसरस्वत्या प्रतिष्ठा दक्षिणायने[५]॥ ३॥
उत्तरायणकाले तु स्थापयेत्परमेश्वरम्।

[२. शुभाशुभपक्षादि]

शुक्लपक्षे प्रशस्ता च कृष्णपक्षे च निन्दिता[६]॥ ४॥
चरराशिषु सर्वेषु धनुषि वर्जयेत्सुधीः[७]।
त्रीण्युत्तराणि हस्तश्च मैत्र्यादित्यप्रजापतिः[८]॥ ५॥
स्वाती चाश्वयुजौ तिष्यः पौष्णार्द्राश्च शुभाः स्मृताः[९]।
भार्गवः सोमजीवौ च सौम्यवारः प्रशस्यते[१०]॥ ६॥

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 1c अयनं दक्षिणं] A^2, अयने दक्षिणे A^1, G, अयनं दक्षिणे F^1 ; 1cd नेष्टमिष्टं] A, F^1, नेष्टं दृष्टं G ; चोत्तरायणम्] F^1, G दक्षिणायनम् A^1, lacune A^2.

३. F^1 omet 2d-4a.

४. 3a चामुण्डा] A^1, G, चामुण्डी A^2.

५. 3c शास्तृ] Eds, शास्ता A, शास्त° G.

६. 4c °पक्षे] A^1, °पक्ष° A^2 ; प्रशस्ता च] Eds, प्रशस्तानि A (etc.) ; 4d च निन्दिता] F^1, विनिर्गताः A, विनष्टिदाः G.

७. 5b धनुषि वर्जयेत्सुधीः] A^1, G, धनुक्षी वर्जयेद्बुधः A^2, चतुष्षष्टिर्जयेत्सुधीः F^1.

८. 5c हस्तश्च] Eds., हस्तानि A, F^1, शस्तानि G ; 5d °प्रजापतिः] A^1, G, lacune A^2, °प्रजापदम् F^1.

९. 6a स्वाती चा°] G, स्वातिश्चा° A, स्वाति चा° F^1 ; °युजौ तिष्यः] Eds, °युजे तिष्ये A (etc.) ; 6b पौष्णार्द्राश्च शुभाः स्मृताह्] A, G, पौष्णा श्रावणा शुभा F^1.

१०. 6c °जीवौ च] G, °जीवश्च A, °जीवा च F^1 ; 6d सौम्यवारः] A, G, सौम्यवारं F^1.

होरा चांशकद्रेक्काणादर्शनं शुभमिष्यते[१]।
चन्द्रः सर्वोदये काले सर्वकार्येषु वर्जयेत्[२]॥ ७॥
सप्तनवद्वितीये तु व्याधिशोकभयानि तु[३]।
द्वितीये पञ्चमे चैव सोमः सौख्यं करोति हि[४]॥ ८॥
भृगुयुक्तं च पौष्णं च स्वातीमन्दः प्रजापतिः[५]।
बुधानूराधयुक्ता च गुरुपुष्यसमागतः[६]॥ ९॥
[७]द्वितीया बुधयुक्ता च षष्ठी जीवसमायुता[८]।
सोम एकादशीयुक्तः करोति प्राणसंशयम्[९]॥ १०॥
पौष्णश्च सप्तमीयुक्तो दह्यते चाग्निना प्रजाः[१०]।

[३. कालदोषाः]

[११]रक्तस्थूनं च स्थूणं च विषं च गुलिकास्तथा॥ ११॥
दुर्दिने मारुते चैव कम्पने दाहने तथा।
अन्येष्वशुभकालेषु वर्जयेत्तान्प्रयत्नतः[१२]॥ १२॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे कालपरीक्षाविधिपटलः [एकत्रिंशत्तमः][१३]॥

---

१. 7a चांशकद्रेक्काणा°] A^1, G, चांशद्रेककाण° A^2, lacune F^1 ; 7b दर्शनं शुभमिष्यते] Eds., दर्शने दथमिष्यते A^1, दर्शनं दथमिष्यते A^2, G, दर्शनं दश इष्यते F^1.

२. 7c चन्द्रः सर्वोदये] A^1, G, छन्दः सर्वोदये A^2, चन्द्रसोपद° F^1.

३. 8a सप्तनवद्वितीये तु] A^2, G, सप्तं नवद्वितीयं तु A^1, सप्तमं न द्वितीयेषु F^1 ; 8b °शोक°] A, G, °रोग° F^1.

४. 8c पञ्चमे] A, G, पञ्चमी F^1 ; 8d सोमः सौख्यं करोति हि] Eds., सोमः सौख्यकरोति हि A^1, सोमसौख्यकरोतिभिः A^2, G, सोमसूक्तं करोति ह F^1.

५. 9a भृगुयुक्तं च] Eds, भ्रूयुक्ता न च A^1, भ्रूयुक्ता च (*v.f.*) A^2, lacune F^1, G ; 9b °मन्दः] F^1, °मन्द° A, G.

६. 9c °युक्ता च] A^1, G, °युक्ता (*v.f.*) A^2, °युक्ताश्च F^1 ; 9d समागतः] F^1, G, समागता A^1, समागताः A^2.

७. F^1 intercale ceci entre 9cd et 10ab : त्रिन्युत्तराय ... । + पणं चैव तिष्यश्च शुक्रवारे वज .. ।

८. 10a द्वितीया] A^2, F^1, G, द्विविधा A^1 ; 10b °समायुता] G, °समाहितः A, °समायुताः F^1.

९. 10c °युक्तः] A, G, °युक्ता F^1.

१०. 11a °युक्तो] A^2, °युक्ते A^1, F^1, G ; 11b दह्यते चाग्निना प्रजाः] A^2, दह्यते चाग्निना प्रजान् A^1, दह्यतेऽग्निरिव प्रजा F^1, दह्यन्ते चाग्निना प्रजाः G.

११. F^1 donne la leçon suivante de 11cd : कण्डुस्थानद्धनक्षत्रं गुलिका विष्टयस्तथा।

१२. 12c अन्येष्वशुभकालेषु] A^2, G, अन्येष्वशुभकाले तु A^1, अन्येषु च शुभे काले F^1.

१३. A^{1-2}: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे कालपरीक्षाविधिपटलः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां कालपरीक्षा षडधिकषष्टिमोऽध्यायः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे कालपरीक्षापटलः।

[द्वात्रिंशत्तमः पटलः]
[ग्रामादिवास्तुलक्षणम्][१]

अथ वक्ष्ये विशेषेण ग्रामादीनां च लक्षणम्।
ग्रामे वा नगरे वापि पत्तने वापि खेटके[२] ॥ १ ॥
राजधान्यां च वैतेषु शृणुष्व हव्यवाहन[३]।
देशविधं ततः पूर्वं ततो भूमिपरिग्रहम्[४] ॥ २ ॥

[१. देशविधः]

अरण्ये च वने तीर्थे पर्वते गुहकानने[५]।
[६]ग्रामादौ कारयेद्वास्तु प्रासादं वा विशेषतः[७] ॥ ३ ॥
अरण्ये राज्यकामश्च ऐश्वर्यं च वने तथा[८]।
पापनाशं तु तीर्थे तु पर्वते हरिवृद्धिषु[९] ॥ ४ ॥
गुहे तु मोक्षकामस्य कानने सर्वसिद्धि च[१०]।
[११]ग्रामादौ कारयेद्धीमान् ग्रामश्रीत्वं भविष्यति[१२] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, F^1. SNB = conjectures du Pandit S.N. Bhatt (voir t. I, p. v).

२. 1c ग्रामे वा] A, G, ग्रामेषु F^1.

३. 2a °धान्यां] A^2, F^1, °धान्यं A^1 ; वैतेषु] G, चैतेषु A, पञ्चैते F^1 ; 2b शृणुष्व] A (etc.), शृणु त्वं G ; हव्यवाहन] A, G, वृषवाहन F^1.

४. 2c देश°] Eds, देशे A (etc.) ; °विधं] A, G, °विधि F^1 ; पूर्वं] A, G, पूर्वे F^1 ; 2d भूमि°] A^1, F^1, G, द्रव्य° A^2.

५. 3b गुह°] G, इह A (etc.).

६. G place une première fois 5cd avant 3cd.

७. 3c ग्रामादौ कारयेद्वास्तु] Eds, ग्रामाश्चान्कारयेत्तस्तु A^1, ग्रामांश्च कारयेद्यस्तु A^2, ग्रामादी द्वारयेद्वास्तु F^1, lacune G ; 3d प्रासादं] Eds, प्रासादे A (etc.).

८. 4a राज्यकामश्च] A^2, राजकामश्च A^1, G, राज्यकारश्च F^1.

९. 4d हरिवृद्धिषु] A, G, हनिवृत्तिषु F^1.

१०. 5a गुहे] A, शुभे F^1 ; मोक्ष°] A^2, F^1, G, मोक्षं A^1 ; 5b °सिद्धि च] A, G, °सिद्धिषु F^1.

११. F^1 ajoute entre 5c et 5d : प्रासादं कारयेद्बुधः। ग्रामे च नगरे चैव सर्वकामसुखं प्रदम्। ग्रामादीशानभागे तु ईशानस्थालयं भवेत्। अन्यथा कारयेद्धीमान्।

१२. 5c ग्रामादौ] Eds, ग्रामादीन् A (etc.) ; 5d ग्रामश्रीत्वं] Eds, ग्रामं श्रीत्वं A, G, ग्रामशून्यं F^1.

[२. भूमिपरिग्रहः]

[२.१. चतुर्विधभूमिः]

पूर्णं शुभं च पद्मं च ऋष्टं चेति चतुर्विधम्[१]।
भूमेः प्रोक्तं तथा चैव लक्षणं तेषु वक्ष्यते[२]॥ ६॥
अशोककिंशुकाङ्कोलप्लक्षन्यग्रोधसंयुतम्[३]।
कुलत्थमाषनिष्पावगोधूमैश्च सुपूर्णकम्[४]॥ ७॥
कुमुदोत्पलसंजाता भुक्तिमुक्तिफलप्रदा[५]।
बकुलार्जुनखर्जूरकदम्बचम्पकैः शुभम्[६]॥ ८॥
[७]चन्दनागरुपुन्नागसारदारु च चूतकैः[८]।
[९]रम्भैश्च कोरकोरण्डकुरदकुटजावृता[१०]॥ ९॥
ऊषरावणिकाभिश्च गैरिकाशर्करान्विता[११]।
श्येनाथ गृध्रगोमायुखरवायससंकुला॥ १०॥
सा भूमिः ऋष्टसंज्ञा तु ग्रामादीनां तथालयम्[१२]।
सा श्रीः पुष्टिश्च सुखदं नाशनीयं यथाक्रमम्[१३]॥ ११॥

---

१. 6a पूर्णं] A^2, F^1, पूर्णा A^1, G ; 6b ऋष्टं] G, जुष्टं A (etc.).

२. 6c भूमेः] Eds, भूमि॰ A^1 (etc.) ; 6d लक्षणं] A^1, F^1, G, लवणं A^2.

३. 7a अशोककिंशुकाङ्कोल॰] F, G, अशे किंशुकमाकोल॰ A.

४. 7c कुलत्थ॰] Eds, कुलस्था॰ A^1, कुलस्थ॰ A^2, F^1, G ; ॰निष्पाव॰] A^1, F^1, G, ॰निष्पाष॰ A^2 ; 7d सुपूर्णकम्] SNB, सुवर्णकम् A, G, सवर्णकम् F^1.

५. 8a संजाता] G, F, संजात॰ A.

६. 8d ॰कदम्बचम्प॰] A^2, ॰कदम्बश्चम्प॰ A^1, ॰कदम्बं चम्प॰ F^1, lacune G ; शुभम्] F^1, शुभैः A, G.

७. Lacune probable concernant le nom du type de site dont il est question ici (*padma*).

८. 9b ॰सारदारु च] A, ॰सारदागरु F^1, lacune G.

९. F^1 donne la version suivante de 9cd : रम्भैश्च क्रमुकैश्चैव नालिकेरैश्च सर्वदा। suivie de कुशेकाशां च भिर्युक्तं साभू.. मि.. न्त्रजस्थिताम्। वेणुबिल्वै समिश्चैव श्रेष्ठाताकविभूतकैः। पिलिर... puis reprend avec les derniers mots de 33cd (लिखेत्पुनः), suivis de 34ab, etc. Dans ce même manuscrit F^1, les vers 10ab-33c ont été retrouvés au milieu du chapitre 60.

१०. 9cd कोरकोरण्डकुरद॰] A^1, कोरण्डकुरदं A^2, lacune G.

११. 10a ॰वणिकाभिश्च] A^1, ॰वणिकाभी च A^2, ॰धणिगभि॰ F^1, ॰वर्तिकाभिश्च G ; 10b गैरिका॰] SNB, गैरिणा A, F^1, G.

१२. 11a भूमिः ऋष्ट॰] Eds, भूमिमृष्ट॰ A, G, भूमिजं ष॰ F^1 ; 11b तथालयम्] A^1, तदालयम् A^2, G, चालयम् (*v.f.*) F^1.

१३. 11c श्रीः] SNB, श्री॰ A, G, श्रि॰ F^1.

फलेषु तेषु संप्रोक्तं स्थानेष्वेवं न संशयः।

[२.२. भूतक्रूरबल्यादि]

भूतक्रूरबलिं दद्यात्पश्चात्क्षेत्रपरिग्रहम्॥ १२॥
क्षेत्रशोधनकर्माणि कीटकेशास्थिलोष्टकैः[१]।
रत्निमात्रं खनित्वा तु पांसुमुद्धृत्य पूरयेत्॥ १३॥
पांसुरप्यधिको यत्र सा भूमिः सर्वकामदा[२]।
मध्यमा समपांसुस्तु हीना साप्यधमा स्मृता[३]॥ १४॥
एवं परीक्ष्य बहुधा कर्षयेल्लाङ्गलेन तु।

[२.३. कर्षणम्]

हलकर्म प्रयुञ्जीत खादिरं बिल्वमेव च[४]॥ १५॥
कपिलाभ्यां सिताभ्यां वा रक्ताभ्यां वा प्रयोजयेत्[५]।
युगं वै बन्धयेत्तत्र गोचर्मकृतरज्जुना[६]॥ १६॥
दैत्यदानवगन्धर्वपिशाचोरगराक्षसाः।
ते सर्वे यान्तु वानं च तस्मात्सीतापथा सुखम्[७]॥ १७॥
ग्रामार्थं देवतार्थं च प्रतिगृह्णन्तु मेदिनीम्[८]।
तस्मात्तु क्षेत्रतामेति कृषेन्मन्त्रेण पूर्वकम्[९]॥ १८॥
पञ्चब्रह्मेण मन्त्रेण जपेत्कर्षणमारभेत्।
ग्रामादीन्स्वकरे कृष्य गृहे प्रासादविस्तरम्[१०]॥ १९॥

---

१. 13a क्षेत्र°] A², F¹, G, क्षेत्रे A¹ ; °शोधन°] F¹, °शोधक° A, G.

२. 14b °कामदा] SNB, °कर्मदा A (etc.), °कामदं F¹.

३. 14c मध्यमा] F¹, G, मध्यमं A.

४. 15c प्रयुञ्जीत] F¹, G, प्रयुक्तानि A¹, प्रयुत+ (*v.f.*) A².

५. 16a कपिलाभ्यां] F¹, कपिलां सां° A¹, कपालाभ्यां A², G ; सिताभ्यां] A², F¹,G, सितासां A¹.

६. 16c वै] A¹, F¹, सं° A² ; 16d गोचर्मकृतरज्जुना] A², G, गोधचर्मकृतार्जुना A¹, F¹.

७. 17c यान्तु] A², F¹, G, यातु A¹ ; वानं] F¹, G, धानं A ; 17d सीतापथा] G, पीतापथा A¹, पीतापता A², प्रातापथा F¹ ; सुखम्] A (etc.), मुखम् F¹.

८. 18b प्रतिगृह्णन्तु] A¹, F¹, गृह्णी + + + G.

९. 18c तस्मात्तु] G, तस्मात्तं A, अस्माकं F¹ ; क्षेत्रतामेति] A, F¹, क्षेत्रनामेति G.

१०. 19d गृहे] F¹, G, ग्रसेत् A.

प्राच्यां सीतात्रयं कृष्य उदीच्यां तु तथा त्रयम्[१]।
तत्सर्वं क्षेत्रं गृह्णीयाद्यावत्कर्षणमिष्यते॥ २०॥

[२.४. बीजावापनम्]

तस्योपादानकर्मेषु सर्वबीजानि वापयेत्[२]।
तिलांस्तु वापयेत्तत्र यवान्वापि विशेषतः॥ २१॥
अथवा सर्वधान्यानि वापयित्वा समन्ततः।
त्रिरात्रे यत्र रोहन्ति उत्तमं त्विति निश्चितम्[३]॥ २२॥
मध्यमं पञ्चरात्रं तु अधमं सप्तरात्रकम्[४]।
तां प्रयत्नेन वाप्यन्ति यत्र देशे प्ररोहन्ति[५]॥ २३॥
वर्धयंस्तत्र रोहन्ति वाप्य जीवो जयं तथा[६]।
अन्यत्तु विपरीतं स्याद्देवानां तु न कारयेत्[७]॥ २४॥

[३. भूपरीक्षा]

[८]श्वेतं रक्तं तथा पीतं कृष्णं चेति द्विजादयः[९]।
सा भूमिर्ब्राह्मणादीनां ; गन्धाद्यमधुनोच्यते[१०]॥ २५॥
आज्यगन्धं भवेद्ब्राह्मं रक्तगन्धं नृपस्य तु[११]।
रूक्षगन्धं तु वैश्यानां शूद्रा विष्ठा सुगन्धिनी[१२]॥ २६॥
ब्राह्मणं मधुरं ज्ञेयं क्षारं वै क्षत्रियस्य तु[१३]।

---

१. 20a प्राच्यां सीतात्रयं] F^1, G, प्राच्या सितात्रया A^1, प्रास्यासिका त्रया A^2 ; कृष्य] F^1, कृष्णा A^1, कृष्णं A^2, G ; 20b उदीच्यां तु] G, उदीच्यास्तु A^1, दीव्यास् तु A^2, उदिच्यांस्तु F^1.

२. 21a तस्योपादान°] A, तस्योपातिन F^1, तस्योपातान° G ; °कर्मेषु (*sic*).

३. 22d त्विति] A^2, F^1, निति A^1, त्वेत्रि G ; निश्चितम्] G, निश्चयम् A, निर्दिशेत् F^1.

४. 23b °रात्रकम्] A^1, G, °रात्रिकम् A^2, F^1.

५. 23d देशे] G, देशं A, F^1.

६. 24a °तत्र] F^1, G, °त त्रि A ; 24b वाप्य जीवो जयं] A, F^1, वाप्यां जीवोच्छ्रयं G.

७. 24c अन्यत्तु] Eds, अन्ये तु A^1, F^1, G, अन्त्ये तु A^2 ; 24d देवानां] A (etc.), देवनं F^1.

८. 32.25ab = *78.50ab.

९. 25b द्विजादयः] SNB, द्विजातयः A (etc. et *78.50b), द्विधा यता F^1.

१०. 25c ब्राह्म°] A^2, G, ब्रह्मा° A^1, F^1 ; गन्धाद्य°] SNB, गन्धाज्य° A (etc.).

११. 26a आज्य°] A, F^1, आन्य G ; °ब्राह्मं] A^2, G, °ब्रह्मं A^1, °ब्रह्मय° F^1.

१२. 26d रूक्ष°] Eds, राक्ष° A (etc.), क्षार° F^1 ; शूद्रा] G, शूद्रान् A, शूद्र° F^1.

१३. 27a ब्राह्मणं मधुरं ज्ञेयं] SNB, ब्राह्मणं मधुरं राज्ञे A, ब्रह्मणा मधुरा ज्ञेया F^1, ब्राह्मणमधुरा ज्ञेया G ; 27b

वैश्यस्य षड्रसा ज्ञेयाः शूद्रस्यैकोषरा स्मृता[१] ॥ २७ ॥
एवं परीक्ष्य यत्नेन वर्णगन्धरसादिभिः ।
पुनश्च लक्षणं कृत्वा गेहस्थानं विशोधयेत् ॥ २८ ॥
गर्तं कुर्यात्तथा ह्येवं शल्यं कुर्याद्विचक्षणः ।

[४. दिक्परिच्छेदः]

[२]दृढत्वं च मृदुत्वं च भूमेर्ज्ञात्वा विचक्षणः[३] ॥ २९ ॥
सत्कृते ग्रामतो मध्ये ++++++++[४] ।
याज्ञिकं वृक्षमादाय शङ्कुं तत्रैव कारयेत्[५] ॥ ३० ॥
द्वादशाङ्गुलमायामं विस्तारं तु षडङ्गुलम् ।
मध्ये शङ्कुं त्रिधा ग्राह्य रवच्छाया प्रवर्तते[६] ॥ ३१ ॥
चैत्रे च विषुवे चैव प्राचीग्रहणमारभेत्[७] ।
आदित्योदयकाले तु शङ्कुच्छायां समालिखेत् ॥ ३२ ॥
मेषे तु वृषभे चैव शङ्कुच्छायां तु लाञ्छयेत्[८] ।
पूर्वाह्ने वा पराह्ने वा शङ्कुच्छायां लिखेत्पुनः[९] ॥ ३३ ॥
[१०]तत्र सूत्रायतं प्राचीं ग्रामादीन्गेहवास्तुना[११] ।
उदीचीं मत्स्यपुच्छाद्या[१२]

क्षारं] A, F^1, क्षारा G.

१. 27c षड्रसा] F^1, षण्मृता A (etc.) ; 27d °स्यैकोषरा] Eds, °स्यैकोषरः A^1, °स्यैकेषर° A^2, °स्य कार° F^1, lacune G.

२. A^2 omet 29cd

३. 29c भूमेर्ज्ञा°] A (etc.), मम ज्ञा° F^1.

४. 30a सत्कृते] A^2, सकृतो A^1, सकृते G, F^1 ; 30b lacune générale correspondant à l'indication de l'emplacement du gnomon.

५. 30c यज्ञिकं] SNB, यज्ञिकैर्° A (etc.) ; वृक्ष°] A^2, G, F^1, वृष° A^1.

६. 31c ग्राह्य] A (etc.), भ्राम्यां F^1 ; 31d रवच्छाया] A^1, रज्जुछाया A^2, F^1, रविच्छाया G ; प्रवर्तते] A (etc.), प्रवर्तयेत् F^1, G.

७. 32a चैत्रे च] A^2, G, चैत्रेषु A^1, F^1.

८. 33b लाञ्छयेत्] F^1, G, पिञ्छयेत् A^1, लाञ्चयेत् A^2.

९. 33c पूर्वाह्ने वा पराह्ने वा] G, पूर्वाह्नेव निमित्तेन A^1, lacune A^2, पूर्वाह्ने वा शङ्कुच्छाया F^1.

१०. F^1 donne cette version de 34ab : तत्र सूत्रायं प्राचिं ग्रामादीन्येव वास्तुना।

११. 34a सूत्रायतं] A^1, सूत्रत्रयं A^2, G.

१२. 34c उदीचीं] A^2, समदी A^1, उदीची F^1, G.

[५. वास्तुहोमः]

वास्तुहोमं प्रकल्पयेत्[१] ॥ ३४ ॥

सुमुहूर्ते शुभे ऋक्षे योगे च करणान्विते[२]।
कर्तुश्चैवानुकूले च ब्राह्मणस्वस्तिवाचकैः[३] ॥ ३५ ॥
सूत्रे प्रसार्यमाणे तु निमित्तान्युपलक्षयेत्[४]।
शुभैस्तु कार्यपुष्पाद्यैरथ होमं समारभेत्[५] ॥ ३६ ॥
बीजमुख्येन मन्त्रेण आज्येनैव शतं हुनेत्।

[६. वास्तुमण्डलम्]

[६.१. मण्डलकल्पनम्]

सूत्रं प्रसारयित्वा तु चतुरश्रं समन्ततः ॥ ३७ ॥
चतुरश्रीकृते क्षेत्रे विभजेन्नवधा ततः[६]।
ग्रामादीन्कल्पयेत्तत्र वास्तुदेहव्यवस्थितः[७] ॥ ३८ ॥
यावत्तु खनने भूमिस्तावत्सर्वाङ्गमुच्यते।
विस्तारं तु तथायामं धाम वै चतुरश्रकम्[८] ॥ ३९ ॥
सर्वाङ्गं पूर्णतं यस्मिन्तस्मिन्देहं प्रतिष्ठितम्[९]।

[६.२. मण्डलबाह्यदेवताः]

ईशानादि समारभ्य पादात्पादविभागतः ॥ ४० ॥
ईशानश्चैव पर्जन्यो जयन्तश्च महेन्द्रकः[१०]।

---

१. 34d °होमं] A, °देहं F^1, °गेहं G.

२. 35a ऋक्षे] A^2, F^1, G, रक्षे A^1.

३. 35c कर्तुश्चै°] A^2, F^1, G, अर्के चै° A^1 ; 35d ब्राह्मणस्वस्ति°] F^1, G, ब्रह्मस्वस्त तु A^1, ब्रह्मस्वस्ति° (*v.f.*) A^2.

४. 36a सूत्रे] G, सूत्रं A, F^1 ; 36b निमित्तान्यु°] A^2, G, निर्मितान्यु° A^1, निमित्तानु° F^1.

५. 36d °रथ होमं समा°] A^2, °रथ चा होममा° A^1, °रन्यथा होममा° F^1, G.

६. 38a चतुरश्री°] G, चतुरश्रं A (etc.) ; कृते] A^2, F^1, G, तु ते A^1 ; 38b ततः] A, G, तु यत् F^1.

७. 38d °व्यवस्थितः] A^1, G, °व्यवस्थिताः A^2, °विवस्तिता F^1.

८. 39d धाम वै चतुरश्रकम्] G, यामं चैतातरमश्रकम् A^1, lacune A^2, सर्वाश्चतुरश्रकम् F^1.

९. 40a पूर्णतं यस्मि°] F^1, पूर्णतस्तस्मि° A, G ; 40b °देहं] Eds, °देह° A, °गेहे F^1, G.

१०. 41a ईशानश्चै°] F^1, G, ईशाने चै° A ; 41b °तश्च महेन्द्रकः] A^2, °तश्च महेन्द्र च A^1, G, °तो महेन्द्र एव च F^1.

आदित्यः सत्यकभृशावन्तरिक्षश्च पूर्वगाः[१] ॥ ४१ ॥
दक्षिणे त्वथ वक्ष्यामि आग्नेयादि क्रमेण तु ।
अग्निः पूषा च वितथो गृहक्षतयमौ तथा[२] ॥ ४२ ॥
गन्धर्वो भृङ्गराजश्च मृषश्चेति यमागतः[३] ।
दक्षिणे कथिता ह्येवं पश्चिमे नैर्ऋतादयः ॥ ४३ ॥
पिता दौवारिकश्चैव सुग्रीवश्च तृतीयकः[४] ।
पुष्पदन्तश्च वरुण असुरः शोष एव च ॥ ४४ ॥
[५]रोगो नागस्तथा मुख्यो भल्लाटः सोम एव च ।
मृगश्चैवादितिश्चैव दितिश्चेति तथोत्तरे[६] ॥ ४५ ॥
बाह्ये तु देवताः प्रोक्ता द्वात्रिंशत्पदभोगिनः[७] ।

[६.३. मण्डलान्तर्देवताः]

[८]++++ ++++ गर्भं विन्यासं स्थितम्[९] ॥ ४६ ॥
[१०]ईशानब्रह्मणो रन्ध्रे ++++ ++++[११] ।
… आग्ने वै सवितुस्तु पदद्वयम्…[१२] ।
सावितुर्द्विपदाश्चैव लक्षचित्तप्रयत्नतः[१३] ॥ ४७ ॥

---

१. 41c सत्यक°] F^1, G, सत्यकं A^1, सत्यकः A^2 ; °भृशा°] Eds, °भ्रंशा° A (etc.) ; 41d °क्षश्च] A^2, F^1, G, °क्षं च A^1 ; पूर्वगाः] A^2, G, पूर्वगा A^1, पूर्वकः F^1.

२. 42d °क्षतयमौ तथा] A^1, °क्षतयमस्तथा A^2, G, °क्षं च यमस्तथा F^1.

३. 43b मृषः] Eds, मृगः A (etc.) ; यमागतः] Eds, समागतः A (etc.).

४. 44a पिता] Eds, पित्रौ A^1, पितृ A^2, पित्रौ F^1, पित्रो G ; दौवरिकश्चैव] G, दौवारिकं चैव A, F^1.

५. Lacune probable où serait mentionné Vāyu, entre Roga et Nāga.

६. 45c मृगश्चै°] Eds, ऋगश्चै° A, G, गोश्चै° F^1 ; दितिश्चेति तथोत्तरे] Eds, उदितश्चेति चोत्तरे A, G, इति तैश्चेति चोत्तरम् F^1.

७. 46b °भोगिनः] A^2, F^1, G, °भागिनः A^1.

८. 46c Lacune générale (indication de la position de Brahmā). A^2 : lacune 46cd-48cd.

९. 46d गर्भं] A (etc.), गत्यं G.

१०. 47ab-50ab : très corrompus et lacunaires. F^1 : lacune de la fin de 47b au début de 48c ; G : mêmes manques que A^1.

११. Une lacune a fait disparaître les mentions de Āpa et Āpavatsa (angle intérieur nord-est) et de Ārya (ou Āryamān, six cases à l'Est entre Indra et Brahmā).

१२. 47c आग्ने] A^1, आथे F^1, दले G.

१३. 47e सावितुर्द्वि°] Eds, सावित्री द्वि° A^1, G.

यमस्तु ब्रह्मणश्चान्ते विवस्वांश्चैव षट्पदम्[१]।
[२]...
मित्रश्च ब्रह्मवरुणोरन्ते षट्पदभागिनः[३] ॥ ४८ ॥
[४]वायोश्च ब्रह्मणश्चैव रुद्रस्यैव पदद्वयम्[५]।
रुद्रजयपदद्वये लक्षयेच्च विचक्षणः[६] ॥ ४९ ॥
सोमस्य ब्रह्मणो रन्ध्रे ... [७]।

[६.४. चरक्यादिस्थितिः]

कथयिष्यामि बाह्ये ते चतुष्कोणे व्यवस्थिताः[८] ॥ ५० ॥
ऐशान्यां चरकीं विद्याद्विदार्याग्नेयगोचरे[९]।
[१०]पूतना नैर्ऋते भागे वायव्ये पापराक्षसी[११] ॥ ५१ ॥
सद्वास्तुदेवता याश्च अधोमुखव्यवस्थिताः[१२]।
तासामपदभिन्नास्तु केवलं स्थानचोदिताः ॥ ५२ ॥

---

१. 48a °चान्ते] A^1, lacune F^1, स्थाने G.

२. Lacune où il devait être question de Indra et Indrajaya (deux cases, angle intérieur sud-ouest entre Pitṛ et Brahmā).

३. 48c मित्रश्च] Eds, पित्रश्च A^1, G, ब्रह्मवरुणो° A^1, lacune F^1, ब्राह्मने° G ; 48d षट्पदभागिनः] Eds, मरुषट्पदभागिनः (*v.f.*) A^1, G, मन्त्रषट्पदभोगिनः F^1.

४. G donne cette version de 49ab : वायो ब्रह्मरुद्राश्चैव उदितश्चेति पदद्वयोः ; A^2 en donne une version tronquée (वयो ब्रह्ममिन्द्राश्चैव पदद्वयेत्) suivie de 49c (entre deux lacunes d'un quart de vers) et de 49d.

५. 49b रुद्रस्यैव] A^1, G, इन्द्रस्यैव A^2, lacune F^1 ; पदद्वयं] F^1.

६. 49c रुद्रजयपदद्वये] A^2, G, रुद्रं जयपदं द्वयोश्च A^1, रुद्रजयपदे द्वे च F^1 ; 49d लक्षयेच्च विचक्षणः] Eds, लक्षपदविचक्षणः A, G, लक्षपदविपक्षण F^1.

७. Début d'une lacune (mention de Bhūdhara, six cases au nord entre Brahmā et Soma). Dans A^1 et F^1 50ab se termine par बाह्यतः कथयिष्यामि (qui fait double emploi avec 50c) ; dans A^2 et G une lacune de 4 syllabes est suivie de बाह्यतः.

८. 50d चतुष्कोणे व्यवस्थिताः] A, चतुष्कोणेऽप्यवस्थिताः F^1.

९. 51a ऐशान्यां] A^2, G, ऐशान्यं A^1, ऐशान्ये F^1 ; विद्याद्°] A^2, F^1, G, विद्यां A^1.

१०. F^1 donne la version suivante de 51cd : पूतना नैव मन्त्रं ते हङ्गे वायपोपरं विक्षिपेत्। (?)

११. 51d वायव्ये] A, वायव्यां G.

१२. 52a °देवता याश्च] A^1, °देवाश्च (*v.f.*) A^2, lacune F^1, G ; 52b °व्यवस्थिताः] A^2, °स्थिताह् (*v.f.*) A^1, G, ... स्थिते मुखम् (?) F^1.

[६.५. वास्तुपुरुषदेहः]

एवं विभाजितं कृत्वा वास्तुदेहं तु लक्षयेत्[१]।
शिरोमध्य ईशमेवं शिरःस्थाने नियोजयेत्[२]॥ ५३॥
एवं देहे तु वामे तु वास्तुदेवान्प्रकल्पयेत्[३]।
बाहुमध्ये तु चाग्नेयं सविता हस्तसंस्थितः[४]॥ ५४॥
प्राच्यादि दक्षिणे चैव पूर्वदक्षिणयोः स्थितौ[५]।
वामे चैव तु देवाः स्युरुत्तरे पश्चिमेन तु[६]॥ ५५॥
चक्षुषोर्दितिपर्जन्यौ जयन्तादितौ कर्णयोः[७]।
[८]आवृधे +++श्चैव स्तनयोरुभयोरपि[९]॥ ५६॥
नाभिमध्ये स्थितो ब्रह्मा सावित्री कुक्षिपार्श्वयोः[१०]।
[११]राजलक्ष्मी द्वितीयं तु ; इन्द्र इन्द्रजये शृणु[१२]॥ ५७॥
श्रोणित्वमेव देहे तु देवदेहं तु कीर्तिता[१३]।

[६.६. मर्माणि]

त्रिशूलं सन्धिषट्पञ्चचतुष्कं पद्ममेव वा[१४]॥ ५८॥

---

१. 53a °भाजितं] A^2, F^1, G, °भाजिता A^1.

२. 53c शिरो°] A^2, F^1, G, शिरे A^1 ; °मध्य ईशमेवं] A^2, F^1, °मध्येशमेवं तु A^2, F^1, °मध्येशमेवास्तु A^1, G ; 53d शिरः°] A^1, शिर° A^2, F^1, G.

३. 54a देहे] Eds, गेहे A (etc.) ; 54b °देवान्प्र°] G, देवाः प्र° A, °देवाप्र° F^1.

४. 54d °स्थितः] SNB, °स्थितम् A (etc.).

५. 55a प्राच्यादि दक्षिणे चैव] A^1, दक्षिणे चैव पूर्वे च A^2, दक्षिणे चैव ++ F^1, G.

६. 55c वामे चैव तु देवाः स्यूरुत्त°] A^2, वामेन चैतदेवास्या उत्त° A^1, वामश्चैव तथोपस्यादुत्त° F^1, यामे चैव तदेव स्यादुत्त° G.

७. 56a चक्षुषोर्दि°] A, G, चक्षुषौ दि° F^1 ; दिति° A^1, F^1, G, दिक्षु A^2 ; 56b जयन्तादितौ] Eds, जयन्तादि च A, G, जयन्तोदिति F^1.

८. F^1 : lacune 56c-58b.

९. 56c आवृधे +++श्चैव] A^1, आप्रशेश्चे A^2, अवृशीश्चे... G. Il est sans doute question de Bhūdhara et Āryamān ou de Āpa et Āpavatsa.

१०. 57a नाभिमध्ये] A, नभिरन्ध्रे G.

११. 57c n'est pas à sa place !

१२. 57d इन्द्र] G, इन्द्रा A ; इन्द्रजये] Eds, इन्द्रजयं A, G.

१३. 58a श्रोणित्वमेव देहे तु] G, श्रोणिद्वमेव देहं तु A^1, श्रोणिद्वमेव +++ A^2 ; 58b देवदेहं तु कीर्तिता] A^1, ++देहं तु कीर्तिताः A^2, +++++कीर्तिताः G.

१४. 58c सन्धि°] A (etc.), पिण्डि° G.

देवानामालयान्तं च शिरःस्थानं च लक्षयेत्।
लक्षयेद्वास्तुहोमं तु सर्वहोमव्यवस्थिताः[१] ॥ ५९ ॥
ईशो ब्रह्मा दितिश्चैव रोगश्चैव पितृस्तथा[२]।
रोगश्चाग्निश्च मध्यश्च ++++++++[३] ॥ ६० ॥
महेन्द्रादित्यसत्यश्च गृहक्षतयमा परे[४]।
पुष्पदन्तश्च वरुणो असुरश्च त्रितीयकम्[५] ॥ ६१ ॥
भल्लाटाख्यातवरुणस्तस्य सोममपार्श्वतः[६]।
ब्रह्मा नवपदात्पद्मं षट्कैश्चैव चतुष्टये[७] ॥ ६२ ॥
सविरेखा समाख्यातं ललाटं तु पदार्थकम्[८]।
इन्द्रमिन्द्रजयो रुद्रा न व्यवस्थितदेवताः[९] ॥ ६३ ॥
++++ पदमध्ये स्थानं चैव तु लक्षयेत्।
एतान्देवगणानाह एकाशीतिपदे स्थितान्[१०] ॥ ६४ ॥
[११]एवं विधाय कर्तव्यमेकाशीतिपदं बुधैः।
त्रिशूले गर्भनासस्तु सन्धौ मित्रार्थनाशनम्॥ ६५ ॥
[१२]षट्केन बहुलाङ्गेन शिरोरोगो शिरो भवेत्।

---

१. 59c लक्षयेद्वास्तुहोमं तु] A, G, लक्षयोद्वास्वाहेमं तु F¹ ; 59d सर्वहोमव्यवस्थिताः] A¹, ++++ व्यवस्थिताः A², ++++ व्यवस्थिता F¹, G.

२. 60a ईशो] A¹, ईशा A², F¹, G ; 60b : पितृस्तथा se trouve dans tous les manuscrit.

३. 60c °श्चाग्निश्च] A², F¹, G, °श्चानिश्च A¹ ; मध्यश्च] A¹, मध्यतः A², मध्ये तु F¹, G.

४. 61a °दित्य°] A¹, F¹, G, °दित्यश्च (*v.f.*) A² ; 61b गृह°] F¹, ग्रह° A, G.

५. 61c वरुणो] A², F¹, वरुणा A¹, G ; 61d असुरश्च त्रितीयकम्] F¹, वसुरोश्च द्वितीयकम् A¹, वसुरोश्च द्वितीयकः A², G

६. 62a भल्लाटाख्यातवरुण°] A, भल्याटख्यातवारुण... F¹, भल्लाटाद्योतवरुण... G ; 62b तस्य सोममपार्श्वतः] A¹, +++ सोमः पार्श्वतः A², +++ सोमपावकः F¹, +++ सोमपार्श्वतः G.

७. 62d षट्कैश्चैव] A, G, षट्कं चैव F¹ ; चतुष्टये] A, F¹, चतुष्टयोः G.

८. 63a सविरेखा समाख्यातं] A, G, सविरेख्यातं... F¹ ; 63b पदार्थकम्] A, G, पदार्धकम् F¹.

९. 63c इन्द्रमिन्द्र°] (?) F¹, इन्द्रमित्र°] A, G ; 63cd रुद्रा न व्यव°] A¹, रुद्र व्यव° A², रुद्र+व्यव° F¹, G ; °स्थित°] A¹, G, °स्थिता A², F¹.

१०. 64cd °गणानाह एकाशीति] SNB, °गणानेकानाहशीति A¹, °काशीति (*v.f.*) A², °+एकाशीति F¹, G.

११. A² : lacune 65ab-66ab

१२. F¹ : सषट्के तु बहुलङ्गलेन तु शिरोरोगा + suivi de : शिरसिश्च शिरोवशक्षयो भवेत्।

स्थनान्येतानि संरक्ष्य[१]

[७. वास्तुबलिः]

[७.१. बाह्यदेवताबलिः]

सूर्ये धूमघृतादिकम्[२] ॥ ६६ ॥
घृतो गोधूमजः सत्ये भृशे मत्स्यं तु दापयेत्[३] ।
शाकुनं चान्तरिक्षाय घृतश्चैवाग्नये तथा[४] ॥ ६७ ॥
पूष्ण आज्यं च दातव्यं हिरण्यं वितथे तथा[५] ।
गृहक्षताय गोधूमं यमे वै पिशितोदनम्[६] ॥ ६८ ॥
गन्धं गन्धर्वदेशे तु भृङ्गे जीवा तु शाकुनम्[७] ।
मृषे तिलयवाश्चैव पितुश्च कृसराः स्मृताः[८] ॥ ६९ ॥
कोष्ठं दौवारिके चैव सुग्रीवे पुष्पकं बली[९] ।
कुशं वै पुष्पदन्ते च पद्मं वै वारुणे बली[१०] ॥ ७० ॥
असुरे च नयानाद्याच्छोषे वापि घृतोदनम्[११] ।
यवान्नं पापयक्षाय रोगाय घृतमण्डका[१२] ॥ ७१ ॥

---

१. 66c स्थाना°] F^1, G, स्वाना° A^1, lacune A^2.

२. 66d सूर्ये] SNB, सूर्यो A, G, स्त्ववसूर्यो F^1 ; धूमघृतादिकम्] SNB, धूम्रपतादिकम् A^1, धूम्रपताककम् A^2, G, धूम्रपादकम् F^1.

३. 67a घृतो गोधूमजः] A^1, केतगोधूमजः A^2, घृते गोधूमजं F^1, G ; सत्ये] G, सद्यो A^1, सन्द्यो A^2, सत्यो F^1 ; 67b भृशे मत्स्यं तु] SNB, भृशो मध्येस्तु A^1, भ्रूमध्ये ++ A^2, भृशो मत्स्येस्तु F^1, भृगो मध्येस्तु G.

४. 67c शाकुनं चा°] F^1, शकुनश्चा° A, G ; °रिक्षाय] SNB, °रिक्षा च A^1, F^1, °रिक्षाश्च A^2 ; °वाग्नये तथा] Eds, °वाग्निदेवता A, F^1, °वाश्विदेवतः G.

५. 68a पूष्ण आज्यं] Eds, पूषायाजः A (etc.) ; दातव्यं] F^1, दामह्यं A, G ; 68b वितथे] F^1, वितथो A, वितथौ G.

६. 68c गृहक्षताय] F^1, ग्रहक्षतव° A, ग्रहक्षत च G ; 68d यमे वै पिशितोदनम्] SNB, +++विशितोदनम् A, वै पिशितो तातादनम् F^1, पिशितोदनम् G.

७. 69a गन्धं गन्धर्व देशे] G, गन्धर्वगन्धदेशे A, गन्धो गन्धर्वदेशे F^1 ; 69b भृङ्गे] F^1, G, भ्रंशे A ; शाकुनम्] G, शाक्तनम् A^1, शान्तनम् A^2, शा आनम् F^1.

८. 69c मृषे] Eds, मृगे A (etc.) ; 69d कृसराः स्मृताः] G, तुसरस्मृता A^1, तुसरस्मृतः A^2, कृसरा स्मृता F^1.

९. 70a कोष्ठं] G, कोष्ठे A, कोष्ठ° F^1 ; दौवारिके चैव] SNB, दौवारिकश्चैव A (etc.) ; 70b पुष्पकं बली] G, पुष्पकं मली A^1, पुष्पकमालि (*v.f.*) A^2, पुष्पकं बलः F^1.

१०. 70d वारुणे] A^2, F^1, G, वारुणो A^1 ; बली] A, बिलम् F^1.

११. 71a नयानाद्या°] A^1, lacune A^2, G, युनद्या° (*v.f.*) F^1.

१२. 71c पापयक्षाय] F^1, पापयक्ष्माय A, पापक्ष्यं G ; 71d घृतमण्डका] A^1, F^1, G, घृतमण्डकाः A^2.

[१]नागाय नागपुष्पाणि भक्ष्यं मुख्याय दापयेत्[२]।
मुद्गोदनं च भल्लाटे सोमाय मधुपायसम्॥ ७२॥
मृगायाक्षतं दातव्यमादित्यैऽल्पोदनं तथा[३]।
उदित्ये पूरिकाश्चैव इत्येवं बाह्यतो बलिम्[४]॥ ७३॥

[७.२. अभ्यन्तरदेवताबलिः]

अधुनाभ्यन्तरे वक्ष्ये देवतानां दिशां बलिम्[५]।
क्षीरमापाय दातव्यमापवत्साय वै दधि॥ ७४॥
सक्तुकं समरीचाय सावित्राय कुशोदकम्[६]।
सवितुर्गुलं च पूपः विवस्वतो रक्तचन्दनम्[७]॥ ७५॥
इन्द्रेन्द्रजयश्चैव घृतोदनं शष्कुलीयकम्[८]।
हरिद्रान्नं तु मित्राय दापयेत्तु विचक्षणः॥ ७६॥
रुद्राय रुद्रजयाय च दातव्यं गुलपायसम्[९]।
पृथ्वीधराय मांसान्नं कृष्णगन्धं निदापयेत्[१०]॥ ७७॥
तिलाक्षतयवाश्चैव पञ्चगव्यकुशोदकम्।
हविः पूर्णचरुं चैव ब्रह्मस्थाने निवेदयेत्॥ ७८॥
एवं वै पूजिता देवाः शान्तिपुष्टिजयं भवेत्।

---

१. Lacune concernant Vāyu.

२. 72a नागपुष्पाणि] SNB, नागपुष्पाय A (etc.) ; भक्ष्यं] A, G, भिक्षं F^1.

३. 73a मृगायाक्षतं] Eds, मृगाक्षताय A^2, F^1, G, ग्रहाक्षताय A^1 ; 73b °मादित्यै] Eds, °मादित्यो A, °मादित्ये F^1, °मसित्यो G.

४. 73c उदित्ये] Eds, उदके A^1, इन्द्रके A^2, इति के F^1, उदिके G ; 73d बलिम्] A^1 (var.), बलम् A, F^1, बलिः G.

५. 74a अधुनाभ्यन्तरे] A, अधाभ्यन्तरे F^1, अधुनाभ्यन्तरं ; 74b दिशां बलिम्] G, दिशाबलम् A (etc.).

६. 75a सक्तुकं] A^2, सक्थुकं A^1, सतुकं F^1, lacune G.

७. 75c सवितुर्गु°] A, G, बलिं तु गु° F^1 ; °गुलं च पूपः] Eds, °गुलाय पूपाय A^1, °गुलापूपाय A^2, G ; 75d विवस्वतो] (*v.f.*) G, वस्वतो A (etc.).

८. 76a इन्द्रेन्द्रजयश्चैव] G, इन्द्रो इन्द्रजयश्चैव A, इन्द्रो इन्द्रजये चैव F^1 ; 76b घृतोदनं] A^2, F^1, G, घृतोदकं A^1 ; शष्कुलीयकम्] A^1, शाष्कुलीयकम् A^2, G, शषुयकम् F^1.

९. 77a रुद्राय] Eds, रुद्रा च A, F^1, G ; रुद्रजयाय] Eds, राजलक्ष्म्या A (etc.).

१०. 77c पृथ्वीधराय] F^1, G, शिथियनाय A ; °गन्धं नि°] G, °गन्धानि A (etc.).

[७.३. राक्षस्यादिबलिः]

बाह्यतस्तु तथा देवा राक्षसीनां प्रयत्नतः ॥ ७९ ॥
मांसोदनं घृतं चैव दध्योदनमिति स्मृतम्[१] ।
चरक्यै चैव दातव्यं पीदार्यै च ततः पुनः[२] ॥ ८० ॥
[३]पक्वमांसबलिं दद्यात्पूतनायै ततः परम्[४] ।
रक्तोदनं च मांसं च दातव्यं तद्विचक्षणः ॥ ८१ ॥
अस्थिखण्डं च मांसं च दापयेत्पापराक्षसीम्[५] ।
इत्येते पूतनाद्यास्तु स्वस्वमन्त्रेण तर्पयेत्[६] ॥ ८२ ॥
नमस्कारार्चने काले स्वाहान्तेन बलिं ददेत्[७] ।
एवं बलिक्रमं प्रोक्तं ग्रामादीनां तु दापयेत्[८] ॥ ८३ ॥

[८. ग्रामादौ देवालयस्थितिः]

ग्रामादीशानदिग्भागे ईश्वरालयमेव च ।
[९]मध्ये विष्णुगृहं प्रोक्तं पञ्चमूर्तिविधानतः[१०] ॥ ८४ ॥
[११]ऐन्द्रे तु भास्करस्थानं महामोटिं तु पावके[१२] ।
दुर्गादेवीं तु याम्यायां शास्ता नैर्ऋतगोचरे[१३] ॥ ८५ ॥
वारुण्यां विष्णुसंस्थानं विघ्नेशं वायुदेशतः[१४] ।

---

१. 80b स्मृतम्] A^1, श्रुतम् A^2, F^1, श्रितम् G.

२. 80c चरक्यै] Eds, चरकी A (etc.) ; 80d पीदार्यै] Eds, पीदारी A (etc.).

३. A omet 81ab.

४. 81a पक्वमांस°] Eds, पक्वमांसे F^1, G ; 81b °पूतनायै] Eds, °पूतना च F^1, G ; परम्] F^1, पुनः G.

५. 82a अस्थि°] F^1, G, अस्थं A^1, अस्ति° A^2.

६. 82d स्वस्व°] A^2, स्वस्वैर्° A^1, स्वैस्वै° F^1, स्वैः स्वैर्° G ; मन्त्रेण] A (etc.), मन्त्रैः सु° G.

७. 83a काले] A^1, G बाले A^2, lacune F^1 ; 83b स्वाहान्तेन बलिं ददेत्] A, G, स्वाहान्तं बलिरेव च F^1.

८. 83d तु दापयेत्] A (etc.), बलिं ददेत् G.

९. A^2 ajoute एवं ग्रहं प्रोक्तं नकु विधानतः entre 84ab et 84cd et remplace 84d par 86b.

१०. 84c विष्णुगृहं प्रोक्तं] A^1, F^1, G, विष्णुं सुसंस्थाप्य A^2 ; 84d पञ्चमूर्ति°] G, पञ्चशक्ति° A, पञ्चमूर्ध्नि F^1.

११. 85ab = 118cd.

१२. 85b महा°] Eds, ब्रह्म° A, ब्रह्मा° F^1, G ; °मोटीं] Eds, °मोढीं A, °मोहीं F^1, °मोदीं G.

१३. 85d शास्ता] G, शान्ता A (etc.).

१४. 86a °संस्थानं] A, G, °संस्थाप्य F^1.

भद्रकालीं तु सौम्यायां मातृस्थानं तु वा पुनः[१] ॥ ८६ ॥

[९. ईश्वरालयः]

[९.१. ईश्वरपरिवाराः]

ऐशान्यामीश्वरस्थानं पञ्चप्राकारसंयुतम्[२]।
परिवाराष्टकं चान्तर्हारामध्ये विधीयते[३] ॥ ८७ ॥
षोडशं तु परिवारं मध्याहारे प्रकल्पयेत्[४]।
द्वात्रिंशत्परिवारांस्तु न्यसेन्मर्यादिभित्तिके[५] ॥ ८८ ॥
लक्षणं परिवाराणां वक्ष्यते सकलं मया।

[९.२. स्थावरलिङ्गः]

त्रिसूत्रमुकुलैर्युक्तं ब्रह्मविष्णुशिवैर्युतम्[६] ॥ ८९ ॥
स्थावरं लिङ्गमेवं तु प्रतिष्ठा चोत्तरायणे।

[९.३. प्रतिमाः]

किंचिदस्मिन्विशेषोऽस्ति तत्सर्वं शृणु चानल॥ ९० ॥
शैलजप्रतिमाः सर्वाश्चलाचलमिति स्मृतम्[७]।
लोहजप्रतिमानां तु जङ्गमं चेति कीर्तितम्[८] ॥ ९१ ॥

[९.३.१. जङ्गमबिम्बप्रतिष्ठा]

जङ्गमानां तु बिम्बानां प्रतिष्ठां वक्ष्यतेऽधुना[९]।
मेषे च वृषभे चैव तुलावृश्चिकयोस्तथा[१०] ॥ ९२ ॥

---

१. 86d मातृस्थानं] SNB, अत्रस्थाने A^1, मातृस्थाने A^2, F^1, G.

२. 87a ऐशान्यां] G, ईशान्यां A (etc.) ; °मीश्वर°] A^1, F^1, G, °ममर° A^2.

३. 87cd चान्तर्हारामध्ये] SNB, चान्तरोमध्ये A, शान्त ++हं F^1, चान्तर्वारामध्ये G.

४. 88a तु परिवारं] A, G, परिवाराणां F^1.

५. 88c द्वा°] A^1, F^1, षट्° A^2 ; परिवारांस्तु] Eds, परिवाराणां A (etc.) ; 88d न्यसेन्म°] A, G, त्यजेन्म° F^1.

६. 89c °सूत्र°] A (etc.), °सूत्रैर्° G ; °युक्तं] A^2, F^1, G, °युक्त° A^1.

७. 91a सर्वाश्च°] G, सर्वा च° A^1, सर्वे च° A^2, F^1 ; 91b चलाचलमिति स्मृतम्] A, G, शैलजैर्वाचला तथा F^1.

८. 91d चेति कीर्तितम्] A, G कीर्तिता मया F^1.

९. 92a बिम्बानां] A, G, सर्वेषां F^1.

१०. 92d तथा] Eds, गतः A (etc.).

मकरे ज्येष्ठमासे तु षण्मासे तु प्रशस्यते।
शुक्लपक्षे द्वितीया च तृतीया पञ्चमी तथा॥ ९३॥
षष्ठी च सप्तमी चापि दशम्येकादशी तथा।
त्रयोदशी चतुर्दशी शुभमेतत्प्रशस्यते॥ ९४॥
रोहिण्यां सौम्यनक्षत्रे आदित्ये चोत्तरत्रये[१]।
[२]मघार्द्राप्यनुराधा च श्रवणा च शुभप्रदाः[३]॥ ९५॥
इन्दुभार्गवसौम्यानां वाराः श्रेष्ठतमाः स्मृताः[४]।
कर्षणादिप्रतिष्ठान्तं लोहजप्रतिमादिषु[५]॥ ९६॥

[९.३.२. जङ्गमबिम्बस्थानम्]

अन्तर्हारान्ततः कुर्यादायताश्रं तु मण्डपम्[६]।
तन्मध्ये स्थापयेन्मूर्तिं नृत्तरूपं सुसंस्थितम्[७]॥ ९७॥
अन्तःसालाग्रतः कुर्यादायताश्रं तु मण्डपम्[८]।
तन्मध्ये स्थापयेद्विद्वान्सुखासनप्रतिमादिकान्[९]॥ ९८॥

[९.३.३. जङ्गमबिम्बप्रासादः]

गर्भस्य मध्यहारे तु मध्ये वै कल्पयेत्सुधीः[१०]।
आग्नेय्यां पश्चिमे भागे याम्यायां नैर्ऋते पदे॥ ९९॥
प्रासादं कल्पयेद्धीमान्यजमानेच्छया भवेत्।
दारुकैश्चेष्टकैर्वापि शैलजैर्वा यदृच्छया॥ १००॥

---

१. 95a सौम्य°] A[2], F[1], G, सम्य° A[1].

२. F[1] : मायास्वादिक्षनक्षत्रे रोयाश्रवणा शुभ्यश्च (?).

३. 95c मघार्द्राप्य°] A[1], मघातिष्य° A[2], मखा स्वाती ह्य° G ; 95d श्रवणा च] A[2], G, श्रवणाश्च A[1], श्रवण च F[1].

४. 96a इन्दु°] Eds, इन्द्र° A (etc.) ; °सौम्यानां] G, °सौम्यायां A (etc.).

५. 96c °दिप्रतिष्ठान्तं] A[2], F[1], G, °दित्य तिष्ठान्तीं A[1].

६. 97a अन्तर्हारान्ततः] A[2], G, अन्तर्हारा ततः A[1], अन्तरभाराग्रतो F[1].

७. 97c °येन्मूर्तिं] Eds, °येच्छान्तिं A[1], °येद्याग्निं A[2], F[1], G ; 97d नृत्त°] A, G, उक्त° F[1].

८. 98a अन्तःसालाग्रतः कुर्यादा°] G, अतः सालाग्रतः कुर्यादा° A[1], अतः शूलाग्र +कुर्यादा° A[2], अत साराग्रतः कृत्वा आ° F[1] ; 98b °यताश्रं] A[2], F[1], °यदाग्रं A[1], G.

९. 98d सुखासनप्रतिमादिकान्] (*v.f.*) A[2], G, सुखानप्रतिमादिकान् A, सुखासनप्रतिमादिषु (*v.f.*) F[1].

१०. 99a गर्भस्य मध्यहारे] A, गुह्यस्थं लहारे F[1], गर्भस्य मध्यवारे G.

दारुजैश्चेष्टकं श्रेष्ठं चेष्टकैर्लोहजोत्तमम्[१]।
प्रासादं कल्पयेद्धीमान्पञ्चहस्तप्रमाणतः ॥ १०१ ॥
षड्वर्गेण समायुक्तं चतुर्मूर्तिविधा भवेत्[२]।
वृषस्थानं विना ग्रीवं चतुर्नासिसमायुतम्[३] ॥ १०२ ॥
अधिष्ठानं प्रथमवर्गं पादवर्गं द्वितीयकम्[४]।
प्रस्तरं तु तृतीयं तु कण्ठवर्गं चतुर्थकम्[५] ॥ १०३ ॥
शिखरं पञ्चमं वर्गं षड्वर्गं स्थूपिरुच्यते[६]।
आप्रासादाग्रतो विद्वानर्धमण्डपमिष्यते ॥ १०४ ॥
द्वारपालार्चनं तत्र प्रासादे तु प्रतिष्ठिते[७]।
मध्यमे स्थापयेद्विद्वान्सोमास्कन्दं च विग्रहम्[८] ॥ १०५ ॥
शिवमन्त्रेण संस्थाप्य पूर्वोक्तविधिना सह।
प्रवेशनिर्गमं चैव जङ्गमप्रतिमादिषु ॥ १०६ ॥
सकलाराधनं वीक्ष्य अर्चयेत्तन्त्रवित्तमः[९]।

[१०. नगरादित्रयम्]

ग्रामवास्तुरिति प्रोक्तं नगरादिमतः शृणु[१०] ॥ १०७ ॥
नगरादित्रये चाग्ने मध्ये विष्णुगृहं विना[११]।
अन्यत्सर्वं समानं तु राजधानीं शृणुष्वथ[१२] ॥ १०८ ॥

---

१. 101a °श्चेष्टकं] A^2, °श्चेष्टकैः A^1, F^1, G ; 101b °श्चेष्टकैर्लोहजोत्तमम्] A^1, G, °श्चेष्टकाल्लोहजमुत्तमम् A^2, °श्चेष्टजैच्छैलजोत्तमम् F^1.

२. 102b °विधा भवेत्] A^2, F^1, G, विभाभयेत् A^1.

३. 102c वृष°] A (etc.), विष° G ; ग्रीवं] Eds, वृक्षं A, वृषं F^1, G ; 102d °नासि°] A, G, °नाडि° F^1.

४. Vers faux dans tous les manuscrits.

५. 103c तृतीयं] A, G, द्वितीयं F^1 ; 103d चतुर्थकम्] A^1, G, त्रितीयकम् F^1.

६. 104a शिखरं] G, शिखा A, शिरं F^1 ; पञ्चमं वर्गं] G, विपन्नधी वर्गं A^1, च पञ्चकवर्गं A^2, भूतवर्गं तु (*v.f.*) F^1.

७. 105b प्रतिष्ठिते] Eds, प्रतिष्ठितम् A (etc.).

८. 105c मध्यमे] A, G, तन्मध्ये F^1 ; 105d °सोमास्कन्दं च विग्रहम्] A, G, उमास्कन्दसहितं परम् F^1.

९. 107a वीक्ष्य] F^1, वक्ष्ये A, G ; 107b °तन्त्रवित्तमः] G, °तत्र वित्तमः A, °तत्र वित्तम F^1.

१०. 107c ग्रामवास्तुरिति] G, ग्रामस्तु निर्ऋतिः A^1, ग्रामस्तुनिति (*v.f.*) A^2, ग्रामायांस्तु इदं F^1 ; 107d नगरादिमतः] SNB, नागरादिमतः A, नागरादिमिदं F^1, नागरादित्रयं G.

११. 108a नगरादित्रये] SNB, नागरादित्रये A (etc.) ; 108b विष्णुगृहं] G, विष्णुग्रहं A, विष्णुं गृहं F^1.

१२. 108d शृणुष्वथ] A, षृणु ++ F^1, ततः शृणु G.

[११. राजधानी]

[११.१. द्वाराणि]

राजेच्छया परिग्राह्य वास्तुकल्पाय पूर्ववत्[१]।
प्राकारं परितः कुर्याच्चतुरश्रायताश्रकम्॥ १०९॥
महेन्द्रद्वारं पूर्वे तु गृहक्षतद्वारं दक्षिणे[२]।
पुष्पदन्तं न्यसेद्धीमान्द्वारं वै पश्चिमस्य तु॥ ११०॥
भल्लाटद्वारमेवं तु उत्तरद्वारमेव च[३]।
महाद्वारात्सव्यभागे शुद्धद्वारं तु कारयेत्[४] ॥ १११॥

[११.२. योषितादिस्थानम्]

सर्वसिद्धिसमायुक्तं योषितां चैव सव्यकम्[५]।
दक्षिणे वर्जयेद्वीथीं पश्चिमे लेखकाः स्मृताः[६]॥ ११२॥
अमात्यपुरोहिता मन्त्री सेनापतिरुदाहृताः[७]।
अन्यसामन्तकैर्युक्तं वीथ्यामुत्तरतो गृहम्[८] ॥ ११३॥

[११.३. राजवेश्म]

राजवेश्मगृहमध्ये हर्म्यं वै पञ्चभूमिकम्[९]।
हर्म्यस्य द्विगुणं चाग्रे परितो मालिका भवेत्[१०]॥ ११४॥
तत्प्राकारस्य माहेन्द्रं द्वारं वै कल्पयेत्सुधीः[११]।

---

१. 109b वास्तुकल्पाय पूर्ववत्] A^1, वास्तु कल्पयेत्पूर्ववत् A^2, F^1, पूर्ववद्वास्तुं कल्पयेत् G.

२. 110a °द्वारं पूर्वे] Eds, द्वारपूर्वे A, द्वारपूर्वं F^1 ; 110b गृहाक्षत°] (*v.f.*) F^1, गृहं च A^1, G, ग्रहक्ष्तं A^2 ; °द्वारं] Eds., °द्वार° A, F^1, G.

३. 111a भल्लाटद्वारमेवं F^1, भल्लाटद्वारवामं A^1, भल्लाटं द्वारवामे A^2, G.

४. 111c °द्वारात्सव्यभागे] F^1, °द्वारान्सभागे A^1, G, °द्वारस्य भागे A^2 ; 111d शुद्धद्वारं] A, G, शुष्कद्वारं F^1.

५. 112a सर्वसिद्धि°] A^1, G, सर्वसन्धि°A^2, चर्वधीम° F^1 ; 112b °योषितानां तु सव्यकम्] A^2, F^1, °ये वितानां तु सर्व्यका A^1, °योषितानां तु सर्वका G.

६. 112d लेखकाः स्मृताः] A, G, लेखका स्मृता A^2, F^1.

७. 113a अमात्यपुरोहिता मन्त्री] G, अमात्यं पुरोहितं मन्त्रि° A^1, F^1, अमात्यपुरोहितमन्त्री A^2 ; 113b °दाहृतः G, °दाहृतम् A, F^1.

८. 113d वीथ्या°] A^2, F^1, G, वीर्य° A^1.

९. 114a °गृह°] Eds, °गृहा° A^1, G, °गृहान्° A^2, °गृहैर्° F^1.

१०. 114d परितो] SNB, परिवृतो (*v.f.*) A, F^1, परिकृतो (*v.f.*) G.

११. 115a माहेन्द्रं] A^1, F^1, माहेन्द्र° A^2, माहेन्द्रे G.

द्वारपालनबाह्ये तु आस्थानमण्डप उच्यते[१] ॥ ११५ ॥
ऐशे मज्जनशालां च आरामां चैव पश्चिमे[२]।
मण्डपस्योत्तरे सव्ये गर्भस्थानं विधीयते[३] ॥ ११६ ॥
[४]आस्थानमण्डपे पूर्वेऽभिषेकस्थानमेव च।
बाह्यप्राकारसव्ये तु द्वारमेकं प्रकल्पयेत्॥ ११७ ॥
पूर्वद्वाराग्रके कुर्याद्भेषजस्थानमेव च।

[११.४. अन्तरप्राकारे देवतालयाः]

ऐन्द्रे तु भास्करस्थानं महामोटयास्तु पावके[५] ॥ ११८ ॥
सुब्रह्मण्यं तु याम्यायां पित्रौ द्वाःस्थं च लाभयेत्[६]।
दौवारिकपदे वाथ तत्स्थाने स्थापयेद्धरिम्॥ ११९ ॥
विघ्नेशं वायुदिग्भागे सौम्ये वै भद्रकालिनीम्।
वास्तुबाह्ये तु कर्तव्यं वासवस्यातिदूरतः[७] ॥ १२० ॥
ऐशान्ये क्षेत्रपालं तु तद्बाह्ये चेश्वरालयम्।
वाजिस्थाने यजेन्नृत्तं गन्धस्थाने विनायकम्॥ १२१ ॥
द्वारे तु सव्यवामे तु शास्तृविघ्नेश्वरौ यजेत्[८]।
एवं वै वास्तुदेवांश्च पूजयेत्तु यथाविधि[९] ॥ १२२ ॥
सर्वदोषनिवृत्त्यर्थं ग्रहपीडां व्यपोहति[१०]।

---

१. 115c द्वारपालनबाह्ये तु] A^1, द्वारबाह्ये तु (*v.f.*) A^2, द्वारं बाह्ये तु वामे तु F^1, द्वारबाह्ये तु वामे तु G ; 115d आस्थान°] A^2, G, आस्थानं A, F^1 ; °मण्डप उच्यते] (*v.f.*) A^2, °मण्डपोच्यते A^1, F^1, G.

२. 116b आरामां] A^2, F^1, G, आतरां A^1.

३. 116d गर्भस्थानं वि°] A^1, F^1, गर्भसानुर्वि° A^2, G.

४. F^1 ajoute entre 117a et 117b : त्वर्वस्थानमेव च। चण्डवर्ते तत्पूर्वे लेप्य स्थनं यु वामके। सिद्धिवेनसमायुक्ता जलकीटाद्वारसव्यके। निर्गमद्वारसव्ये तुर्गस्थ ... न्वितीयके। ... लयं यु स ...

५. 118d °मोटयास्तु] SNB, °कोटयं तु A, lacune F^1, °मोटयां तु G ; पावके] A^2, F^1, G, पावक A^1.

६. 119b द्वाःस्थं च लाभयेत्] A^1, द्वाम्यं च लाभयेत् A^2, द्वार्थं च वाहयेत् F^1, द्वार्थं च लाभयेत् G.

७. 120d वासवस्यातिदूरतः] A^2, सपश्चस्यात्रिदुरतः A^1, मण्डपं स्यादिदूरतः F^1, ... पश्यातिदूरतः G.

८. 122a तु सव्यवामे तु] A, तु वा सव्ये तु F^1, तु वामसव्ये तु G ; 122b शास्तृविघ्नेश्वरौ] Eds, शास्ता विघ्नेश्वरं A (etc.).

९. 122c वास्तुदेवांश्च] SNB, वास्तुदेवानां A (etc.).

१०. 123a °दोष°] A, G, °देव° F^1.

[११.५. बाह्यप्राकारः]

एवं वै कल्पयेद्धीमान्प्राकारं परितो भवेत्[१] ॥ १२३ ॥
बाह्यप्राकारवीथीषु आयतावृत्तमेव च[२] ।
महेन्द्रद्वारपूर्वे तु महावीथीं तु कल्पयेत्[३] ॥ १२४ ॥
सेनापतिस्तु सचिवो महत्सामन्तकादिभिः ।
महावीथीद्वयोः पार्श्वे गृहे वा हर्म्य एव वा[४] ॥ १२५ ॥
[५]द्वारं पूर्वस्य तु पश्चात्तद्वारं कल्पयेत्सुधीः ।
महेन्द्रद्वारवामं तु क्षुद्रद्वारं तु सव्यके[६] ॥ १२६ ॥
दक्षिणे पश्चिमे चैव उत्तरे पूर्ववद्भवेत् ।
हर्म्यं वाथ मुखे वापि द्वारमेवं प्रकल्पयेत्[७] ॥ १२७ ॥
वणिजां च क्रियाणां तु तन्तुकारोऽथवा पुनः[८] ।
[९]ध्वजैश्च सूकरैश्चैव चव्यकारोऽथवा पुनः[१०] ॥ १२८ ॥
बाह्यप्राकारमध्ये तु कल्पयेत्तु गृहं प्रति ।
क्षुद्रद्वाराग्रतः कुर्यान्महाद्वाराग्रके पुनः[११] ॥ १२९ ॥
वीथीस्तु कल्पयेद्धीमांस्तत्तत्स्थाने गृहे गृहे[१२] ।
अन्त्येषु शुद्धवीथीं तु तद्वयोः पार्श्वयोः प्रति[१३] ॥ १३० ॥

---

१. 123d परितो] A¹, पतितो A².

२. 124b आयतावृत्तं] A¹, G, आयतावर्तम् A², आयतो वृत्तं F¹.

३. 124d महावीथीं] A, G, पःआपीठं F¹ ; कल्पयेत्] A, F¹, कारयेत् G.

४. 125d हर्म्य एव] G, हर्म्यमेव A, F¹.

५. Le texte de 126ab varie beaucoup d'un manuscrit à l'autre : द्वारवत्पूर्वद्वारं कल्पयेत्सुधीः । (A²) ; द्वारपूर्वा द्वारं + + + कल्पयेत्सुधीः । (F¹) ; द्वारवत्पूर्वे तद्वारं बाह्यद्वारं तु कल्पयेत् । (G).

६. 126c °द्वारवामं] A, G, °द्वारमेवं F¹ ; 126d क्षुद्रद्वारं] A, G, सुष्कद्वारं F¹.

७. 127c वाथ मुखे वापि] G, वाथ चमूं वापि A¹, वाथ मरुं वापि A², वा मटमेवं वा F¹.

८. 128a च क्रियाणां] A, G, चक्रधानां F¹, क्षत्रियाणां G¹ ; 128b तन्तुकारोऽथवा] A¹, G, तन्तुकारे धवा F¹.

९. F¹ et G omettent 128cd.

१०. 128d चव्यकारो] A², चव्यक्रारो A¹.

११. 129c क्षुद्रद्वाराग्रतः] A, G, शुष्कद्वाराग्रतः F¹.

१२. 130a वीथीस्तु] G, वीथयः A, F¹ ; 130b °तत्तत्°] A², F¹, G, °तत्र A¹.

१३. 130c अन्त्येषु शुद्धवीथीं तु] A², तेषु शुद्धविधीयं तु A¹, अन्येषु शुष्कवीथीं तु F¹, अन्येषु शुद्धवीथीं च G.

भल्लाटद्वारसव्ये तु शुद्धद्वारैशभागतः[१]।
[२]एवं मध्यवीथीः कल्पयेद्धीमांस्तत्तत्स्थाने गृहे गृहे॥ १३१॥
अन्येषु शुद्धवीथीं च ++++ ++++।
पञ्चमद्वितयं वास्तु वक्ष्यते सकलं मया[३]॥ १३२॥

॥ इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे ग्रामादिवास्तुलक्षणपटलः [द्वात्रिंशत्तमः][४] ॥

---

१. 131b शुद्धद्वारैश°] A^1, G, शुद्धद्वारैः शु° A^2, शुष्कद्वरेश° F^1.

२. Dans tous les manuscrits, sauf G, le texte s'interrompt après les premières lettres de 131c (*evaṃ ma...*) pour reprendre avec huit vers empruntés au chapitre 54 (54.10d-18ab), suivis de 32.132 cd. Dans G les vers 54.10d-18ab sont intercalés entre 32.132a et 32.132cd.

३. 132c पञ्चमद्वितयं] A, G, पञ्चविधिं (*v.f.*) F^1.

४. A, G : इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे ग्रामादिवास्तुलक्षणपटलः।
F^1 : इति दीप्ताशास्त्रे प्रतिष्ठायां ग्रामादिवास्तुलक्षणपटलः।

[त्रयस्त्रिंशत्तमः पटलः]
[अग्निकार्यविधिः[१]]

अतः परं प्रवक्ष्यामि अग्निकार्यविधिक्रमम्।
सर्वरोगनिवृत्त्यर्थं सर्वकामार्थसाधनम्[२] ॥ १॥

[१. कुण्डविषयः]

[१.१. कुण्डभेदाः]

वेदाश्रं योनिश्चन्द्रार्धं त्रिकोणं वृत्तमेव च[३]।
पञ्चाश्रं चैव पद्माभं वस्वश्रं वर्तुलं भवेत्॥ २॥
चतुरश्राकृति सर्वं सर्वकामफलप्रदम्।
योनौ प्रजाकरं ज्ञेयमर्धचन्द्रे त्रिशान्तिकम्[४] ॥ ३॥
त्र्यश्रे रिपुक्षयं प्रोक्तं वर्धनं वर्तुले भवेत्[५]।
पञ्चाश्रे श्रीप्रदं ज्ञेयं पर्जन्यार्थं तु पद्मके[६] ॥ ४॥
वस्वश्रे रोगनाशार्थं वर्तुले मुक्तिदं भवेत्[७]।

[१.२. कुण्डलक्षणम्]

हस्तमात्रं खनेद्भूमौ विस्तारं तावदेव तु॥ ५॥
मात्राङ्गुलेन कर्तव्यमन्यमानैर्न कारयेत्[८]।
एकाङ्गुलप्रमाणेन परितो विष्टरं न्यसेत्॥ ६॥
तद्बाह्ये मेखला कार्या विस्तरेण नवाङ्गुलम्[९]।

---

१. Manuscrits utilisés : A¹, A², C¹, C², D¹, D², G ; les vers 71ab-73 cd sont cités dans le *Dīkṣādarśa* (T.153, p.278, variantes indiquées par *Dīkṣā°*).

२. 1d °कामार्थ°] A (etc.), °काम्यार्थ° C.

३. 2a °निश्चन्द्रार्धं] A, G, °निकुण्डं तु C, D ; त्रिकोणं] A² (etc.), त्रिनेत्रं A¹.

४. 3d °चन्द्रे त्रि°] A¹, °चन्द्रेति A², °चन्द्रे तु C, D, G.

५. 4a त्र्यश्रे] A, C¹, D¹, त्र्यक्षे C², D², त्र्यश्रं G ; 4b वर्तुले] C², D, वर्तुलं A, C¹, G ; भवेत्] A, C, G, हुतम् D.

६. 4c पञ्चाश्रे] C¹, D, पञ्चाश्रं A, G, पञ्चाग्रे C² ; श्रीप्रदं] A¹, पुत्रदं A², पुष्टिदं C, D¹, G, पुष्टितं D¹ ; 4d पर्जन्यार्थं] C, G, पर्जन्यर्धं A¹, D¹, वर्णिन्यार्थं A², पर्जन्यां (*v.f.*) D².

७. 5a वस्वश्रे] C², D, वस्वश्रं A, C¹, G ; 5b वर्तुले] C², D, वर्तुलं A, C¹, G ; भवेत्] A, C, G, स्मृतम् D.

८. 6b °न्यमानैर्न] A, G, °न्यमाने तु C, D.

९. 7b नवाङ्गुलम्] A, G, नवाङ्गुला C¹, D.

अधस्तान्मेखला कार्या विस्तारेण द्वियङ्गुला[१] ॥ ७ ॥
[२]उत्सेधं तत्समं ज्ञेयं त्र्यङ्गुलं मध्यमेखला[३]।
त्र्यङ्गुलं तु तदुत्सेधं विस्तारं तावदेव तु[४] ॥ ८ ॥
चतुरङ्गुलं तदूर्ध्वे तु विस्तारोत्सेधतत्समम्[५]।
योनिः पञ्चाङ्गुला ज्ञेया स्वयामेनाष्टमङ्गुला[६] ॥ ९ ॥
अश्वत्थपत्रवत्कार्या क्रमेण कृशता भवेत्[७]।
कुण्डमध्ये लिखेत्पद्ममष्टाङ्गुलसमन्वितम्[८] ॥ १० ॥

[१.३. कुण्डसंस्कारः]

[९]प्रथमं शोधयेत्कुण्डं द्वितीयं क्षालनं भवेत्[१०]।
तृतीयं शोषणं ज्ञेयं पाचनं तु चतुर्थकम्[११] ॥ ११ ॥
पञ्चमं शिवमन्त्रेण कल्पयेत्कल्पवित्तमः[१२]।
उल्लेखनं ततः कृत्वा स्थण्डिले तु विशेषतः ॥ १२ ॥
रेखास्तिस्रस्तु पूर्वाग्रा रेखास्तिस्रस्तथोत्तरे[१३]।
अस्त्रमन्त्रं समुच्चार्य मध्ये दक्षिणवामयोः[१४] ॥ १३ ॥

---

१. 7d विस्तारेण द्वियङ्गुला] C^1, विस्तरेण द्वयङ्गुलम् A^1, C^2, विस्तारेण द्व्यङ्गुलम् (*v.f.*) A^2, विस्तरे द्व्यङ्गुला (*v.f.*) D^1, विस्तारेण द्वयङ्गुलाः D^2, विस्तारेण तु द्व्यङ्गुलम् G.

२. D^2 omet 8b-9c.

३. 8a तत्समं ज्ञेयं] A (etc.), तत्समा ज्ञेया D.

४. 8c त्र्यङ्गुलं तु] A^1 G, त्र्यङ्गुलं (*v.f.*) A^2, C, D^1.

५. Vers faux dans tous les manuscrits.

६. 9c योनिः पञ्चाङ्गुला ज्ञेया स्व°] C, D^1, योनिपञ्चाङ्गुलं ज्ञेयमा° A, योनिं पञ्चाङ्गुलं ज्ञेयमा° G ; 9d स्वायामेनाष्टमङ्गुला] D^2, °मायामेनाष्टमाङ्गुलम् A^1, °मायामेनाष्टमाङ्गुला A^2, G, स्वधामेनाष्टमाङ्गुलम् C, D^1.

७. 10a °कार्या] D, °कार्यं A^1 (etc.) ; 10b कृशता] A^2, D, G, तु शता A^1, C^1, तु शतं C^2.

८. 10d °द्ममष्टाङ्गुल°] A^1 (etc.), °द्मं षडङ्गुल° A^2.

९. C^2, D ajoutent entre 10cd et 11ab : मानहीने महाव्याधिरधिके शत्रुवर्धनम्।

१०. 11a शोधयेत्°] A^1 (etc.), षोडशं C^2.

११. 11c ज्ञेयं] A, C^1, G, प्रोक्तं C^2, D ; 11d पाचनं] A, G, पावनं C, D.

१२. 12a पञ्चमं] A, G, सप्तमं C, D.

१३. 13a °तिस्रस्तु] C, D^1, G, °तिस्रं तु A, °तिप्रस्तु D^2 ; पूर्वाग्रा] A^2, C, D, सर्वाग्रा A^1, पुर्वाग्रे G ; 13b °तिस्रस्त°] C, D, G, °तिस्रो त° A ; तथोत्तरे] A^2, C, D, G, तथोत्तराः A^1.

१४. 13c समुच्चार्य] A, C^2, D^1, G, lacune C^1, च उच्चर्य D^2 ; 13d °वामयोः] A (etc.), °पादयोः D^2.

उत्तराग्रं लिखेन्मध्ये गौरीगायत्रिमन्त्रतः[१]।
रुद्रः पितामहो विष्णुरुमा तत्राधिदेवताः[२]॥ १४॥
गन्धपुष्पादिना पूज्य स्वस्वनाम्ना विशेषतः[३]।

[२. अग्निस्थापनम्]

[२.१. अग्निसम्भवः]

ताम्रपात्रे शरावे वा जातवेदसमानयेत्[४]॥ १५॥
सूर्यकान्तोद्भवं श्रेष्ठमरणीजातं मध्यमम्[५]।
श्रोत्रियागारजो वह्निरधमं तु विदुर्बुधाः[६]॥ १६॥
[७]अस्त्रेण शोधयेदग्निं कवचेनावकुण्ठयेत्[८]।
अमृतं बीजमुख्येन नेत्रेणाभ्यर्च्य देशिकः[९]॥ १७॥

[२.२. वागीश्वर्यावाहनम्]

आसने कुण्डमध्यस्थे वागीश्वरीं प्रकल्पयेत्[१०]।
ध्यात्वा वागीश्वरीं देवीं ऋतुस्नातां मनोरमाम्[११]॥ १८॥
पूजयित्वा स्वनाम्ना च प्रणवेन समन्वितम्[१२]।

---

१. 14a उत्तराग्रं] A (etc.), उत्तरार्धं G ; 14b °मन्त्रतः] A^1 (etc.), °मन्त्रितम् G.

२. 14d विष्णुरुमा] A, विष्णुरुद्रा C, D, विष्णुरुद्रं G.

३. 15b स्वस्वनाम्ना] A (etc.), स्वस्य नाम्ना C^1.

४. 15c शरावे वा] D^2, शरावे च A, C^2, G, शरा ++ C^1, शरावेण D^1 ; 15d जातवेदसमानयेत्] A^2, C^2, D, जातमध्यसमानयेत् A^1, ++वेससामनयेत् C^1, जातवेदं समापयेत् G.

५. 16b °रणी°] A^1 (etc.), °रणे C^2.

६. 16c वह्नि°] A, G, योऽग्नि° C, D.

७. 18ab = *Dīpta* 20.178cd et *Raurava* Kp.15.4cd.

८. 17b °वकुण्ठयेत्] A^2, C^1, D, G, °वगुण्ठयेत् A^1, °वकुण्टयेत् C^2.

९. 17c अमृतं] A, G, अत्रती (?) C^1, अमृता C^2, अमृतीकर° (*v.f.*) D ; 17d नेत्रेणाभ्य°] A, G, नेत्रास्याभ्य° C, D^1, नेत्राभ्य° (*v.f.*) D^2.

१०. 18a आसने] A^1 (etc.), कुर्यात्तं C^2 ; 18b वागीश्वरीं] A^2, वागीश्वर्यं A^1, वागीश्वर्यां C, D, G.

११. 18d मनोरमाम्] A, G, विशेषतः C, D.

१२. 19a स्वनाम्ना] A^2, C, D, सनाम्ना A^1, सुनाम्ना G ; 19b समन्वितम्] C, D, G, समन्वितः A.

[२.३. अग्निपञ्चसंस्काराः]

[२.३.१. गर्भाधानादिसुजातान्तम्]

प्रक्षिपेदग्निं सद्योन त्रिधा कुण्डं तु भ्रामयेत्[१] ॥ १९ ॥
प्रक्षिपेद्योनिमार्गेण प्रशान्तेति त्रिधा स्मरन्[२] ।
गर्भाधानं भवेत्तस्मिन्भवेत्पुंसवनं ततः[३] ॥ २० ॥
वामदेवेन शिरसा रुद्राणीमर्च्य देशिकः[४] ।
[५]पुंसवनं भवेदेवं सीमन्तं तु ततः शृणु[६] ॥ २१ ॥
अघोरयुक्तशिखया पाद्यमाचमनार्घ्यकम्[७] ।
गन्धं पुष्पं च दीपं च धूपं चैव प्रदापयेत्[८] ॥ २२ ॥
वक्त्रेण कवचेनैव दद्यादर्घ्यं सुजातकम्[९] ।
पूरयेदिन्धनैर्धीमान्प्रज्वाल्याग्निं विशेषतः[१०] ॥ २३ ॥

[२.३.२. नामकर्म]

[११]एकहृदयद्विवक्त्रं द्विनासी च षडक्षिणम्[१२] ।
त्रिमेखलं त्रिपादं च सप्तजिह्वाभिरावृतम् ॥ २४ ॥
वृषारूढं चतुःशृङ्गं जटामकुटमण्डितम्[१३] ।
दक्षिणे तु चतुर्हस्तं वामभागे त्रिहस्तकम् ॥ २५ ॥

---

१. 19c °ग्निं सद्येन] A^{2}, C^{1}, D, G, °ग्निसद्योन A^{1}, °ग्नौ सद्येन C^{2}.

२. 20b स्मरन्] A^{2}, C, D^{1}, G, स्वरन् A^{1}, स्मरेत् D^{1}.

३. 20c °त्तस्मिन्] Eds, °त्तस्मै A, C, G, °देकं D^{1}, °देषां D^{2} ; 20d ततः] A (etc.), पुनः D.

४. 21ab रुद्राणीमर्च्य] C^{2}, रुद्राण्यभ्यर्च्य A (etc.).

५. G répète 18ab-21ab avant 21cd.

६. 21c पुंसवनं] A^{2}, C, D^{2}, पुंसवना A^{1}, D^{1}, पुंसवनो G.

७. 22a अघोरयुक्त°] A^{2}, G, अघोरयुक्तिः A^{1}, अघोरयुक्तं C, D ; °शिखया] A, D, G, lacune C^{1}, °शतधा C^{2}.

८. 22c गन्धं] C^{2}, D, G, गन्ध° A, C^{1} ; दीपं] A^{1}, धूपं A^{2} (etc.) ; 22d धूपं] A^{1}, दीपं A^{2} (etc.).

९. 23a वक्त्रेण] A, G, वस्त्रेण C^{1}, D, अस्त्रेण C^{2} ; 23b °र्घ्यं] A^{2}, C, G, °र्घ्या A^{1}, °र्घ्य D.

१०. 23c पूरयेदिन्धनैर्धीमान्°] A, C^{2}, G, पूरयेदिन्धने धीमान्° C^{1}, पूरयित्वेन्धने धीमान्° D ; 23d °ज्वाल्याग्निं] A (etc.), °ज्वाल्य च G.

११. A^{2} lacune de 24b (fin) à 26c (début).

१२. 24a एकहृदय°] A, C^{1}, D^{1}, एकहृदयं C^{2}, D^{2}, G ; 24b षडक्षिणम्] A, G, षडक्षयम् C, D.

१३. 25a चतुःशृङ्गं] A^{1}, G, lacune C^{1}, चतुरश्रं C^{2}, D.

शक्तिरग्निः तथा स्रुक्च स्रुवं वै दक्षिणे करे[१]।
तोमरं व्यजनं वामे घृतपात्रं विशेषतः[२]॥ २६॥
सुदीप्तस्वर्णवर्णं तु तुङ्गपिङ्गललोचनम्[३]।
तव रूपमिदं वह्ने सर्वकामार्थसाधनम्[४]॥ २७॥
ध्यात्वा पञ्चाग्निमध्ये तु आसीनं प्रत्यगाननम्[५]।
पाद्यमाचमनं चार्घ्यमीशमन्त्रेण दापयेत्[६]॥ २८॥
नामकर्म इदं प्रोक्तं पञ्चसंस्कारमुच्यते[७]।

[३. कुशपरिस्तरणादिकृत्यम्]

[३.१. कुशपरिस्तरणम्]

ततः परिस्तरणं कुर्यादग्निबीजमनुस्मरन्॥ २९॥
प्रागग्रैश्चोत्तराग्रैश्च कुशैरिध्मं परिस्तरेत्[८]।
दक्षिणे तु कुशाः सर्वा सर्वतश्चोर्ध्वतः स्थिताः[९]॥ ३०॥
अधः स्थिता उदग्दर्भा सर्वेषां च विशेषतः[१०]।

[३.२.पात्रसादनम्]

आज्यस्थालीं स्रुवं चैव चरुस्थलीं च मेक्षणम्[११]॥ ३१॥
प्रोक्षणीं च प्रणीतां च समिद्दर्भसमन्वितम्।

---

१. 26a शक्तिरग्निः] A^1, C^1, D, G, शक्तिमग्निं C^2 ; स्रुक्च] A^1, C^2, G, रतुग्भिः C^1, स्रुक् (*v.f.*) D.

२. 26c तोमरं] A, C^2, D^1, G, तोमर° C^1, चामरं D^2.

३. 27a सुदीप्त°] A^1, सुदीप्तं A^2, C, D, G ; °स्वर्णवर्णं] A, °स्वर्णपुष्पं C, °सुरवर्णपुष्पं (*v.f.*) D^1, °सुवर्णपुष्पं (*v.f.*) D^2, °स्वर्णस्वर्णाङ्गं... G.

४. 27c तव] A, G, तप्त° C, D.

५. 28b आसीनं] A^2, G, आसुरं A^1, सुखासीनं C, D^2, सुखीसीनं D^1 ; प्रत्यगाननम्] A^1, D, प्रत्यगासनम् A^2, सुयुगासनम् C^1, पुगासनम् C^2.

६. 28c पाद्यमाचमनं] A^1 (etc.), पाद्यं चाचमनं G.

७. 29a °कर्म इदं] Eds, °कर्णमिदं A^1, °करणमिदं (*v.f.*) A^2, C, D, G.

८. 30b कुशैरिध्मं] A, G, कुशैः कुण्डैः C^1, D, कुशैः कुण्डं C^2.

९. 30c कुशाः] A, C^2, G, कुशा C^1, D ; 30d स्थिताः] G, स्थितौ A, स्थिता C^1, D^1, स्थितः C^2, D^2.

१०. 31a अधः स्थिता उदग्दर्भा] A, G, lacune C^1, D, उदग्दण्डं भवे ++ C^2.

११. 31c °स्थालीं] A^2, C, G, °स्थाली A^1, D ; 31d च मेक्षणम्] A^2, G, च मोक्षणम् A^1, C^2, D^1, च मोक्षकम् C^1.

[१]सर्वाणि द्रव्यपात्राणि द्वन्द्वरूपाणि साधयेत्[२] ॥ ३२॥
वामतो यजमानस्य दर्भोपरि द्विधा भवेत्।
[३]प्रोक्षणीपात्रमादाय पूरयेदुदकेन तु ॥ ३३॥
विसृज्य कूर्चं तन्मध्ये न्यस्त्वा प्रादेशमात्रतः[४]।
अङ्गुष्ठानामिकाभ्यां च त्रिरुत्प्लवनमाचरेत्[५] ॥ ३४॥
तेनैव प्रोक्षयेत्पात्रानस्त्रमन्त्रं समुच्चरन्[६]।
[७]उद्धृत्य सर्वपात्राणि प्रोक्षयेत्पुरुषेण तु ॥ ३५॥
विसृज्येध्मन्तु त्रिः प्रोक्ष्य चरुं वै प्रोक्ष्य देशिकः[८]।

[३.३. ब्रह्मासनकल्पनाद्याज्यसंस्कारान्तम्]

कुण्डस्य दक्षिणे भागे कूर्चं पैतामहं न्यसेत्[९] ॥ ३६॥
प्रणीतामुत्तरे स्थाप्य विष्णुबीजं समुच्चरन्।
[१०]पूर्वपश्चिमतो वह्नौ चोत्तराभिमुखः स्थितः[११] ॥ ३७॥
[१२]अन्येषु प्राङ्मुखो भूत्वा होमं कुर्याद्विचक्षणः।
आज्येन पूरयेत्पात्रं कूर्चं तत्रैव निक्षिपेत्[१३] ॥ ३८॥
पश्चिमे चोत्तरे धीमानाज्याधिश्रयणं कुरु[१४]।

---

१. C^2 omet 32d-35a puis 35c-37b.

२. 32d °रूपाणि] A, C, °रूपेण D, G.

३. 33.33cd = 20.188cd.

४. 34b °मात्रतः] A^1 (etc.), °मात्रकम् D^2.

५. 34c °नामिकाभ्यां] A^2, C^1, D, G, °नामिकासां A^1 ; 34d त्रिरुत्प्लवन°] A^2, C^1, D, G, त्रिरुपवन° A^1.

६. 35a तेनैव प्रोक्षयेत्पात्रा°] C^1, D, G, तेन प्रोक्षणयेत्पात्रा° A^1, तेन प्रोक्षयेत् +++ त्रा° A^2.

७. C^1 omet 35cd-37ab.

८. 36a विसृज्येध्मन्तु त्रिः] G, विसृज्येध्मे तु त्रिः A^1, विसृज्येध्मन्त्रित्रिः A^2, विसृज्येध्मनि त्रिः D.

९. 36c कुण्डस्य] A^1 (etc.), कुण्डं तु A^2.

१०. 33.37cd-38ab = 20.191.

११. 37c पूर्व°] A^1(etc.), पूर्वं D^2 ; वह्नौ] A (etc.), वह्ने C^2 ; 37d चोत्तरा°] A, D^1, G, उत्तरा° C^1 ; स्थितः] C^2, G, स्थिताः A, C^1, D.

१२. D : lacune de 38b (début) à 60a.

१३. 38c °पात्रं] C^2, °पात्रे A, C^1, G.

१४. 39b °श्रयणं] A^2, C^1, °श्रवणं A^1, C^2, °श्रपणं G.

[३.४.स्रुक्स्रुवसंस्कारः]

पर्यग्निं च कुशेनैव कुशाग्रं तत्र निक्षिपेत्॥ ३९॥
सद्योजातेन मन्त्रेण त्रिरुत्प्लवनमाचरेत्।
विसृज्य कूर्चं तत्प्रोक्ष्य वह्निमध्ये विनिक्षिपेत्॥ ४०॥
पर्यग्निं च पुनः कृत्वा दर्भानग्नौ विनिक्षिपेत्।
स्रुक्स्रुवौ वामहस्ते तु दक्षिणे तु कुशान्ग्रहेत्[१]॥ ४१॥
प्रदक्षिणक्रमेणैव कवचेन स्पृशेद्बुधः।
अग्रमग्रेण संस्पृश्य मूलं मूलेन संस्पृशेत्[२]॥ ४२॥
मध्यं मध्येन सम्स्पृश्य स्रुवं चैवाभिमर्शयेत्[३]।

[३.५. परिधिस्थापनम्]

[४]तिस्रः परिधयः स्थाप्य पश्चिमे दक्षिणोत्तरे[५]॥ ४३॥

[३.६. वक्त्राभिघारादि]

आघारसमिधौ न्यस्त्वा वह्नावीशानदेशतः[६]।
आज्यस्थालीं प्रणीतां च अस्त्रमन्त्रेण विन्यसेत्[७]॥ ४४॥
अग्निमूर्तिं विधातारमच्युतं च समर्चयेत्[८]।
लोकपालान्यथास्थाने पूजयित्वा स्वनामतः॥ ४५॥
अदिते न्वादि मन्त्रेण अग्निं संप्रोक्ष्य देशिकः[९]।
प्रासादबीजमुच्चार्य अभ्यर्च्येध्मानि होमयेत्[१०]॥ ४६॥

---

१. 41c स्रुक्स्रुवौ] A^1, स्रुक्स्रुवं A^2, G, स्रुवं वै C ; 41d कुशान्ग्रहेत्] A, G, कुशाद्भवेत् C^1, क्रमाद्भवेत् C^1 (var.), कुशो भवेत् C^2.

२. 42c अग्रमग्रेण] A, G, अग्रमन्त्रेण C.

३. 43b स्रुवं] A^2, C, स्रुचं A^1, G ; °मर्शयेत्] C, °मार्जयेत् A, G.

४. 33.43cd = 20.193ab.

५. 43c तिस्रः परिधयः] C, त्रिसृभिः परितः A, G.

६. 44a आघार°] A, C^1, G, आघारे C^2 ; 44b वह्नावीशान°] C, वह्निबीजांस्तु A, G ; °देशतः] C^1 (var.), °देशिकः A, C, G.

७. 44c आज्यस्थालीं] Eds, आनथाजीं A^1, अनु +जीं A^2, अनुयामि C, अनुयाजीं G ; प्रणीतां च] Eds, प्रणीतायां A (etc.).

८. 45b °तारमच्युतं] A^2, C, °तारं मुर्चितं A^1, lacune G ; समर्चयेत्] A, C^1, G, समर्पयेत् C^2.

९. 46a अदिते न्वादि] A, C^1, अदितेया न्वादि (*v.f.*) C^1, अदिते न्वति G.

१०. 46c प्रासाद°] A^2, C, G, प्रासादं A^1 ; 46d अभ्यर्च्येध्मानि] A, आदीध्मानि च C, अब्यर्च्येध्मादि G.

वक्त्राभिघारं कुर्यात्तु सद्यवामेन देशिकः[१]।
अघोरपुरुषेणैव हुत्वा वै पञ्चमेन तु[२]॥ ४७॥
वक्त्रस्य निष्कृतिर्ह्येवं वक्त्रोद्धाटनमुच्यते[३]।
[४]क्षुरिकोद्धाटनं वक्त्रमन्त्रेणैव तु निष्कृतिम्[५]॥ ४८॥

[३.७. अन्नप्राशनादिसंस्काराः]

वह्निबीजमनुस्मृत्य हुत्वा वै पञ्चविंशतिः।
अन्नप्राशनमेतद्धि शिरसा चौलमुच्यते॥ ४९॥
उपनयनं हृदा दत्त्वा शिरसा च हुनेद्धृदा[६]।
समावर्तनविवाहं हृदयेनैव होमयेत्[७]॥ ५०॥
पृथक्पृथक्क्रियाणां च सप्तसप्ताहुतिं हुनेत्[८]।

[४. शिवाग्निः]

[४.१. शिवाग्निध्यानम्]

शिवाग्निं जनयेदेवं पश्चाद्दद्यात्तु विष्टरम्[९]॥ ५१॥
अग्निमध्ये ततो मन्त्रैरासनं परिकल्पयेत्[१०]।
आवाहनादि यत्कर्म पूर्वोक्तविधिना कुरु॥ ५२॥
त्रिनेत्रं दशदोर्देवं जटामकुटमण्डितम्[११]।
पञ्चवक्त्रयुतं रौद्रं पञ्चमूर्ध्ना च संयुतं॥ ५३॥
दिव्याम्बरधरं देवं दिव्यगन्धानुलेपनम्।

---

१. 47a °घारं] A, C^1, G, °धारं C^2 ; 47b सद्य°] C, सद्यो A, G.

२. 47c अघोर°] A, G, अघोरं C^1, आधारं C^2.

३. 48a निष्कृतिर्ह्येवं] A^2, G, निष्कृतिह्येवं A^1, निष्कृतिं ह्येवं C.

४. Les manuscrits A omettent 48cd-49cd.

५. 48c °घाटनम्] C, D, °घाट्टनं G ; 48d वक्त्रमन्त्रेणैव] Eds ((*cf.* 20.196ab), वक्त्रमस्त्रेणैव C, D, G ; निष्कृतिम्] C, D, निष्कृतिः G.

६. 50a हृदा दत्त्वा] A, G, हृदा हुत्वा C^1, घृतं हुत्वा C^2.

७. 50c समावर्तनविवाहं] A^2, G, समावर्तविवाहं तु A^1, +++ क्तविवाहं च C^1, समावर्तविवाहं च C^2.

८. 51b °हुतिं हुनेत्] A, °हुतिर्भवेत् C, °हुतिर्हुनेत् G.

९. 51c शिवाग्निं जनयेदेवं] A, G, शिराग्निं जनितो ह्येवं C^1, शिवाग्निजनितो ह्येवं C^2 ; 51d °दद्यात्तु] A^2, C, G, °दद्यास्तु A^1.

१०. 52ab मन्त्रैरासनं] A, G, मन्त्री आसनं C.

११. 53a दशदोर्देवं] C^2, दशभुजं देवं (*v.f.*) A, C^1, G.

सर्वाभरणसंयुक्तं चन्द्रार्धकृतशेखरम्॥ ५४॥
[१]ध्यात्वा सदाशिवं देवं पञ्चमावरणान्वितम्।
शतं शिवेन हुत्वा तु शेषाणां च दशाहुतिः॥ ५५॥
शिवे दशाहुतिर्यद्यदन्येष्वेकाहुतिर्भवेत्[२]।
गन्धपुष्पादिनाभ्यर्च्य होमं कृत्वा यथाविधि[३]॥ ५६॥

[४.२. शिवाग्निजिह्वाः]

[४.२.१. सप्तजिह्वाः]

हिरण्या कनका रक्ता कृष्णा चैव तु सुप्रभा[४]।
अतिरक्ता बहुरूपा सप्तजिह्वाः प्रकीर्तिताः[५]॥ ५७॥
हिरण्या वारुणे जिह्वा कनका मध्ये व्यवस्थिता[६]।
रक्ता तु चोत्तरे जिह्वा कृष्णा याम्यदिशि स्थिता[७]॥ ५८॥
सुप्रभा पूर्वजिह्वा स्यादतिरक्तानले स्थिता[८]।
बहुरूपेशजिह्वा स्याज्जिह्वास्थानं प्रकीर्तितम्[९]॥ ५९॥
हिरण्या शातकुम्भाभा कनका राजपुष्पवत्।
रक्ता सिन्दूरसदृशा कृष्णा कृष्णाभ्रसंनिभा[१०]॥ ६०॥
सुप्रभा श्वेतवर्णाभा अतिरक्तेन्द्रगोपमा[११]।
बहुरूपा चित्रवर्णा जिह्वावर्णमुदाहृतम्[१२]॥ ६१॥

---

१. C^2 omet 55ab-55cd.

२. 56a °हुतिर्य°] A, G, °हुतिं य° C ; यद्यद°] A^1, C, दद्याद° A^2, G.

३. 56d कृत्वा] A, G, हुत्वा C.

४. 57a हिरण्या] C, G, हिरण्य° A.

५. 57d सप्तजिह्वाः प्रकीर्तिताः] A^2, C^1, G, सप्तजिह्वा प्रकीर्तिता A^1, C^2.

६. 58a वारुणे] A, G, वारुणा C ; 58b कनका] (*v.f.*) A^2, C, G, नका A^1.

७. 58c चोत्तरे] A, G, चोत्तर° C^1, चोत्तरा C^2.

८. 59b °नले] C, G, °नवे A.

९. 59c °रूपेश°] A, °रूपैस्यध° (*v.f.*) C^1, °रूपास्य C^2, °रूपा च G.

१०. 60c सिन्दूर°] A, C^1, G, सिन्धूर° C^2 ; 60d कृष्णाभ्र°] C, G, कृस्णाग्र° A.

११. 61b °गोपमा] A, G, °कोपवत् C.

१२. 61c चित्रवर्णा] A^1, चित्रवर्णास्याज्° (*v.f.*) A^2, चित्रवर्णाभा (*v.f.*) C, च जीह्वा स्याज्° G.

[४.२.२. नवजिह्वाः]

बहुरूपा त्रिधा ज्ञेया सुषुम्ना पिङ्गला इडा[१]।
एकाग्निमुखजिह्वास्था नवभेदा उदाहृताः[२] ॥ ६२ ॥
बहुरूपा रक्तजिह्वा सुप्रभा वामतो भवेत्[३]।
अतिरक्ता कनका च हिरण्या कृष्णा सव्यके[४] ॥ ६३ ॥
वायुनैर्ऋतयोः स्थाने इडापिङ्गलयोर्न्यसेत्।
आनने तु समुत्पन्ने जिह्वा तच्छक्तिराश्रिता[५] ॥ ६४ ॥
काली चैव कराली च मनोरमा च लोहिता[६]।
धूम्रवर्णा विश्वरूपा विष्णुलिङ्गी विलोमता[७] ॥ ६५ ॥
देवी लोलायनयना इति शक्तिः प्रकीर्तिता[८]।
हिरण्यादि इडान्तं च वर्णशक्तिषु योजयेत्[९] ॥ ६६ ॥

[४.२.३. जिह्वाद्रव्याणि]

हिरण्यायां समिद्धुत्वा कनकायां घृतं हुनेत्[१०]।
रक्तायां तु यवं हुत्वा कृष्णायां धान्यकं हुनेत्[११] ॥ ६७ ॥
सुप्रभायां हुनेत्सक्तुमतिरक्तायां तिलं हुनेत्[१२]।

---

१. 62a त्रिधा] A^2 (etc.), त्रया A^1 ; 62b इडा] C, D, G, °पि वा A^1, शिवा A^2.

२. 62c एकाग्नि°] A, G, एकाह्नि° C, D ; °जिह्वास्था] A^1, G, °जिह्वायां A^2, °जिह्वस° C^1, D^2, °जिह्वा सा C^2, °जिह्वाय D^1 ; 62d नवभेदा उदाहृताः] C, D, नवभेदादुदाहृता A^1, स्थानभेदादुदाहृताः A^2, नवभेदा उदाहृता G.

३. 63b वामतो] C, D, G, वा न ता A^1, वामना A^2.

४. 63c अतिरक्ता] A^2 (etc.), अतिरक्त A^1 ; च] Eds, चैव (*v.f.*) A^1 (etc.) ; 63d कृष्णा] Eds, कृष्ण A^1, कृष्णा च (*v.f.*) A^2, C, D, lacune G.

५. 64c समुत्पन्ने] C^1, समुत्पत्तिं A, D, समुत्पत्तीक° (*v.f.*) C^2 ; 64d तच्छक्तिराश्रिता] D, तच्छान्तिराश्रिता A, °च्छक्तिराश्रितम् (*v.f.*) C, तच्छक्तिराश्रितः G.

६. 65b मनोरमा] D^1, G, मनोरामा A, C ; च लोहिता] A, G, सुलोहिता C, च सुलोहिता (*v.f.*) D.

७. 65c धूम्रवर्णा] A, G, सूत्रवर्णा C, सुसूत्रवर्णी (*v.f.*) D ; विश्वरूपा] A^2, G, विश्वरूपं A^1, विष्णुलिङ्गी C, D ; 65d विष्णुलिङ्गी] A^1, G, विष्फुलिङ्ग° A^2, विश्वरूपा C, D ; विलोमता] A, G, विलोहिता C, D.

८. 66a लोलाय°] D^2, लीलाय A^1, C^1, लुलया° A^2, लेलाय° D^1, लुलाय° G ; 66b शक्तिः] A^1 (etc.), शक्ति° A^2 ; प्रकीर्तिता] A, C^1, D^1, G, प्रकीर्तिताः C^2, D^2.

९. 66c हिरण्यादि] C, D, हिरन्या च A, G.

१०. 67a समिद्धुत्वा] A, G, हुनेदिध्मान्° C^1, D, हुनेदिध्मं C^2.

११. 67c यवं] A, C^1, G, यवान्° C^2, यवां D.

१२. 68a सक्तु°] A^2 (etc.), सक्थु° A^1 ; 68b °रक्तायां] (*v.f.*) C^1, D, °रक्ता A, G, °रिक्तायां C^2.

बहुरूपायां सिद्धार्थं सर्वासु चरुरुच्यते[१] ॥ ६८ ॥
द्रव्याण्यन्यनि सर्वाणि कनकायां हुनेत्क्रमात् ।
अर्थसिद्धिमवाप्नोति घृतेन मधुनानल[२] ॥ ६९ ॥
अन्नेन धान्यमाप्नोति क्षीरेणैव तु शान्तिकम्[३] ।
तिलेन पुष्टिमाप्नोति सौभाग्यं लाजकेन तु[४] ॥ ७० ॥
रिपुनाशकरी सक्तु सिद्धार्थं व्याधिनाशनम्[५] ।
गुलं प्रीतिकरं प्रोक्तं राजवश्यं यवेन तु[६] ॥ ७१ ॥
फलेन सुखमाप्नोति पत्रं पुत्रविवर्धनम्[७] ।

[४.३. वह्नेः षट्चिह्नानि]

[४.३.१. चिह्नानां नामानि सङ्ख्या च]

वर्णं गन्धं च शब्दं च धूमं चाग्निशिखारणम्[८] ॥ ७२ ॥
षट्चिह्नानि च वह्नेस्तु ज्ञात्वा कर्म समारभेत्[९] ।
वर्णमेकादशं ज्ञेयं गन्धं चैव त्रयोदशम् ॥ ७३ ॥
शब्दं च पञ्चधा ज्ञेयं चतुर्धा धूमलक्षणम्[१०] ।
पञ्चधा वै शिखाकारमरणीं द्वादशं स्मृतम्[११] ॥ ७४ ॥
सिद्धासिद्धं तु लिङ्गानि पञ्चाशद्भिर्विधीयते[१२] ।

---

१. 68c बहुरूपायां] A^1 (etc.), बहुरूपा G ; सिद्धार्थं] A^2, C, D^1, च सिद्धार्थं (*v.f.*) A^1, G, मूधास्यं D^2 ; 68d चरुरुच्यते] A^1 (etc.), च चरुं हुनेत् G.

२. 69d मधुनानल] A, G, मपिधानल (?) C, मसिथकानल (*v.f.*) D^1, मस्थितानलाः D^2.

३. 70a अन्नेन] A, G, अन्येन C, D.

४. 70c तिलेन पुष्टिमाप्नोति] A, G, तिल पुष्टिमवाप्नोति C, D^1, तिलो पुष्टिमवाप्नोति D^2 ; 70d तु] A, G, वै C, D.

५. 71a °नाशकरी] A, C^1, G, + नाशं करं C^2, नाशं करि D ; सक्तु] D, सक्थू A^1, C^2, सक्तुस्° A^2, C^1, G.

६. 71c गुलं प्रीतिकरं] A, गौलं प्रीतपदं C, G, गौं प्रीतपदं (*v.f.*) D ; 71d यवेन तु] A, G, यवैरपि C, D.

७. 72b पुत्र°] A, C^1, D^1, पत्र° C^2, D^1, पौत्र° G.

८. 72c वर्णं] A, G, वर्ण° C, D, *Dīkṣā°* ; 72d धूमां चाग्निशिखारणम्) A, G, धूपं चाग्निशेवरणम् C^1, धूपं चाग्निशिवे रणम् C^2, D.

९. 73b समारभेत्] A, G, समाचरेत् C, D, *Dīkṣā°*.

१०. 74a शब्दं च] A (etc.), शब्दाश्च C^2 ; ज्ञेयं] A, C^2, G, ज्ञेया C^1, D ; 74b चतुर्धा] A, G, चतुर्थं C, D ; धूम°] A, G, धूम्र° C, D^1, ध्रुव° D^2.

११. 74c शिखाकारमर°] A (etc.), शिखां चैव अर° *Dīkṣā°* ; 74d °मरणीं] A, °मिरणं C, D, °मरणी G.

१२. 75a °सिद्धं] A^2, C, D, °सिद्धिं A^1, G ; 75b पञ्चाशद्भिर्विधीयते] A (etc.), पञ्चशब्दाभिधीयते *Dīkṣā°*.

[४.३.२. एकादश वर्णाः]

शुद्धसौवर्णसंकाशं सिन्दूरारुणसंनिभम्[१] ॥ ७५ ॥
वैडूर्याभेन्द्रगोपाभं हरितालसमप्रभम्[२] ।
तप्तायसमयं रौप्यं पिङ्गलं सर्पिमञ्जनम्[३] ॥ ७६ ॥
कृष्णवर्णा इमे सर्वे सर्वत्र परिकीर्तिताः[४] ।
कृष्णाभे यजमानस्य मरणं कुरुते सदा[५] ॥ ७७ ॥
रौप्याभे राष्ट्रदोषं स्यात्पिङ्गलं बहुरोगदम्[६] ।

[४.३.३. त्रयोदश गन्धाः]

चन्दनागरुकर्पूरं कस्तूरी मल्लिका तथा ॥ ७८ ॥
आज्यगुग्गुलुपुन्नागपाटली ह्युशीरं तथा[७] ।
मूत्रविष्ठानुगन्धं च शवगन्धं त्रयोदश[८] ॥ ७९ ॥
विष्ठागन्धो महादुःखं मूत्रगन्धो बलक्षयम्[९] ।
शवगन्धः सुतं हन्ति शब्दं च शृणु सांप्रतम्[१०] ॥ ८० ॥

[४.३.४. पञ्चशब्दाः]

मेघकुञ्जरभेर्याश्च खरकाकस्वरं तथा[११] ।
वायसी वास्तुनाशं स्याद्वर्गनाशं खरध्वनिः[१२] ॥ ८१ ॥

---

१. 75d सिन्दूरा°] A (etc.), सिन्धूरा° C^2.

२. 76a °गोपाभं] G, °कोभागं A^1, °कोपाभं A^2, C^2, D, lacune C^1.

३. 76d सर्पिमञ्जनम्] Eds, सर्पमण्डलम् A, C^1, G, सर्पमङ्गलम् C^2, सर्पिमण्डलम् D.

४. 77a °वर्णा इमे] G, °वर्णानिमे A^1 (etc.) ; 77b सर्वत्र परिकीर्तिताः] D, सर्वत्र परिकीर्तिता A, G, सर्व +++ कीर्तिताः C^1, +++ सर्वकीर्तिताः C^2.

५. 77c कृष्णाभे] A (etc.), कृष्णाभं C^2.

६. 78a रौप्याभे] A (etc.), रौज्यं गो° C^2 ; 78b °रोगदम्] A^1, C, G, °दोषदम् A^2, °रोगदः D.

७. 79a °गुग्गुलु°] A^2, C, D, °भङ्गुलु° G, °गग्गुलु° A^1 ; 79b °पाटली ह्यु°] C^2, °पाटकीप्यु° A^1, °पाटलीप्यु° A^2, °पाटलीभ्यु° C^1, D, °पाटली उ° G ; °षीरं तथा] A, G, °षीरस्तु वा C^1, °षीरस्तथा C^2, D.

८. 79d शव°] Eds, वाचा A, G, शवन्न° (*v.f.*) C^1, D^1, वर्ण° C^2, ववन्न° D^2.

९. 80b °गन्धो बलक्षयम्] C, D, G, °गन्धं बलिक्षयम् A^1, °गन्धो बलिक्षयः A^2.

१०. 80c शवगन्धः सुतं हन्ति] A, G, शवन्तगन्धं … C^1, शवगन्धं सुतं हान्ति C^2, शवन्नगन्धं सुतं हन्ति (*v.f.*) D.

११. 81a °भेर्याश्च] A^2 (etc.), °भेर्या च A^1 ; 81b खरकाक°] C, D, G, रवाकार° A^1, रवाकाक° A^2.

१२. 81c वास्तु°] A, C^1, वस्तु° C^2, D, G ; 81d खरध्वनिः] A^2, C^2, खरध्वनि D, खरध्वनिम् A^1, G, शङ्खध्वनिः C^1.

[४.३.५. चतुर्धूमानि]

कुन्दकाशनिभं धूमं कपोतं शुकपिञ्छकम्[१]।
गोनार्शीं शुकपिञ्छभां वाहनानां क्षयं भवेत्[२] ॥ ८२॥

[४.३.६. पञ्चशिखाः]

शिखा रश्मिसमाकारा छत्राकारोर्ध्वगामिनी[३]।
सुचित्रा च सुवृत्ता च पञ्चधा परिकीर्तिता[४] ॥ ८३॥
सुचित्रा मरणं कुर्यात्सुवृत्ता धननाशनम्[५]।

[४.३.७. द्वादश रणानि]

प्रदक्षिणं चापसव्यमपहासं च खाननम्[६] ॥ ८४॥
अधोगतिस्तथा तिर्यक्पुनरावर्तं लास्यकम्[७]।
विस्फुलिङ्गापशब्दं च दर्दरो माक्षिकाकृतिः[८] ॥ ८५॥
[९]अथ प्रदक्षिणावर्तं शुभं वै सर्वकर्मणि[१०]।
विस्फुलिङ्गे त्वनर्थं स्याद्विद्युत्पातं च दर्दरे[११] ॥ ८६॥
आकृतिस्तावदित्युक्ता तेन भूताद्भयं भवेत्[१२]।

---

१. 82b कपोतं] A, G, कलोतं C, D ; शुकपिञ्छकम्] A^1, G, शुकपिच्छकम् A^2, शुकपिञ्छतम् C, D^2, शकपिञ्छकम् D^1.

२. 82c गोनार्शीं] A, गोनाशं C (etc.) ; 82d क्षयं] A^1 (etc.), क्षयो A^2.

३. 83a °कारा] C, D, °कारं A ; 83b °गामिनी] A^2, C, D, °गामिनीम् A^1, G.

४. 83c सुचित्रा च सुवृत्ता] Eds, सुचित्रवसुसिवृत्ता (*v.f.*) A, सुच्छिन्ना च सुवृत्ता C, सच्छिन्ना च सुवृत्ता D, सुचित्रा च्सुवृ... G.

५. 84a सुचित्रा] A, G, सुच्छिन्ना C, D ; 84b °नाशनम्] A, °नाशिनी C, D, G.

६. 84c प्रदक्षिणं] C, D, G, प्रदक्षिणीं A ; 84d च खाननम्] C^2, D, G, च खा +++ म् A^1, शिखाननम् A^2, lacune C^1.

७. 85a तिर्यक्°] A, D, G कुर्यात्° C ; 85b लास्यकम्] A^1, लेह्यकम् A^2, C, D^2, लेद्यतः D^1, लेस्यकम् G.

८. 85c विस्फु°] Eds, हवि° A, विष्णु° C, D, हविर्° G ; 85d दर्दरो मक्षिकाकृतिः] D^2, G, दद्याद्रोमाक्षिकाकृतिम् A^1, दर्दा रोमात् ++ कृतिम् A^2, ददर्श मक्षिकाकृतिः C, D^1.

९. D^1 omet 86ab-86cd.

१०. 86a अथ] A, C^2, G, अधः C^1, D^2.

११. 86c विस्फुलिङ्गे त्व°] A, विष्णुलिङ्गेष्व° C, D^2, विष्णूलिङ्गे ह्य° G ; 86d °विद्युत्पातं] C, G, °विद्युत्यादं A, °उत्पातं (*v.f.*) D^2 ; दर्दरे] A, C^1, D^2, G, दर्दुरे C^2.

१२. 87a °स्तावदित्युक्तात्°] C, °स्थापतीत्युक्ता A^1, °स्थापदीत्युक्ता A^2, °स्तावदित्युक्तं D, °स्थापदित्युक्तं G ; 87b भयं] A, C, D^2, G, भवं D^1.

यदापसव्यगमनमनलेन दहेद्गृहम्[1] ॥ ८७ ॥
एषां दोषनिवृत्त्यर्थमस्त्रेणैव शताहुतिः[2]।
मिन्दाहुतिश्च कर्तव्या व्याहृतिं च हुनेत्क्रमात्[3] ॥ ८८ ॥
स्विष्टमग्नेति मन्त्रेण स्विष्टाहुतिमथाचरेत्।

[५. हृदयेऽग्निपूजा]

हृदये चाग्निमावाह्य पश्चादग्निं विसर्जयेत्[4] ॥ ८९ ॥
अग्निमावाहयेत्पश्चाद्विसृज्य च यथाविधि।
अग्निकार्यविधिः प्रोक्त आसीनस्थापनं शृणु[5] ॥ ९० ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यपटलः [त्रयस्त्रिंशत्तमः][6] ॥

---

१. 87d °गृहम्] A^2, C, D, G, °क्रमम् A^1.

२. 88a एषां] A^1 (etc.), एतद्° G ; 88b °वृत्त्यर्थ°] A, C, D^2, G, °नृत्यर्थ° D^1.

३. 88c मिन्दाहुतिश्च कर्तव्या] C, G, मिन्दाहुतिं च कर्तव्यं A^2, D, मन्दाहुतिं च कर्तव्यं A^1.

४. 89c °वाह्य] A^2 (etc.), °प्नोति A^1.

५. 90c विधिः] A^2, C, G, विधि° A^1, विधिं D ; 90d आसीन°] A, G, आसन° C, D.

६. A^2, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यविधिपटलः।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यविधिः षड्विंशः पटलः।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यविधिः षड्विंशतितमः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यविधिपटलः षड्विंशतितमः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अग्निकार्यपटलः षड्विंशतितमः।

[चतुस्त्रिंशत्तमः पटलः]
[सुखासनस्थापनविधिः[१]]

अथतः संप्रवक्ष्यामि आसीनस्थापनं परम्[२] ।
क्षेमदं जयदं लोके राजराष्ट्रविवर्धनम्॥ १॥

[१. स्थापनकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने[३]।
तिथ्यंशके शुभे वारे स्थिरराश्युभयोदये[४] ॥ २॥
स्थापयेद्देशिको धीमान् चरराश्युदयं विना[५]।

[२. अङ्कुरार्पणम्]

निर्दिष्टदिनपूर्वं तु सप्ताहे पञ्चमेऽपि वा[६] ॥ ३॥
अङ्कुराण्यर्पयेद्धीमान्पूर्वोक्तविधिना सह[७]।

[३. रत्नन्यासः]

प्रतिष्ठादिवसात्पूर्वं पञ्चाहे त्रियहेऽपि वा[८] ॥ ४॥
रत्नन्यासः प्रकर्तव्यः सुमुहूर्ते सुलग्नके[९]।
माणिक्यं मध्यमे न्यस्त्वा हैमकूर्चसमन्वितम्[१०] ॥ ५॥

---

१. Manuscrits utilisés : A^1, A^2, B^2, B^3, B^4, C^1, C^2, D^1, D^2, G.

२. 1b आसीन॰] A, B^{2-4}, D^1, G, आसन॰ C, आसीनं D^2.

३. 2b ॰पक्षे] A (etc), ॰वारे C^1.

४. 2c तिथ्यंशके] A, B^4, D, G, तीर्थंशके B^2, तिर्यंशके B^3, त्रियंशके C ; 2d स्थिरराश्युभयोदये] C^2, G, स्थिराः शुभगोदये A^1, स्थिराः शुभयोदये A^2, स्थिरराशुभयोदये B^{2-4}, स्थितराश्युभयोदये C^1, D^1, स्थिरात्युभयोदये D^2.

५. 3b चरराश्युदयं विना] D^2, स्थितरासुभयं विनाA^1, स्थिरराश्युभयं विना A^2, G, बिम्बं पूर्वोक्तवर्त्मना B^{2-3}, lacune B^4, शरराश्युदयं D^1.

६. 3d ऽपि वा] A, B^{2-3}, G, ऽथवा B^4, C, D.

७. 4a अङ्कुराण्यर्पयेद्धी॰] A, B^{2-4}, C, G, अङ्कुरार्पयेद्धी॰ (*v.f.*) D^1, अङ्कुरानर्पयेद्धी॰ D^2.

८. 4d पञ्चाहे] C, D^2, पञ्चमे A, B^3, G, पश्चिमे B^2, lacune B^4, पञ्चभो (?) D^1 ; त्रियहे] A^2, B^{2-3}, C^1, त्रयहे A^1, C^2, lacune B^4, C, तियहे D^1, त्र्यहे D^2, G ; ऽपि वा] A, B^{2-4}, ऽथवा C, D.

९. 5a रत्नन्यासः प्रकर्तव्यः] C^1, रत्नन्यासं प्रकर्तव्यं A, B^{2-4}, C^2, D^1, G, रक्तन्यासं प्रकर्तव्यं D^2.

१०. 5c माणिक्यं] A^1, C^1, G, मणिक्कं A^2, B^{2-4}, C^2, D ; न्यास्त्वा] A (etc.), न्यस्य C^1 ; 5d हैमकूर्च॰] A, C, D, G, हैमकूर्म॰ B^{2-3}, हेमकूर्च॰ B^4.

इन्द्रनीलं तु पूर्वायां न्यसेन्मरकतं यमे[१]।
वारुणे स्फटिकं प्रोक्तं चन्द्रकान्तं तु सौम्यके[२] ॥ ६ ॥
हृद्बीजेन न्यसेद्धीमान् सुस्निग्धं कारयेत्ततः[३]।

[४. नयनमोक्षणम्]

नयनमोक्षणं कुर्यान्नेत्रयुग्मयुते दिने[४] ॥ ७ ॥
मण्डपे स्थण्डिलं कुर्याच्छालिभिश्चतुरङ्गुलम्।
हस्तमात्रप्रविस्तारं वृत्तं वा चतुरश्रकम्॥ ८ ॥
तण्डुलैस्तिलदर्भैश्च लाजैश्चैव परिस्तरेत्।
तन्मध्ये विन्यसेद्देवं परितोऽष्टघटान्न्यसेत्[५] ॥ ९ ॥
ससूत्रान्सापिधानांश्च गन्धतोयेन पूरयेत्[६]।
तत्तत्स्वनाममन्त्रेण गन्धपुष्पादिनार्चयेत्[७] ॥ १० ॥
आचार्यं पूजयेत्तत्र शिल्पिनं तदनन्तरम्[८]।
पक्ष्मरेखां लिखेत्सूच्या शातकुम्भमयेन च[९] ॥ ११ ॥
कृष्णमण्डलमालिख्य दृष्टिमण्डलमालिखेत्[१०]।
[११]आचार्यो मन्त्रमुच्चार्य शिल्पिकर्म समारभेत्[१२] ॥ १२ ॥
प्रोतहैमनखैः स्पृष्ट्वा नेत्रमन्त्रमुदाहरेत्[१३]।

---

१. 6a इन्द्रनीलं] A (etc.), lacune B^{4}, उग्रनीलं D^{2} ; 6b मरकतं] A^{1}, C^{2}, D, मरतकं A^{2}, B^{2-4}, G, lacune C^{1}.

२. 6d सौम्यके] A^{1} (etc.), याम्यके A^{2}.

३. 7a हृद्बीजेन] A, B^{2-3}, C, G, हृद्बीजे च B^{4}, हृद्बीजे (*v.f.*) D.

४. 7c नयनमोक्षणं] A^{2}, B^{2-4}, नयनामोक्षणं A^{1}, नयनं मोक्षणं C^{1}, D, नयनोन्मेषणं C^{2}, नयनोन्मोक्षणं G ; 7b °युग्म°] A (etc.), °युग्मे D.

५. 9c तन्मध्ये] A (etc.), तन्मध्ये मे (*v.f.*) D^{1}, तन्मध्यमे (*v.f.*) D^{2} ; 9d ऽष्ट°] A (etc.), ऽष्टौ B^{4}, C, D.

६. 10a ससूत्रा°] A^{1}, सवस्त्रा° A^{2} (etc.), lacune B^{4} ; 10b पूरयेत्] A^{1}, पूरितान् A^{2} (etc.).

७. 10c तत्तत्स्वनाममन्त्रेण] A, B^{2-3}, तत्तदीशानमन्त्रेण B^{4}, C, D, तत्तत्स्वनाममन्त्रैश्च G.

८. 11b तदनन्तरम्] A^{1}, C^{2}, तदनन्तरे A^{2}, B^{2-4}, C^{1}, D, G.

९. 11c पक्ष्म°] A, B^{2-4}, G, पक्ष° C, D ; °रेखां] B^{2-4}, G, °रेखा A, C, D ; °सूच्या] A, B^{4}, C^{2}, G, °सूच्यां B^{2-3}, °सूच्यं C^{1}, °सूच्य D ; 11d च] A, B^{2-3}, तु B^{4}, C, D^{2}, न D^{1}.

१०. 12a कृष्णमण्डल°] A (etc.), कृष्णन्धल° D^{1} ; 12b दृष्टि°] A(etc.), °प्यदृष्टि° D^{1}.

११. C^{2} : lacune 12d-13c.

१२. 12d शिल्पिकर्म समारभेत्] A, B^{3-4}, G, शिल्पिकर्म समाचरेत् B^{2}, शिल्पिना कर्ममारभेत् C^{1}, D.

१३. 13a °हैमनखैः] B^{4}, C^{1}, °हेमनखे A, °हेमनखैः B^{2-3}, °हैमानखैः D^{1}, °हैमानवैः D^{2}, °हेमनवैः G ;

मध्वाज्यसूक्तमुच्चार्य मध्वाज्याभ्यां तु तर्पयेत्[१] ॥ १३ ॥
गौर्धेन्वा धेनुकं दृष्ट्वा ब्रह्मसूक्तेन ब्राह्मणान्[२] ।

[५. जलाधिवासः]

पुण्याहं वाचयेदन्ते शुद्धिं कृत्वा यथोदितम् ॥ १४ ॥
[३]ग्रामप्रदक्षिणं कृत्वा सर्वातोद्यसमन्वितम्[४] ।
कुर्याज्जलाधिवासं तु नद्यां वाथ तटाकके ॥ १५ ॥
तीरे समतलं कृत्वा शुद्धिं कृत्वा तु पूर्ववत् ।
मूर्धादिपादपर्यन्तं वस्त्रैर्दर्भैश्च वेष्टयेत्[५] ॥ १६ ॥
शाययेज्जलमध्ये तु प्राक्शिरस्कं हृदा बुधः[६] ।
एकरात्रं द्विरात्रं वा त्रिरात्रं वाऽधिवासयेत्[७] ॥ १७ ॥

[६. मण्डपकल्पनम्]

वितानैर्धूपदीपैश्च ध्वजदण्डैश्च भूषितम्[८] ।
मण्डपं कारयेद्धीमान्प्रासादस्याग्रतोऽन्तिके ॥ १८ ॥
द्वादशं दशहस्तं वा दर्पणोदरसन्निभम् ।
त्रिभागैकं भवेद्वेदी रत्निमात्रसमुच्छ्रयम्[९] ॥ १९ ॥
परितः कल्पयेत्कुण्डं हस्तमात्रप्रविस्तरम्[१०] ।

स्पृष्ट्वा] Eds., दृष्या A, दृष्टिन् $B^{2,4}$, D, दंष्ट्राण् B^3, दृष्ट° C^1, दृष्टं G ; 13b °दाहरेत्] C^1, D, G, °दाहरन् A, $B^{2\text{-}4}$.

१. 13d मध्वाज्याभ्यां] A (etc), मध्वाज्यं (*v.f.*) D^1, मध्वाज्यान् (*v.f.*) D^2.

२. 14a गौर्धेन्वा धेनुकं दृष्ट्वा] C^2, गेयेन कद्रुद्रायद A^1, गोधेनुकद्रुदाय (*v.f.*) A^2, गौर्धेनुकद्रुद्राय (*v.f.*) $B^{2\text{-}3}$, +धाबुकं दृष्ट्वा (*v.f.*) B^4, गौर्धेन्याये +ष्ट्वा (*v.f.*) C^1, गौर्ध्वेन्यो धेनुकां (*v.f.*) D^1, गौर्धेन्वो धेनुकां (*v.f.*) D^2, lacune G ; 14b °सूक्तेन] A, $B^{2\text{-}4}$, C^1, D , °सूत्रेण C^2 ; ब्राह्मणान्] A, $B^{2\text{-}4}$, C^1, D, ब्राह्मणात् C^2.

३. D : lacune de 15b-38c.

४. 15a ग्राम°] A^2 (etc.), ग्रामं A^1.

५. 16c मूर्धा°] A (etc.), मूर्ध्रा° B^4 ; 16d वस्त्रैर्द°] A, B^2, C, G, वस्त्रद° B^3, lacune B^4.

६. 17a शाययेज्ज°] A, B^4, C, G, प्राययेज्ज° $B^{2\text{-}3}$.

७. 17cd एकरात्रं द्विरात्रं वा त्रिरात्रं] B^4, एकरात्रं त्रिरात्रं वा द्विरात्रं A, B^3, G, एकारत्रिद्विरात्रं वा त्रिरात्रं B^2, C.

८. 18b °दण्डैश्च भूषितम्] A, B^2, G, °दण्डैश्च भाषितम् B^3, °दण्डोर्ध्वभूषिता C^1, °दण्डोर्ध्वभूषितान् C^2.

९. 19c °भागैकं भवेद्वेदी] A, G, C, °भागैकभवश्चेत् (*v.f.*) B^2, °भागैकं भवेद्वेदिं B^3 ; 19d रत्निमात्रसमुच्छ्रयम्] A (etc.), अरत्निस्तु समुच्छ्रयम् C^2.

१०. 20a कल्पयेत्कु°] A (etc.), कलयेत्कु° B^2, कलये कु° B^3 ; 20b हस्तमात्र°] A (etc.), हस्तिमत्र° B^3, हस्तमात्रं C^2.

चतुरश्रं चतुर्दिक्षु वृत्तं प्राधानिकं कुरु॥ २०॥
मेखलात्रयसंयुक्तं द्वित्रिभिश्चतुरङ्गुलैः।
नाभियोनिसमायुक्तं निम्नोन्नतविवर्जितम्॥ २१॥
वितानध्वजदर्भैश्च मण्डयेन्मण्डपं बुधः[१]।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥ २२॥
पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः।

[७. अधिवासः]

[७.१. शयनकल्पनादि]

स्थण्डिलं कारयेद्विद्वान्वेदिमध्ये विधानतः[२]॥ २३॥
तण्डुलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत्।
शयनं कल्पयेन्मध्ये चर्मजाद्यैरनुक्रमात्[३]॥ २४॥
चर्मजं चाण्डजं चैव रोमजं मुण्डजं तथा[४]।
परिस्तरणसंयुक्तं गन्धपुष्पैस्तु पूजयेत्[५]॥ २५॥
जलादुत्तार्य देवेशं शुद्धिं कृत्वा तु पूर्ववत्[६]।
सुमुहूर्ते सुलग्ने तु शाययेच्छयनोपरि॥ २६॥
प्राक्शिरस्कं हृदा देवमूर्ध्ववक्त्रं यथा न्यसेत्[७]।
रक्तवस्त्रेण संवेष्ट्य कुशदर्भैश्च वेष्टयेत्[८]॥ २७॥

[७.२. कुम्भस्थापनम्]

अभितः कलशानष्टौ द्रोणाम्बुपूरिताान्न्यसेत्[९]।

---

१. 22b °श्च मण्डयेन्म°] A, C^2, G, °श्च खण्डयेम° B^2, °श्चापेण्डयेम° B^3, lacune B^4, च मण्डपे म° C^1.

२. 23d विधानतः] B^2, C^1, वितानतः A^1, B^3, G, विथानतः A^2, lacune B^4, विशेषतः C^2.

३. 24d चर्मजा°] A, B^4, चर्मचा° B^{2-3}, C^1, G, चर्मवा° C^2.

४. 25b रोमजं] A, B^2, C^2, G, लोभजं B^3, lacune B^4, C^1.

५. 25c परिस्तरण°] A (etc.), परिस्थरण° B^4.

६. 26a °त्तार्य] G, °त्तीर्य A (etc.) ; 26b शुद्धिं] A^1 (etc.), शुद्धं A^2.

७. 27a हृदा] A^1 (etc.), यथा A^2 ; 27b न्यसेत्] A, B^{2-3}, G, तथा B^4, C.

८. 27c रक्त°] A^1 (etc.), रक्षा° A^2.

९. 28b द्रोणाम्बुपूरितान्न्यसेत्] C^2, द्रे वारीपूरिता न्यसेत् A^1, द्रे वारिपूरितान्न्यसेत् A^2, द्रोणवारिप्रपूरयेत् B^{2-3}, द्रोणं वा पूरितान्न्यसेत् B^4, द्रोण वा पूरितान्न्यसेत् C^1, न्यसेत्तोयेन पूरितान् G.

ईशानशक्रयोर्मध्ये शिवकुम्भं च वर्धनीम्[१] ॥ २८ ॥
स्थापयित्वा यथान्यायं शिवमन्त्रसमन्वितम्[२]।
गौरीबीजं तु वर्धन्यां न्यस्त्वा ; विद्येश्वरात्मकान्[३] ॥ २९ ॥
कूर्चवस्त्रापिधानैश्च पल्लवैश्च विभूषयेत्[४]।
गन्धपुष्पादिनाभ्यर्च्य स्वस्वबीजं स्मरन्न्यसेत्[५] ॥ ३० ॥
तोरणद्वारकुम्भं च पूजयित्वा यथाविधि[६]।

[७.३. होमः]

अश्वत्थोदुम्बरप्लक्षवटं पूर्वादितः क्रमात्[७] ॥ ३१ ॥
पलाशं तु प्रधानस्य सर्वेषामिध्ममुच्यते[८]।
समिदाज्यचरून् लाजान् यवसिद्धार्थमाषकान्[९] ॥ ३२ ॥
मधुघृतसमायुक्तं गुलखण्डं च होमयेत्[१०]।
शोधनं क्षालनं चैव शोषणं पाचनं तथा[११] ॥ ३३ ॥
पञ्चसंस्कारसंयुक्तं होमं कुर्याद्यथाक्रमम्[१२]।
ईशानेन समिद्धोमं पुरुषेण घृतं हुनेत्॥ ३४ ॥
अघोरेण चरुं हुत्वा लाजं वामेन होमयेत्।
यवं सद्येन हुत्वा तु सिद्धार्थं कवचेन तु॥ ३५ ॥

---

१. 28c शक्रयो°] A, B^3, C, G, वक्रयो° B^2 ; 28d वर्धनीम्] A, B^{2-3}, C, G, वर्धनी B^4.

२. 29b शिवमन्त्र°] C, शिवकुम्भं A^1, B^3, शिवकुम्भ° A^2, B^2, G, lacune B^4.

३. 29c वर्धन्यां] A^1, B^{3-4}, C, G, वर्धन्या A^2, B^2 ; 29d °त्मकान्] A, B^{2-3}, C, G, °त्मकम् B^4.

४. 30a °वस्त्रापिधानैश्च] C^2, °वस्त्रविधानैश्च A, B^{2-4}, °वस्त्राभिधानैश्च C^1, °वस्त्रपिधानैश्च G ; 30d विभूषयेत्] A, B^{2-4}, विभूषितान् C.

५. 30d स्मरन्न्यसेत्] A, C^2, G, स्मरेन्न्यसेत् B^2, स्मरे न्यसेत् B^{3-4}, C^1.

६. 31a तोरणद्वार°] A, B^4, C^1, तोरणं शान्ति° B^{2-3}, तोरणं द्वार° C^2, तोरणं शात° G.

७. 31c °वटं] A, B^4, G, °वटाः B^{2-3}, C^1, °वटान् C^2 ; 31d पूर्वादितः] A^2 (etc.), पूर्वादितं A^1, lacune B^4.

८. 32a प्रधानस्य] A, B^{2-3}, C^1, G, प्रधानं स्यात् C^2, lacune B^4 ; 32b °मुच्यते] B^{2-4}, C, °मेव च A, G.

९. 32c °ज्यचरून्] C, G, °ज्यं चरुं A^1, °ज्यचरुं A^2, B^{2-4}.

१०. 33a °युक्तं] A, B^{2-3}, C, G, °युक्तान् B^4.

११. 33c शोधनं] C, शोषणं A, B^{2-3}, G, lacune B^4 ; 33d शोषणं पाचनं] B^4, C, शोधनं पाचनं A^2, शोधनाच्छदनं A^1, शोधनं पाशनं B^{2-3}, G.

१२. 34b °क्रमम्] B^2, B^4, C, °क्रमात् A, B^3, G.

माषमस्त्रेण जुहुयान् नेत्रमन्त्रैर्मधुत्रयम्[१]।
प्रत्येकं शतमर्धं वा तदर्धं वापि होमयेत्[२] ॥ ३६ ॥
[३]रात्रिशेषं हुनेद्धीमान्षोडशाहुतिसंख्यया।
घृतमिक्षे घृतं हुत्वा देवस्यत्वा चरुं हुनेत्[४] ॥ ३७ ॥
ब्रह्मजज्ञानमन्त्रेण शेषद्रव्याणि होमयेत्[५]।
[६]द्रव्यान्ते व्याहृतिं हुत्वा पूर्णाहुतिम् अथाचरेत्॥ ३८ ॥

[८. अधिवासानन्तरदिवसकृत्यादि]

प्रभाते स्नानं कुर्वीत आचार्यो मूर्तिपैः सह[७]।
मुहूर्तनाडिकापूर्वे सर्वातोद्यसमाकुलम्[८] ॥ ३९ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्[९]।
शयनाद्देवमुत्थाप्य स्नानवेद्युपरि न्यसेत्[१०] ॥ ४० ॥
मण्डपं भूषयेद्धीमान्स्नानार्थं संप्रकल्पितम्[११]।
आसनं श्वभ्रमध्ये तु कल्पयेत्पद्मसंज्ञितम्[१२] ॥ ४१ ॥
[१३]तन्मध्ये स्थापयेद्देवं प्राङ्मुखं हृदयेन तु ।
अष्टत्रिंशत्कलान्यासं ब्रह्माङ्गं च ततो न्यसेत्॥ ४२ ॥

---

१. 36a माषमस्त्रेण] $B^{2\text{-}3}$, C, G, माषमन्त्रेण A, lacune B^4 ; 36b °मन्त्रैर्मधु°] Eds., °मन्त्रान्मधू° A, $B^{2\text{-}3}$, G, lacune B^4, नेत्रमन्त्रे मधू° C.

२. 36d वापि होमयेत्] A^2 (etc.), होमं कारयेत् A^1.

३. Tous les manuscrits (y compris B^4) placent 37 et 38 après 39cd ; B^4 : lacune 37b-38c.

४. 37c घृतमिक्षे] (*sic*, voir ci-dessus p. 30) A, $B^{2\text{-}3}$, घृतं मिमिक्षे (*v.f.*) C^1, G, घृतमिक्षु C^2.

५. 38a °मन्त्रेण] A, $B^{2\text{-}3}$, °सूक्तेन B^4, C^2, °सूक्ते च C^1.

६. A, $B^{2\text{-}4}$ et G omettent 38cd ; D^1 et D^2 reprennent avec 38d.

७. 39a प्रभाते स्नानं] A (etc.), स्नानं प्रभाते G.

८. 39c मुहूर्तनाडिकापूर्वे] B^2, आहूर्तानाडिकापूर्वे A^1, मुहूर्तानाडिका पूर्वे A^2, G, मुहूर्ते नाडिकापूर्वे B^3, +++अपि सर्वे तु B^4, मुहूर्तेनपिका पूर्वे C ; 39d सर्वातोद्य°] A^1, $B^{3\text{-}4}$, G, सर्वातोद° A^2, सर्वतोऽद्य° B^2 ; °समाकुलम् A (etc.), °समन्वितम् C^2.

९. 40b °भृच्च] $B^{2\text{-}4}$, C, D, G, °भिश्च A^1, °भ्रश्च A^2.

१०. 40c शयनाद्देव°] A (etc.), शयनं देव° G.

११. 41b संप्रकल्पितम्] A, C, D, G, संप्रकल्पयेत् $B^{2\text{-}3}$, lacune B^4.

१२. 41d °संज्ञितम्] B^4, C^1, D, °संस्थितम् A, $B^{2\text{-}3}$, G, °संज्ञिकम् C^2.

१३. A, $B^{2\text{-}3}$ et G omettent 42b-45c.

पूजयित्वा हृदा मन्त्री ततः स्थापनमारभेत्।
शिवकुम्भं समादाय शिवबीजं हृदि न्यसेत्[१] ॥ ४३॥
गौरीबीजं न्यसेत्पीठे कण्ठदेशसमाश्रितम्[२]।
विद्येश्वरानपि स्थाप्य कुम्भतोये स्वनामतः[३] ॥ ४४॥
स्नपनं कारयेदन्ते पूर्वोक्तविधिना सह ।
मण्डपे स्थापयेद्देवमर्चयित्वा यथाविधि[४] ॥ ४५॥
नैवेद्यं दापयेद्धीमान् ताम्बूलं च निवेदयेत्[५]।
उत्सवं कारयेत्पश्चाद्यथावित्तानुसारतः ॥ ४६॥

[९. सुखासनस्थापनफलम्

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्[६]।
इह लोके सुखं प्राप्य मृते सायुज्यमाप्नुयात्[७] ॥ ४७॥
आसीनस्थापनं प्रोक्तं वैवाह्यस्थापनं शृणु[८]।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासनस्थापनपटलः [चतुस्त्रिंशत्तमः][९] ॥

---

१. 43d : शिवबीजं] C^1, lacune B^4, शिवकुम्भं C^2.

२. 44b °देश°] C, lacune B^4, °देशि° D^1, °देशं D^2.

३. 44c विद्ये°] B^4, C, D^2, सद्ये° D^1 ; °पि स्थाप्य] C^2, °भिस्थाप्य C^1, D, lacune B^4 ; 44d स्वनामतः] B^4, C^1, D, स्वानामकम् C^2.

४. 45d °र्चयित्वा] A, B^3, C, D, °र्पयित्वा B^2, lacune B^4.

५. 46b निवेदयेत्] A (etc.), निदापयेत् D.

६. 47a मर्त्यः] A, $B^{2,4}$, C, D^1, G, मर्त्य B^3, D^2.

७. 47d मृते सायुज्यमाप्नुयात्] A, $B^{2\text{-}3}$, G, lacune B^4, मृते स्वर्गगतिं लभेत् C^1, D, मृतः स्वर्गगतिं लभेत् C^2.

८. 48b वैवाह्यस्थापनं शृणु] A, B^4, C, G, सर्वसम्पत्सुखावहम् $B^{2\text{-}3}$, वैवाह्यमूर्तिनस्थापनं शृणु (*v.f.*) D^1, वैवाह्यमूर्तिनः स्थापनं शृणु (*v.f.*) D^2.

९. A^2, B^3, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासनस्थापनपटलः।
B^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासनस्थापनः पटलः।
B^4 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासिनस्थापनपटलः सप्तविंशतिः।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासिनस्थापनविधिः विंशतिः पटलः।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासिनस्थापनविधिः सप्तविंशतिः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासीनस्थापनपटलसप्तवींशतिः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सुखासीनस्थापनपटलसप्तविंशतितमः।

[पञ्चत्रिंशत्तमः पटलः]

[वैवाह्यस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि यागं वैवाह्यमूर्तिनः[२]।
प्रतिमालक्षणोपेतं देवं देवीमजं कुरु[३] ॥ १ ॥
विष्णुं च लक्ष्मीमग्निं च ततः स्थापनमारभेत्[४]।

[१. अङ्कुरार्पणं रत्नन्यासश्च]

प्रतिष्ठादिनपूर्वं तु वापयेदङ्कुराणि वै ॥ २ ॥
रत्नन्यासं ततः कुर्यान्मण्डपे समलङ्कृते।
स्थण्डिलं शालिभिः कुर्यात्पञ्चतालप्रमाणतः[५] ॥ ३ ॥
तण्डुलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत्[६]।

[१.१. वैवाह्यमूर्तिनो द्विविधाः]

स्थापयेन्मध्यमे देवं देवीं दक्षिणतो न्यसेत्[७] ॥ ४ ॥
देव्याश्च दक्षिणं हस्तं गृह्णीयाद्दक्षिणेन तु[८]।
सर्वशान्तिकरं ह्येतन्मुक्त्यर्थमधुनोच्यते[९] ॥ ५ ॥
देवस्य वामभागे तु देवीं कुर्याद्विचक्षणः[१०]।
देव्यास्तु दक्षिणं हस्तं गृह्णीयाद्वामपाणिना[११] ॥ ६ ॥

---

१. Manuscrits utilisés : A^{1}, A^{2}, C^{1}, C^{2}, D^{1}, D^{2}, G.

२. 1a अतः परं] A^{1}, C, D, अथतः सं॰ A^{2}, G ; 1b यागं] A (etc.), योगं G ; ॰मूर्तिनः] A, C, G, ॰मूर्तिनम् D.

३. 1c ॰णोपेतं] C, ॰णस्योक्त॰ A, ॰णस्योक्तं G ॰नोपेत॰ D ; 1d देवं देवी॰] D^{2}, G, देवीदेव॰ A, देवदेवी॰ C^{1}, D^{1}, देवदेवं C^{2} ; ॰मजं कुरु] A (etc.), जगद्गुरुम् C^{2}.

४. 2a विष्णुं च] A, C, G, विष्णुश्च D.

५. 3c स्थण्डिलं] A (etc.), स्तण्डिलः C^{1} ; शालिभिः] A^{2}, C, D^{2}, G, शातभिः A^{1}, शान्तिभिः D^{1}.

६. 4a शोभितं] A (etc.), शोभितः C^{1} ; 4b परिस्तरेत्] A (etc.), परिस्तरे D^{1}.

७. 4c देवं] A, C, G, देव॰ D.

८. 5a हस्तं] A, D, G, हन्ति C ; 5b गृह्णी॰] A, D^{2}, G, शृणु॰ C, शृणी॰ D^{1}.

९. 5c ॰शान्ति॰] A^{2} (etc.), ॰शान्तं A^{1} ; ह्येतन्॰] A, D, G, येतन्॰ C ; 5d ॰न्मुक्त्य॰] A^{2} (etc.), ॰नुक्त्वा॰ A^{1}, ॰नुक्त्य॰ D^{2}.

१०. 6b ॰चक्षणः] A, D, G, ॰शेषतः C.

११. 6d गृह्णी॰] A, D^{2}, G, शृणु॰ C, शृणी॰ D^{1} ; ॰पाणिना] A, G, ॰पाणिनम् C, D.

एतन्मुक्त्यर्थमाख्यातं ज्ञात्वा कर्म समाचरेत्[१]।
वामभागे न्यसेद्विष्णुं ब्रह्माणं दक्षिणे न्यसेत्॥ ७॥

[१.२. रत्नविन्यासः]

रत्नानि विन्यसेद्धीमान्दिग्विदिक्षु च मध्यमे[२]।
प्रवालं पूर्वदिग्भागे मरकतं चाग्निगोचरे[३]॥ ८॥
[४]इन्द्रनीलं तु याम्यायां मुक्ता निर्ऋतिगोचरे[५]।
स्फटिकं वारुणे भागे वायव्यां शङ्खमेव च॥ ९॥
पुष्यरागं तु कौबेर्यां सूर्यकान्तं तु शाङ्करे[६]।
माणिक्यं मध्यमे चैव न्यसेद्दिग्बीजमन्त्रतः[७]॥ १०॥
इन्द्रनीलं महानीलं स्फटिकं पुष्परागकम्[८]।
[९]माणिक्यं च महादिक्षु मध्ये विष्णौ ततो न्यसेत्[१०]॥ ११॥
ब्रह्मपीठे न्यसेदेवं हैमं गौरीश्रियोर्न्यसेत्[११]।
एवं न्यस्त्वा हृदा मन्त्री सुस्निग्धं कारयेत्ततः[१२]॥ १२॥

[२. नेत्रोन्मीलनम्]

अक्षिद्वययुते ऋक्षे तन्नेत्रोन्मीलनं कुरु[१३]।

---

१. 7a एतन्मुक्त्यर्थ°] A, G, एवं मुक्त्यर्थ° C, D^1, एवमुक्त्यर्थ° D^2, lacune A^2.

२. 8a रत्नानि] A (etc.), रत्नादि C ; 8b °दिग्विदिक्षु] A^2 (etc.), °दिशि दिक्षु A^1 ; मध्यमे] C^2, D, मध्यतः A, C^1, G.

३. 8d मरकतं] (*v.f.*) A^1, D^1, मरतकं (*v.f.*) A^2, C^1, D^2, G, मरतं C^2.

४. C omettent 9ab-10cd.

५. 9b मुक्ता निर्ऋति°] A (etc.), मुक्तानि श्रुति° D^1.

६. 10a पुष्यरागं] D, G, पुष्परागं A, C.

७. 10c माणिक्यं] A, C, G, माणिक्कं D ; 10d न्यसेद्दिग्बीज°] A, C, विन्यसेद्बीज° G, विन्यसेदिक्बीज° (*v.f.*) D.

८. 11b पुष्परागकम्] A^1, पुष्परागम् (*v.f.*) A^2, C, पुष्यरागम् (*v.f.*) D, G.

९. D^1 répète 9ab-cd avant 10cd.

१०. 11c माणिक्यं] A^1, C^1, G, माणिक्कं A^2, C^2, D^2 ; 11d विष्णौ] D, विष्णुं A, C, G ; ततो न्यसेत्] A, G, तु विन्यसेत् C, D.

११. 12a न्यसेदेवं] Eds, न्यसेद्देवं A (etc.) ; 12b गौरीश्रियोर्न्य°] A, गौरीश्रितोन्य° C, D, शौरीश्रियोर्न्य° G.

१२. 12d सुस्निग्धं] A^1, C^2, G, lacune A^2, C^1, स्निग्धं तु D.

१३. 13a अक्षि°] A (etc.), अक्ष° D^2 ; ऋक्षे] A, C^1, D^2, G, दक्षे C^2, रिक्षे D^1.

पूर्ववत्स्थण्डिलं कृत्वा स्थापयेत्पूर्ववत्क्रमात्[१] ॥ १३ ॥
लोकपालाधिदैवत्यानभितोऽष्टौ तु विन्यसेत्[२] ।
कलशान्वारिसंपूर्णान्सवस्त्रान्कूर्चसंयुतान्[३] ॥ १४ ॥
संस्थाप्य च ततः पूज्य गन्धपुष्पादिना बुधः ।
शङ्खभेरीनिनादैश्च स्वस्तिमङ्गलवाचकैः ॥ १५ ॥
हेमसूच्या लिखेद्विद्वान्पक्ष्मरेखां विशेषतः[४] ।
असितं मण्डलं लिख्य दृष्टिमण्डलमालिखेत्[५] ॥ १६ ॥
नेत्रमन्त्रं समुच्चार्य प्रोतसौवर्णकैर्नखैः[६] ।
उमादिप्रतिमानां च नयनोन्मीलनं कुरु[७] ॥ १७ ॥
मधुवातेति मन्त्रेण मधु नेत्रेषु तर्पयेत्[८] ।
घृतमिक्षेति मन्त्रेण घृतपात्रं प्रदर्शयेत्[९] ॥ १८ ॥
गौर्धेनुभव्यमन्त्रेण दर्शयेद्धेनुमुत्तमाम्[१०] ।
ब्राह्मणान्दर्शयेत्पश्चाद्ब्रह्मजज्ञानमन्त्रतः ॥ १९ ॥
दर्शयेत्सप्तबीजानि बीजमुख्यमनुस्मरन् ।

---

१. 13d स्थापयेत्°] A, D, G, lacune C^1, स्थापनं C^2.

२. 14a °धिदैवत्यानभि°] C^2, D, दैवतानि भि° (*v.f.*) A^1, °धिदैवतानभि° A^2,G, °धिदैवतान्यभि° C^1 ; 14b अभितोऽष्टौ] A^2,C, G, भीतोष्टौ न A^1, न हि तोष्टौ D.

३. 14c कलशान्वारि°] A^1 (etc.), कलशानुपरि° (*v.f.*) A^2.

४. 16a हेम°] A^1 (etc.), हेमं A^2; 16b °पक्ष्मरेखां] A^2, °पद्मरेखा° A^1, °पक्षरेखा° C^1, D, °पक्षरेखां C^2, G.

५. 16c असितं] Eds. (cf. 42.13, etc.), आसीतं A^1, आसितं A^2, lacune C^1, आसीनं C^2, आसीन° D, अक्षि (*v.f.*) G ; लिख्य] A (etc.), आलिख्य G ; 16d दृष्टिमण्डालमालिखेत्] A^2 (etc.), दृष्टं मण्डलं मालिखेत् A^1.

६. 17a नेत्र°] Eds., क्षेत्र° A^1 (etc.) ; 17b °सौवर्णकैर्नखैः] A^2, °सौवर्णकैर्नवैः A^1, °सौवर्णिके नखे C^1, °सौवर्णिकैर्नखैः C^2, D^2, °सौवर्णिकैर्नवैः D^1, °सार्वर्णकैर्नवैः G.

७. 17c उमादिप्रतिमानां च] C^2, शिवादिप्रतिमा सर्वे A^1, शिवादिप्रतिमाः सर्वे A^2, उमादिप्रतिमा ++ C^1, उमातिप्रतिमा सर्वा D, शिवादिप्रतिमाः सर्वा G ; 17d नयनोन्मी°] Eds., नेत्रावोन्मी° A^1, नेत्रोन्मी° (*v.f.*) A^2, नेत्राण्युन्मी° C, D^1, G, नेत्रादुन्मी° D^2.

८. 18a मधुवातेति] A, D^1, G, अथ वामेति C, मर्थवातेति D^2.

९. 18c घृतमिक्षेति] (*sic*, voir p. 30) A, G, घृतमीशेति C^1, घृतर्माशेति C^2, घृतं मिमिक्षेति (*v.f.*) D, G ; 18d घृतपात्रं] A, G, घृतसङ्क्षे C^1, घृतसङ्क्ष्ये C^2, घृतशन्खे D.

१०. 19a °भव्य°] A^1, C^1, D^1, °हव्य° A^2, C^2, D^2, G ; 19b दर्शयेद्धेनु°] A^2 (etc.), दर्शयेचन° A^1.

[३. स्नानादि]

गन्धद्वारेति मन्त्रेण गोमूत्रमभिषेचयेत्[१] ॥ २० ॥
सवितेति शकृत्तोयं क्षीरमाप्यायमन्त्रतः[२] ।
दधिक्रेति दधिस्नानमाज्यं शुक्रमसीति च[३] ॥ २१ ॥
यत इन्द्रेति मन्त्रेण गन्धतोयेन सेचयेत्[४] ।
तत्तद्धृदयमुच्चार्य गन्धपुष्पादिनार्चयेत् ॥ २२ ॥
स्रग्वस्त्रभूषणैर्भूष्य कुर्याद्ग्रामप्रदक्षिणम्[५] ।
सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम् ॥ २३ ॥

[४. जलाधिवासः]

नद्यां वापि तटाके वा प्रपां कृत्वातिसुन्दराम्[६] ।
तत्तीरे प्रतिमाः स्थाप्य पवमानेन सेचयेत्[७] ॥ २४ ॥
वस्त्रेण वेष्टयेत्सर्वान्कुशैश्च परिवेष्टयेत् ।
जलमध्ये चतुर्गात्रं कृत्वा तत्रैव शाययेत्[८] ॥ २५ ॥
प्राक्शिरश्चोर्ध्ववक्त्रं तु कण्ठदघ्नजले बुधः[९] ।
पञ्चरात्रं त्रिरात्रं वा एकरात्रमथापि वा ॥ २६ ॥

[५. मण्डपादिकल्पनम्]

[५.१. मण्डपलक्षणम्]

मण्डपं कारयेद्धीमान्प्रासादस्याग्रतोऽन्तिके[१०] ।

---

१. 20c °द्वारेति] C, D, G, °द्वारेण A.

२. 21a °त्तोयं] A^2, C, D, G, °त्तोय° A^1.

३. 21c °क्रेति] A^2 (etc.), °क्रेण A^1, °केति D^1 ; °स्नान°] A (etc.), °स्थान° D^2 ; 21d शुक्रमसीति च] A, D^2, G, शुक्र +++च C^1, शुक्रमसीत्य सः C^2, शुकमसीति च D^1.

४. 22a यत इन्द्रेति] A^2, G, यतं तु इन्द्रेति (*v.f.*) A^1, एतोञ्चितेति C, D.

५. 23a स्रग्व°] A^2 (etc.), सृग्व° A^1, सृश्व° D^1 ; °स्त्रभूषणैर्भूष्य] A, C^2, G, °स्त्रभूषणैर्भूष्यं C^2, G, °स्त्रं भूषयेद्भूष्यं C^1, D.

६. 24a वापि] A (etc.), वापी° C^2 ; 24b °तिसुन्दराम्] G, °तिसुन्दरम् A, C, D^2, °सिसुन्दरम् D^1.

७. 24c प्रतिमाः] A^2, प्रतिमां A^1, C^2, D, G, प्रभमां C^1.

८. 25c °गात्रं] C, D, °मात्रं A, G ; 25d शाययेत्] A, C^1, D^2, G, शोधयेत् C^2, शाधयेत् D^1.

९. 26a °र्ध्व°] A^2 (etc.), °र्ध्वे A^1 ; 26b °दघ्न°] A, G, °मग्न° A^2 (var.), °मग्ने C, D.

१०. 27b °तोऽन्तिके] C, D, °तोऽन्यके A, G.

दशद्वादशहस्तं वा नवहस्तमथापि वा[१] ॥ २७ ॥
मध्यमे वेदिकां कुर्याद्धस्तमात्रसमन्विताम् ।
रत्निमात्रसमुत्सेधं दर्पणोदरसंनिभाम्[२] ॥ २८ ॥

[५.२. कुण्डलक्षणम्]

[३]कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्[४] ।
रत्निमात्रप्रविस्तारं तद्वत्खातं त्रिमेखलम्[५] ॥ २९ ॥
द्वित्रिचतुर्भिरङ्गुल्यैस्तारोत्सेधं ततः समम्[६] ।
चतुरश्रं त्रिकोणं च धनुः पञ्चाश्रमेव च[७] ॥ ३० ॥
वृत्तं षडश्रं पद्मं च सप्तकोणं यथाक्रमम्[८] ।
सुरेन्द्रेशानयोर्मध्ये वृत्तकुण्डं प्रकल्पयेत्[९] ॥ ३१ ॥
दर्पणोदरसंकाशं निम्नोन्नतविवर्जितम्[१०] ।
नाभियोनिसमायुक्तं योनौ योनिं न कारयेत् ॥ ३२ ॥
वितानध्वजसंयुक्तं मुक्तादामैरलङ्कृतम्[११] ।

---

१. 27c दशद्वादशहस्तं वा] A^1, G, दशद्वादशविस्तारं A^2, द्वादशं दशहस्तं वा C, D.

२. 28c °समुत्सेधां] Eds, °समुत्सेधं A (etc.), °समुच्छ्रेयं C^2 ; 28d दर्पणो°] A^2, C, D, दर्शयो° A^1, G ; °भाम्] G, °भम् A (etc.).

३. D^1 omet 29ab-29cd.

४. 29b पदे] A^2, C, D, G, सदे A^1.

५. 29c रत्नि° A, D, G, अग्नि° C.

६. 30a °त्रिचतुर्भिरङ्गुल्यैस्ता°] Eds., °त्रिचतुरङ्गुल्यैर्वा ता° A^2, °त्री च चतुरङ्गुल्यैस्ता° A^1, °त्रिश्चतुर्भिरङ्गुल्यं ता° C^1, D, °स्त्रिश्चतुर्भिरङ्गुल्यं ता° C^2, °तीयचतुरङ्गुल्यैस्ता° G ; 30b तारोत्सेधं ततः स°] A^1, विस्तारोत्सेधं तत्स° A^2, C, D^2, विस्तरोत्सेधतत्स° D^2, G.

७. 30d धनुः] A^2, C^2, D, G, धनं A^1, lacune C^1 ; पञ्चाश्र°] A, D, G, lacune C^1, पञ्चम° C^2.

८. 31a वृत्तं] A (etc.), वृत्त° C^2 ; षडश्रं पद्मं] A, G, षोडशाश्रं C, D ; 31b °कोणं] A (etc.), °कोटिनं (*v.f.*) D ; °क्रमम्] A^2 (etc.), °क्रमात् A^1.

९. 31c °न्द्रेशानयो°] A^2, G, °न्द्रीशानयो° A^1, °न्द्राग्निनयो° C^1, °न्द्राग्निद्वयो° C^2, °न्द्रेऽग्नेनयो° D^1, °न्द्रेग्नयो° (*v.f.*) D^2 ; 31d वृत्त°] A, D, G, lacune C^1, वृत्तं C^2.

१०. 32b °विवर्जितम्] A (etc.), °वर्जितम् (*v.f.*) D.

११. 33a °युक्तं] A (etc.), °युक्त° D^2 ; 33b °मुक्ता°] A (etc.), °वृत्त° G.

[१]दर्भमालासमायुक्तं मुक्तादामैरलङ्कृतम्[२] ॥ ३३ ॥
चतुस्तोरणसंयुक्तं फलपल्लवशोभितम्[३] ।

[५.३. स्नानश्वभ्राः]

मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ॥ ३४ ॥
हस्तमात्रप्रविस्तारं मेखलाद्वयभूषितम् ।
विस्तारोत्सेधमानं तु प्रत्येकं चतुरङ्गुलम्[४] ॥ ३५ ॥
नालमुत्तरभागे तु कल्पयेत्तु सुवृत्तकम्[५] ।
तस्य पश्चिमतो भागे विष्णोः श्वभ्रं प्रकल्पयेत्[६] ॥ ३६ ॥
पूर्वे तु ब्रह्मणः श्वभ्रं कल्पयेत्पूर्ववत्क्रमात् ।
एवमेव क्रमो गौर्या मण्डपस्योत्तरे कुरु[७] ॥ ३७ ॥
गौर्या एकं श्रियश्चाग्नेः कल्पयेत्कल्पवित्तमः[८] ।
ब्राह्मणान्भोजयेत्तत्र शुद्धिं कृत्वा विशेषतः ॥ ३८ ॥
पुण्याहं वाचयेत्तत्र वास्तुहोमं तदन्तरे[९] ।

---

१. Entre 33c et 33d C^1, C^2, D^1, D^2 intercalent le passage suivant :

चतुस्तोरणभूषितं। फलपल्लवसंयुक्तं धूपदीपसमाकुलम् ॥
एवं [1]मण्डलसंस्कारं तस्याग्रे मण्डलं कुरु। [2]दशद्वादशहस्तं वा नवहस्तमथापि वा ॥
तत्र मध्ये पदे कुर्याद् [3]वेदिं रत्निसमुच्छ्रयं। परितः कल्पयेत् [4]कुण्डमष्टौ चत्वारि [5]एव च ॥
दिशासु [6]वृत्ताकारं स्याद्योन्याकारं विदिक्षु वै। [7]मेखलाद्व्यङ्गुला ज्ञेया प्रत्येकं तु महानवः ॥
मण्डपं भूषयेत्तत्र वितानध्वजसंयुक्तम्। [8]दर्भमालासमयुक्तं [9]मुक्तादामाद्यलङ्कृतम् ॥

(1. मण्डपसंस्कारं D^2 ; 2. = 29cd ; 3. वेदिका रत्निसमुच्छ्रिता C^1, D^2, वेदिका कुर्याद्रत्निसमुच्छ्रिता D^1 ; 4. कुण्डान्यष्टौ C^1, D ; 5. एव वा D^2 ; 6. ++तकारं C^2, वृत्तकारं D^2 ; 7. मेखलान्यङ्गुला D ; 8. = 33c ; 9. मुक्तादामैरलङ्कृतम् C^2, D).

२. 33c दर्भ°] A, G, दश° C, D^2, दर्श° D^1 ; 33d मुक्तादामैरलङ्कृतम्] A (etc), कदलीपूगवल्लिका G.

३. 34b °शोभितम्] A, °संयुतम् C, D.

४. 35c तु] A^1, यत् A^2 (etc.).

५. 36a नालमुत्तर°] A, D, G, lacune C^1, नाभेरधर° C^2.

६. 36d विष्णोः] C^1, विष्ण्वोः A^1, विष्णो A^2, C^2, D, विष्णु° G.

७. 37c एवमेव क्रमो गौर्या] A^2, G, एवमेव क्रमं गौर्य A^1, वामेन वक्त्रमाद्गौर्या C^1, वामेनैव क्रमाद्गौर्याः C^2, वामेव क्रमाद्गौर्यं D ; 37d कुरु] A, G, गुरुः C, D.

८. 38a गौर्या एकं श्रियश्चा°] Eds., गौर्या एकाश्रयं चा° A (etc.), गौर्याः एकाश्रयं चा° C^2 ; °ग्नेः] C, D, °ग्नौ A, G.

९. 39b वास्तुहोमं] A^2, C, D, वास्तुहोमे A^1, G.

[६. अधिवासः]

[६.१. शयनानि]

जलादुत्तीर्य देवांश्च शुद्धिं कृत्वा तु पूर्ववत्॥ ३९॥
वस्त्रैराभरणैर्माल्यैर्भूषयेद्भूषणार्हकान्[१]।
स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः[२]॥ ४०॥
तदर्धैस्तण्डुलैः कुर्यात्तदर्धैश्च तिलैरपि[३]।
शयनं कल्पयेन्मध्ये चर्मजाद्यैरनुक्रमात्॥ ४१॥
चर्मजं रोमजं चैव मुण्डजं चाण्डजं तथा।
उपर्युपरि संकल्प्य दर्भैश्च कम्बलैरपि॥ ४२॥
दक्षिणे कल्पयेद्विष्णोरुत्तरे ब्रह्मणस्तथा[४]।
देव्यधिवासवेद्यां तु स्थण्डिलं शालिभिः कुरु[५]॥ ४३॥
अष्टद्रोणैस्तदर्धैर्वा तदर्धैश्च तिलैरपि[६]।
[७]तिलदर्भलाजसङ्कीर्णं तन्मध्ये पद्ममालिखेत्[८]॥ ४४॥
मध्यमे कल्पयेद्गौर्याः श्रियं चोत्तरतो न्यसेत्[९]।
चर्मजाद्यैरनुस्थाप्य द्वयोर्देव्योर्विशेषतः[१०]॥ ४५॥
पुरुषेणेति मन्त्रेण स्थण्डिलं प्रोक्षयेद्गुरुः[११]।

[६.२. शयनेषु प्रतिमन्यासः]

नृत्तगेयसमायुक्तैः स्तोत्रमङ्गलवाचकैः॥ ४६॥

---

१. 40a वस्त्रैराभरणैर्माल्यैर्भू॰] A (etc.), वस्त्राभरणमाल्यैश्च भू॰ G.

२. 40c ॰द्वेद्याम॰] A, G, ॰द्विद्वान॰ C, ॰द्विद्याम॰ D ; 40d ॰द्रोणैश्च] A^2, ॰कोणैश्च A^1, ॰द्रोणेन C, D, G.

३. 41a कुर्यात्॰] A (etc.), चैव C^2.

४. 43a विष्णोरुत्त॰] A (etc.), विष्णुं उत्त॰ C^2 ; 43b ब्रह्मणस्तथा] G, ब्रह्मणस्य तु A, कर्मणा भवेत् C, D.

५. 43c देव्यधिवासवेद्यां] C^2, D, G, देवाधिवासदेव्यां A^1, देव्यधिवासदेव्यां A^2, देव्यनिवासवेद्यां C^1.

६. 44b ॰र्धैश्च तिलैरपि] A, G, ॰र्धैस्तण्डुलैरपि C, D.

७. Vers faux dans tous les manuscrits.

८. 44c ॰लाज॰] A^1 (var.), C, D, G, ॰लाल॰ A^1, ॰राज॰ A^2.

९. 45a ॰गौर्याः] C^1, G, ॰गौर्या A, ॰गौरीं C^2, ॰गौद्ध्य D^1, ॰गौर्य D^2 ; 45b चोत्तरतो] A (etc.), चैवत्तरतो (*v.f.*) C^2.

१०. 45c ॰देव्योर्वि॰] Eds., ॰देव्या वि॰ A^1 (etc.).

११. 46a पुरुषेणेति] A, C, D^1, G, पुरुषेयेणेति (*v.f.*) D^2.

शाययेच्छयने देवं प्राक्शिरश्चोर्ध्ववक्त्रकम्[१]।
दक्षिणे शाययेद्विष्णुं वामे वै वेधसं न्यसेत्॥ ४७॥
तत्तद्धृदयमन्त्रेण शाययेच्छयनोपरि[२]।
[३]प्रत्येकं वेष्टयेद्धीमान्रक्तवस्त्रेण देशिकः[४]॥ ४८॥
तत्तच्छिरःप्रदेशेषु शिवकुम्भं च वैष्णवम् ।
ब्रह्मकुम्भं तु संस्थाप्य सवस्त्रं सापिधानकम्॥ ४९॥
[५]सकूर्चं वारिसंपूर्णं शिवकुम्भं च वर्धनीम्।
अभितः कलशानष्टौ द्रोणार्धोदकपूरितान्[६]॥ ५०॥
[७]ससूत्रान्सापिधानांश्च सवस्त्रान्हेमसंयुतान्।
लोकपालाधिदैवत्यान्पूजयित्वा यथाविधि[८]॥ ५१॥
दर्शयेद्दशमुद्रास्तु नैवेद्यं दापयेत्पृथक्[९]।
अपरो देशिको धीमान्गौरीमधिवसेत्क्रमात्[१०]॥ ५२॥
वेदिकायास्तु तन्मध्ये स्थण्डिलं पूर्ववत्कुरु।
[११]तिलदर्भैः समाकार्य तन्मध्ये शयनं कुरु[१२]॥ ५३॥
शयनं कल्पयेन्मन्त्री श्रीदेव्याश्च विशेषतः[१३]।

---

१. 47a शाययेच्छयने] A (etc.), शयने शाययेद्° G ; 47b प्राक्शिरश्चोर्ध्व°] A^{1}, C, G, प्राक्च्छिरमूर्ध्व° A^{2}, प्राक्शिरस्कोर्ध्व° D.

२. 48a तत्तद्धृ°] C, D^{2}, तत्र हृ° A, तत्तदृ°D^{2}, lacune G.

३. A^{1} omet 48cd-50ab ; A^{2} omet 48d-50a.

४. 48c वेष्टयेद्°] C, G, वेदयेद्° D ; °धीमान्°] A^{2}, °देवान्° C^{1}, D, °देवं C^{2}, एवं G ; 48d °रक्त°] C^{1}, D, °नृत्त° C^{2}, °तत्तन्° G.

५. C^{1} omet 50ab et le remplace par une répétition de 46ab.

६. 50d द्रोणार्धोदक°] A^{2} (etc.), द्रोणषण्डोद° A^{1}.

७. A et G omettent 51ab.

८. 51d °पूजयित्वा] A^{1}, C^{1}, °पूजयेत्तु A^{2}, C^{2}, D, G.

९. 52a °दश°] A, C, G, °देश° D^{1}, °देव° D^{2}.

१०. 52c अपरो] A^{1} (etc.), अपरे A^{2}.

११. A et G omettent 53cd.

१२. 53c समाकार्य] C^{1}, समं कार्यं C^{2}.

१३. 54a °न्मन्त्री] A, G, °द्वामे C, D ; 54b च] A (etc.), तु C^{1}.

उमाया दक्षिणे भागे वह्न्यर्थं शयनं कुरु[१] ॥ ५४ ॥
शयने शाययेद्देवीं मध्यमे तु हृदा तदा[२] ।
वामे तु शाययेल्लक्ष्मीं प्राक्शिरश्चोर्ध्ववक्त्रकाम्[३] ॥ ५५ ॥
दक्षिणे शाययेद्वह्निं शयनस्योपरि क्रमात्[४] ।
रक्तवस्त्रेण संवेष्ट्य कुशपुष्पैः परिस्तरेत् ॥ ५६ ॥
तत्तच्छिरःप्रदेशेषु गौरीकुम्भं तु विन्यसेत् ।
श्रीकुम्भं चाग्निकुम्भं च विन्यसेत्तु विचक्षणः ॥ ५७ ॥
सकूर्चान्सापिधानांश्च सवस्त्रान्तोयपूरितान्[५] ।
वामादि चाष्टशक्तीश्च पूर्वादिकलशे न्यसेत्[६] ॥ ५८ ॥
गन्धपुष्पादिना पूज्य नैवेद्यान्तं विशेषतः[७] ।
द्वारकुम्भं ततः स्थाप्य पूजयित्वा यथाविधि[८] ॥ ५९ ॥
[९]चतुर्दिक्षु चतुर्वेदैः कुर्यादध्ययनं क्रमात् ।
कोणे मन्त्रजपं कुर्यात्ततो होमं समाचरेत्[१०] ॥ ६० ॥

[६.३. होमः]

[६.३.१. इध्मम्]

खदिरोदुम्बराश्वत्थवटं पूर्वादितः क्रमात्[११] ।
शमीबिल्वार्कमायूरमाग्नेयादि च कोणके[१२] ॥ ६१ ॥

---

१. 54d वह्न्यर्थं] C, D, बाह्यार्थं A, G.

२. 55a °देवीं] A, C, G, °देवी D ; 55b तदा] A, तथा C, D.

३. 55d °श्चोर्ध्व°] A, C, G, °स्कर्ध्व° D^1, °स्कोर्ध्व° D^2 ; °वक्त्रकाम्] A^1, °वक्त्रकम् A^2, C^1, D^2, G, °वक्तृकाम् C^2, °वक्त्रकः D^1.

४. 56b शयनस्योपरि] A^2 (etc.), शयनेऽस्योपरि A^1.

५. 58b सवस्त्रान्°] A, C, D^2, G, सर्वज्ञान्° D^1.

६. 58c °शक्तीश्च] Eds., °शक्तिश्च A, C, G, °शक्तिस्तुश्च D^1, °शक्तिस्तु D^2 ; 58d °कलशे] C^2, G, °कलशान् A, C^1, D.

७. 59a गन्धपुष्पादिना] A, C, G, गन्धादिना पूज्य (*v.f.*) D.

८. 59c ततः] C^1, D, अथ A^1, अध A^2, तत C^2, अधः G.

९. 60ab lacunaire dans A^1 et A^2 qui omettent 60cd-61ab.

१०. 60c मन्त्र°] C, D^2, G, मन्त्रं D^2.

११. 61a खदिरो°] C^1, D^2, खादिरो° C^2, D^1, G ; °श्वत्थ°] C, °श्वत्थं D, G ; 61b °वटं] C^1 (etc.), °वटाः C^2.

१२. 61c °मायूरं] A, C^1, D^2, G, °मायूरा C^2, °माधूरं D^1 ; 61d °यादि] A, G, °यादौ C, D.

पलाशं तु प्रधानस्य सर्वेषामिध्ममुच्यते[१]।
पलाशं चैव बिल्वं च उदुम्बरं च खादिरम्[२] ॥ ६२ ॥
वैकङ्कतं तु मायूरं गौरीयागे विधीयते[३]।
अष्टोत्तरं तदर्धं वा प्रत्येकं परिगृह्य च[४] ॥ ६३ ॥

[६.३.२. शिवयागः]

समिदाज्यचरून्लाजान्सिद्धार्थतिलमाषकान्[५]।
यवशालिकुलत्थं च जुहुयात्क्रमशः पुनः[६] ॥ ६४ ॥
शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारपूर्वकम्[७]।
हृदयादि चतुर्दिक्षु विदिक्षु पुरुषादयः[८] ॥ ६५ ॥
[९]प्रत्येकं समिधो हुत्वा शिवाग्नौ बीजमन्त्रतः[१०]।
शिवाङ्गैश्चैव विद्याङ्गैर्घृतेन जुहुयाच्छतम् ॥ ६६ ॥
चरुं हुत्वा हृदा मन्त्री लाजं वै शिरसा हुनेत्[११]।
सिद्धार्थं शिखया हुत्वा कवचेन तिलं हुनेत् ॥ ६७ ॥
माषं हुत्वास्त्रमन्त्रेण नेत्रेण तु यवाहुतिः[१२]।

---

१. 62a पलाशं तु] A, G, पञ्चांशं तु C^1, D, पञ्चाशत्तु C^2,

२. 62c पलाशं चैव बिल्वं] A, G, पलाशाशोकबिल्वं C^1, D, पलाशाशोकबिल्वा C^2 ; 62d उदुम्ब°] A, G, औदुम्ब° C, D ; च खादिरम्] A, C^1, खादिरं ततः (*v.f.*) C^2.

३. 63a वैकङ्कतं तु] A, D^2, G, वैवङ्कतं च C^1, वैकृतं चापि C^2, वैकर्तं कथं च D^1 ; 63b गौरी°] A^2, G, गौरि° A^1, गौर्या° C, D.

४. 63c अष्टोत्तरं] A (etc.), अष्टशतं G.

५. 64a समिदाज्यचरून्°] C^2, G, समिदाज्यचरुं A^2, C^1, D, संयज्य च चरुं A^1 ; °लाजान्°] A, G, °लाज° C^1, °लाजं, C^2, °लाजा D ; 64b °र्थ°] A^2, C, D^2, G, °र्थं A^1, D^1.

६. 64c °कुलत्थं] Eds., °कुलुत्थं A^1, °कुलस्थं A^2, C, D, G ; 64d पुनः] A, G, पुमान् C, D.

७. 65b °पूर्वकम्] A, G, °संयुतम् C, D.

८. 65d पुरुषादयः] A, G, पुरुषादिभिः C^2, D, हृदयादिभिः C^1.

९. A^1 et A^2 omettent 66b-67c.

१०. 66a समिधो] A, संहिता C^1, D^2, सहितां C^2, संहिधा D^1, समिधा G ; 66b शिवाग्नौ] G, शिवाग्निं C, शिवाग्ना D^1, शिवग्नि° D^2.

११. 67a हुत्वा हृदा] D, G, हृदा तु या C^1, हृदा तु वा C^2.

१२. 68a हुत्वास्त्र°] A (etc.), हुत्वास्त° C^2 ; यवाहुतिः] A, G, यथाहुतिम् C^1, D^1, यथा क्रमम् C^2, यथाहुतिः D^2.

शालिं हुत्वा शिवेनैव बीजमुख्यैः कुलत्थकम्[१] ॥ ६८ ॥
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात्।
द्रव्यं प्रति हुनेद्धीमान्व्याहृतिं च विशेषतः[२] ॥ ६९ ॥
अघोरास्त्रेण मन्त्रेण पूर्णाहुतिमथाचरेत्।
शिवयागक्रमं ह्येतद्गौरीयागमथ शृणु[३] ॥ ७० ॥

[६.३.३ गौरीयागः]

समिदाज्यचरून्लाजांस्तिलसर्षपमाषकान्[४]।
दूर्वामधुयवाश्चैव दशद्रव्यं प्रकीर्तितम्[५] ॥ ७१ ॥
गौर्यग्निं कल्पयेत्पूर्वं गौरीमन्त्रोक्तमार्गतः[६]।
गौरीगायत्रिमन्त्रेण समिद्धोमं समाचरेत्॥ ७२ ॥
[७]ब्रह्माङ्गैर्जुहुयाद्गौर्या आज्यादि च यवान्तकम्[८]।
शतमर्धं तदर्धं वा जुहुयात्क्रमशः पुनः ॥ ७३ ॥
गौरीमिमायमन्त्रेण घृतं हुत्वा शतार्धकम्[९]।
अहमस्मीति मन्त्रेण चरुं हुत्वा विशेषतः ॥ ७४ ॥
धान्यं हुत्वाग्निमीलेति सर्षपं सवितेति च।
विष्णोर्नु कं तिलस्योक्तं त्र्यम्बकेन यवं हुनेत्[१०] ॥ ७५ ॥
अयं कुमारमन्त्रेण दूर्वां हुत्वा घृताक्तकाम्[११]।

---

१. 68d बीजमुख्यैः] A, G, द्विजमुख्यैः C^1, D, द्विजमुख्यः C^2 ; °त्थकम्] A, G, °त्थकान् C, D.

२. 69d °व्याहृतिं च विशेषतः] A, D, G, °व्यहृतीर्जुहुयात्ततः C^1, °व्याहृतिं जुहुयात्ततः C^2.

३. 70c शिवयाग°] A (etc.), शिवागम° C ; 70d °यागमथ] A, C^2, °यागं ततः C^1, G, °यागमतः D.

४. 71a °चरून्°] C^2, D, G, °चरुं A, C^1 ; °लाजांस्ति°] A (etc.), लाजति° C^1.

५. 71c दूर्वा°] A^2, D, G, पूर्वा° A^1, C^1, पूर्वं C^2 ; 71d °द्रव्यं प्रकीर्तितम्] C^2, °द्रव्याणि कीर्तिता A^1, D, °द्रव्याणि कीर्तिताः A^2, C^1, °द्रव्यं तु कीर्तितम् G.

६. 72b °मन्त्रोक्तमर्गतः] A, G, °कलपोमन्त्रतः C^1, °तन्त्रोक्तमन्त्रतः C^1(var.), °मन्त्रोक्तमन्त्रतः C^2, D.

७. A et G omettent 73ab-73cd.

८. 73b आज्यादि] C^1, D, पूज्यादि C^2 ; यवान्तकम्] C^2, D, यवान्तिकम् C^1.

९. 74a °मिमायमन्त्रेण] A (etc.), °मन्त्रोक्तमन्त्रतं D^1 ; 74b घृतं हुत्वा शतात्मकम्] A^1, G, शतं हुत्वा शतार्धकम् C^2, हृदं हुत्वा शतात्मकम् A^2, हुतं हुत्वा शतार्धकम् C^1, घृतं हुत्वा शतार्धकम् D.

१०. 75c विष्णोर्नु कं] A^1, C, G, विष्णोमनुकं A^2, विष्णोन्नतं D^1, विष्णोन्नकं D^2.

११. 76a कुमारमन्त्रेण] A^1, C, कुमारेति मन्तेण D, lacune A^2, G ; 76b घृताक्तकाम्] Eds., घृतान्तकम् A^1, घृतात्मकम् A^2, घृतोक्तकम् C, D^1, घृतोत्तमम् D^2.

मधुवाता मधु हुत्वा यवानाप्याय मन्त्रतः[१] ॥ ७६ ॥
गौरीबीजं समुच्चार्य पूर्णाहुतिमथाचरेत्।
विष्णुसूक्तैर्ब्रह्मसूक्तैः शिवसूक्ताग्निसूक्तकैः[२] ॥ ७७ ॥
प्रत्येकं जुहुयाद्धीमान्दशसंख्याक्रमेण तु।
नृत्तगेयैश्च होमैश्च रात्रौ जागरमाचरेत्[३] ॥ ७८ ॥

[७. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः सार्धं क्षीरभुक्सुजितेन्द्रियः[४]।
स्नानं कुर्यात्प्रभाते तु सकलीकृतविग्रहः ॥ ७९ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्।

[७.१. मन्त्रन्यासः]

स्नानश्वभ्रे हृदा मन्त्री दारवं च सदा भवेत्[५] ॥ ८० ॥
मुहूर्ते नाडिकापूर्वे सर्वातोद्यं सुघोषयेत्।
स्नानवेदिं च परितो नृत्तगेयं प्रकल्पयेत्[६] ॥ ८१ ॥
उत्थाप्य शयनाद्देवान्ब्रह्मविष्णुमहेश्वरान्।
पूर्वाभिमुखमास्थाप्य गन्धपुष्पादिना यजेत्[७] ॥ ८२ ॥
हस्तेनादाय तन्मूर्तिं विष्णुं ब्रह्माणमेव च[८]।
आलयं तु परिभ्राम्य स्नानवेद्युपरि न्यसेत्[९] ॥ ८३ ॥
[१०]अष्टत्रिंशत्कलान्यासं ब्रह्माङ्गं च ततो न्यसेत्[११]।

---

१. 76c मधु] C^2, मधुं A, C^1, D ; 76d यवाना°] A^1 (var.), C, D, यवना° A^1, यवमा° A^2, हवाना° G.

२. 77d शिवसूक्ताग्नि°] A^1, G, शिवसूक्तैरग्नि° (*v.f.*) A^2, श्रीसूक्तैरग्नि° C, D.

३. 78d °माचरेत्] A^1, G, °मारभेत् A^2, C, D.

४. 79b क्षीरभुक्सु°] C, D^2, क्षीरं हुत्वा A, G, क्षीरभृत्सु° D^1.

५. 80c मन्त्री] A^2, C, D, G, मन्त्रं A^1 ; 80d दारवं] C, D, दानवं A.

६. 81c स्नानवेदिं] D, G, C, स्नानं देवीं A.

७. 82c °मास्थाप्य] A^2, °मास्थाय A^1 (etc.).

८. 83a °मूर्तिं] D, G, °मूर्तं A, C.

९. 83c आलयं तु] A, G, पयं तु न C^1, वयं तु न C^2, जयं तु (*v.f.*) D^1, अयं तु (*v.f.*) D^2.

१०. C, D lacune 84ab-84cd.

११. 84b न्यसेत्] Eds., नयेत् A^1 (etc.).

विष्ण्वङ्गं विष्णवे योज्य ब्रह्माङ्गं ब्रह्मणे न्यसेत्[१] ॥ ८४ ॥
गौरीकलां च न्यस्त्वा तु गौरीबीजाङ्गकं न्यसेत्[२]।
श्रीवह्निबीजं तद्देहे न्यस्त्वा पूज्य यथाक्रमम्[३] ॥ ८५ ॥
शिवकुम्भं समानीय प्रतिमन्ते तु विन्यसेत्।
ब्रह्मकुम्भं च विष्ण्वाख्यं तत्तद्देवाग्रतो न्यसेत्॥ ८६ ॥
उमाश्रीवह्निकुम्भं च तत्तद्देव्यग्रतो न्यसेत्[४]।

[७.२. बीजन्यासः]

ततो मुहूर्तमन्वीक्ष्य स्थापनं तु समारभेत्[५] ॥ ८७ ॥
शिवकुम्भाच्छिवं बीजं प्रतिमाया हृदि न्यसेत्[६]।
विष्णुमूर्तेर्हृदि न्यस्त्वा विष्णुबीजसमावृतम्[७] ॥ ८८ ॥
ब्रह्मणो ब्रह्मबीजं च हृदि न्यस्त्वा तु भावयेत्।
उमाकुम्भादुमाबीजं हृदि योनौ गले न्यसेत्[८] ॥ ८९ ॥
लक्ष्मीबीजं न्यसेदेवं शिखायामग्निबीजकम्[९]।
स्नपनं कारयेदन्ते प्रत्येकं पञ्चविंशतिः ॥ ९० ॥

[७.३. पूजा]

गन्धोदकेन संस्नाप्य पूजाकर्म समारभेत्[१०]।
पाद्यमाचमनं चार्घ्यं हृदयेनैव दापयेत्[११] ॥ ९१ ॥

---

१. 84c विष्ण्वङ्गं] A^2, G, विष्णङ्गं A^1 ; 78b ब्रह्मणे] Eds., ब्रह्मणं A^1 (etc.).

२. 85b गौरीबीजाङ्गकं न्यसेत्] C, D, बीजाङ्गं विन्यसेद्बुधः A, G.

३. 85d न्यस्त्वा पूज्य यथाक्रमम्] A^1, G, पूजयित्वा यथाविधि C^1, न्यस्त्वा पूज्य यथाविधि C^2, D.

४. 87a उमाश्रीवह्निकुम्भं च] A, G, उमाख्यं श्रीवह्निकुम्भां च (*v.f.*) C^1, D, उमाख्यं श्रीवह्निकुम्भां C^2.

५. 87d स्थापनं तु] A^2, स्थाप्यं तु न A^1, lacune C, D, G.

६. 88b प्रतिमाया] A^1, G, प्रतिमस्य A^2, C, D.

७. 88c °मूर्तेर्हृदि] Eds., °मूर्तिं हृदि A^1 (etc.) ; 88d °समावृतम्] A, °समाहितः C, D, G.

८. 89d हृदि योनौ गले] G, हृदि न्यस्त्वा गलन् A^1, हृदि न्यस्त्वा गले A^2, भयनौ भवे C^1, भयोनौर्भवे C^2, lacune D.

९. 90a न्यसेदेवं] A, G, न्यसेद्देवं C, D.

१०. 91a गन्धोदकेन संस्नाप्य] A^2, G, गन्धोदकेन संस्थाप्य A^1, +++केन संस्थाप्य C^1, D, कुम्भोदकेन संस्नाप्य C^2 ; 91b पूजाकर्म समारभेत्] A, प्++कर्म समाचरेत् C^1, पूर्वकर्म समाचरेत् C^2, D, G.

११. 91c °माचमनं चा°] A, G, °माचमनीया° C, D.

गन्धैराभरणैर्माल्यैर्धूपदीपैश्च पूजयेत्[१]।
नैवेद्यं पायसं दद्याद्घृतेन गुलसंयुतम्॥ ९२॥
हृदा चाचमनं दद्यान्निर्माल्यं तु विसर्जयेत्[२]।
ताम्बूलं दापयेत्पश्चाद्घनगन्धसमन्वितम्॥ ९३॥

[८. वैवाह्यकर्म]

कुर्याद्वैवाहिकं कर्म तद्दिने वापरे दिने[३]।
रात्रौ वाथ विशेषेण वैवाह्यं कर्म कारयेत्[४]॥ ९४॥
मण्डपे स्थण्डिलं कुर्यात्सर्वलक्षणसंयुतम्।
शुद्धवालुकया कार्यं रत्निमात्रप्रविस्तरम्॥ ९५॥
अग्नेः पश्चिमतो भागे आसनं परिकल्पयेत्।
[५]पीठोपरि न्यसेद्धीमान्सदशं वस्त्रमुत्तमम्॥ ९६॥
तन्मध्ये शिवमूर्तिं च स्थापयेत्प्राङ्मुखं ततः।
शिवस्य दक्षिणे भागे स्थापयेत्पार्वतीं बुधः ॥ ९७॥
युक्त्या विष्णुं <स्थापयेत्तु> ब्रह्माणं चोत्तरं मुखम्[६]।
तस्याग्रे विन्यसेदग्निमाचार्यश्चोत्तरे मुखः[७]॥ ९८॥
शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारपूर्वकम्[८]।
शिवाङ्गैश्चैव विद्याङ्गैः शिवमन्त्रेण होमयेत्॥ ९९॥
युवं वस्त्रेति मन्त्रेण वस्त्रयुग्मं प्रदापयेत्।
आच्छादनमधश्चैव उत्तरीयमथान्यकम्॥ १००॥
आपः पादेति पाद्यं स्याद्धृदा चाचमनं ददेत्।

---

१. 92a °धूपदीपैश्च] A, G, °धूपैः पुष्पैश्च C, lacune D.

२. 93a हृदा चा°] A^{1}, C, G, हृदादा A^{2}, D ; दद्यान्°] A, G, दत्वा C, D.

३. 94a °द्वैवाहिकं] A, G, °त्तु बाह्मकं C^{1}, D, °त्तु बाह्यकं C^{2}.

४. 94c वाथ विशेषेण] A, G, lacune C^{1}, वापीति वावाथ C^{2}, वाथ दिवा वाथ D.

५. A et G omettent 96d-98a.

६. 98a lacune générale.

७. 98c तस्याग्रे विन्यसेद°] A^{2}, G, तस्याग्ने विन्यसेद° A^{1}, त +++क्षिपेद° C^{1}, तस्याग्रतो क्षिपेद° C^{2}, तस्याग्रे निक्षिपेद° D ; 98d °चार्यश्चो°] A^{2}, C, °चार्यं चो° A^{1}, G, °चार्य चो° D ; चोत्तरे मुखः] Eds., चोत्तरः मुखः A^{1} (etc.).

८. 99a °पूर्वं] A (etc.), °पश्चात् C^{1} ; 99b °पूर्वकम्] A, G, °संयुतम् C, D.

गन्धद्वारेति गन्धं तु पुष्पं पुष्पावतीत्ययम्॥ १०१॥
अक्षता पृथिवी ज्ञेया शिरस्यर्घ्यं प्रदापयेत्।
वस्त्रयुग्मेति मन्त्रेण वस्त्रं गौर्या निवेदयेत्[१]॥ १०२॥
पाद्यादि दापयेत्पश्चात्पूर्वोक्तविधिना सह[२]।
घोषयेत्स्वस्तिसूक्तं तु सर्वातोद्यसमन्वितम्[३]॥ १०३॥
हृदा तु दापयेद्गौर्या दिव्यं मङ्गलसूत्रकम्[४]।
कौतुकं बन्धयेद्धीमान्देवीं देवं हृदा तथा[५]॥ १०४॥
अस्त्रमन्त्रं समुच्चार्य भस्म दद्याद्द्वयोरपि[६]।
क्षीरं दधि घृतं गौल्यं बीजमुख्येन योजयेत्॥ १०५॥
मधुपर्कं ददेद्धीमान्त्र्यम्बकेन शिवाय च[७]।
अस्त्रेणाचमनं दद्याज्जलदानं समाचरेत्॥ १०६॥
विष्णुसूक्तेन मन्त्रेण विष्णुमन्त्रैश्च पूजयेत्[८]।
शिवगायत्रिमन्त्रेण विष्णुना दापयेज्जलम्॥ १०७॥
ब्राह्मणो वेदसंपन्नो ह्याहिताग्निर्दृढव्रतः[९]।
विष्णुभावं भावयित्वा गुरुहस्ते जलं ददेत्॥ १०८॥
रुद्रसूक्तं ब्रह्मसूक्तं विष्णुसूक्तं हुनेत्क्रमात्[१०]।
गौरीपादं स्पृशेदश्मन्निधाय च शिवेन तु[११]॥ १०९॥
अघोरास्त्रेण मन्त्रेण विंशत्याहुतिमाचरेत्।

---

१. 102d गौर्या] A, C^1, G, गौर्यां C^2, D.

२. 103b °पूर्वोक्त°] A^2 (etc.), °पूर्वाक्त° A^1.

३. 103d सर्वातोद्यसमन्वितम्] A, G, ++हृदा तु दापयेत् C^1, सर्वं हृदा तु दापयेत् C^2, lacune D.

४. 104b दिव्यं] A^1, यद्दो A^2, या सा C^1, या सां C^2, यत्सा D, सद्यो G.

५. 104c कौतुकं] A (etc.), कालकं C^1 ; 104d तथा] A, C^2, D, G, तदा C^1.

६. 105b °द्वयो°] A^2, C^2, G, °द्वयो° A^1, C^1, lacune D.

७. 106a ददेद्धी°] A^2, C, D^2, G, दधेद्धी° A^1, दयेद्धी° D^1.

८. 107b विष्णुमन्त्रैश्च] A^1, G, विष्णुमन्त्रैव A^2, +रमन्त्रण C^1, द्वरमन्त्रेण C^2, lacune D.

९. 108a वेदसंपन्नो] A, G, वेदसंपन्न° C^1, D, देवसंपन्न° C^2 ; 108b ह्याहिता] G, वाहिता° A^1, आहिता° A^2, C, D.

१०. 109a रुद्र°] A, C^1, G, भद्र° C^2, D ; ब्रह्म°] A, G, विष्णु° C, D ; 109b विष्णु°] A, G, ब्रह्म° C, D.

११. 109c स्पृशेदश्मन्°] A, G, तदाश्मानम्° C, तदाश्मना D ; 109d °निधाय च शिवेन तु] A, G, °देवदेवेन स्थापयेत् C, D.

शिवमन्त्रं समुच्चार्य पूर्णाहुतिमथाचरेत्॥ ११०॥
यदस्येति ततो हुत्वा सर्वस्यान्ते विशेषतः[१]।
[२]परिषेचनं ततः कृत्वा प्रणीतां च विसर्जयेत्[३]॥ १११॥
[४]ब्रह्माणं च विसृज्याथ नैवेद्यं दापयेत्तदा।
सर्वेषां सोपदंशं च आचमनं हृदा ददेत्[५]॥ ११२॥
ताम्बूलं दापयेत्पश्चात्पञ्चगन्धसमन्वितम्।
चतुर्थेऽहनि यत्कर्म तत्सर्वं सहसाचरेत्[६]॥ ११३॥
अग्न्याधानादिकं कर्म पूर्वोक्तविधिना कुरु।
स्नापयेद्गन्धतोयेन देवं देवीं विशेषतः[७]॥ ११४॥
वस्त्रैराभरणैर्माल्यैर्भूषयेद्भूषणैः शुभैः[८]।
पूर्वोक्तेनैव मन्त्रेण दद्यात्पाद्यादिकं क्रमात्[९]॥ ११५॥
ब्रह्माङ्गैश्चैव विद्याङ्गैर्लोकपालादिमन्त्रकैः।
शयनस्थानं संप्राप्य प्रोक्षयेत्पुरुषेण तु॥ ११६॥
विष्णुर्योनीति मन्त्रेण शयनं परिकल्पयेत्[१०]।
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्॥ ११७॥
शयने विन्यसेद्देवं गौरीयुक्तं हृदा तदा।
स्नपनं कारयेद्धीमांस्तत्तन्नैवेदनैर्बुधः[११]॥ ११८॥
अर्चनोक्तं समभ्यर्च्य नैवेद्यान्तं विशेषतः।

---

१. 111a यदस्येति] A^2, C, D^1, G, यतस्येति A^1, यदग्नेति D^2.

२. Vers faux dans tous les manuscrits.

३. 111c कृत्वा] A, G, कुर्यात्° C, D ; 111d प्रणीतां च] A (etc.), प्रणीताज्ये C^2.

४. C et D : lacune 112ab-113cd et très lacunaires jusqu'à la fin du chapitre.

५. 112c सोपदंशं] A^2, G, सोपदेशं A^1.

६. 113d °सर्वं सहसाचरेत्] A^1, °सर्वाहं समाचरेत् A^2, °सर्वं हि समाचरेत् G.

७. 114d देवं देवीं] A, G, देवीं देवं C, D^2, देवीदेवं D^1.

८. 115b °भूषणैः शु°] A^2, G, °भूषयेच्छु° A^1, lacune C, D.

९. 115c °क्तेनैव मन्त्रेण] A, G, °क्तैरेव मन्त्रैश्च C, D ; 115d °पाद्या°] A, C^2, G, °पात्रा° C^1, D.

१०. 117a विष्णुर्योनीति] C, D, G, विष्णोर्योनिति A.

११. 118d °तत्तन्नैवेदनैर्बुधः] A^1, lacune A^2, G, °तत्परे तु दिने बुधः C, D.

[९. उत्सवः]

उत्सवं कारयेत्तत्र एकाहं त्रियहं तु वा[१] ॥ ११९ ॥
सप्ताहं वा प्रकुर्वीत ततस्तद्विधिना सह[२] ।
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ १२० ॥

[१०. वैवाह्यस्थापनफलम्]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।
इहैव धनवान्श्रीमान्गोमान्सत्पुत्रवान्भवेत्[३] ॥ १२१ ॥
अमुत्र स्वर्गमाप्नोति भोगान्भुङ्क्ते यथेप्सितान्[४] ।
पुण्यक्षयादिहागत्य पृथिव्यामेकराड् भवेत्[५] ॥ १२२ ॥
वैवाह्यस्थापनं प्रोक्तं सहितस्थापनं शृणु[६] ।

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिपटलः [पञ्चत्रिंशत्तमः][७] ॥

---

१. 119c °तत्र] A, G, °पश्चात् C , D.

२. 120b ततस्तद्विधिना] A, G, पूर्वोक्तविधिना C, D.

३. 121c धन°] A, G, lacune C^1, D, गुण° C^2 ; °श्रीमान्°] A^1, C^2, G, °धीमान्° A^2, lacune C^1, D.

४. 122a स्वर्ग°] C, D, वर्ग° A, G ; 122b यथेप्सितान्] C, D, यथेच्छया A, G.

५. 122c °दिहागत्य] A, C^2, G, °दिहागम्य C^1, °दिभावत्य D^1, °दिभागत्य D^2.

६. 123b सहित°] C, D, G, रसहि° A.

७. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिपटलः ।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिः सप्तविंशतिः पटलः ।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिसप्तविम्षतितमः पटलः ।
D^1: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिपटलः अष्टविंशतितमः ।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनपटलः अष्टविंशतिमः ।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वैवाह्यस्थापनविधिपटलः समाप्तः ।

[षट्त्रिंशत्तमः पटलः]
[सोमास्कन्दप्रतिष्ठाविधिः[१]]

अतः परं प्रवक्ष्यामि स्कन्दोमासहितस्य तु[२]।
स्थापनं भोगदं वक्ष्ये राजराष्ट्रविवर्धनम्[३] ॥ १ ॥

[१. अङ्कुरार्पणं रत्नन्यासश्च]

अङ्कुराण्यर्पयेत्पूर्वं पूर्वोक्तविधिना सह[४]।
[५]रत्नन्यासं तदन्ते तु नवबीजसमन्वितम् ॥ २ ॥
ब्रह्मस्थाने न्यसेद्वज्रमैन्द्रे चैवेन्द्रनीलकम्[६]।
माणिक्यं वह्निदेशे तु याम्ये मरकतं न्यसेत्[७] ॥ ३ ॥
पुष्यरागं तु नैर्ऋत्यां वारुण्यां मौक्तिकं न्यसेत्[८]।
स्फटिकं वायुदिग्भागे प्रवालं सौम्यदेशके[९] ॥ ४ ॥
ऐशान्यां तु महानीलं न्यसेद्दिग्बीजसंयुतम्[१०]।
एवमेव क्रमाद्देव्या गौरीगायत्रिमन्त्रतः[११] ॥ ५ ॥
अष्टदिक्षु च मध्ये तु न्यसेद्धैमं विशेषतः[१२]।
रत्नन्यासं न कर्तव्यं स्कन्दस्य तु विशेषतः ॥ ६ ॥
सुस्निग्धं कारयित्वा तु कुर्याच्चैवाक्षिमोक्षणम्[१३]।

---

१. Manuscrits utilisés : A^1, A^2, B^6, C^1, C^2, D^1, D^2, G.

२. 1a अतः परं प्रवक्ष्यामि] A (etc.), अथातः संप्रवक्ष्यामि B^6 ; 1b °सहितस्य तु] A, B^6, G, °सहितं ++ C^1, °सहितं शिवम् C^2, °सहिता + D.

३. 1c भोगदं] A (etc.), शुभदं B^6.

४. 2a °येत्पूर्वं] A^2, C, D, G, lacune A^1, °येद्धीमान् B^6.

५. C^1 et C^2 omettent 2cd.

६. 3b चैवेन्द्र°] A (etc.), वै चेन्द्र° B^6.

७. 3c माणिक्यं] A, G, मणिक्क° B^6, मणिक्कं C^2, D ; 3d याम्ये] A^2 (etc.), याम्यां A^1.

८. 4a पुष्यरागं] A^1, D^2, पुष्परागं A^2, B^6, C, D^1, G ; 4b वारुण्यां] A, B^6, वारुणे C, D, lacune G.

९. 4d सौम्यदेशके] A, B^6, G, सौम्यदेशतः C, D.

१०. 5b °दिग्बीजसंयुतम्] C, D, °बीजमसंयुतम् A^1, °बीजसुसंयुतम् A^2, °बीजसमायुतम् B^6, °दिग्बीज-संवृतम् G.

११. 5c क्रमा°] A (etc.), क्रमे° B^6 ; °देव्या] A (etc.), °देव्याः C^2.

१२. 6b °सेद्धैमं] Eds., °सेन्नैमिं A, °सेन्नैमीं B^6, lacune C, D, °सेन्नैमं G.

१३. 7b °च्चैवाक्षि°] A^1, C^1, G, °द्वै चाक्षि° A^2, C^2, D, °द्वै पार्थि° B^6.

[२. अक्षिमोक्षणम्]

मण्डपे वा प्रपायां वा स्थण्डिलं चतुरश्रकम्॥ ७॥
कारयेदष्टद्रोणेन तदर्धैस्तण्डुलैस्तिलैः[१]।
[२]तन्मध्ये स्थापयेद्देवं हृदा पूज्य यथाविधि॥ ८॥
अभितः कलशानष्टौ ससूत्रान्सापिधानकान्।
गन्धोदकेन संपूर्णान्लोकपालाधिदेवतान्॥ ९॥
स्थापयेत्तु यथान्यायं यजेदस्त्रादिना बुधः[३]।
हैमसूच्या लिखेत्पूर्वं पक्ष्मरेखां विशेषतः[४]॥ १०॥
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्[५]।
जाम्बूनदनखैः प्रोतैः नेत्रमन्त्रमुदीरयन्[६]॥ ११॥
मधुपूर्णताम्रपात्रं मधुवातेति दर्शयेत्[७]।
नेत्रेषु तर्पयेत्तेन नेत्रबीजमुदाहरन्[८]॥ १२॥
घृतं तु दर्शयेत्पश्चात्कांस्यपात्रे विशेषतः।
धेनुं च दर्शयेद्धीमान् गौर्धेनुरिति मन्त्रतः[९]॥ १३॥
ब्राह्मणान्दर्शयेत्पश्चाद्ब्रह्मजज्ञानमन्त्रतः[१०]।
एवमेव क्रमाद्देव्याः स्कन्दस्यापि विशेषतः[११]॥ १४॥
अस्त्रमन्त्रं समुच्चार्य शिल्पिनं च विसर्जयेत्।

---

१. 8b °तण्डुलैस्तिलैः] A (etc.), °तण्डुलैरपि C.

२. C^{1} : le chapitre 36 s'interrompt au bas d'une ôle et la suivante contient 34.37b et suivants.

३. 10b यजेदस्त्रादिना] A^{1}, यजेद्वस्त्रादिना A^{2}, C^{2}, D, G, पूजयेद्वस्त्रना (?) B^{6}.

४. 10c °सूच्या] A (etc.), °सव्यो B^{6} ; 10d पक्ष्म°] A^{2}, G, पद्म° A^{1}, पक्ष° B^{6}, C^{2}, D.

५. 11a °लिख्य] A, G, °लिख्यं B^{6}.

६. 11d नेत्रमन्त्र°] A^{1}, B^{6}, D, G, अस्त्रमन्त्र° A^{2}, नेत्र° (*v.f.*) C^{2}.

७. 12a मधुपूर्णताम्रपात्रं] C^{2}, D, G, मधूपूर्णे ताम्रपात्रे A^{1}, मधुपूर्णां ताम्रपात्रे A^{2}, B^{6}.

८. 12d °बीज°] A^{1}, G, °मन्त्र° A^{2}, lacune C^{2} et D.

९. 13c धेनुं च] A, G, धेनुश्च C^{2} ; 13d °गौर्धेनुरिति] C^{2}, °गोर्धेनन्वाति A, °भूर्धेनन्वादि B^{6}, °गौर्द्धेनित्यादि D, °गोधेन्वेति G.

१०. 14a ब्राह्मणान्°] A^{2} (etc.), ब्रह्मणा A^{1} ; 14b °मन्त्रतः] A (etc.), °मन्त्रितः B^{6}.

११. 14c क्रमाद्देव्याः] A (etc.), क्रमो देवोमा° B^{6}.

[३. शुद्धिः]

मण्डपस्योत्तरे पार्श्वे शुद्धस्नानं समाचरेत्[१] ॥ १५ ॥
शुद्धैरुक्थेति मन्त्रेण शुद्धिं कृत्वा शिवाम्भसा[२] ।
व्योमव्यापीति मन्त्रेण कुर्याद्गव्याभिषेचनम्[३] ॥ १६ ॥

[४. ग्रामप्रदक्षिणम्]

गन्धपुष्पादिना पूज्य वस्त्राभरणसंयुतम् ।
ग्रामप्रदक्षिणं कृत्वा सर्वालङ्कारसंयुतम् ॥ १७ ॥
पिञ्छचामरसंकीर्णं धूपदीपसमन्वितम् ।
सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम्[४] ॥ १८ ॥

[५. जलाधिवासनम्]

जलाधिवासनं कुर्याद्वाहुदघ्नजले बुधः[५] ।
जलमध्ये प्रपां कृत्वा वितानध्वजदर्भकैः[६] ॥ १९ ॥
वस्त्रेणाच्छादयेद्देवं गौरीं स्कन्दं पृथक्पृथक् ।
दर्भैराच्छादयेन्मन्त्री जलमध्ये तु शाययेत्[७] ॥ २० ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम्[८] ।

[६. मण्डपादिकल्पनम्]

[६.१. मण्डपलक्षणम्]

आलयस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ २१ ॥
दशद्वादशहस्तं वा एकादशमथापि वा ।

---

१. 15d °स्नानं] A, B^6, G, °दानं C^2, D.

२. 16a शुद्धैरुक्थेति] Eds., शुद्धेरुत्थेति A^1, द्विरुहकेति (?) A^2, शुद्धेरुद्धेति B^6, शुद्धेरूर्ध्वेति C^2, शुद्धेरुद्धेकथति (?) D^1, शुद्धे रुद्धे कयति (?) D^2, शुद्धेरुन्थेति G ; 16b शिवाम्भसा] A, B^6, G, गवाम्भसा C^2, D.

३. 16c °व्यापीति] B^6, C^2, D^2, °व्यापिनि A, °व्यपि तु D^1, °व्यापिना G.

४. 18d °समन्वितम्] A, B^6, C^2, D, °समायुतम् G.

५. 19b °दघ्न°] A, B^6, G, °दघ्ने C^2, °दने D.

६. 19c °मध्ये प्रपां कृत्वा] C^2, D^1, °प्रपायां कुर्यात्तु A, °प्रपायां कुर्यान्म (?) B^6, °मध्ये प्रपा (?) D^2, °तीरे प्रपां कुर्याद्° G ; 19d वितान°] A (etc.), चितान° B^6.

७. 20d तु शाययेत्] A, B^6, G, प्रवेशयेत् C^2, D.

८. 21b रात्रीं partout dans B^6.

[१]मण्डपं तु त्रिधा भज्य मध्यभागं तु वेदिका॥ २२॥
रत्निमात्रं समुत्सेधं मुष्टिमात्रमथापि वा।
दर्पणोदरसङ्काशं वितानध्वजभूषितम्॥ २३॥
दर्भमालासमायुक्तं द्वारतोरणसंयुतम्।
मुक्तादामैः समायुक्तं पुष्पमालाप्रलम्बितम्॥ २४॥

[६.२. कुण्डकल्पनम्]

कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्[२]।
[३]चतुरश्रं च पूर्वायां पञ्चाश्रं चैव दक्षिणे[४]॥ २५॥
वर्तुलं वारुणे भागे सौम्यायामनलाश्रकम्[५]।
आग्नेयादिषु कोणेषु कुर्यादश्वत्थपत्रवत्[६]॥ २६॥
ईशानशक्रयोर्मध्ये वृत्तकुण्डं प्रकल्पयेत्।
[७]हस्तमात्रप्रविस्तारं खातं हस्तप्रमाणकम्[८]॥ २७॥
[९]मेखलादिसमायुक्तं द्वित्रिभिश्चतुरङ्गुलैः।
नाभियोनिसमायुक्तं योनौ योनिं न कारयेत्॥ २८॥

[६.३. स्नानश्वभ्रकल्पनम्]

मण्डपस्योत्तरपार्श्वे स्नानश्वभ्रं प्रकल्पयेत्।
तत्पीठतारादध्यर्धं तारायामं तु तत्समम्[१०]॥ २९॥

---

१. A et B^6 omettent 22cd-23ab.

२. 25b °मानुषे तु पदे] B^6, °मण्डपे तु पदे A^1, °मानुषे तु पदैः A^2, C^2, D, G.

३. C^2 et D donnent cette version de 25cd : तुर्यश्रं चैव पूर्वायां वैश्रश्रं स्यात्तु दक्षिणे।

४. 25c चतुरश्रं च] A^2, G, चतुरश्रैव A^1, B^6.

५. 26a वर्तुलं] A, B^6, G, वर्तुले C^2 ; 26b °नलाश्रकम्] A, B^6, °नलाश्रितम् C^2, D^2, °बलात्मकः D^1, °नलाश्रयम् G.

६. 26d कुर्यादश्वत्थपत्रवत्] A (etc.), योन्याकारं प्रकल्पयेत् B^6.

७. A et B^6 placent 29cd après 27ab ; A^2 omet 27cd.

८. 27d °प्रमाणकम्] C^2, D, °प्रमाणतः A^1, B^6, G.

९. A et B^6 omettent 28ab-29ab.

१०. 29c तत्पीठतारादध्यर्धं] C^2, D, G, तत्तारादनदर्ध्यर्धं A^1, B^6, तत्पीठविस्तारादर्ध्यर्धं (*v.f.*) A^2 ; 29d तारायामं] C^2, D^2, विस्तारायाम° A, B^6, G स्नानायामं D^1 ; तु तत्समम्] C^2, D^2, °तत्समम् A, G °तः समम् B^6.

[१]उत्तरे नलमार्गं स्यात्पीठायामं समं युतः[२]।
नालाग्रे ह्यवटं कुर्याद्धस्तमात्रप्रमाणकम्[३] ॥ ३० ॥
मेखलाद्वयसंयुक्तमेकैकं चतुरङ्गुलम्।
प्रोक्षयेन्मण्डपं सम्यक्पुरुषेण तु मन्त्रतः[४] ॥ ३१ ॥
पुण्याहं वाचयेदन्ते वास्तुहोमं समाचरेत्।

[७. अधिवासः]

[७.१. शयने प्रतिमान्यासः]

जलादुत्तीर्य देवेशं पूर्ववच्छुद्धिमाचरेत्[५] ॥ ३२ ॥
कौतुकं बन्धयेत्तत्र देवं देवीं गुहं क्रमात्[६]।
स्यन्दने रोपयित्वा तु सर्वालङ्कारसम्युते[७] ॥ ३३ ॥
प्रासादं तु परिभ्राम्य नयेन्मण्डपमध्यतः।
[८]स्थण्डिलं कारयेद्विद्वानष्टद्रोणैश्च शालिभिः[९] ॥ ३४ ॥
[१०]गन्धादिना समभ्यर्च्य अण्डजादीनि कल्पयेत्[११]।
अण्डजं मुण्डजं चैव रोमजं चर्मजं तथा ॥ ३५ ॥
प्रतिलोमक्रमात्स्थाप्य पूजयित्वा हृदा बुधः[१२]।
शन्नो देवेति मन्त्रेण शाययित्वोर्ध्ववक्त्रतः[१३] ॥ ३६ ॥

---

१. A^1 et B^6 omettent 30ab-30cd.

२. 30a उत्तरे जल°] A^2, पक्षं च जल° (*v.f.*) C^2, D, उत्तरे च जल° G ; 30b युतः] C^2, D, G, पुनः A^2.

३. 30c नालाग्रे ह्यवटं] C^2, D, G, ना +गृह्यवटं A^2 ; 30d °प्रमाणकम्] A^2, °प्रमाणतः C^2, D, G.

४. 31c °मण्डपं] A, B^6, D^2, G, °मण्डलं C^2, D^1 ; 31d °पुरुषेण तु] A (etc.), °पुरुषेणैव तु (*v.f.*) B^6.

५. 32d पूर्ववच्छुद्धिमाचरेत्] A, C^2, G, पूर्ववच्छुद्धमाचरेत् B^6, भूछुद्धिमाचरेत् D.

६. 33b देवं देवीं] A^1, देवीं देवं A^2, C^2, D, G, देवीं देव° B^6.

७. 33c स्यन्दने] A, B^6, D^1, G, चन्दनं C^2, स्यन्दनं D^2.

८. A, C^2, B^6 et G : 38cd est placé avant 34cd et répété (ou omis B^6) à sa place normale.

९. 34d °द्रोणैश्च शालिभिः] A^2, °द्रोणैश्च शालिना A^1, B^6, °द्रोणेन शालिना C^2, D, G.

१०. C^2 et D intercalent après 34cd : तण्डुलैर्शोभितं कृत्वा तदर्धैश्च तिलैरपि (तदर्धैश्च C^2, तदर्धं चे D) ; C^2 omet 35ab-37ab.

११. 35b अण्डजादीनि] A (etc.), अजादीनि (*v.f.*) B^6.

१२. 36a °लोम°] D, °सोम° A, B^6, °होम° G.

१३. 36d °वक्त्रतः] A (etc.), °वक्त्रकम् B^6.

[१]प्राक्शिरस्कं न्यसेत्तस्मिन्वस्त्रैराच्छदयेद्बुदा[२]।

[७.२. कुम्भन्यासः]

गन्धादिना समभ्यर्च्य शिवकुम्भं न्यसेत्क्रमात्[३]॥ ३७॥
वर्धनीं वामदिग्भागे स्कन्दकुम्भं तु मध्यमे।
शिवकुम्भे न्यसेद्रत्नं वर्धन्यां हैममेव च॥ ३८॥
स्कन्दकुम्भे न्यसेद्रत्नं शक्तिं वा हेमसंभवाम्।
तत्तच्छिरःप्रदेशे तु तत्तत्कुम्भं तु विन्यसेत्॥ ३९॥
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्।

[७.३. शिवादिबीजन्यासः]

प्रासादबीजं विन्यस्य शिवकुम्भस्य मध्यमे॥ ४०॥
आदिमं स्याद्द्वितीयस्य अष्टमस्य द्वितीयकम्[४]।
षष्ठस्य चान्तिमं बीजं मायानलसमन्वितम्[५]॥ ४१॥
बिन्दुनादसमायुक्तं धर्मकामार्थमोक्षदम्[६]।
चलानां चैव सर्वेषां बीजमेतदुदाहृतम्[७]॥ ४२॥
खान्तं यान्तसमायुक्तमुमाबीजसमायुतम्[८]।
[९]बिन्दुनादसमायुक्तं वर्धन्यां मध्यमे न्यसेत्॥ ४३॥
षान्तमौकारसंयुक्तं मायानलसमायुतम्।
बिन्दुनादसमायुक्तं स्कन्दकुम्भे तु विन्यसेत्[१०]॥ ४४॥

---

१. A omettent 37b-38a ; B^6 omet 37b-38c.

२. 37a °त्तस्मिन्°] D, G, °द्रत्नम् A , B^6 ; 37b °वस्त्रै°] Eds, °अस्त्रै° D^1, G, °वषै° D^2.

३. 37c गन्धादिना] C^2, D^2, G, गन्धादिनां D^1.

४. 41a °द्वितीयस्य] A, G, °द्वितीयं स्याद् B^6, C^2, D ; 41b अष्टमस्य] A (etc.), अष्टमं स्याद् B^6.

५. 41c षष्ठस्य चान्तिमं] A, B^6, G, षष्ठस्येशादिमं C^2, षष्ठस्य शान्तिमं D.

६. 42a बिन्दु°] A (etc.), बीज B^6 ; 42b धर्म°] A, B^6, D, G, सर्व° C^2.

७. 42c चलानां] A, B^6, चलनं C^2 ; चैव] A (etc.), च (*v.f.*) B^6 ; 42d बीजमेतदु°] A, C^2, एतद्बीजमु° D, lacune G ; °दाहृतम्] A (etc.), °दाहृदा B^6.

८. 43a यान्त°] Eds, यान्तं A (etc.) ; 44b °मुमा°] C^2, D^1, °म्यान्तं A, °ममा° D^2 ; °समायुतम्] A (etc.), °समन्वितम् B^6.

९. D^1 omet 43cd-44ab.

१०. 44d स्कन्द°] C^2, D^2, स्कन्दं A, B^6, lacune G.

शिवं गौरीं कुमारं च तत्तत्कुम्भे तु भावयेत्[१]।
अभितः कलशानष्टौ द्रोणतोयप्रपूरितान्[२] ॥ ४५ ॥
सवस्त्रान्सापिधानांश्च सकूर्चान्सहिरण्यकान्।
अनन्तादिशिखण्ड्यन्तान्पूर्वादिक्रमतो न्यसेत्[३] ॥ ४६ ॥
तत्तत्कुम्भेषु तद्बीजं न्यस्त्वा पूज्य यथाविधि।
कुम्भानामन्तराले तु वर्धन्यष्टौ तु विन्यसेत् ॥ ४७ ॥
मुकुलीं पद्ममुद्रां तु अमृताख्यां प्रदर्शयेत्[४]।
अष्टमङ्गलरूपाणि वेद्यधः परिकल्पयेत् ॥ ४८ ॥
दिक्षु चाध्ययनं कुर्याद्विदिक्ष्वस्त्रं जपेद्बुधः[५]।
तोरणानि समभ्यर्च्य ततो होमं समारभेत्[६] ॥ ४९ ॥

[७.४. होमः]

पलाशोदुम्बराश्वत्थं प्लक्षं चेति दिशासु वै।
[७]शमीखादिरबिल्वं च मायूरं च विदिक्षु च ॥ ५० ॥
पालाशं तु प्रधानस्य समित्सम्यगुदीरितम्[८]।
समिदाज्यचरून् लाजान्सक्तुं च सर्षपांस्तिलान्[९] ॥ ५१ ॥
[१०]शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारसंयुतम्।
आज्यं हृदयमन्त्रेण चरुं वै शिरसा हुनेत् ॥ ५२ ॥

---

१. 45b तत्तत्कुम्भे तु] A, D, G, तत्रकुम्भे B^6, तत्कुम्भे चैव C^2.

२. 45c कलशान°] A (etc.), कुशान° (*v.f.*) B^6.

३. 46c अनन्तादि°] A (etc.), अनन्दादीन् B^6 ; 46d °क्रमतो] A, B^6, G, °कलशो C^2, D.

४. 48a मुकुलीं] D, मुकुली° A^1, B^6, G, मुकुलं A^2, C^2.

५. 49b °बुधः] A, B^6, G, °क्रमात् C^2, D.

६. 49d समारभेत्] A^1, D^2, G, समाचरेत् A^2, B^6, C^2, D^1.

७. C^2 et D donnent cette version de 50cd : शमी (D^1 : शम्यग) बिल्वं च मायूरा विदिक्षु परिकल्पयेत्।

८. 51a प्रधानस्य] A, B^6, प्रधानं स्यात्° C^2, D, G ; 51b समित्सम्यगुदी°] A, D, G, सर्मिक्सत्पः शुदी° B^6, सम्यक्सम्यगुदी° C^2.

९. 51c लाजान्°] A^2 (etc.), लाजा° A^1 ; 51d °सक्तुं] A^2, B^6, D, G, °सक्थुं A^1, C^2.

१०. C^2 et D intercalent deux vers entre 51cd et 52ab :
होमयेत्तु विशेषेण सहस्रं वार्धमेव वा। शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥
सद्यादिभिश्चतुर्दिक्षु विदिक्षु हृदयादिभिः। ईशाने तु प्रधाने तु समिद्धोमं समाचरेत् ॥

लाजं हुत्वाथ शिखया सक्तुं वै कवचेन तु[१]।
सर्षपं चास्त्रमन्त्रेण तिलं नेत्रेण होमयेत्॥ ५३॥
[२]घृतमिक्षेति मन्त्रेण अन्नं प्राणमिति ब्रुवन्[३]।
आ वो राजेति मन्त्रेण लाजहोमं समाचरेत्[४]॥ ५४॥
सक्तुं त्रियम्बकैर्मन्त्रैस्तिलं यत्तोयमेव च[५]।
त्वन्नो अग्नेति मन्त्रेण सर्षपं जुहुयाद्गुरुः[६]॥ ५५॥
एवं जागरणं रात्रौ प्रभाते स्नानमाचरेत्[७]।

[८. अधिवासानन्तरदिवसकृत्यम्]

[८]आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत्[९]॥ ५६॥
[१०]प्राणायामत्रयं कृत्वा करन्यासं तु कारयेत्।

[८.१. होमः]

द्रव्यैराज्यादिभिर्हुत्वा चरुहीनं यथा क्रमात्[११]॥ ५७॥
हृदादिनेत्रपर्यन्तं प्रत्येकं षोडशं हुनेत्[१२]।
तत्तद्देशे स्पृशेद्देवं गौरीस्कन्दं स्पृशेत्क्रमात्[१३]॥ ५८॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्[१४]।

---

१. 53a हुत्वाथ] A, C^2, D, हुत्वा वि° B^6, हुत्वा तु G ; 53b सक्तुं वै] A^2, G, सक्थुं वै A^1, सक्तुं (*v.f.*) B^6, चूर्णं वै C^2, D ; कवचेन] A^2, C^2, D, G, त्वचेन (*v.f.*) A^1.

२. C^2 et D^1 omettent 54ab-55cd.

३. 54a घृतमिक्षेति (*sic*, voir p. 30) ; 54b प्राणमिति] A^2, G, प्राण इति A^1, B^6.

४. 54d लाजहोमं समाचरेत्] A, B^6, D^2, जलं हुत्वा ++++ G.

५. 55a सक्तुं] A^2, B^6, G, सक्थुं A^1 ; त्रियम्बकैर्म°] A^1, G, त्रियम्बकं म° A^2, त्र्यम्बके म° B^6.

६. 55d सर्षपं जुहुया°] G, सर्ववज्जुहुया° A, B^6, सर्ववस्तु हुया° A^1 (var.).

७. 56a एवं] A (etc.), कुर्याज्° C^2 ; 56b स्नानमाचरेत्] A, B^6, C^2, D^1, G, स्थापनमारभेत् (*v.f.*) D^2.

८. C^2 donne 57ab avant 56cd et le répète à sa place normale.

९. 56d स्नानत्रयमथाचरेत्] A, B^6, G, स्नपनत्रयमरभेत् C^2, स्नपनत्रयं समचरेत् D.

१०. B^6 place une première fois 59cd-61ab entre 56cd et 57ab.

११. 57c °ज्यादिभिर्हुत्वा] A, G, °ज्याहुतिः कृत्वा C^2, D ; 57d यथा क्रमात्] A (etc.), अथा क्रमात् B^6.

१२. 58b षोडशं] A (etc.), षोडशा B^6.

१३. 58c °देशे] C^2, °देशं A (etc.) ; 58d °त्क्रमात्] C^2, D, °त्तदा A^1, B^6, °त्ततः A^2, G.

१४. 59a °दिरभ्याधानं] A, D^2, B^6, G, °ध्याधिकारं C^2, °धिरन्याधिकारं D^1 ; 59b हुनेत्क्रमात्] A^2, C^2, D, G, हुनेत्क्रमेत् A^1, तथा हुनेत् B^6.

स्नानासनादि संकल्प्य स्नानवेद्युपरि न्यसेत्[१] ॥ ५९ ॥
अनन्तं कल्पयेच्चाथ पद्मासनमथोच्यते[२]।
नवशक्तिं न्यसेद्दिक्षु मध्ये चैव मनोन्मनीम्[३] ॥ ६० ॥
गन्धादिना समभ्यर्च्य पद्ममुद्रां प्रदर्शयेत्[४]।

[८.२. दक्षिणा]

आचार्यं पूजयेत्पश्चाद्वस्त्रहेमाङ्गुलीयकैः[५] ॥ ६१ ॥
आचार्यदक्षिणां दद्यात्पूर्वोक्तविधिना सह।
मूर्तिपादीन्विशेषेण पूजयित्वा यथाविधि॥ ६२ ॥

[८.३. स्नानश्वभ्रे प्रतिमाविन्यासः]

सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम्।
ब्रह्मघोषसमायुक्तं स्वस्तिसूक्तसमन्वितम्॥ ६३ ॥
उत्थाप्य शयनाद्देवं स्नानश्वभ्रे तु विन्यसेत्[६]।

[८.३.१. कलान्यासादि]

अङ्गानि कल्पयेत्तस्मिन्नष्टत्रिंशत्कला न्यसेत्[७] ॥ ६४ ॥
[८]देव्यङ्गं कल्पयेद्देव्याः स्कन्दाङ्गेऽङ्गानि कल्पयेत्[९]।
घृतं शिरोर्पणं कुर्यादक्षताङ्कुरसर्पिषा[१०] ॥ ६५ ॥
तत्तद्धृदयमन्त्रेण मूर्तिबाह्वोश्च पादयोः[११]।

---

१. 59c स्नानासनादि] A, D, G, स्नासनादीनि B^6, स्नानादिना तु C^2 ; 59d स्नानवेद्युपरि] A (etc.), स्नापयेदुपरि B^6.

२. 60a °च्चाथ] A, B^6, G, °च्छाधः C^2 ; 60b पद्मा°] C^2, D, G, पत्रा° A, B^6.

३. 60c न्यसेद्दिक्षु] A (etc.), ततो दिक्षु C^2.

४. 61a गन्धादिना] A (etc.), गजादिना B^6.

५. 61c °पश्चाद्वस्त्र°] A, B^6, G, °तत्र वस्त्र° C^2, D.

६. 64b °श्वभ्रे तु] A, G, °श्वभ्रेति B^6, °श्वभ्रेषु C^2, D^2, °श्वभ्रे स्व (?) D^1.

७. 64d °कला] A (etc.), °कलां B^6.

८. A^2 omet 65b-67a.

९. 65a देव्यङ्गं कल्पयेद्देव्याः] A, B^6, G, देवं संकल्पयेद्देव्या C^2, देव्यं संकल्पयेद्देवं D^1, देवीं संकल्पयेद्देवं D^2.

१०. 65d °दक्षताङ्कुर°] D^2, °दक्षितां गुरु A^1, °द्दक्षितां गुरु B^6, °द्दक्षेवाङ्कुर° C^2, D^1, °द्दक्षिणं गुल° G.

११. 66b पादयोः] C^2, D, दापयेत् A^1,B^6, G.

[८.३.२. मन्त्रन्यासः]

ततो मुहूर्तं चान्वीक्ष्य ततः स्थापनमारभेत्[१] ॥ ६६ ॥
शिवकुम्भं समानीय पूज्य गन्धादिना बुधः[२] ।
[३]शिवकुम्भात्समादाय प्रासादं प्रतिमस्य च ॥ ६७ ॥
हृदि न्यस्त्वा क्रमात्पूज्य अर्चनोक्तं विचक्षणः ।
गौरीबीजं तु वर्धन्यामुमाया हृदि विन्यसेत् ॥ ६८ ॥
कण्ठे शिरसि योनौ तु विन्यसेत्पादयोरपि[४] ।
स्कन्दकुम्भात्समादाय स्कन्दबीजं हृदि न्यसेत् ॥ ६९ ॥
मूर्तिकुम्भात्समादाय मूर्तीश्च परितो न्यसेत्[५] ।

[८.४. स्नपनं पूजा च]

गन्धपुष्पादिना पूज्य दशमुद्रां प्रदर्शयेत्[६] ॥ ७० ॥
स्नपनं कारयेदन्ते यथाशक्ति विशेषतः ।
अर्चनोक्तं समभ्यर्च्य वस्त्राभरणमाल्यकैः ॥ ७१ ॥
[७]भस्म दद्याद्धृदा मन्त्री देवीसुतसमायुतम्[८] ।
दर्पणं दर्शयेत्पश्चान्नैवेद्यं पायसं पृथक्[९] ॥ ७२ ॥
दद्याद्वै सोपदंशं तु बहुभिर्गुलखण्डकैः[१०] ।
घृतदधिसमायुक्तं पानीयं पूर्ववद्ददेत्[११] ॥ ७३ ॥

---

१. 66c चान्वीक्ष्य] A (etc.), चान्वीक्षे B^6.

२. 67a शिवकुम्भं] A (etc.), नवकुम्भं D^2 ; 67b गन्धादिना] C^2, D, कुम्भादिना A, B^6, G.

३. B^6, C^2 et D^1 ajoutent entre 67ab et 67cd : शिवकुम्भान्समादाय मूर्ध्नश्च परितो बुधः (न्यसेत् B^6)। ; B^6 omet 67d-70a.

४. 69a कण्ठे] C^2, D, कर्णे A, G.

५. 70b मूर्तीश्च] A^1, G, मूर्तिश्च A^2, मूर्ध्नश्च C^2, मूर्ध्निश्च D.

६. 70d प्रदर्शयेत्] B^6, C^2, D, प्रदर्शयन् A, G.

७. A^2 omet 72ab-73ab.

८. 72b देवीसुत°] A^1 (etc.), देवियुत° B^6

९. 72d पायसं] A^1, D, G, पायस B^6, दापयेत् C^2.

१०. 73a °द्वै सोपदंशं A^1 (etc.), °द्वेद्योपदेशं B^6 ; 73b बहुभि°] A^1 (etc.), ब्रह्मभि° G ; °खण्डकैः A^1, B^6, G, °मण्डलैः C^2, D.

११. 73c घृत°] A (etc.), घृतं B^6 ; 73d पूर्व°] C^2, गन्ध° A, D, G, गज° B^6.

अपनीय च निर्माल्यं ताम्बूलं दापयेच्छुचिः[१]।

[९. उत्सवः]

उत्सवं कारयेदन्ते यावत्सप्तदिनान्तकम्॥ ७४॥
एकाहमपि कुर्वीत तीर्थस्नानसमन्वितम्[२]।
यागोपकरणद्रव्यमाचार्याय प्रदापयेत्[३]॥ ७५॥

[१०. सोमास्कन्दस्थापनफलम्]

यस्मिन्राष्ट्रे कृतं ह्येवं तद्राजा जयमाप्नुयात्।
पुत्रपौत्राश्च वर्धन्ते धनधान्यविवर्धनम्॥ ७६॥
सहितस्थापनं प्रोक्तं वृषारूढमतः परम्[४]॥ ७७॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सोमास्कन्दसहितप्रतिष्ठाविधिपटलः [षट्त्रिंशत्तमः][५]॥

---

१. 74a अपनीय] B^6, अपनीयं A (etc.) ; 74b °च्छुचिः] A^1, C^2, D, G, °च्छुभम् A^2, °च्छुचिम् B^6

२. 75a एकाहमपि] A (etc.), एकाहं वापि B^6.

३. 75c यागोपकरण°] A (etc.), यनोपकरण° D^2, योगोपकरं (*v.f.*) B^6.

४. 77a सहित°] A (etc.), स्कन्द° (*v.f.*) D^2.

५. A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दसहितप्रतिष्ठाविधिपटलः।
B^6 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दसहितप्रतिष्ठाविधिर्नाम एकोनत्रिंशत्पटलः।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे सोमास्कन्दसहितप्रतिष्ठाविधिरष्टाविंशतितमः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दसहितप्रतिष्ठाविधिपटल एकोनविंशतिः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दसहितप्रतिष्ठाविधिपटल एकोनविंशतितमः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे उमास्कन्दसहितप्रतिष्ठाविधिपटलः समाप्तः।

[सप्तत्रिंशत्तमः पटलः]
[वृषारूढस्थापनम्[१]]

अतः परं प्रवक्ष्यामि वृषवाहनमूर्तिनः[२]।
स्थापनं शृणु हविर्भुक् भोगमोक्षफलप्रदम्[३] ॥ १॥

[१. वृषारूढस्थापनकालः]

उत्तरायणकाले तु प्रतिष्ठां सम्यगाचरेत्।
पूषाश्वयुक्तथा तिष्ये रोहिण्यां सौम्यमैत्रयोः[४] ॥ २॥
स्वातौ त्रिरुत्तरादित्यमघासु स्थापनं कुरु[५]।
बृहस्पतिर्भार्गवः सौम्यः सोमवारस्तु शोभनाः[६] ॥ ३॥
एषां हि दर्शनं श्रेष्ठं विना सोमस्य दर्शनम्।
षण्डानि गुलिका क्रूरनक्षत्राणि विषं त्यजेत्[७] ॥ ४॥
शुक्रस्यास्तमनं नेष्टं गुरोरस्तमनं तथा।

[२. अङ्कुरार्पणं रत्नन्यासश्च]

प्रतिष्ठादिदिनात्पूर्वं पञ्चाहे सप्तमेऽपि वा[८] ॥ ५॥
अङ्कुराण्यर्पयेद्रात्रौ शास्त्रदृष्टेन कर्मणा[९]।
रत्नन्यासं ततः कुर्यान्मण्डपे समलङ्कृते[१०] ॥ ६॥

---

१. Manuscrits utilisés : A^1, A^2, B^4 (très lacunaire), B^7, C^2, D^1, D^2, G.

२. 1a अतः परं] A (etc.), अथतः सं° G ; 1b °मूर्तिनः] A (etc.) °मूर्तिना D.

३. 1c हविर्भुक्] A, B^7, हविर्भुत्कृष्टं (*v.f.*) B^4, D^1, चोत्कृष्टं C^2, हविर्भुक् तुष्टं (*v.f.*) D^2, वह्ने त्वम् G.

४. 2c पूषा°] A, $B^{4,7}$, D^2, G, पूष्या° C^2, पूर्वा° D^1 ; तिष्ये] $B^{4,7}$, C^2, D, तिष्यो A, G ; 2d °मैत्रयोः] B^4, C^2, D, °मैत्रके A, G, °मैतृके B^7.

५. 3a स्वातौ] A, B^4, D, G, स्वाति B^7, C^2 ; °दित्य°] C^2, D, °दित्यौ A, B^7, G, lacune B^4 ; 3b °मघासु] D, G, °मखासु A, C^2, lacune B^4, °मासासु B^7.

६. 3c °भार्गवः] A, D, °भार्गव° C^2, °भानवः B^7, °भृगुः (*v.f.*) G ; सौम्यः] A^1, D, G, सौम्य A^2, B^7, C^2 ; 3d °वारश्च] Eds, °वारस्तु A (etc.) ; शोभनाः] A, B^7, C^2, शोभनम् D, G.

७. 4c षण्डानि] A (etc.), D, G, lacune B^4, पापिनां B^7 ; गुलिका क्रूर°] A, B^7, G, क्रूरनक्षत्रं C^2, D^2, कुरु नक्षत्रं D^1 ; 4d नक्षत्राणि विषं त्यजेत्] A, B^7, G, गुलिकाविष्टयस्त्यजेत् C^2, D^2, गुलिकाविष्टयस्यजेत् D^1.

८. 5c °दिदिनात्पूर्वं] Eds, °दिदिनात्पूर्वे A, °दिपूर्वे तु B^4, C^2, D, °दिनपूर्वे तु B^7, °दिवसात्पूर्वे G ; 5d पञ्चाहे सप्तमेऽपि वा] A, B^7, lacune B^4, G, सप्ताहे पञ्चमेऽथवा C^2, D.

९. 6a °राण्यर्पयेद्रात्रौ] A^1 (var), B^7, C^2, D, °रार्पणयद्रात्रौ A^1, °रार्पणं यद्रात्रौ A^2, °रानर्पयेद्रात्रौ G.

१०. 6c °न्यासं] A (etc.), °न्यायं B^7.

स्थण्डिलं कारयित्वा तु तन्मध्ये प्रतिमां न्यसेत्[१]।
पूजयित्वा यथान्यायं ततो रत्नानि निक्षिपेत्[२]॥ ७॥
पद्मे वा भद्रपीठे वा न्यसेदैन्द्रादिके दिशि[३]।
इन्द्रनीलं न्यसेदैन्द्रे वैडूर्यं वह्निगोचरे[४]॥ ८॥
याम्ये मरकतं प्रोक्तं स्फटिकं नैर्ऋते न्यसेत्[५]।
[६]वारुण्यां मौक्तिकं प्रोक्तं प्रवालमनिले न्यसेत्[७]॥ ९॥
पुष्पराग तु सौम्यायामैशान्यां चन्द्रकान्तकम्[८]।
माणिक्यं मध्यमे चैव न्यसेद्दिगीशमन्त्रकैः[९]॥ १०॥
[१०]ब्रह्मजज्ञानमन्त्रेण ब्रह्मस्थाने तु विन्यसेत्।
[११]एवमेव न्यसेद्देव्या वृषभस्य विना बुधः[१२]॥ ११॥

[३. नेत्रोन्मीलनम्]

अक्षिमोक्षं प्रकर्तव्यं नेत्रयुग्मयुते दिने[१३]।
मण्डपेऽलङ्कृते कुर्यात्स्थण्डिलं शालितण्डुलैः[१४]॥ १२॥
तिलदर्भैः परिस्तीर्य पूज्य दिग्देवताः पुनः[१५]।

---

१. 7a प्रतिमां] A, C^{2}, D^{2}, G, lacune B^{4}, प्रतिमा B^{7}, D^{1}.

२. 7d रत्नानि] A, D^{1},B^{7}, G, lacune B^{4}, रक्षादि C^{2}, रत्नादि D^{2}.

३. 8b °दैन्द्रादिके] A (etc.), °दिन्द्रादिके B^{7}.

४. 8d वैडूर्यं] A (etc.), वैढूर्यं D^{1} ; °गोचरे] A (etc.), °गोचरं A^{2}, °गोचरेत् D^{2}.

५. 9a मरकतं] A, C^{2}, D^{1}, मरतकं B^{4}, D^{2}, G, रजतकं B^{7} ; 9b स्फटिकं] A, B^{7}, D^{2}, G, स्फटिके C^{2}, स्फटिक D^{1}.

६. C^{2} omet 9cd.

७. 9c वारुण्यां] A, B^{7}, G, वारुणे B^{4}, D.

८. 10a पुष्परागं] B^{7}, D^{1}, पुष्यरागं A, C^{2}, D^{2}, G, lacune B^{4} ; 10b °कान्तकम्] A^{1} (etc.), °कालकम् A^{2}.

९. 10c माणिक्यं] A^{1}, C^{2}, G, माणिक्कं A^{2}, B^{7}, B^{4}, D ; मध्यमे] A (etc.), मध्यमं B^{7} ; 10d °द्दिगीश°] A, lacune B^{4}, °द्दृग्वेद° B^{7}, °द्दिग्देव° C^{2}, D^{2}, °दित्देव D^{1}, °द्दिग्वेद° G.

१०. B^{4} omet 11ab.

११. A^{2} omet 11cd-13ab.

१२. 11c °देव्या] A^{1}, °देवं देव्या C^{2}, °देत्य D, °देव्याः B^{7} ; 11d °भस्य] A (etc.), °स्यापि C^{2}.

१३. 12a अक्षि°] A^{1}, C^{2}, D^{2}, अक्ष° B^{7}, D^{1} ; 12b °युग्मयुते दिने] A, B^{7}, lacune B^{4}, °युग्मे शुभे दिने C^{2}, °युग्मे दिने शुभे D, °युग्मदिने युते G.

१४. 12c मण्डपेऽलङ्कृते] C^{2}, D, मण्डपेऽलङ्कृतं A^{1}, G, मण्डपालङ्कृतिं B^{7}.

१५. 13b दिग्देवताः] C^{2}, G, दिग्देवतान्° A^{1}, B^{4}, D, दिग्देवता B^{7}.

तन्मध्ये स्थापयेद्देवमुमावृषसमन्वितम्॥ १३॥
अभितः कलशानष्टौ विन्यसेद्वसुदेवताः[१]।
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्[२]॥ १४॥
गन्धादिना समभ्यर्च्य वस्त्रादिमन्त्रमुच्चरन्[३]।
पक्ष्मरेखां लिखेत्पूर्वं हेमसूच्याभिमन्त्रितः[४]॥ १५॥
अक्षिमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्[५]।
जाम्बूनदनखैः प्रोतैः कुर्यान्नेत्रमुदाहरन्[६]॥ १६॥
मधुना तर्प्य नेत्राणि मधुवातेति मन्त्रतः[७]।
ताम्रपात्रे मधु वीक्ष्य मधुवातेति मन्त्रतः[८]॥ १७॥
कांस्यपात्रे घृतं दृष्ट्वा हृदयमन्त्रमुच्चरन्[९]।
गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत्[१०]॥ १८॥
दर्शयेद्धान्यराशिं च तत्तद्द्रोणेन सञ्चितम्[११]।
ब्राह्मणान्दर्शयेत्पश्चाद्ब्रह्मजज्ञानमन्त्रतः॥ १९॥
प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत्[१२]।
पुण्याहं वाचयेदन्ते स्वस्तिसूक्तसमन्वितम्॥ २०॥

---

१. 14b °देवताः] G, °देवतान् A^1, B^4, C^2, D, °दैवतान् A^2, B^7.

२. 14d सवस्त्रान्°] A (etc.), सवस्त्रा B^7 ; °वारिपूरितान्] A, B^7, G, उदकपूरितान् (*v.f.*) B^4, C^2, D.

३. 15b वस्त्रादि°] C^2, G, वस्त्रादिं A, B^7, D, lacune B^4.

४. 15c पक्ष्म°] A, B^7, G, पद्म° A^1(var.), lacune B^4, पक्ष° C^2, D ; रेखां] A^1, C^2, D, रेखा A^2, B^7, G, lacune B^4 ; पूर्वं] Eds., पूर्वे A (etc.) ; 15d °भिमन्त्रितः] Eds. (cf. 42.13), °भिमन्त्रिता A, G, °दिभिः क्रिया B^7, °दिमन्त्रतः B^4, C^2, lacune D.

५. 16a अक्षि°] A^1 (var), अस्ति° A^1, असित° A^2, B^4, अस्थि° B^7, C^2, G, तन्° (*v.f.*) D.

६. 16c °नखैः] A (etc.), °नख° B^7 ; प्रोतैः] A, B^7, G, प्रोतं C^2, D ; 16d °दाहरन्] A (etc.), °दीरयन् B^7.

७. 17a तर्प्य नेत्राणि] A (etc.), lacune D^1, तर्पयेन्नेत्रे B^7 ; 17b मधुवातेति] A, B^7, G, मधुना हेति B^4, मधुना भेति C^2, lacune D.

८. 17c मधु] G, मधुं A, B^7, C^2, D ; वीक्ष्य] A, B^4, C^2, D, क्षिप्त्वा B^7, प्रोक्ष्य G.

९. 18a कांस्य°] A (etc.), कंस° D^2 ; 18b हृदयमन्त्रमुच्चरन्] C^2, हृदमन्त्रं समुच्चरन् A, B^7, lacune B^4, हृदयमन्त्रं समुच्चरन् (*v.f.*) D^1, दयमन्त्री समुच्चरन् D^2, हृण्मन्त्रं च समुच्चरन् G.

१०. 18c गौर्धेनुभव्य°] C^2, D^1, गोधेनुगव्य° A^1, गोर्धेनुभव्य° A^2, D^2, गौडेऽनु हव्य° B^7, गोधेनुहव्य° G ; 18d गां] A^2 (etc.), गं A^1 ; प्रदर्शयेत्] A (etc), प्रदर्शयन् B^7.

११. 19a दर्शये°] A, B^7, G, प्रदर्शये° B^4, D ; °द्धान्यराशिं च] A, G, °दन्यराशिं च B^7, °द्यान्यरशिं च D.

१२. 20b जनसङ्घान्°] A, B^7, G, जनान्सर्वान्° B^4, C^2, D.

शिल्पिनं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः।
अस्त्रमन्त्रं समुच्चार्य शिल्पिनं हि विसर्जयेत्[१] ॥ २१॥

[४. शुद्धिः]

स्नानासनं समारोप्य देवं देवीं वृषं क्रमात्[२]।
स्नापयेत्पञ्चगव्येन पवमानं समुच्चरन्॥ २२॥
[३]मृदम्भसा तु संस्नाप्य हृदयमन्त्रमुच्चरन्[४]।
शुद्धोदकेन संस्नाप्य शुद्धैरुक्थेति मन्त्रतः[५] ॥ २३॥
कौतुकं बन्धयेद्धीमान्देवं देवीं वृषं तथा[६]।
वृषस्य दक्षिणे शृङ्गे कुर्यात्कौतुकबन्धनम्॥ २४॥
वस्त्रैराभरणैर्माल्यैर्भूषयेत्तु विशेषतः।

[५. ग्रामप्रदक्षिणं जलाधिवासश्च]

[७]ग्रामप्रदक्षिणं कुर्याच्छङ्खभेरीरवैः सह[८] ॥ २५॥
सर्वातोद्यसमायुक्तं वितानध्वजसंकुलम्[९]।
धूपदीपसमायुक्तं शनैः कुर्यात्प्रदक्षिणम्[१०] ॥ २६॥
[११]जलमध्ये प्रपां कृत्वा वितानध्वजसंयुतम्।
चतुष्पादीं न्यसेन्मध्ये कण्ठदघ्ने जले तथा[१२] ॥ २७॥

---

१. 21d हि] B^4, C^2, D, च A, B^7, G.

२. 22b देवं देवीं] A^1 (etc.), देवदेवीं A^2, lacune B^4.

३. C^2 omet 23ab.

४. 23a मृद°] A, G, मृता° D^1, मदा° D^2 ; °स्नाप्य] A^2, D, G, °स्थाप्य A^1, B^7 ; 23b हृदयमन्त्रमु°] G, हृदमन्त्रं समु° A^1, B^7, हृदयमन्त्रं समु° (*v.f.*) A^2, D.

५. 23c शुद्धो°] A, B^7, G, गन्धो° C^2, D ; °स्नाप्य] A, C^2, D^2, G, °स्थाप्य D^1, B^7 ; 23d शुद्धैरुक्थेति] Eds., शुद्धेरुन्थेति A^1, शुद्धैरुत्थेति A^2, G, शुद्धेरुत्थेति B^4, C^2, शुद्धेरुकेधति D^1, शुद्धोरुद्धेति B^7, शुद्धेरुद्धेति D^2.

६. 24b देवं देवीं A] (etc.), देवदेवीं B^7.

७. A^1 et A^2 placent 25d-27a après 38c.

८. 25c कुर्याच्°] A, कृत्वा B^4 (etc.).

९. 26a सर्वा°] A (etc.), lacune B^4, सव्य° B^7 ; 26b संकुलम्] A (etc.), संयुतम् C^2.

१०. 26d कुर्यात्° B^4, C^2, D, °ग्राम° A, B^7, G.

११. A^2 omet 27ab.

१२. 27c चतुष्पादीं न्यसेन्°] G, चतुष्पादी न्यसेन्° A^1, D, lacune A^2, B^4, चतुष्पादिनस्नम्मध्ये C^2 ; 27d कण्ठदघ्ने] A^1, G, कथमग्ने A^2, कण्ठलघ्ने B^7, कण्ठमग्न° C^2, कण्ठमग्ने D.

प्रतिमाशुद्धिं कुर्वीत पूज्य गन्धादिना बुधः[१]।
[२]जाम्बूनदमयं कूर्चं देवस्य शिरसि न्यसेत्[३] ॥ २८ ॥
वस्त्रेण वेष्टयेद्देवं देवीं च वृषभं विना[४]।
प्राक्शिरस्कं हृदा धीमाञ्छाययेज्जलमध्यमे[५] ॥ २९ ॥
त्रिरात्रं वा द्विरात्रं वा एकरात्रमथापि वा।

[६. मण्डपादिकल्पनम्]

[६.१. मण्डपलक्षणम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ ३० ॥
[६]द्वादशं दशहस्तं वा एकादशकरं तु वा।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ ३१ ॥
वितानध्वजसंछन्नं मुक्तादामैर्विभूषितम्[७]।
फलपल्लवसंयुक्तं दर्भमालासमावृतम्[८] ॥ ३२ ॥
मण्डपं तु त्रिधा भज्य मध्यभागे तु वेदिकाम्[९]।
रत्निमात्रसमुत्सेधां दर्पणोदरसंनिभाम्[१०] ॥ ३३ ॥

[६.२. कुण्डकल्पनम्]

कुण्डानि परितः कुर्यान्मानुषे तु पदे बुधः[११]।
पूर्वे तु चतुरश्रं स्याद्याम्यायां धनुराकृति[१२] ॥ ३४ ॥

---

१. 28a प्रतिमा°] A^1 (etc.), प्रतिमां A^2.

२. A^2 omet 28cd-30ab.

३. 28c °नदमयं] A^1 (etc.), °नामदयं B^7.

४. 29a °द्देवं] A^1, D^2, lacune B^4, °द्देव° B^7, C^2.

५. 29c प्राक्शिरस्कं हृदा धीमान्°] A^1 (etc.), प्राक्शिरश्चोर्ध्ववक्त्रस्याः B^7.

६. A, B^7 et G omettent 31b-33a.

७. 32a °संछन्नं] D, lacune B^4 , °सच्छन्नं C^2.

८. 32c फलपल्लव°] B^4, C^2, फलतल्लव° D^2, lacune D^1.

९. 33b मध्यभागे तु वेदिकाम्] B^4, D, हस्तभागैकवेदिका A^1, हस्तभागे तु वेदिका A^2, हस्तमात्रेण वेदिकाम् B^7, मध्यभागे तु वेदिकाम् C^2, हस्तमानेन वेदिका G.

१०. 33c रत्निमात्रस°] A (etc.), अरत्निमात्र° B^7 ; °समुत्सेधाम्] G, °समुत्सेधं A (etc.).

११. 34a कुर्यान्°] B^7, कल्प्य A (etc.) ; 34b तु] A (etc.), ऽथ B^7.

१२. 34c पूर्वे] A, $B^{4,7}$, G, सर्वे C^2, D.

वर्तुलं वारुणे भागे पद्मकुण्डं तथोत्तरे[१]।
अग्नौ निर्ऋतिवायव्ये ऐशान्यां तु भगाकृति[२]॥ ३५॥
चतुरश्रस्य पूर्वे तु चतुरश्रं प्रधानकम्[३]।
हस्तमात्रप्रविस्तारं तद्वत्खातं त्रिमेखलम् ॥ ३६॥
चतुस्त्रिद्व्यङ्गुलोत्सेधं विस्तारं तावदेव तु[४]।
नाभियोनिसमायुक्तं योनौ योनिं न कारयेत्[५]॥ ३७॥

[६.३. स्नानश्वभ्रकल्पनम्]

द्विगुणं पीठतारं तु स्नानश्वभ्रस्य विस्तरम्[६]।
दक्षिणोत्तरमायामं विस्तारद्विगुणं भवेत्[७]॥ ३८॥
उत्तरे जलमार्गं स्यादवटेन समन्वितम्[८]।
[९]मेखलात्रयसंयुक्तमेकैकं तु द्व्याङ्गुलम्[१०]॥ ३९॥

[७. अधिवासः]

[७.१. शयनकल्पनादि]

गोमयालेपनं कृत्वा मण्डपं तु समन्ततः[११]।
पर्यग्निकरणं कृत्वा प्रोक्षयेत्पुरुषेण तु[१२]॥ ४०॥

---

१. 35b तथोत्तरे] C^2, D, lacune B^4 , तदुत्तरे A, B^7, G.

२. 35c निर्ऋति°] A (etc.), नैर्ऋति° C^2 ; °वायव्ये] A (etc.), °वायव्योर् D.

३. 36b चतुरश्रं प्रधानकम्] A^2, B^4, C^2, D, G, चतुरश्रं प्रधानतः A^1, चतुरश्रकं प्रधानकम् B^7.

४. 37b विस्तारं तावदेव तु] A (etc.), विस्तारभावदेव तु D^1.

५. 37c °समायुक्तं] A (etc.), °समं युक्तं B^7 ; 37d योनौ] A (etc.), योनो B^7 ; योनिं न] A^1, B^7, योनिर्न A^2.

६. 38a पीठतारं तु] A, D, lacune B^4, +विस्तारं तु B^7, पीठतरान्तं C^2, पीठमानं तु G ; 38b °श्वभ्रस्य विस्तरम्] A^2 (etc.), °श्वभ्रं सविस्तरम् A^1, lacune B^4.

७. 38c विस्तारद्वि°] A^1, विस्ताराद्वि° D, विस्तारं द्वि° B^4, B^7, C^2, G.

८. 39a °मार्गं] A (etc.), °मार्गः G, lacune B^4 ; 39b समन्वितम्] A (etc.), समन्वितः G.

९. A^2 omet 39cd-40ab ; B^4 omet 39cd.

१०. 39d द्व्या°] A (etc.), त्रया° C^2.

११. 40a °यालेपनं] A (etc.), °यैर्लेपनं C^2 ; 40b मण्डपं तु समन्ततः] C^2, D, G, मण्डपे तु समन्ततः A^1, मण्डपं तु समन्वितः B^7.

१२. 40c पर्यग्निकरणं] A, G, परियग्निं ततः B^4, D, पर्यग्निं च ततः C^2 ; 40d प्रोक्षयेत्°] A, D, G, lacune B^4, मोक्षयेत्° C^2.

स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः[१]।
तदर्धैस्तण्डुलैर्भूष्य तिललाजसमन्वितम्[२]॥ ४१॥
पञ्चविंशत्पदं कृत्वा मध्ये नवपदं बुधः[३]।
शयनं कल्पयेत्तत्र चर्मजाद्यैरनुक्रमात्[४]॥ ४२॥
चर्मजं रोमजं चैव मुण्डजं चाण्डजं तथा[५]।
उपरिस्तरणेनैव नवशक्तिसमन्वितम्॥ ४३॥
आस्तरेच्छुद्धवस्त्रैस्तु पूज्य गन्धादिना बुधः[६]।
रक्तवस्त्रेण संवेष्ट्य देवं देवीं वृषं क्रमात्[७]॥ ४४॥

[७.२. कुम्भन्यासः]

पीठं पादप्रदेशे तु न्यस्त्वा पूज्य यथाविधि[८]।
ततः शिरःप्रदेशे तु शिवकुम्भं च वर्धनीम्॥ ४५॥
वृषकुम्भं च संस्थाप्य तत्तद्धृदयमन्त्रतः।
शिवकुम्भं न्यसेत्पूर्वं सवस्त्रं सापिधानकम्[९]॥ ४६॥
सकूर्चं रत्नसंयुक्तं द्रोणतोयप्रपूरितम्[१०]।
तस्मिन्नावाहयेद्देवमेकवक्त्रं चतुर्भुजम्॥ ४७॥
जटामकुटसंयुक्तं कृष्णापरशुधारिणम्[११]।

---

१. 41a °वेद्याम°] A^{2}, B^{7}, G, °योमम° A^{1}, °विद्वान° C^{2}, °वेद्याद° D ; 41b °द्रोणैश्च] A^{2}, B^{4}, G, °द्रोणेन A^{1}, B^{7}, C^{2}, D.

२. 41c तदर्धैस्तण्डुलैर्भूष्य] A (etc.), तदर्थं तण्डुलोपेतं B^{7} ; 41d तिललाज°] A, G, लाजातिल° B^{4}, राजत्तिल° C^{2}, जातिल° D^{1}, जातिलय° D^{2}.

३. 42a पञ्चविंशत्पदं] A^{1}, B^{4}, C^{2}, G, पञ्चविंशतिपदं A^{2}, D, एकाशीतिपदं B^{7} ; 42b मध्ये नवपदं] A^{2}, C^{2}, D, G, मध्येन च नवं A^{1}, lacune B^{4}, नव मध्ये नवं B^{7}.

४. 42c °जाद्यै°] A^{2} (etc.), °जात्यै° A^{1}, lacune B^{4}

५. 43a चर्मजं] A^{1} (etc.), चर्मजा B^{7} ; 43b मुण्डजं चाण्डजं] B^{4} C^{2}, D, G, मण्डजं चाण्डजं A^{1}, अण्डजं मुण्डजं A^{2}, मण्डद्याण्डजं (*v.f.*) B^{7}.

६. 44a आस्तरेच्छु°] A^{2}, B^{7}, C^{2}, D^{2}, G, आस्तरे शु° A^{1}, lacune B^{4}, कुस्तरेच्छु° D^{1}.

७. 44d देवं देवीं] A (etc.), देवदेवीं B^{7}.

८. 45a पीठं] A, C^{2}, G, पीठ° B^{7}, lacune D.

९. 46c °पूर्वं] A, G, °पूर्वे B^{4}, C^{2}, D.

१०. 47a सकूर्चं] A^{2}, B^{7}, C^{2}, D, G, सकूर्च° A^{1}, lacune B^{4} ; 47b °तोय°] A (etc.), °तोयं D.

११. 48b कृष्णा°] A^{1}, C^{2}, D^{2}, G, lacune A^{2}, B^{4}, D^{1}, कृष्णं B^{7}.

तरुणादित्यसंकाशं नेत्रत्रयविभूषितम्[१] ॥ ४८ ॥
दिव्याम्बरधरं देवं दिव्यगन्धानुलेपनम्।
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम्॥ ४९ ॥
शिवकुम्भस्य मध्ये तु ध्यायेत्तं परमेश्वरम्[२]।
शिवमन्त्रं न्यसेत्कुम्भे पञ्चाङ्गेन समन्वितम्[३] ॥ ५० ॥
वर्धन्यां तु न्यसेद्देवीं दुकूलवसनान्विताम्[४]।
[५]चारुपीनोन्नतकुचां चारुभ्रूचारुलोचनाम्[६] ॥ ५१ ॥
सकूर्चां सापिधानां च सवस्त्रां हेमसंयुताम्[७]।
[८]गौरीबीजसमायुक्तां वर्धन्यां विन्यसेत्क्रमात्[९] ॥ ५२ ॥

[७.३. वृषकुम्भादिन्यासः]

दक्षिणे वृषकुम्भं तु विन्यसेत्तु विचक्षणः।
सकूर्चं सापिधानं च वस्त्रहेमसमायुतम्[१०] ॥ ५३ ॥
सप्तवर्गाद्यचतुर्थं तु तद्वर्गात्तद्द्वितीयकम्[११]।
चतुर्थस्वरसंयुक्तं बिन्दुनादसमायुतम्[१२] ॥ ५४ ॥
वृषमन्त्रमिति ज्ञेयं वृषकुम्भे तु विन्यसेत्।
मूर्तिकुम्भान्तु वर्धन्या संयुतांश्च क्रमात्ततः[१३] ॥ ५५ ॥

---

१. 48c तरुणा°] A, C^2, D^2, lacune B^4, D^1, G, अरुणा° B^7.

२. 50b ध्यायेत्तं] C^2, lacune B^4, ध्याययेत्° A, D^2, ध्यायेत्° D^1, दायेत्तु G ; परमेश्वरं] A (etc.), परमेश्वरः B^7.

३. 50c °कुम्भे] A, B^4, C^2, °कुम्भं B^7.

४. 51b °विताम्] A (etc.), °वितम् D^2.

५. B^7 remplace 51d par सर्वाभरणभूषितम् et omet 52ab.

६. 51c °नतकुचां] A, C^2, G, lacune B^4, °नतां कूर्चं B^7, °नतत्र चान्न D^1, °नतां तृचां D^2 ; 51d चारुभ्रू] C^2, चारूरुं A, चारुभ्रूं B^4, चरुद्रुं D^2, चारुं चारुवि° G.

७. 52a °धानां] A (etc.), °धानं D^1.

८. A^2 omet 52cd-53cd.

९. 52d वर्धन्यां वि°] A , lacune B^4, वर्धनीं च D, वर्धनीं वि° G.

१०. 53d वस्त्रहेमसमायुतम्] A^1, lacune B^4, सवस्त्रं हेमसंयुतम् C^2, D, वस्त्रहेमसमन्वितम् B^7, G.

११. 54b तद्वर्गात्तद्°] A (etc.), तद्वर्गात्ति C^2.

१२. 54d °समायुतम्] A, G, °समन्वितम् B^4, B^7, C^2, D.

१३. 55c °कुम्भान्तु] A^1, °कुम्भास्तु A^2 (etc.) ; 55d संयुतांश्च] Eds, संयुताश्च A, lacune B^4, संयुक्ताश्च

सकूर्चान्सापिधानांश्च सवस्त्रान्सहिरण्यकान्।
द्रोणार्धतोयसंपूर्णानष्टविद्येश्वरात्मिकान्[१] ॥ ५६॥
वामादिशक्तिसंयुक्तान्वर्धन्यां च क्रमान्न्यसेत्।
इन्द्रादीशानपर्यन्तं रुद्रान्कुम्भेषु कल्पयेत्[२] ॥ ५७॥
सर्वस्मिन्नन्तराले तु वर्धन्यष्टौ तु विन्यसेत्[३]।
गन्धपुष्पादिना पूज्य तत्तन्मन्त्रमनुस्मरन्[४] ॥ ५८॥
मुकुलीं पद्ममुद्रां च सुरभिं च प्रदर्शयेत्[५]।
दिशास्वध्ययनं कुर्युश्चत्वारो वेदपारगाः[६] ॥ ५९॥

[७.४. होमः]

एवं कृत्वा विशेषेण ततो होमं समाचरेत्[७]।
शिवाग्निं जनयेत्पूर्वं दिशाहोमं ततः कुरु[८] ॥ ६०॥
शिवाग्नौ तु शिवः प्रोक्तो विद्येश्वरसमन्वितः[९]।
भवश्च पूर्वतो मूर्तिर्दक्षिणे शर्व एव च[१०] ॥ ६१॥
पश्चिमे पशुपतिश्चैव सौम्यायामुग्र एव च।
गौरी दुर्गा तथा लक्ष्मीर्भूमिरग्न्यादिकोणके[११] ॥ ६२॥
शोधनं क्षालनं चैव शोषणं पाचनं तथा।

B^7, G.

१. 56c °संपूर्णान्] A (etc.), °संपूर्णत् D^1 ; 56d °त्मिकान्] A^2, B^7, °त्मिकम् A^1, °त्मकाम् C^2, D, G.

२. 57d रुद्रान्°] B^7, रुद्र° A (etc.).

३. 58b °न्यष्टौ] G, °न्याष्टौ A (etc.).

४. 58d °मन्त्रमनुस्मरन्] A (etc.), °मन्त्रं समुच्चरन् B^7.

५. 59a मुकुलीं] G, मुकुली° A, C^2, D^2, lacune B^4, D^1, मुकुलं B^7.

६. 59c दिशास्व°] A (etc.), दिशाध्वस्य° D^1 ; 59d °पारगाः] A^2, B^4, C^2, D^2, G, °पारगान् A^1, B^7, °पारगम् D^1.

७. 60b समाचरेत्] (A etc.), समारभेत् C^2, D.

८. 60d ततः] A (etc.), तथा A^2, B^7.

९. 61a शिवाग्नौ] A, C^2, G, lacune B^4, शिवाग्ने B^7, D ; शिवः प्रोक्तो] A^2, G, शिवं प्रोक्तं A^1 (etc.) ; 61b °वितः] A^2, G, °वितम् A^1 (etc.).

१०. 61c भवश्च] A^2 (etc.), गावश्च A^1 ; मूर्तिर्°] A (etc.), मूर्ध्नि D ; 61d °दक्षिणे] C^2, D, G, °अक्षिणे A, B^4, B^7.

११. 62d °ग्न्यादि°] B^7, D, G, °न्यादि° A, B^4, C^2.

समिदाज्यचरुं चैव लाजापूपाश्च सर्षपाः[१] ॥ ६३ ॥
तिलमाषयवान्क्षीरं होमकर्मणि योजयेत्।
पूर्वभागे पलाशं स्याद्वह्निभागे शमी भवेत्[२] ॥ ६४ ॥
औदुम्बरं तु याम्यायां खादिरं नैर्ऋते दिशि।
अश्वत्थं वारुणे भागे प्लक्षं वै वायुगोचरे[३] ॥ ६५ ॥
न्यग्रोधं सौम्यदिग्भागे बिल्वमीशानगोचरे।
[४]...

[८. वृषारूढस्थापनफलम्]

[५]यस्मिन्राष्ट्रे कृतं ह्येवं राजा विजयमाप्नुयात्[६] ॥ ६६ ॥
[७]एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
वृषारूढमिति प्रोक्तं पुरारिस्थापनं शृणु॥ ६७ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनपटलः [सप्तत्रिंशत्तमः][८] ॥

---

१. 63d लाजापूपाश्च] B^7, लाजापूजाश्च A, lacune B^4, लाजं चूर्णं च C^2, लाजचूर्ण° (*v.f.*) D^1, लाजाचूर्ण° (*v.f.*) D^2, लाजपुष्पा ++ G.

२. 64d °वह्निभागे] A, G, lacune B^4, °वह्निदेशे C^2, D.

३. 65d वायुगोचरे] A^2 (etc.), युगगोचरे A^1.

४. Lacune générale (fin du séjour, rites du lendemain). A^2, B^4, C^2, D et G ont entre 66ab-66cd (... पि कारयेत्।), sans doute la fin du texte manquant.

५. B^7 omet 66cd-67cd et le colophon.

६. 66c यस्मिन्°] A, G, अस्मिन्° C^2, D ; 66d राजा वि°] A (etc.), तद्राज G.

७. C^2 omet 67ab.

८. A^2, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनपटलः।
B^4 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनपटलत्रिंश ...।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनविधिरेकोनत्रिंशः पटलः।
D^1 : दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनपटलत्रिंशतितमः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे वृषारूढस्थापनपटलः त्रिंशतितमः।

[अष्टत्रिंशत्तमः पटलः]
[पुरारिस्थापनविधिः[१]]

[२]अथातः संप्रवक्ष्यामि पुरारिस्थापनं परम्[३]।
परचक्रप्रशमनं सर्वारिष्टविनाशनम्[४] ॥ १ ॥
शत्रवो नाशमायान्ति परसेनामुखे न्यसेत्[५]।

[१. अङ्कुरार्पणादि]

प्रतिष्ठादिदिनात्पूर्वं कारयेन्मङ्गलाङ्कुरम्[६] ॥ २ ॥
पद्मे वा भद्रपीठे वा रत्नन्यासमथाचरेत्[७]।
माणिक्यमिन्द्रनीलं च वैडूर्यं नीलमेव च[८] ॥ ३ ॥
शङ्खस्फटिकेन्दुकान्तं वैडूर्यं च तथैव च[९]।
पुष्परागं विशेषेण मध्यादिक्रमशो न्यसेत्[१०] ॥ ४ ॥
हृदयं मन्त्रमुच्चार्य रत्नादीन्क्रमशो न्यसेत्[११]।
गौर्याश्चैव न्यसेद्रत्नं हैमेन सह देशिकः[१२] ॥ ५ ॥

---

१. Manuscrits utilisés : A^1, A^2, B^4 (très lacunaire), C^1, C^2, D^1, D^2, G.

२. C^1 : lacune 1a-5b.

३. 1a अथातः संप्र°] A^1, अतः परं प्र° A^2, C^2, D, G, lacune B^4 ; 1b पुरारि°] A^1, C^2, D^1, G, पुरारे A^2, D^2, lacune B^4.

४. 1c °प्रशमनं] A, G, °प्रथमनं B^4, D, °प्रमथनं C^2 ; 1d °विनाशनम्] A, G, °निहारिणम् B^4, °निवारणम् C^2, D.

५. 2b परसेनामुखे] C^2, परसेनामुखं A^1, परे सेनामुखं A^2, lacune B^4, D, परसेनामुखो G.

६. 2c °दिदिनात्पूर्वं] A, lacune B^4, °दिने पूर्वे तु C^2, °दिनपूर्वे तु D, °दिवसात्पूर्वे G ; 2d कारयेन्°] A, G, ++दौ B^4, कुर्याद्वै C^2, D.

७. 3b अथाचरेत्] A, G, समाचरेत् B^4, C^2, D.

८. 3c माणिक्य°] A^1, C^2, G, माणिक्क° A^2, D, lacune B^4 ; 3d °नीलमेव] A^2, C^2, D^2, G, °नियमेन A^1, lacune B^4, D^1.

९. 4a शङ्खस्फटिकेन्दु°] G, शङ्खस्फटिकये° A^1, शङ्खस्फटिके (*v.f.*) A^2, ++स्फटिकेन्दु° B^4, शङ्खं स्फटिकेन्द्र° C^2, lacune D ; 4b च तथैव च] B^4, C^2, वज्रमेव च A, G, तथैव च (*v.f.*) D.

१०. 4c पुष्परागं विशेषेण] A^1, पुष्परागं विशेषेण A^2, B^4, C^2, D^1, G, पुष्यागं वै शोषेण (*v.f.*) D^1 ; 4d मध्यादिक्रमशो] A^1, मध्यादिक्रमतो A^2, G, lacune B^4, मध्यमादिक्रमान्° C^2, D.

११. 5a हृदयं मन्त्रमु°] A^2, C^2, G, हृदयमन्त्रं समु° (*v.f.*) A^1, D, lacune B^4 ; 5b रत्नादीन्क्रमशो] A^1, G, lacune A^2, B^4, रत्नानि च बुधे C^2, D.

१२. 5d हैमेन सह] A, C, G, हेमेन सह B^4, +मेहसन D^1, +मेन सह D^2.

[२. अक्षिमोक्षणम्]

सुस्निग्धं कारयेत्पश्चादक्षिमोक्षणमारभेत्।
मण्डिते मण्डपे कुर्यात्स्थण्डिलं मण्डलान्वितम्[१] ॥ ६॥
स्थण्डिलं शोभितं कृत्वा तिलदर्भैः परिस्तरेत्[२]।
[३]देव्याश्च स्थण्डिलं तद्वद्वामभागे प्रकल्पयेत्[४] ॥ ७॥
पूर्वाभिमुखमास्थाप्य देवं देवीं विशेषतः[५]।
गन्धादिना समभ्यर्च्य सर्वातोद्यसमन्वितम्॥ ८॥
दिशासु कुम्भं संस्थाप्य वस्त्रकूर्चसमन्वितम्[६]।
शिल्पिनं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ९॥
गन्धादिना समभ्यर्च्य प्रच्छन्नपटसंयुतम्[७]।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत्[८] ॥ १०॥
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्[९]।
हिरण्यनखयुक्ताभिरङ्गुलीभिर्विशेषतः ॥ ११॥
नेत्रद्वययुते ऋक्षे नेत्रमन्त्रमनुस्मरन्।
मधुवाता ऋतायेति मधुना तर्पयेत्तदा[१०] ॥ १२॥
घृतमिक्षेति मन्त्रेण घृतेन परिकल्पयेत्[११]।

---

१. 6c मण्डपे] A, G, lacune B^4, मण्डपं C, D ; 6d स्थण्डिलं मण्डलान्वितम्] Eds. (cf. 42.10ab), स्थण्डिले मण्डपोपरि A, कुर्यात्स्थण्दिलोपरि B^4, स्थण्डिले मण्डलोपरि C, D, G.

२. 7a स्थण्डिलं] A^1, स्थण्डिलैः A^2, B^4, C, D, स्थण्डिले G.

३. B^4 : omet 7cd.

४. 7c स्थण्डिलं तद्वद्वाम°] A, C, G, स्थण्डिद्वद्वाम° D^1, स्थण्डिलद्वद्वाम° D^2.

५. 8a °भिमुख°] A, D, G, lacune B^4, °दिश° (*v.f.*) C^1, °दिमुख° C^2 ; 8b देवं] A (etc.), देव° D^1.

६. 9a दिशासु कुम्भं संस्थाप्य] C, D, दिशादिकुम्भं संस्थाप्य A, दिशासु क्रि ++++ B^4, कुम्भं संस्थापयेत्तत्र G ; 9b वस्त्रकूर्च°] D, G, वस्त्रं कूर्च° A^1, lacune A^2, B^4, C^1, वस्त्रकूर्चैः C^2.

७. 10a गन्धादिना समभ्यर्च्य] A, B^4, C, D, गन्धपुष्पादिना पूज्य G.

८. 10c °सूचिप्रहाराभ्यां] A, C^2, D^2, °सूचिप्रहारा + B^4, °सूचीप्रहाराभ्यां C^1, G, °सूचिप्रभारात्मां D^1 ; 10d समालिखेत्] A, G, lacune B^4, लिखेत्क्रमात् C, D.

९. 11a °मण्डलमालिख्य] A, C, D^2, G, lacune B^4, °मण्डलं समालिख्य (*v.f.*) D^1.

१०. 12d तर्पयेत्°] A^1 (etc.), तत्पर्ययेत्° (*v.f.*) D^1 ; °तदा] A^1, G, °ततः A^2 (etc.).

११. 13a घृतमिक्षेति] (*sic*, voir p. 30) A^1, घृतं मिमिक्षेति (*v.f.*) A^2 (etc.), घृतमीक्षे तु C^2, घृतमिमीक्षेति (*v.f.*) D^1.

गौर्धेनुभव्यमन्त्रेण धेनुं पश्येत्सवत्सकाम्[१] ॥ १३ ॥
ब्रह्मसूक्तं समुच्चार्य ब्राह्मणान्संप्रदर्शयेत्।
एवमेव क्रमाद्देव्याः कारयेद्देशिकोत्तमः[२] ॥ १४ ॥
प्रच्छन्नपटमावर्ज्य जनान्सर्वान्प्रदर्शयेत्[३]।

[३. प्रतिमाशुद्ध्यादि]

प्रतिमाशुद्धिं कुर्वीत पञ्चमृत्पञ्चगव्यकैः[४] ॥ १५ ॥
स्नापयेत्पञ्चगव्येन पवमानमुदीरयन्।
[५]त्वं नो अग्नेति मन्त्रेण स्वच्छतोयेन सेचयेत्[६] ॥ १६ ॥
वस्त्राभरणमालाभिर्देवं देवीं च भूषयेत्[७]।

[४. ग्रामप्रदक्षिणम्]

रथे वा शिबिकायां वा देवं देवीं च रोपयेत्[८] ॥ १७ ॥
ग्रामप्रदक्षिणं कृत्वा सर्वालङ्कारसंयुतम्।
नानापिञ्छध्वजैश्छत्रैः धूपदीपसमाकुलैः[९] ॥ १८ ॥
एवं प्रदक्षिणं कृत्वा जले चैवाधिवासयेत्।

[५. जलाधिवासः]

[१०]तीरे समतले स्थाप्य स्नानं कुर्याद्विधानतः[११] ॥ १९ ॥

---

१. 13c गौर्धेनुभव्य°] C, गोधेनुभव्य° A, गौर्धेनु ++ B^4, गौर्धेनुहव्य° D, गोर्धेनुहव्य° G ; 13d धेनुं पश्येत्सवत्सकाम्] A^1, G, धेनुं पश्येत्सवत्सगाम् A^2, lacune B^4, धेनुं पश्येत्सहोत्सहाम् C^1, धेनुं पश्येत्सहोद्वहाम् C^2, धेकं पश्चेत्सवोत्सगाम् D^1, धेनुं पश्येत्सवोत्सगाम् D^2.

२. 14c क्रमाद्देव्याः] A, G, क्रमेद्देवीं B^4, क्रमाद्देवी C^1, D, क्रमाद्देवीं C^2.

३. 15a प्रच्छन्न°] A^2, C, D^2, G, प्रच्छिन्न° A^1, lacune B^4, प्रचन्न° D^1.

४. 15d पञ्चमृत्प°] A (etc.), पञ्चमृतप° C^2 (*v.f.*).

५. B^4 omet 16cd.

६. 16c त्वं नो अग्नेति] A, G, ततो अग्नेति C^1, ततोऽग्नेति C^2, तन्नो अग्नेति D ; 16d स्वच्छ°] A^2 (etc.), स्वज° A^1, स्वश्च° D^1.

७. 17b °देवं] A (etc.), °देव° D ; च भूषयेत्] A, B^4, D, च पूजयेत् C, विभूषयेत् G.

८. 17c रथे वा] A (etc.), अथवा G ; 17d देवं देवीं] A (etc.), देवदेवीं B^4.

९. 18c नानापिञ्छध्व°] A^1, G, नानापिञ्छयु° A^2, +++न्छैर्ध्व° B^4, नानापिञ्छैर्ध्व° C, D.

१०. B^4 omet 19cd.

११. 19c समतले स्थाप्य] A, C, G, समतलं कृत्वा D ; 19d स्नानं कुर्याद्विधानतः] A, G, स्नानं कुर्याद्यथाविधि C^1, स्थानं कुर्याद्यथाविधि C^2, D^1, स्थानं कुर्याद्यथाविधिः D^2.

सदशाहतवस्त्राभ्यां देवं देवीं च वेष्टयेत्[१]।
जलमध्ये प्रपां कृत्वा वितानध्वजशोभिताम्[२] ॥ २० ॥
[३]चतुष्पादीं न्यसेन्मध्ये कण्ठदघ्नजले ततः[४]।
प्राक्शिरस्कं हृदा मन्त्री शाययेज्जलमध्यमे[५] ॥ २१ ॥
त्रिरात्रं वा द्विरात्रं वा एकरात्रमथापि वा।

[६. प्रतिष्ठामण्डपम्]

आलयस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ २२ ॥
द्वादशं दशहस्तं वा नवहस्तमथापि वा।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ २३ ॥
वितानध्वजसंयुक्तं दर्भमालोपशोभितम्[६]।
तन्मध्ये वेदिकां कुर्यात् त्रिभागैकप्रमाणतः ॥ २४ ॥
रत्निमात्रसमुत्सेधां तालमात्रमथपि वा[७]।
[८]कुण्डानि परितः कल्प्य दिक्षु चैव विदिक्षु च[९] ॥ २५ ॥
चतुरश्रं धनुर्वृत्तं पद्माकारं च दिक्षु च[१०]।
विदिक्षु योन्याकाराणि कारयेत्तु विचक्षणः[११] ॥ २६ ॥
कुण्डं हस्तप्रविस्तारं तद्वत्खातं त्रिमेखलम्[१२]।

---

१. 20a सदशाहतवस्त्राभ्यां] C, D^2, सदाहतववस्त्राद्या A^1, सदाहतवस्त्राभ्यां A^2, सदाशाहतवस्त्राभ्यां B^4, सदशाहतवस्त्राभ्या D^1, सदा अहतवस्त्राभ्यां G.

२. 20d °शोभिताम्] G, °शोभितम् A, C, D, lacune B^4.

३. B^4 omet 21-23 ; C et D omettent 21-23ab ; A omet 22cd-23ab.

४. 21a चतुष्पादीं] A^2, G, चतुष्पादं A^1 ; 21b °दघ्नजले] A^1, G, °मग्नजले A^2.

५. 21c मन्त्री शा°] A^2, यामाच्छा° A^1, धीमाञ्शा° G.

६. 24a °संयुक्तं] A (etc.), °संयुक्तां B^4 ; 24b °मालोपशोभितम्] A (etc.), °मालोभशोभितम् B^4.

७. 25a °मात्र°] A, G, lacune B^4, °मात्रं C, D.

८. A^2 répète 23cd-25ab entre 25ab et 25cd.

९. 25c कल्प्य] A (etc.), कुर्याद्° B^4 ; 25d चैव विदिक्षु च] B^4, C, D, वै च विदिक्षु वै A^1, चैव विदिक्षु वै A^2, G.

१०. 26a धनुर्°] A (etc.), धनु° B^4 ; 26b पद्माकारं च दिक्षु च] C, D, पद्मं चैव विदिक्षु च A, G, lacune B^4.

११. 26c योन्याकाराणि] A, C, G, lacune B^4, चोन्न्यकाराण D^1, चोन्यकाराण D^2.

१२. 27a कुण्डं] A (etc.), कुण्ड° C^2 ; °प्रविस्तारं] A, B^4, C^2, G, °प्रमाणं C^1, °प्रविस्तार° D ; 27b तद्वत्खातं त्रिमेखलम्] B^4, C, खातं द्वित्रि च मेखलम् A^1, खातं द्वित्रिमेखलम् A^2, °द्वत्खातं त्रिमेखलम् (*v.f.*) D^1, °त्वत्खातं त्रिमेखलम् (*v.f.*) D^2, खातं तन्मानमेव च G.

चतुस्त्रिद्व्यङ्गुलोत्सेधं विस्तारं तावदेव तु[१] ॥ २७ ॥
नाभियोनिसमायुक्तं निम्नोन्नतविवर्जितम्[२] ।
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु[३] ॥ २८ ॥
गोमयालेपनं कृत्वा पञ्चचूर्णैस्तु भूषयेत्[४] ।

[७. अधिवासः]

जलादुत्तीर्य देवेशं देवीं शुद्धिं च कारयेत्[५] ॥ २९ ॥
कौतुकं बन्धयेत्तत्र त्र्यम्बकेनैव मन्त्रतः[६] ।

[७.१. शयनकल्पनादि]

स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः[७] ॥ ३० ॥
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि[८] ।
चर्मजाद्यैश्च विधिवच्छयनं परिकल्पयेत् ॥ ३१ ॥
नवशक्तीः कल्पयेत्तन्मध्ये चैव मनोन्मनीम्[९] ।
पूजयित्वा यथान्यायं पुरारिं तत्र शाययेत्[१०] ॥ ३२ ॥
[११]प्राक्शिरस्कं न्यसेद्धीमानुदङ्मुखं तथा सतीम्[१२] ।

---

१. 27c चतुस्त्रिद्व्य°] A, C^1, G, lacune B^4, चतुस्त्र्य° (*v.f.*) C^2, चतुस्त्र्यद्व्य° D.

२. 28b °विवर्जितम्] A (etc.), °वर्जितम् (*v.f.*) D.

३. 28c ईशानशक्रयो°] A^1, B^4, C, G, ईशान्य +क्रयो° A^2, ईशानचकयो° D^1, ईशानचक्रयो° D^2 ; 28d वृत्तं] A, G, कुण्डं B^4, C, D^2, lacune D^1.

४. 29a गोमयालेपनं] A (etc.), lacune B^4, गोमयैर्लेपनं C^2 ; 29b तु भूषयेत्] A^1, विभूषयेत् A^2, G, च पूजयेत् C, च भूषयेत् D.

५. 29c देवेशं] A (etc.), देवेश° D^1.

६. 30a °तत्र] A, G, °ताभ्यां B^4, C, D.

७. 30c °द्वेद्या°] A (etc.), lacune B^4, °द्विद्या° C^2 ; 30d °द्रोणैश्च शालिभिः] G, °द्रोणेन शालिना A, C^1, D, lacune B^4, °द्रोणेन शालिभिः C^2.

८. 31b तिलैरपि] A^2 (etc.), तिलोपरि A^1.

९. 32a °शक्तीः कल्पयेत्तन्°] C^2, °शक्तिं कल्पयेत्तत्र (*v.f.*) A, D^1, G, lacune B^4, °शक्तिं क्षिपेत्तत्र C^1, °शक्तिं कल्पयेत्तन्° D^2 ; 32b °मध्ये चैव] C, D, °तत्र मध्ये A^1, lacune A^2, B^4, °मध्यमे तु G.

१०. 32d पुरारिं] A (etc.), lacune C^1, पुरारन् D^2.

११. B^4 omet 33b-34a.

१२. 33b °दङ्मुखां तथा सतीम्] G, °दङ्मुखं स्यात्तदा सदिम् (*v.f.*) A^1, °दङ्मुखं स्यात्तथा सतीम् (*v.f.*) A^2, °दङ्मुखः स्यास्तथा सति (*v.f.*) C^1, °दगास्यं तसा सति C^2, ++स्यात्तथा सतिः D.

अर्चयित्वा हृदा मन्त्री रक्तवस्त्रेण वेष्टयेत्[१] ॥ ३३ ॥
ऐशान्यां तु न्यसेद्धीमान् शिवकुम्भं च वर्धनीम्[२] ।
रत्नहेमसमायुक्तौ सकूर्चौ सपिधानकौ[३] ॥ ३४ ॥
सवस्त्रवारिसंपूर्णौ शिवोमाबीजसंयुतौ[४] ।
वर्धनीकुम्भमध्ये तु तत्तन्मूर्तिं च भावयेत्[५] ॥ ३५ ॥
[६]देवस्य परितः स्थाप्य घटान्विद्येश्वरात्मकान्[७] ।
ससूत्रान्सापिधानांश्च सवस्त्रान्वारिपूरितान् ॥ ३६ ॥
सकूर्चान्पल्लवोपेतान्मूर्तिबीजसमन्वितान्[८] ।
कुम्भानामन्तराले तु वर्धन्यष्टौ तु विन्यसेत्[९] ॥ ३७ ॥
वामादिशक्तयश्चाष्टौ वर्धनीषु प्रभावयेत्[१०] ।
पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः[११] ॥ ३८ ॥
अष्टमङ्गलरूपाणि वेदिकां परितो न्यसेत्[१२] ।
पूजयित्वा यथान्यायं

[७.२. होमः]

ततो होमं समाचरेत् ॥ ३९ ॥

---

१. 33c हृदा] C, D, यथा A, G ; 33d °वस्त्रेण] A^2, C^2, D, G, °वर्णेण A^1, lacune C^1.

२. 34a ईशान्यां तु न्यसेद्धीमान्] C, D, ऐशान्यां तु न्यसेद्देवं A^1, G, lacune A^2.

३. 34c रत्न°] A^1 (etc.), रक्त° A^2, D^1 ; °युक्तौ] B^4, C^1, D, G, °युक्तं A^1, °युक्त° A^2, °युक्तां C^2 ; 34d सकूर्चौ सपिधानकौ] A^2, C, G, सकूर्चं सपिधानकम् A^1, lacune B^4, D.

४. 35a सवस्त्र°] A^2, सवस्त्रं A^1, lacune B^4, C, वस्त्रेण D^1, सवस्त्रौ D^2, G ; °पूर्णौ] A^2 (etc.), °पूर्णं A^1 ; 35b शिवोमा°] A^2, G, शिवोमां A^1, D, lacune B^4, शिवकामां C^1, शिवक्लीं (*v.f.*) C^2 ; °संयुतौ] A^2, B^4, C, G, °संयुतम् A^1, D^2, संयुते D^1.

५. 35c वर्धनी°] A^2, B^4, वर्धनीं A^1, C, D, G ; 35d °मूर्तिं च] A (etc.), °मूर्तीश्च G.

६. Les manuscrits A omettent 36b-37c.

७. 36a परितः स्थाप्य] B^4, C, D, lacune A, परितश्चाष्टौ G ; 36b °विद्येश्वरात्मकान्] G, °विद्येश्वरा ++ B^4, D^2, °विद्येश्वरात्मिकान् C, °विद्ये ++++ D^1.

८. 37b °मूर्ति°] B^4 (etc.), °मूर्ध्नी° D^1.

९. 37d वर्धन्यष्टौ] A^1, G, lacune A^2, C^1, वर्धन्यादौ B^4, D, वर्धन्यां तौ C^2.

१०. 38b वर्धनीषु प्रभावयेत्] C^1, वर्धन्याष्टौ तु भावयेत् A, ++++प्रभावयेत् D, वर्धन्यष्टौ तु भावयेत् G.

११. 38d नैवेद्यान्तं] A, B^4, D^2, G, lacune C^1, नैवेद्येन C^2, नैवेद्यान्नं D^1.

१२. 39b वेदिकां] C^2, G, वेदिका A^1, B^4, C^1, D, वेदिको A^2.

शोधनं क्षालनं चैव शोषणं पाचनं तथा[१]।
तत्तत्संस्कारं कुण्डानां पूर्वोक्तविधिना कुरु[२] ॥ ४० ॥
पलाशं वैकङ्कताशोकं न्यग्रोधं खादिरं शमी[३]।
बिल्वोदुम्बरमायूरसमिधः संप्रकीर्तिताः[४] ॥ ४१ ॥
द्वादशाङ्गुलमायामं कनिष्ठाङ्गुलिनाहकम्[५]।
[६]षट्त्रिंशदङ्गुलायामं तिस्रः परिधयः स्मृताः[७] ॥ ४२ ॥
द्वावूर्ध्वसमिधौ तत्र अनुयाज्येकमुच्यते[८]।
पञ्चदशैव जुहुयादिध्ममेतत्प्रकीर्तितम् ॥ ४३ ॥
[९]समिदाज्यं चरुं चैव लाजं गुलं यवं तिलम्[१०]।
मधुगोक्षीरसर्षपमुद्गं च जुहुयात्क्रमात्[११] ॥ ४४ ॥
[१२]शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात्।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च ॥ ४५ ॥
कुण्डानामधिदेवाः स्युर्विदिक्षु शृणु चानल[१३]।

---

१. 40b पाचनं] A, B^4, C, G, पाशनं D.

२. 40c तत्तत्संस्कारं] A^1, तत्तत्संस्कार॰ A^2, B^4, D, G, ++संस्कार॰ C^1, होमसंस्कार॰ C^2.

३. 41a वैकङ्कताशोकं] (*v.f.*) A^1, C^1, वैकङ्कताशोक॰ (*v.f.*) A^2, D^2, वैकताशोकं C^2, वैताशोक॰ (*v.f.*) D^1, कङ्कताशोकं G ; 41b शमी] A, D, G, lacune C^1, शतीम् C^2.

४. 41c ॰मायूर॰] A^2, C^2, ॰माधूर॰ A^1, D^1, ॰मयूर॰ B^4, C^1, D^2, lacune G ; 41d ॰समिधः] A^2 (etc.), lacune A^1, ॰समिधाः D.

५. 42b ॰ङ्गुलिनाहकम्] A, D, G, lacune B^4, C^1, ॰ङ्गुल यवं तिलम् (*v.f.*) C^2.

६. B^4 lacune 42cd ; les manuscrits C omettent 42cd-44ab.

७. 42c ॰यामं] A, ॰यामस्॰ D, G ; 42d तिस्रः] A^2, D^2, G, तिसृः A^1, तिराः D^1 ; स्मृताः] A, स्मृतम् D, lacune G.

८. 43a द्वावूर्ध्व॰] A^1, द्वा ऊर्ध्वे A^2, B^4, द्वौ ऊर्ध्वौ D^1, द्वौ मौर्ध्वे D^2, lacune G ; 43b अनुयाज्येकमुच्यते] A, G, अनुयाजकमुच्यते B^4, अनुयाम्यकैकाद्योच्यते D.

९. B^4 omet 44ab.

१०. 44a ॰दाज्यं] A^1, ॰दाज्य॰ A^2, G, ॰धाज्य॰ D^1, ॰धाज्या॰ D^2 ; 44b लाजं गुलं यवं] A, D^1, G, लाजां गुलयवं D^2.

११. 44c मधुगोक्षीरसर्षप॰] A^2, B^4, D^1, G, मधुगोक्षीरसेसर्ष॰ A^1, ++++सर्षपं च C^1, वटोक्षु सर्षपां च C^2, मधुनो क्षीरसर्षप॰ D^2.

१२. B^4, C et D, omettent 45ab.

१३. 46a ॰देवाः स्युर्॰] A^1, G, ॰देवं स्याद्॰ A^2, lacune B^4, ॰देवाभ्यां C^1, D^2 ॰देवाश्च C^2, ॰देवाभ्या D^1 ; 46b ॰विदिक्षु] A, C, D^2, G, ॰दिक्षु (*v.f.*) D^1.

उमा दुर्गा मही लक्ष्मीः कोणकुण्डाधिदेवताः[१] ॥ ४६ ॥
उल्लेखनादि यत्सर्वमग्निकार्योक्तमार्गतः[२] ।
पुरुषाघोरसद्योन वामेन जुहुयाद्दिशि[३] ॥ ४७ ॥
गौरी मिमाय मन्त्रेण हुत्वाग्नेयादिकोणके[४] ।
समिधो जुहुयादेवमाज्यादीनि ततः शृणु[५] ॥ ४८ ॥
त्र्यम्बकेन घृतं हुत्वा गौरीगायत्रीमन्त्रतः[६] ।
शिरसा जुहुयाल्लाजं देवस्य त्वेति कोणके[७] ॥ ४९ ॥
गुलं च कद्रुद्रायेति तिलं यत्तोयमित्यथ[८] ।
मधु वै मधुवातेति क्षीरमाप्यायमन्त्रतः[९] ॥ ५० ॥
सर्षपं कवचेनैव मुद्गमस्त्रेण होमयेत्[१०] ।
शिवाङ्गैश्चैव विद्याङ्गैर्हुत्वा हुत्वा स्पृशेत्पुनः[११] ॥ ५१ ॥
दिशास्वध्ययनं कुर्युश्चत्वारो वेदपारगाः[१२] ।
एवं जागरणं रात्रौ प्रभाते स्थापनं कुरु[१३] ॥ ५२ ॥

---

१. 46c मही लक्ष्मीः] C^1, G, महालक्ष्मी A^1, C^2, मही लक्ष्मी A^2, B^4, D ; 46d कोणकुण्डाधिदेवताः] C, G, कोणकुण्डाधिदेवता A^1, B^4, D^1, कोणे कुण्डाधिदेवता A^2, कोणकुण्डाधिदैवताः D^2.

२. 47a उल्लेखनादि] A, B^4, D, G, lacune C^1, मनोमन्यादि C^2 ; 47b °क्तमार्गतः] A, G, °क्तमाचरेत् B^4, C, D.

३. 47c °सद्योन] A, C^1, D, G, lacune B^4, °सद्यैश्च C^2.

४. 48b हुत्वाग्नेयादि°] A^1, B^4, C, D^2, G, हुत्वाग्नेर्यादि° A^2, भुत्वाग्नेयादि° D^1.

५. 48c समिधो जुहुयादेव°] D, G, समिधौ जुहुयादेव° A, समिधो जुहुया ++ B^4, समिधो जुहुयाद्देव° C^1, C^2 ; 48d °माज्यादीनि ततः] C, D^2, G, °मज्यादि निर्ऋतं A^1, °मादित्यादि ततः A^2, lacune B^4, °माज्यादीनि तत D^1.

६. 49b गौरीगायत्री°] A^1, गौरीगायत्रि° A^2, D, G, lacune B^4, ++गायत्रि° C^1, गौर्धेनुरिति C^2.

७. 49c °ल्लाजं] A^1, C, G, °ल्लाजान् A^2, B^4, °ल्लाजा D ; 49d त्वेति] A^1 (etc.) त्येति A^2.

८. 50a च कद्रुद्रायेति] A^1, C, D^2, G, कद्रुद्रायेति (*v.f.*) A^2, च गद्रदायेति B^4, कम्रभ्रायेति (*v.f.*) D^1 ; 50b यत्तोयमित्यथ] A, lacune B^4, यमे नयमित्यतः C^1, घत्ते यमीत्यतः C^2, यत्नेन मित्यतः D^1, यत्तोयमित्यतः D^2, यत्तेयमित्यथ G.

९. 50d °माप्याय°] A^1, C^1, D, G, °मापूर्य A^2, lacune B^4, °माज्याय° C^2.

१०. 51a कवचेनैव] A (etc.), कवचेय (*v.f.*) D^1 ; 51b °मस्त्रेण] A, C^2, D, G, °मन्त्रेण B^4, lacune C^1.

११. 51c शिवाङ्गैश्चैव विद्याङ्गैर्°] C, D, G, शिवलिङ्गे मधुं चैव A^1, शिवाङ्गैश्चैव हुत्वा तु A^2, शिवाङ्गैश्चै ++++ B^4 ; 51d °हुत्वा] A (etc.), lacune B^4, °भुक्त्वा C^1 ; स्पृशेत्पुनः] C, D, स्पृशेद्बुधः A, G, lacune B^4.

१२. 52a कुर्युश्च°] G, कुर्याच्छ° A, C^2, D, lacune B^4, C^1; 52b °पारगाः] B^4 (etc.), °पारगान् A.

१३. 52c जागरणं] A, B^4, C^2, G, जागरकं C^1, जाकरकं D^1, जागरगं D^2 ; 52d प्रभाते स्थापनं कुरु] G, प्रभाते

[८. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः।
अङ्गन्यासं करन्यासं पूर्वोक्तविधिना कुरु[१] ॥ ५३॥
रुद्रकुम्भादिवर्धन्यां चाग्नौ चैव प्रपूजयेत्[२]।
जयादिरभ्याधानं च स्विष्टान्तं जुहुयात्ततः[३] ॥ ५४॥
आचार्यं पूजयेत्तत्र मूर्तिपानथ पूजयेत्।

[८.१. कुम्भाभिषेकः]

उत्थाप्य शयनाद्देवं सतीदेवीं हृदा बुधः[४] ॥ ५५॥
आसनं कल्पयेद्धीमान्स्नानश्वभ्रे पृथक्पृथक्[५]।
आसनोपरि विन्यस्य देवं देवीं विशेषतः[६] ॥ ५६॥
शिवकुम्भं समुत्थाप्य वर्धन्या सह देशिकः[७]।
प्रतिमाग्रे पुनः स्थाप्य शिवकुम्भं च वर्धनीम्॥ ५७॥
अष्टत्रिंशत्कला न्यास्त्वा ब्रह्माङ्गं च पुनर्न्यसेत्[८]।
गौरीकलास्तु वर्णानि गौरीदेहे तु विन्यसेत्[९] ॥ ५८॥
घृतं शिरोऽर्पणं कुर्यात्पूर्वोक्तविधिना सह[१०]।

स्थापमारभेत् A^1, प्रभाते स्नानमाचरेत् A^2, C^2, lacune B^4, प्रभाते स्नारमारभेत् C^1, प्रभास्थापनमारभेत् D^1, प्रभाते स्थापनमारभेत् (*v.f.*) D^2.

१. 53c अङ्गन्यासं] A, C^2, G, अङ्गन्यास° B^4, C^1, D.

२. 54a °कुम्भादिवर्धन्यां चा°] A^1, °कुम्भानि वर्धन्याश्चा° A^2, D, °कुम्भानि वर्धन्या चा° B^4, °कुम्भानि वर्धन्यां चा° C^1, G, °कुम्भाश्च वर्धन्या चा° C^2 ; 54b °ग्नौ चैव प्र°] Eds, °ग्निं चैव प्र° A^1, °ग्निकुम्भानि A^2, lacune B^4, °ग्निं चैव सु° C, D^2, G, °ग्निं चैव सू° D^1.

३. 54c °भ्याधानं] A^2, C^1, D, °भ्यधानं A^1, C^2, G, lacune B^4 ; 54d स्विष्टान्तं] A, B^4, D^2, G, स्विष्टकृज्° C, स्विष्टान्त° D^1.

४. 55d सती°] A^2, सदिग्° A^1, G, lacune B^4, सति C^1, D, सतीं C^2 ; बुधः] A, G, पुनः B^4, C, D.

५. 56b श्वभ्रे] A, C, G, श्वभ्रौ B^4, लचुने D^1, श्वभ्रं D^2.

६. 56d देवं देवीं] A, B^4, C, D, देवीं देवं G.

७. 57a °कुम्भं] A^2 (etc.), °कुम्भात् A^1 ; समुत्थाप्य] C, G, समुत्थाय A, B^4, D ; 57b वर्धन्या] A, B^4, C^2, G, वर्धन्यां C^1, D.

८. 58a °कला] A^1, C^1, G, °कलान् A^2, °कलां B^4, C^2, lacune D ; 58b ब्रह्माङ्गं च] A (etc.), ब्रह्माङ्ग (*v.f.*) B^4.

९. 58c °कलास्तु वर्णानि] A, G, °कलां तु वर्णानि B^4, C, °कलाकुण्ठानि D^1, °कलाकुर्णानि D^2.

१०. 59a घृतं शिरोऽर्पणं कुर्यात्] A^1, घृतशिरोऽर्पणं कुर्यात् A^2, B^4, D, G, व्रतशिरोऽर्प +++ C^1, ततः शिरोऽर्पणं कुर्यात् C^2.

[८.२. मन्त्रन्यासः]

[१]सुमुहूर्ते सुलग्ने च मन्त्रन्यासं समाचरेत्[२] ॥ ५९ ॥
शिवकुम्भात्समादाय शिवबीजं हृदि न्यसेत्[३] ।
शिवाङ्गानि ततो न्यस्त्वा पूजयित्वा यथाविधि[४] ॥ ६० ॥
वर्धन्या बीजमादाय गौर्याश्च हृदि विन्यसेत्[५] ।
मूर्ध्नि कण्ठे च योनौ च न्यस्त्वाङ्गानि ततो न्यसेत्[६] ॥ ६१ ॥
मूर्ध्नि कुम्भोदकैर्देवं स्नाप्योमां वर्धनीजलैः[७] ।
स्नपनं कारयेदन्ते पूर्वोक्तविधिना ततः[८] ॥ ६२ ॥

[८.३. पूजाद्युत्सवान्तकृत्यम्]

मण्डपे विन्यसेद्देवं देवीं चैव तु देशिकः[९] ।
वस्त्राभरणमालाभिरर्चनोक्तं समाचरेत्[१०] ॥ ६३ ॥
एवं गौरीं समभ्यर्च्य नैवेद्यं पायसं ददेत्[११] ।
पुनराचमनं दद्यान्निर्माल्यं तु विसर्जयेत् ॥ ६४ ॥
ताम्बूलं दापयेत्ताभ्यां हृदयेन तु मन्त्रतः[१२] ।
विवाहकार्यं यत्सर्वं पूर्वोक्तविधिना कुरु[१३] ॥ ६५ ॥
उत्सवं कारयेदन्ते सप्ताहं त्र्यहमेव वा[१४] ।

---

१. D^2 intercale entre 59ab et 59cd un doublon des vers 54-59ab.

२. 59d समाचरेत्] A, B^4, समारभेत् C, D, G.

३. 60a °कुम्भात्°] A, G, °कुम्भान्° B^4, C, D.

४. 60c न्यस्त्वा] A^2, B^4, C, D^2, G, हुत्वा A^1, न्यस्त्वाङ्गानि D^1 (*v.f.*).

५. 61a वर्धन्या बीजमादाय] A, G, वर्धन्यां बीजमा ++ B^4, वर्धन्यां बीजमादाय C, D.

६. 61c मूर्ध्नि कण्ठे] A, C^1, G, मूर्ध्नि कर्णे B^4, मूर्धि कण्ठे C^2, ++कण्ठे D.

७. 62a मूर्ध्नि कुम्भोदकैर्देवं] A, C, D^2, G, मूर्ध्नि कुम्भोदकैर्दैवं B^4, मूध्नर्य कुम्भोदकैर्देव D^1 ; 62b स्नाप्योमां] C, B^4, स्नाप्येनां A, G, स्नाप्यो उमां D ; वर्धनीजलैः] A, C, G, वर्धनीजले B^4, बन्धनीजलैः D.

८. 62d पूर्वोक्तविधिना ततः] A^1, G, पुरोक्तविधिना ततः A^2, पूर्वोक्तविधिना बुधः B^4, C, lacune D.

९. 63b तु] A^1 (etc.), च A^2.

१०. 63d °नोक्तं समाचरेत्] A, °नोक्तं समर्चयेत् B^4, C^2, D, °नाक्त समर्चयेत् C^1, °नोक्तं समारभेत् G.

११. 64b नैवेद्यं] A, B^4, D^2, C, lacune D^1, निवेद्यं G.

१२. 65a ताभ्यां] A^2, B^4, C, D, G, सर्वं चौक्तभ्यां (*v.f.*) A^1.

१३. 65c विवाहकार्यं यत्°] A, D, G, lacune B^4, विवाहं कार्य यत्° C^1, विवाहं कारयेत्° C^2.

१४. 66b °व वा] A, G, °व च B^4, C, lacune D.

[९. पुरारिस्थापनफलम्]

एवं यः कुरुते मर्त्यश्चान्ते शिवपदं व्रजेत्[1] ॥ ६६ ॥
पुरारिस्थापनं प्रोक्तं नृत्तरूपस्य वै शृणु।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनपटलः [अष्टत्रिंशत्तमः][2] ॥

---

१. 66c मर्त्यश्चान्ते] B^4, C, नित्यमन्ते A, G, lacune D ; 66d शिवपदं] C^2, चैव पथ A^1, शैवं पदं A^2, शैवपदं B^4, C^1, D, चैव पदं G.

२. A^1, D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनपटलः।
A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनपटल एकत्रिंशतिः।
B^4 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनपटल एकत्रिंशतम्।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनविधिः त्रिंशतिः पटलः।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनविधिस्त्रिंशः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनविधिपटल एकत्रिंशत्पटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे पुरारिस्थापनपटल एकत्रिंशत्तमः समाप्तः।

[एकोनचत्वारिंशत्तमः पटलः]
[नृत्तमूर्तिस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि स्थापनं नृत्तमूर्तिनः।
क्षेमदं जयदं लोके राजराष्ट्रविवर्धनम्[२]॥ १॥
उत्तरायणकाले तु पूर्वपक्षे शुभे दिने।
सुवारे लग्नसंपन्ने प्रतिष्ठां सम्यगाचरेत्॥ २॥

[१. अङ्कुरार्पणम्]

प्रतिष्ठादिनपूर्वे तु सप्ताहे वाथ पञ्चमे[३]।
अङ्कुराण्यर्पयेद्धीमान्पूर्वोक्तविधिना सह[४]॥ ३॥

[२. रत्नन्यासः]

रत्नन्यासं प्रकर्तव्यं देवदेव्योर्विशेषतः।
पिण्डिकां स्थापयेन्मध्ये मण्डपे समलङ्कृते॥ ४॥
देवीपीठं न्यसेत्पश्चात्कृत्वा चैव दिगर्चनम्[५]।
पद्मे वा भद्रपीठे वा नवकोष्ठानि कल्पयेत्[६]॥ ५॥
इन्द्रनीलं न्यसेदैन्द्रे वैडूर्यं वह्निगोचरे।
वैवस्वते महानीलं मुक्ता निर्ऋतिगोचरे[७]॥ ६॥
वारुणे स्फटिकं न्यस्त्वा वायव्यां पुष्यरागकम्[८]।
प्रवालं सौम्यदेशे तु वज्रमीशानगोचरे॥ ७॥
माणिक्यं मध्यमे न्यस्त्वा नवबीजमुदाहरन्[९]।

---

१. Manuscrits utilisés : A^{1}, A^{2}, B^{4} (très lacunaire), C^{1}, C^{2}, D^{1}, D^{2}.

२. 1c जयदं] A, B^{4}, C, त्रयदं D^{1}, तु पदं D^{2}.

३. 3b वाथ पञ्चमे] A, B^{4}, C^{2}, वाधिपञ्चमे C^{1}, वाधि तुञ्चमे D.

४. 3c अङ्कुराण्यर्प°] A, B^{4}, C, अङ्कुरानर्प° D.

५. 5a °पीठं न्यसेत्°] B^{4}, C, D, °पठे व्यसेत्° A^{1}, °पीठे न्यसेत्° A^{2} ; 5b चैव दिगर्चनम्] B^{4}, C, वैदिकगर्चनात् A, चैव दिगर्चनाम् D.

६. 5c भद्र°] A^{2} (etc.), पद्म° A^{1}, D^{2}.

७. 6c वैवस्वते] A (etc.), वैवसुते D^{1} ; 6d निर्ऋति°] C, D, निर्ऋत° A^{1}, निऋति° A^{2}, B^{4}.

८. 7a वायव्यां] A, वायवे B^{4}, वायव्ये C, D^{2}, वायवै D^{1}.

९. 8a माणिक्यं] A^{1}, माणिकं A^{2}, माणिक्कं B^{4}, C, D.

प्रतिमां तत्र विन्यस्य सुस्निग्धं कारयेत्ततः ॥ ८ ॥
[१]एवं क्रमान्न्यसेद्देव्याः सुस्निग्धं कारयेत्ततः[२]।
भित्तौ चित्रपटे चैव रत्नन्यासं न कारयेत्[३] ॥ ९ ॥

[३. अक्षिमोक्षणम्]

[३.१. स्थण्डिलकल्पनम्]

ततोऽक्षिमोक्षणं कुर्यान्नेत्रयुग्मयुते दिने[४]।
स्थण्डिलद्वितयं कुर्यान्मण्डपे समलङ्कृते॥ १० ॥
दक्षिणे स्थण्डिले देवं पूर्वाभिमुखमानयेत्[५]।
उत्तरे विन्यसेद्देवीं पूर्वाभिमुखमार्गतः[६] ॥ ११ ॥
अभितः कलशानष्टौ लोकपालाधिदैवतान्।
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्॥ १२ ॥
एवं क्रमान्न्यसेद्देव्यामष्टशक्तिसमन्वितम्[७]।

[३.२. अक्षिहोमः]

देवस्याभिमुखं कुर्यादक्षिहोमं विशेषतः[८] ॥ १३ ॥
सूर्यसोमाग्निमन्त्रैश्च नेत्रमन्त्रशतं हुनेत्[९]।
सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम्[१०] ॥ १४ ॥

[३.३. पक्ष्मरेखाद्यालेखनम्]

शुभलग्नसमायुक्तं नेत्रमोक्षणमारभेत्[११]।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत्॥ १५ ॥

---

१. D^1 omet 9ab.

२. 9a °देव्याः] A, C, °देव्या B^4, D^2.

३. 9c भित्तौ चित्रपटे] C^2, भित्तिचित्रपटे A, C^1, D^1, भित्तिचि+++ B^4, भित्तिचित्रपटलं D^2.

४. 10b °युते] A, B^4, C, °युगे D.

५. 11b पूर्वा°] A, B^4, C^2, D, पूजा° C^1.

६. 11c उत्तरे] A^2, B^4, C^2, D, उत्तर A^1, मध्यमे C^1 ; 11d °मार्गतः] A, B^4, C^1, D, °मासतुः C^2.

७. 13b °देव्यां] C^2, °देव्या A, B^4, C^1, D ; °समन्वितम्] A, B^4, C^2, D, °समन्वितः C^1.

८. 13c °मुखं] A, lacune B^4, °मुखे C, D.

९. 14b °मन्त्रशतं हुनेत्] A, lacune B^4, °मन्त्रैश्च तं ++ C^1, °मन्त्रैरगतं हुनेत् (*v.f.*) C^2, D.

१०. 14d °समन्वितम्] A, C^2, °समङ्कुलम् B^4, C^1, D^2, °क्रमाकुलम् D^1.

११. 15a शुभ°] A^1, C, D, शुद्ध° A^2.

[१]असितं मण्डलं लिख्य दृष्टिमण्डलमालिखेत्[२]।
ज्योतिर्मण्डलमालिख्य तत्तन्नेत्रमुदाहरन्[३] ॥ १६ ॥
तर्जन्यनामिकामध्या रविचन्द्रानला मताः[४]।
[५]सुवर्णनखयुक्ताभिरङ्गुलीभिर्विशेषतः ॥ १७ ॥
नेत्रमन्त्रं समुच्चार्य प्रोतनेत्रत्रये बुधः[६]।
अक्षिद्वयं न्यसेद्देव्या देवीनेत्रमुदाहरन्[७] ॥ १८ ॥

[३.४. तर्पणं प्रदर्शनं च]

हिरण्यदूर्वया विद्वान्मध्वाज्याभ्यां तु तर्पयेत्[८]।
सौवर्णमुत्तमं पात्रं ताम्रपात्रं तु मध्यमम् ॥ १९ ॥
मृण्मयं चाधमं पात्रं त्रिधा पात्रं विधीयते[९]।
मधुवाता ऋतायेति मधुपात्रं प्रदर्शयेत् ॥ २० ॥
घृतेन पूरितं पात्रं दर्शयेद्धृतमन्त्रतः[१०]।
[११]दर्शयेत्सप्तपात्राणि सप्तबीजयुतानि च ॥ २१ ॥
गौर्धेनुभव्यमन्त्रेण धेनुं दृष्ट्वा विशेषतः[१२]।
ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान्वेदपारगान्[१३] ॥ २२ ॥

---

१. C^2 omet 16ab.

२. 16a असितं मण्डलं लिख्य] A^1, B^4, C^1, D, असितमण्डलमालिख्य (*v.f.*) A^2.

३. 16d तत्तन्°] A, तत्र B^4, C, D.

४. 17b °चन्द्रानला मताः] A^2, C, D, °चन्द्रमुदाहरन् A^1, °चन्द्रानला मता B^4.

५. A^1 omet 17cd-18cd.

६. 18b °त्रये] B^4, °त्रयो A^2, C, lacune D.

७. 18d देवीनेत्र°] A^2, B^4, D, देवीमन्त्र° C^1, एवं नेत्र° C^2.

८. 19a °दूर्वया विद्वान्°] B^4, C, D^2, °दूर्वया नन्यान्° A^1, °दूर्वया मध्वा A^2, °म्रर्वया विद्वान्° (?) D^1 ; 19b °मध्वाज्याभ्यां तु] B^4, C^2, °ध्वाज्यसान्तेन A^1, °ज्याभ्यान्तु A^2, lacune C^1, °ध्वाज्याभ्यान्तु D.

९. 20b त्रिधा] A^1, दर्श A^2, दश B^4, C, lacune D.

१०. 21a पूरितं] A^1 (etc.), पूर्यतं A^2 ; 21b दर्शयेद्धृतमन्त्रतः] B^4, दर्शयेद्धृतमुत्तमम् A, घृतमन्त्रं तु दर्शयेत् C, lacune D^1, घृतमन्त्रतः दर्शयेत् D^2.

११. D^2 répète 19cd-20 entre 21ab et 21cd. C^2 remplace 21cd-22ab par : सप्तपात्राणि विन्यस्य सप्तबीजयुतानि च। तदूर्ध्वे भव्यमन्त्रेण धेनु दृष्ट्वा विशेषतः।

१२. 22a गौर्धेनु°] A^1, B^4, C^1, D^2, गौगेनु° A^2, गौर्यधेनु° (*v.f.*) D^1.

१३. 22d °पारगान्] A (etc.), °पारगाः C^2.

एवं समाचरेद्देव्या एतन्मन्त्रमुदाहरन्[१]।
प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत्॥ २३॥

[३.५. अन्यदेवतानां नयनमोक्षणम्]

वाहनाख्यमपस्मारं सूर्यचन्द्रमसौ ततः[२]।
जाह्नवीं चान्यदेवांश्च कुर्यान्नयनमोक्षणम्॥ २४॥

[३.६. शिल्पिनो विसर्जनम्]

शिल्पिनं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः।
अस्त्रमन्त्रं समुच्चार्य शिल्पिनं च विसर्जयेत्॥ २५॥
पुण्याहं वाचयेदन्ते साक्षतं सकुशोदकम्।

[४. शुद्ध्यादिग्रामप्रदक्षिणपर्यन्तम्]

स्नानवेद्यां न्यसेद्देवं शुद्धिं कृत्वा विशेषतः[३]॥ २६॥
व्योमव्यापिनमुच्चार्य कुर्याद्गव्याभिषेचनम्[४]
मृदम्भसा च सुस्नाप्य रुद्रसूक्तमुदाहरन्[५]॥ २७॥
शुद्धैरुक्थेति मन्त्रेण शुद्धतोयेन सेचयेत्[६]।
पार्वतीं स्नापयेदेवं पत्रतोयसमन्वितम्[७]॥ २८॥
वस्त्राभरणमालाभिर्देवदेव्यौ विभूषयेत्[८]।
ग्रामप्रदक्षिणं कुर्यात्सर्वालङ्कारसंयुतम्॥ २९॥
पिञ्छचामरसंयुक्तं धूपदीपसमाकुलम्[९]।
पुत्रभ्रातृकलत्रैश्च यजमानो व्रजेदनु[१०]॥ ३०॥

---

१. 23a °देव्या] A, C^2, °देव्याम् B^4, C^1, D ; 23b °हरन्] A, C, °हरेत् B^4, D.

२. 24a °ख्यमपस्मारं] A, B^4, C, D^2, °ख्यः पध्मारं D^1 ; 24b सूर्य°] C^1, D, सूर्या° A, B^4, C^2.

३. 26d शुद्धिं] A^1, C, D, शुद्धं A^2, lacune B^4.

४. 27a °व्यापिनमुच्चा°] A, B^4, °व्यापिनुच्चा° (*v.f.*) C, lacune D.

५. 27c सुस्नाप्य] A, D, संस्नाप्य B^4, C ; 27d °हरन्] A^2, B^4, C, D, °हरेत् A^1.

६. 28a शुद्धैरुक्थेति] C^1, शुद्धैरुत्थेति A^2, शुद्धेरुद्धेति A^1, lacune B^4, शुद्धेरुत्थेति C^2, शुद्धेरुकेय D^1, शुद्धेरुक्थेथ D^2.

७. 28c °स्नापयेदेवं] A, B^4, °स्नपयेद्देवं C, D.

८. 29b °देवदेव्यौ] A, °देवं देवीं B^4, C, D.

९. 30a °संयुक्तं] C^2, °संपूर्णं A, B^4, °संकीर्णं C^1, D.

१०. 30c पुत्र°] A^1 (etc.), यत्र° A^2.

पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः[१] ।

[५. जलाधिवासः]

जलाधिवासनं कुर्याद्देवदेव्योर्विचक्षणः[२] ॥ ३१ ॥
नद्यां वापि तटाके वा ह्रदे वाप्यामथापि वा[३] ।
[४]कण्ठदघ्ने जले चैव प्रपां कृत्वा पृथक्पृथक्[५] ॥ ३२ ॥
न्यस्त्वा मध्ये चतुष्पादीमूर्ध्वच्छन्नसमन्वितम्[६] ।
तीरे समतले स्थाप्य पूजयित्वा स्वनामतः ॥ ३३ ॥
वस्त्रेण वेष्टयेद्देवं देवीं कूर्चसमन्विताम् ।
प्राक्शिरस्कं शाययित्वा कण्ठमात्रजले स्थितम्[७] ॥ ३४ ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम् ।

[६. शिवाधिवासमण्डपकल्पनम्]

[६.१. मण्डपलक्षणम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्[८] ॥ ३५ ॥
त्रयोदशकरं तारमेकादशकरं तु वा ।
द्वादशं दशहस्तं वा चतुर्द्वारसमन्वितम् ॥ ३६ ॥
षोडशस्तम्भसंयुक्तं वितानोपरि शोभितम् ।
दर्भमालासमायुक्तं द्वारतोरणभूषितम् ॥ ३७ ॥
मण्डपस्य त्रिभागैकं वेदिकायाश्च विस्तरम्[९] ।
हस्तमात्रसमुत्सेधं दर्पणोदरसंनिभम् ॥ ३८ ॥

---

१. 31b फलमाप्नोति मानवः] A^1, फलं प्राप्नोति मानवः A^2, C, D, फलं प्राप्नोति माषवत् B^4.

२. 31d °देवदेव्योर्वि°] A, °देवं देवीं वि° B^4, C, D.

३. 32b ह्रदे] A^2 (etc.), देव° A^1.

४. 33cd = 47.34ab

५. 32c कण्ठदघ्ने] A, B^4, कण्ठमग्ने C^1, कण्ठमग्न° C^2, कण्ठेदघ्ने D^1, कण्ठदग्रे D^2.

६. 33a न्यस्त्वा] C, D, व्यस्त्वा A, स्नस्त्वा B^4 ; °पादीमूर्ध्व°] A^2, °पादिमूर्ध्व° A^1, B^4, °पादं ध्वज° C, °पादिनूर्ध्व° D^1, °पादिरूर्ध्व° D^2 ; 33b °च्छन्नसमन्वितम्] C^2, D^2, °च्छन्नसमं जलम् A, B^4, °च्छन्नसम+तम् C^1, °च्छन्तसमन्वितम् D^1.

७. 34d कण्ठमात्र°] A^1, C^2, कर्णमात्र° A^2, कण्ठमात्रे B^4, C^1, D.

८. 35d °मण्डपं] A^1 (etc.), °मण्डलं A^2.

९. 38a त्रि°] D, द्वि° A, B^4, C ; 38b वेदिकायाश्च विस्तरम्] A, B^4, C^1, वेदिकायां च विस्तृतम् C^2, वेदिकायां च विस्तरम् D.

उपवेदिस्तु कर्तव्या वेद्यधश्चाष्टमङ्गलम्[१]।

[६.२. कुण्डलक्षणम्]

कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात्॥ ३९॥
चतुरश्रं तु पूर्वायामाग्नेय्यां तु भगाकृति[२]।
चापाश्रं दक्षिणे भागे नैर्ऋत्यामनलाश्रकम्॥ ४०॥
वर्तुलं वारुणे भागे ऋत्वश्रं वायुगोचरे[३]।
पद्माभं सौम्यदेशे तु पञ्चाश्रं शाङ्करे दिशि॥ ४१॥
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु[४]।
हस्तमात्रप्रविस्तारं खातं वै हस्तमात्रकम्॥ ४२॥
मेखलात्रयसंयुक्तमेकैकं तु त्रयाङ्गुलम्[५]।
नाभियोनिसमायुक्तं कुण्डं सर्वार्थसाधकम्[६]॥ ४३॥
शिवकुण्डे शिवं प्रोक्तं पूर्वादीनि प्रदक्षिणम्[७]।
अनन्तादिशिखण्ड्यन्ता अष्टकुण्डाधिदेवताः[८]॥ ४४॥

[७. पार्वत्यधिवासमण्डपकल्पनम्]

अस्योत्तरे तदग्रे वा दक्षिणे वा विशेषतः[९]।
पार्वत्याश्चाधिवासार्थं मण्डपं कारयेद्बुधः[१०]॥ ४५॥
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्॥ ४६॥

---

१. 39a कर्तव्या] A (etc.), कर्तव्यं C^1 ; 39b वेद्यधश्चा°] B^4, C, D, वेद्यायाश्चा° A^1, वेद्याद्याश्चा° A^2 ; °मङ्गलम्] Eds., °मङ्गुलम् A (etc.).

२. 40c चतुरश्रं तु पूर्वाया°] A, श्रुत्यग्रं चैव दूर्वाया° B^4, श्रुत्यात्रं चैव ++या° C^1, श्रुत्यश्रं चैव पूर्वाया° C^2, श्रत्वाग्रं चैव पूर्वाया° D^1, कृत्वाग्रं चैव पूर्वाया° D^2 ; 40b भगाकृति] A^1, भगाकृतिः A^2, B^4, C, D.

३. 41b ऋत्वश्रं] B^4, D, मन्वश्रं A, दत्वश्रं C^1, तदश्रं C^2.

४. 42a ईशानशक्र°] C^2, ईशान इन्द्र° A, B^4, D, इन्द्र ईशान° C^1 ; 42b प्राधानिकं] A^2 (etc.), वाऽथाग्निकं A^1.

५. 43b त्रयाङ्गुलम्] A^1, C^2, त्रियाङ्गुलम् A^2, B^4, C^1, त्र्यङ्गुलम् (*v.f.*) D.

६. 43d कुण्डं] A (etc.), कण्ठं A^1.

७. 44a °कुण्डे] B^4, C, D, °कुण्डं A.

८. 44c °शिखण्ड्यन्ता] A^2, B^4, C, D, °शिखण्ड्यन्तम् A^1 ; 44d कुण्डाधिदेवताः] A, B^4, कुम्भाधिदेवताः C, कुण्डादिधिदैवताः D^1, कुण्डधिदैवताः D^2.

९. 45a तदग्रे] C^2, तथाग्रे A, B^4, C^1, D.

१०. 45c °धिवासार्थं] A, B^4, C^1, °धिवासोक्त° C^2, °धिवासोर्थं D.

वेदिं कुर्यात्त्रिहस्तेन रत्निमात्रसमुच्छ्रयाम्[१]।
योन्याकाराणि कुण्डानि चतुर्दिक्षु च कल्पयेत्॥ ४७॥
मेखलात्रयसंयुक्तमेकैकं स्यात्त्रियङ्गुलम्[२]।
खातं वै हस्तमात्रं स्याद्विस्तारं तावदेव तु॥ ४८॥
उमा दुर्गा तथा लक्ष्मीः ज्येष्ठा कुण्डाधिदेवताः[३]।

[८. मण्डपसंस्कारः]

दर्पणोदरसंकाशं वितानध्वजभूषितम्[४]॥ ४९॥
मुक्तादामैः समायुक्तं दर्भमालाविभूषितम्[५]।
मण्डपं समलङ्कृत्य गोमयेनोपलेपयेत्[६]॥ ५०॥

[९. स्नानार्थमण्डपकल्पनम्]

मण्डपस्योत्तरे पार्श्वे स्नानार्थं मण्डपं कुरु।
मध्यमे कल्पयेच्छ्वभ्रं तत्पीठस्यानुरूपतः[७]॥ ५१॥
मेखलाद्वयसंयुक्तमेकैकं चतुरङ्गुलम्।
सोमस्थाने जलमार्गं कुर्याद्वै सावटं बुधः[८]॥ ५२॥
एवमेवं क्रमाच्छ्वभ्रं कुर्याद्गौर्या विशेषतः।

[१०. अधिवासः]

[१०.१. शयनकल्पनम्]

स्थण्डिलं कल्पयेद्विद्वान्वेदिकोपरि शालिभिः॥ ५३॥
अष्टद्रोणसमायुक्तं तदर्धैस्तण्डुलैर्युतम्[९]।

---

१. 47b °समुच्छ्रयाम्] A^2, B^4, C, °समुच्चयम् A^1, lacune D.

२. 48b °कैकं स्यात्त्रियङ्गुलम्] C^2, °कैकं स्यात्त्रयाङ्गुलम् A^1, °कैकं स्यात्त्यङ्गुलम् (*v.f.*) A^2, D^2, °कैक्रस्य त्र्यङ्गुलम् B^4, lacune C^1, °कैकं स्यात्र्यङ्गुलम् D^1.

३. 49b ज्येष्ठा कुण्डाधिदेवताः] A (etc.), श्रेष्ठा ज्येष्ठाधिदेवताः C^2.

४. 49d °भूषितम्] A (etc.), °शोभितम् C^1.

५. 50a मुक्ता°] A^1 (etc.), रक्त° A^2.

६. 50c मण्डपं समलङ्कृत्य] A (etc.), मण्डपः पुरतः कृत्वा C^2 ; 50d गोमयेनोपलेपयेत्] A (etc.), गोमयेनालेपनं लेपयेत् (*v.f.*) D^1.

७. 51c °येच्छ्वभ्रं] A, B^4, C^2, °येच्छुभं C^1, lacune D.

८. 52c सोमस्थाने जल°] A^2, सोमस्थानजलं A^1, सोमस्थाने जले B^4, C, D.

९. 54b °लैर्युतम्] A (etc.), °लैः तिलैः C^2.

लाजपुष्पतिलैर्दर्भैर्भूषयेत्तु समन्ततः[१] ॥ ५४ ॥
शयनं कल्पयेन्मध्ये चर्मजाद्यैरनुक्रमात्।
उपस्तरणसंयुक्तं शयनं परिकल्पयेत्॥ ५५ ॥
पूजयित्वा यथान्यायं नवशक्तिसमन्वितम्।
[२]वेदिकायामितरायां गौर्याश्च परिकल्पयेत्[३] ॥ ५६ ॥
जलादुत्तीर्य देवेशं देवीं चैव विशेषतः।
वस्त्रकूर्चं विसृज्याथ पूर्ववच्छुद्धिमाचरेत्[४] ॥ ५७ ॥
वस्त्राभरणमाल्यैश्च देवदेव्यौ च भूषयेत्[५]।
कौतुकं बन्धयेद्धीमान्तत्तद्गायत्रिमन्त्रतः ॥ ५८ ॥

[१०.२. शिवविन्यासः]

आरोप्य सुमुहूर्ते तु शयने शाययेच्छिवम्।
प्राक्शिरस्कं न्यसेद्देवमूर्ध्ववक्त्रं सपिण्डिकम्[६] ॥ ५९ ॥
पूजयित्वा यथान्यायं हृदयं मन्त्रमुच्चरन्।
द्विगुणीकृत्य वस्त्रेण रक्तेन परिवेष्टयेत्॥ ६० ॥
ईशानशक्रयोर्मध्ये शिवकुम्भं न्यसेद्धृदा[७]।
[८]ससूत्रं सापिधानं च सवस्त्रं वारिपूरितम्॥ ६१ ॥
सरत्नकूर्चसंयुक्तं शिवमन्त्रसमन्वितम्[९]।
[१०]आद्यं द्वितीयवर्गे स्यादन्त्यवर्गद्वितीयकम्[११] ॥ ६२ ॥

---

१. 54d समन्ततः] A^2, C^1, D, समं तथा A^1, B^4, विशेषतः C^2.

२. C^2 omet 56cd.

३. 56c °मितरायां] Eds., °मतारायां A^1, B^4, D, °मताराया A^2, °मतारायां C^1.

४. 57c वस्त्रकूर्चं] A, D, वस्त्रं कूर्चं B^4, C^2, lacune C^1.

५. 58b देवदेव्यौ] A, देवं देवीं B^4, lacune C, D.

६. 59d °देवमूर्ध्ववक्त्रं सपिण्डिकम्] Eds., °देवं मूर्ध्नि वक्त्रसपिण्डकम् A, °देवमूर्ध्ववक्त्रं सपिण्डकम् B^4, °देवं मूर्ध्निवक्त्रं सपिण्डिकम् C^1, D^1, °देवं मूर्ध्नि वक्त्रं सपीण्डकम् C^2, D^2.

७. 61a ईशानशक्र°] B^4, C^1, D, ईशानशक्त° A^1, ईशानक्रम° A^2, ईशानश्चक्र° C^2.

८. C met ce demi-vers au pluriel.

९. 62a सरत्न°] A^1, सरत्नं A^2, B^4, C^1, D^1, सरक्तं C^2, D^2.

१०. D^1 omet 62cd-63ab.

११. 62c आद्यं] B^4, आद्य° A, D^2 , lacune C ; °वर्गे स्यादन्त्य°] A^1, °वर्ग स्यादन्त्य° A^2, B^4, lacune C, °वर्गस्य अन्त्य° D^2 ; 62d °वर्गद्वि°] Eds., °वर्गाद्वि° A, B^4, C^1, °वर्गाद्धि° C^2, D^2.

षष्ठवर्गान्तिमं बीजं मायानलसमन्वितम्[१]।
बिन्दुनादसमायुक्तं शिवबीजमिति स्मृतम्[२]॥ ६३॥
ध्यात्वा सदाशिवं रूपं सर्वलक्षणसंयुतम्।
पूजयित्वा हृदा मन्त्री वर्धनीं वामतो न्यसेत्॥ ६४॥
[3]...
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्।
[४]टङ्कशूलसमायुक्तान्हेमरूपमयान्पृथक्॥ ६५॥
आर्द्रपल्लवसंछन्नान्स्वस्वबीजसमायुतान्[५]।

[१०.३. गौरीविन्यासः]

पूजयित्वा यथान्यायं [द्वारतोरणसंयुतम्][६]॥ ६६॥
प्राक्शिरस्कां न्यसेद्देवीं शन्नो देवीति मन्त्रतः।
दक्षिणांशे हृदा न्यस्य गौरीकुम्भं विशेषतः॥ ६७॥
[७]सकूर्चं सापिधानं च सवस्त्रं जलपूरितम्।
सहेमबीजसंयुक्तं पल्लवैरुपशोभितम्[८]॥ ६८॥
गौरीबीजं न्यसेन्मध्ये गौरीरूपं विचिन्तयेत्[९]।
परितोऽष्टघटान्न्यस्त्वा चाष्टशक्तिसमन्वितान्[१०]॥ ६९॥
सकूर्चान्पल्लवोपेतान्सहेमान्वारिपूरितान्[११]।
सवस्त्रान्सापिधानांश्च स्थापयित्वा यथाविधि॥ ७०॥

---

१. 63a °वर्गान्तिमं] D^2, °वर्गातिग्म° A^1, °वर्गात्त्यमं A^2, lacune B^4, °वर्गान्तिकं C.

२. 63d °बीजमिति स्मृतम्] A, C, D, °मन्त्रसमन्वितम् B^4.

३. Lacune correspondant aux détails sur la Vardhanī et au début de la description des vases des Lokapāla.

४. C^1 omet 65d-69c ; C^2 omet 65cd-68ab.

५. 66a °छन्नान्स्व°] A, B^4, °छिन्नान्स्व° D.

६. 66d n'est visiblement pas à sa place !

७. A^1 et D^2 mettent 68ab au pluriel.

८. 68c सहेम°] A, C^2, D^1, सहैम° B^4, D^2.

९. 69b विचिन्तयेत्] A, B^4, D, विचित्रयेत् C^2.

१०. 69d चाष्ट°] A^2, B^4, C^2 , अष्ट° A^1 ; °समन्वितान्] B^4 , °समन्वितम् A, C^2, lacune D.

११. 70b °सहेमान्°] A, °सहैमान्° B^4, C, D.

गन्धादिना समभ्यर्च्य नैवेद्यान्तं स्वनामतः।
मुकुलीं पद्ममुद्रां च बीजमुद्रां च दर्शयेत्[१] ॥ ७१॥
दिशास्वध्ययनं कुर्युरष्टौ वै वेदपारगाः[२]।
कोणे मन्त्रजपं कुर्युः ततो होमं समारभेत्[३] ॥ ७२॥

[१०.४. होमः]

[१०.४.१. अग्निकार्यम्]

पलाशखादिराश्वत्थवटाः पूर्वादितः क्रमात्[४]।
शम्यर्कोदुम्बरप्लक्षा विदिक्षु परितः क्रमात्[५] ॥ ७३॥
पलाशं तु प्रधानं स्याच्छिवस्थापनकर्मणि[६]।
पलशोदुम्बरप्लक्षं देव्यग्नौ तु मयूरकम्[७] ॥ ७४॥
समिदाज्यचरुं लाजान्सक्तुमाषतिलानपि[८]।
सिद्धार्थं च यवं शालिः होमद्रव्याः प्रकीर्तिताः[९] ॥ ७५॥
शोधनं क्षालनं चैव शोषणं पाचनं तथा।
उल्लेखनोक्षणं पूजा वह्निस्थापनमेव च[१०] ॥ ७६॥
कुशास्तरणं पात्राणां प्रोक्षणीसादनं तथा[११]।
ब्रह्मासनं प्रणीतां च आज्यसंस्कारमेव च[१२] ॥ ७७॥

---

१. 71c मुकुलीं] Eds., मुकुलं A, मुकुलि॰ B^4, C, lacune D.

२. 72b ॰पारगाः] A, ॰पारगान् B^4, C, D.

३. 72c कोणे मन्त्र॰] B^4, C^1, D, कोणमन्त्र॰ A^1, कोणं मन्त्र॰ A^2, कोणमन्त्रं C^2 ; 72d समारभेत्] A, B^4, C^1, D, समाचरेत् C^2.

४. 73b ॰वटाः] Eds., ॰वटान्॰ A, ॰वटं B^4, C, lacune D.

५. 73c शम्यर्कोदुम्बरप्लक्षा] A^2, शम्यर्कौदुम्बराश्वत्था A^1, B^4, शम्यर्कोदुम्बराश्वत्था C^1, D ; 73d विदिक्षु परितः क्रमात्] A, प्लक्षो विदिक्षु कीर्तितः B^4, lacune C^1, प्लक्षा विदिक्षु परिकीर्तितः D.

६. 74a प्रधानं स्याच्छिव॰] A, C^2, प्रधानस्य शिव॰ B^4, C^1, D.

७. 74c पलाशोदुम्बरप्लक्षं] A^1, पलशोदुम्बराश्वत्थ A^2, B^4, C^2, D, पलशोदुम्बराश्वत्थं C^1 ; 74d देव्यग्नौ तु मयूरकम्] Eds., देव्यान्या तु मयूरका A^1, देव्यान्या तु मयूरकाः A^2, देव्याग्नौ तु मयूरकम् B^4, C, lacune D.

८. 75b ॰सक्तु॰] A^2, B^4, C^1, D, ॰सक्थु॰ A^1, C^2.

९. 75c सिद्धार्थं च] A^1 (etc.), सिद्धार्थश्च A^2 ; यवं] A^1, यवः॰ A^2, C^2, यवा B^4, C^1, D.

१०. 76c उल्लेखनोक्षणं] A, B^4, उल्लेखनं क्षणं C, lacune D.

११. 77a ॰स्तरणं] Eds, ॰स्तरण॰ A^2, B^4, C, D^1, ॰स्तरति A^1, ॰स्तर॰ D^2 ; 77b ॰सादनं] A, ॰साधनं B^4, C, D.

१२. 77c ब्रह्मासनं] A, ब्रह्माधानं B^4, C, D.

स्रुक्सादनं स्रुवश्चैव परिधिस्थापनं तथा[१]।
ऊर्ध्वप्रवेशमाघारमाज्यभागमुखं क्रमात्[२] ॥ ७८ ॥
अग्निकार्यविधानोक्तं कारयेद्देशिकोत्तमः।
शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारसंयुतम्[३] ॥ ७९ ॥
प्रणीताग्निं समादाय मूर्तिकुण्डेषु निक्षिपेत्[४]।

[१०.४.२. शिवस्याधिवासहोमः]

सद्योजातेन पूर्वायां समिद्धोमं समाचरेत् ॥ ८० ॥
आग्नेय्यां हृदयेनैव याम्यायां गुह्यमन्त्रतः[५]।
नैर्ऋत्यां शिखया हुत्वा वारुण्यां वर्ममन्त्रतः[६] ॥ ८१ ॥
वायव्यां कवचेनैव सौम्यायां पुरुषेण तु[७]।
ऐशान्यां शिरसा हुत्वा पञ्चमेन प्रधानके[८] ॥ ८२ ॥
आज्यं हुत्वा हृदा मन्त्री शिरसा च चरुं हुनेत्।
लाजं हुत्वा तु शिखया तच्चूर्णं कवचेन तु[९] ॥ ८३ ॥
माषं वक्त्रेण जुहुयान्नेत्रेण तु तिलाहुतिः[१०]।
[११]सद्येन सर्षपं हुत्वा यवं वामेन होमयेत् ॥ ८४ ॥
अघोरेण हुनेच्छालीन्प्रत्येकं व्याहृतिं ततः[१२]।
शतमर्धं तदर्धं वा जुहुयात्क्रमशः पुनः ॥ ८५ ॥

---

१. 78a °सादनं] C, D °सदानीं A, B^{4} ; 78b परिधि°] A^{1}, B^{4}, C, प्रणिधि° A^{2}, lacune D.

२. 78c ऊर्ध्वप्रवेश°] A, B^{4}, वर्धप्रदेश° C पान्धवप्रवेश° D^{1}, पार्थिवप्रवेश° D^{2} ; 78d °मुखं क्रमात्] A, °मुपक्रमम् C, °मुखक्रमम् B^{4}, D.

३. 79d °संस्कारसंयुतम्] C, °संस्कारमुच्यते A, B^{4}, °संस्कार+++ D^{1}, °संस्कारस++ D^{2}.

४. 80a प्रणीताग्निं समादाय] Eds., प्रणीयनाग्निम् A, B^{4}, प्रणीतयनाग्निम् C, lacune D.

५. 81b याम्यायां] A, B^{4}, C, याम्यां (*v.f.*) D.

६. 81d वर्म°] A^{2}, B^{4}, C^{2}, धर्म° A^{1}, lacune C^{1}, D.

७. 82a वायव्यां] A, B^{4}, C, वायव्यौ D.

८. 82c ऐशान्यां] A^{2}, C, D, ईशान्यां A^{1}, lacune B^{4} ; सिरसा] A, D, lacune B^{4}, सिरसे C ; 82d प्रधानके] C, D, प्रधानकम् A, B^{4}.

९. 83c तु शिखया] Eds., शिखायां तु A^{1}, तु शिखाया A^{2}, D, lacune B^{4}, तु शिखायां C.

१०. 84a माषं वक्त्रेण] A^{2}, माषं मन्त्रेण A^{1}, lacune B^{4}, माषमन्त्रेण C, D.

११. Entre 84ab et 84cd, C répète 82cd-83ab. D^{1} répète 84ab.

१२. 85b °कं व्याहृतिं ततः] B^{4}, C, D, °कं व्याहृतिस्तथा] A^{1}, °कव्याहृतिस्तथा A^{2}.

उपाहुतिं ततः कुर्यात्पूर्वसंख्याक्रमेण तु[१]।
घृतं मिमिक्ष इत्याज्यं देवस्य त्वा चरुं हुनेत्[२] ॥ ८६ ॥
विरूपाक्षद्वयेनैव लाजं सक्तुं च होमयेत्[३]।
कद्रुद्रायेति वै माषं यवं यत्ते यमेति च[४] ॥ ८७ ॥
यो रुद्र सर्षपं हुत्वा आ वो राजा यवस्य तु[५]।
त्र्यम्बकेन हुनेच्छालिं द्रव्यान्ते व्याहृतिं हुनेत्[६] ॥ ८८ ॥
शिवाधिवासनं ह्येवं शृणु गौर्यधिवासनम्[७]।

[१०.४.३. गौर्या अधिवासहोमः]

समिदाज्यचरुं लाजं तिलसर्षपमाषकाः[८] ॥ ८९ ॥
होमद्रव्याणि सप्तैते जुहुयात्तु विशेषतः।
गौरीमिमाय मन्त्रेण समिद्धोमं समाचरेत् ॥ ९० ॥
गौरीगायत्रिमन्त्रेण घृतं हुत्वा विचक्षणः।
देवस्य त्वा चरुं हुत्वा गौरीबीजेन लाजकम्[९] ॥ ९१ ॥
यत्ते यमं तिलं हुत्वा सर्षपं कवचेन तु[१०]।
माषं हुत्वा वृतं ते व्य शतमर्धार्धमेव वा[११] ॥ ९२ ॥
निश्येवं जागरं कुर्यात्प्रभाते स्थापनं भवेत्[१२]।

---

१. 86a उपाहुतिं] A, B^4, D, पूर्वहुतिं C ; 86b °पूर्वसंख्या°] A, B^4, D, °पूर्वं संख्यात् C^1, °पूर्वं संख्या° C^2.

२. 86c मिमिक्ष इत्याज्यं] A^1, C, मिमिक्ष द्वत्याज्यं A^2, मिक्ष इत्याज्यं B^4, lacune D.

३. 87b सक्तुं] A^2, B^4, C^1, D, सक्थुं A^1, C^2.

४. 87d यत्ते यमेति] C^1, D^2, यत्तेषु मेन्ति A^1, यत्ते मेन्ति A^2, यत्ते च मेन्ति B^4, घत्ते यमेति C^2, यत्ने यमेति D^1.

५. 88a रुद्र] A, B^4, D, रुद्रं C ; 88b आ वो] A^2, C, आ पो A^1, B^4, lacune D ; यवस्य] A, B^4, यमस्य C, D.

६. 88c त्र्यम्बकेन] A^1, B^4, D, त्रियम्बकेन A^2, C^1, त्रियम्बकाद्° C^2.

७. 89b गौर्यधिवासनम्] Eds., गौर्याधिवासनम् A (etc.).

८. 89c लाजं ति°] A^1, लाजंश्ति° A^2, लाजान्ति° B^4, C, lacune D ; 89d °माषकाः] A^1, °माषकान् A^2, B^4, C, D.

९. 91d लाजकम्] A, B^4, C, लात्मकम् D.

१०. 92a यमं] A^1, B^4, C^1, D, यमुम् A^2, याम् (*v.f.*) C^2.

११. 92c वृतं ते व्य] A^1, वृतं तेद्य A^2, B^4, घृतात्ते द्या C^1, घृतात्के द्या C^2, घृतत्नेद्या D^1, घृतत्केद्य D^2.

१२. 93a निश्येवं] A^1, B^4, C, D^2, निशिशेषं A^2, निशेवं D^1.

[११. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः सार्धं स्नानं कृत्वा विशेषतः[१] ॥ ९३ ॥
अङ्गन्यासकरन्यासौ पूर्वोक्तविधिना कुरु[२] ।
शयनाद्देवमुत्थाप्य प्रागानन उपस्थितः[३] ॥ ९४ ॥
गन्धादिना समभ्यर्च्य हृदयं मन्त्रमुच्चरन्[४] ।
गौरीमेवं समुत्थाप्य पूजयित्वा विशेषतः[५] ॥ ९५ ॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात् ।

[११.१. दक्षिणा]

आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ९६ ॥
पञ्चाङ्गभूषणैर्युक्तां दक्षिणां दापयेत्ततः[६] ।
दशनिष्कोऽधमो ज्ञेयो द्विगुणो मध्यमो भवेत्[७] ॥ ९७ ॥
उत्तमं त्रिगुणं प्रोक्तमाचार्यस्य तु दक्षिणा[८] ।
अष्टभागैकभागं तु मूर्तिपानां च दक्षिणा[९] ॥ ९८ ॥
द्विगुणं वास्तुहोमस्य दैवज्ञस्य तथा भवेत्[१०] ।
परिचाराणां सर्वेषां यथाश्रद्धं तु दक्षिणा[११] ॥ ९९ ॥
गौर्याश्च स्थापकायैव एतदर्धं प्रदापयेत्[१२] ।

---

१. 93d कृत्वा] A, B^4, C, D^2, हुत्वा D^1.

२. 94a °न्यासकरन्यासौ] A, °न्यासकरन्यासं B^4, C^1, D, °न्यासं करन्यासं C^2.

३. 94c शयना°] A^1, B^4, C, D, यशना° A^2 ; 94d प्रागानन] A^2, C, D, प्राङ्मुखीन A^1, प्राग++ B^4.

४. 95b हृदयं मन्त्रमुच्चरन्] B^4, C, D^1, हृदमन्त्रं समुच्चरन् A, हृदयमन्त्रं समुच्चरन् D^2.

५. 95d विशेषतः] A, यथाविधि B^4, C, D^1, यथाविधिः D^2.

६. 97a °भूषणै°] A^1, B^4, C, D, °भक्षणै° A^2.

७. 97c °निष्कोऽधमो ज्ञेयो] A, B^4, C^1, °निष्कोऽधमा ज्ञेया C^2, °निष्कोऽधमो ज्ञेया D.

८. 98a उत्तमं त्रिगुणं प्रोक्त°] A, ++++प्रोक्तं गुणा° B^4, उत्तमं द्विगुणं प्रोक्त° C, ++++गुणं प्रोक्त° D.

९. 98d च] A^1, तु A^2, C, D, lacune B^4.

१०. 99b दैवज्ञस्य] C, D^2, दक्षज्ञस्य A^1, देवज्ञस्य A^2, D^1, lacune B^4.

११. 99d °श्रद्धं तु] A, °श्रद्धा तु B^4, D, °शक्तिश्च C^1, °शक्तिं च C^2.

१२. 100a स्थापकायैव] A^2, C, D, स्थापकाश्चैव A^1, स्थापका ++ B^4.

[११.२. आसनादि]

आसनं कल्पयेद्धीमान्स्नानश्वभ्रद्वयोरपि[१] ॥ १००॥
अनन्तं पद्मं विमलं कल्पयेद्विधिना सह[२]।
तत्तन्मन्त्रमनुस्मृत्य पूजयित्वा यथाविधि॥ १०१॥

[११.३. कलान्यासः]

[३]सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम्।
ब्रह्मघोषसमायुक्तं स्वस्तिसूक्तसमन्वितम्॥ १०२॥
प्रदक्षिणं तथा कृत्वा प्रासादं गुरुणा सह।
पुत्रभ्रातृकलत्रैश्च यजमानो व्रजेदनु॥ १०३॥
स्नानवेद्यां न्यसेद्देवं देवीं चैव विशेषतः।
गन्धपुष्पादिना पूज्य कलाङ्गानि ततो भवेत्॥ १०४॥
गौर्याश्चाङ्गकलाश्चैव गौरीदेहे तु विन्यसेत्[४]।
घृतं शिरोर्पणं कुर्याद्धेमदूर्वाङ्कुराक्षतैः[५] ॥ १०५॥
हृन्मन्त्रं तु समुच्चार्य मूर्ध्नि बाह्वोश्च पादयोः[६]।

[११.४. मन्त्रन्यासः]

[११.४.१. शिवमन्त्रन्यासः]

शिवकुम्भं समादाय शिरसा धारयेद्गुरुः ॥ १०६॥
तत्तन्मूर्तिधराश्चैव तत्तत्कुम्भं समुद्धरेत्[७]।
स्थापयेत्प्रतिमाग्रे तु तत्तन्मन्त्रं समुच्चरन्[८] ॥ १०७॥
मुहूर्तं निरीक्ष्य दैवज्ञो गुरवे संनिवेदयेत्[९]।

---

१. 100d ॰श्वभ्रद्व॰] C, D, ॰श्वभ्रं द्व॰ A, B^4.

२. 101a पद्मं विमलं] C^2, पद्मपीठं वा A, पद्मविमलं B^4, C^1, lacune D.

३. C^2 omet 102b-102c.

४. 105a ॰कलाश्चैव] A^1, B^4, D^1, ॰कलां चैव A^2, C, D^2.

५. 105c घृतं] A^2, B^4, C^1, पृतं A^1, घृते C^2, घृत॰ D.

६. 106a हृन्मन्त्रं तु समुच्चार्य] A, हृदयमन्त्रमुच्चार्य B^4, C, हृदयमन्त्रं समुच्चार्य D.

७. 107a ॰मूर्तिधरा॰] A^2, B^4, ॰मूर्ध्निधरा॰ A^1, C, D.

८. 107d समुच्चरन्] A, समुद्धरेत् B^4, C, D.

९. 108a मुहूर्तं] (*v.f.*) A, B^4, मुहुर् C^1, lacune C^2, D ; दैवज्ञो] A^1, C, देवज्ञो A^2, B^4, lacune D ; 108b ॰निवेदयेत्] A, C^2, ॰निवेशयेत् B^4, D, lacune C^1.

शुभे मुहूर्ते संप्राप्ते प्रतिष्ठाकर्म कारयेत्॥ १०८॥
कुम्भाद्बीजं समादाय प्रतिमस्य हृदि न्यसेत्[१]।
हृदयं हृदये न्यस्य शिरः शिरसि विन्यसेत्॥ १०९॥
[२]शिखायां तु शिखां न्यस्य कवचं स्तनमध्यतः[३]।
अस्त्रं हस्तप्रदेशेषु नेत्रं नेत्रेषु विन्यसेत्[४]॥ ११०॥
वर्धनीबीजमादाय पिण्डिकायां तु विन्यसेत्[५]।
विद्येशानाभितः स्थाप्य तत्तत्कुम्भाद्विशेषतः[६]॥ १११॥
तेनोदकेन संस्नाप्य पञ्चब्रह्ममुदीरयन्[७]।
व्योमव्यापिनमुच्चार्य गन्धतोयेन स्नापयेत्[८]॥ ११२॥
[९]स्नपनं कारयेदन्ते यथावित्तानुसारतः।

[११.४.२. गौर्यादिमन्त्रन्यासः]

गौरीकुम्भं समादाय देव्यग्रे तु विनिक्षिपेत्॥ ११३॥
सुमुहूर्ते सुलग्ने तु मन्त्रन्यासं समारभेत्।
उमाकुम्भादुमाबीजमादाय हृदि विन्यसेत्॥ ११४॥
मूर्ध्नि कण्ठे च योनौ च गौरीबीजं सुविन्यसेत्[१०]।
शक्तयः परितः स्थाप्य तत्तत्कुम्भाद्विशेषतः[११]॥ ११५॥
तेनोदकेन संस्नाप्य गौरीबीजमुदाहरन्।
स्नपनं कारयेदन्ते पूर्वोक्तविधिना सह॥ ११६॥

---

१. 109b प्रतिमस्य हृदि न्यसेत्] B^4, C^1, D, प्रतिमां हृदि विन्यसेत् A, प्रतिमासा हृदि न्यसेत् C^2.

२. D^1 omet 110ab-114cd.

३. 110a शिखां] A, B^4, C, D^1, शिखयां D^2.

४. 110d नेत्रेषु] A^2, C, नेत्रे तु A^1, B^4, D^2.

५. 111a वर्धनी°] A, B^4, D^2, वर्धनीं C ; 111b पिण्डिकायां तु] A^1, B^4, C, D^2, प्रतिमां हृदि A^2.

६. 111d °कुम्भाद्°] A^2 (etc.), °कुम्भे A^1.

७. 112a संस्नाप्य] A, B^4, संस्थाप्य C, D^2.

८. 112c °व्यापिनमुच्चार्य] C, D^2, °व्यापीन्समुच्चार्य A^1, °व्यापि समुच्चार्य A^2, lacune B^4.

९. C omet 113ab-114cd.

१०. 115a कण्ठे] A^1, D, कर्णे A^2, B^4, lacune C.

११. 115c शक्तयः] A, C, D, शक्ति+ B^4.

अन्यतो जाह्नवीबीजं तथापस्मारसोमयोः[१]।
तत्तद्धृदि सुविन्यस्य पूजयेत्तु स्वनामतः[२]॥ ११७॥

[११.५. पूजा कल्याणं च उत्सवश्च]

सुशुद्धे मण्डपे स्थाप्य देवदेव्यौ विशेषतः[३]।
वस्त्राभरणमालाभिर्भूषयेत्तु यथाविधि॥ ११८॥
अर्चनोक्तं समभ्यर्च्य नैवेद्यं पायसं ददेत्[४]।
हृदा चाचमनं दत्वा निर्माल्यं तु विसर्जयेत्[५]॥ ११९॥
ताम्बूलं दापयेद्धीमान् पञ्चगन्धसमन्वितम्[६]।
उदकं दापयेद्गौर्या गौरीबीजमुदाहरन्॥ १२०॥
पुनराचमनं दद्यात्ताम्बूलं तु निवेदयेत्।
[७]कल्याणं कारयेत्पश्चात्पूर्वोक्तविधिना सह॥ १२१॥
उत्सवं कारयेदन्ते सप्ताहं विधिना सह।

[१२. नृत्तमूर्तिस्थापनफलम्]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्॥ १२२॥
इहैव धनवान्धीमान्परलोके शिवं व्रजेत्[८]।

---

१. 117a अन्यतो जाह्नवीबीजं] A^1, न्यतं जाह्नवीबीजं A^2, lacune B^4, तिष्यतं जानवन्नवीबीजं C^1, तिष्यतजान पन्नवीबीजं C^2, तिष्यतं जन्नवन्हविबीजं D ; 117b तथापस्मारसोमयोः] A, वै सूर्यसोमयोः C, D.

२. 117c °तद्धृदि सुविन्यस्य] C^2, °तद्धृदिषु विन्यस्य] A, B^4, C^1, D.

३. 118a सुशुद्धे] A, B^4, सशण्ये C^1, ससव्ये C^2, सुसुव्ये D ; स्थाप्य] A, C, D, स्नाप्य B^4 ; 118b देवदेव्यौ] A, देवं देवीं B^4, C, D.

४. 119b नैवेद्यं] A^1 (etc.), निवेद्यं A^2.

५. 119c हृदा चाचमनं] A, C, D^2, हृदादाचमनं B^4, D^1.

६. 120a दापयेद्धी°] A^1 (etc.), स्थापयेद्धी° A^2; 120b पञ्चगन्ध°] Eds (cf. 35.113ab), पञ्चासन° A (etc.).

७. A^1 omet 121cd-122cd; D^1 omet 122ab.

८. 123a °धीमान्°] A^1, °श्रीमान्° A^2, B^4, C, D ; 123b व्रजेत्] B^4, यजेत् A, C, D.

प्रतिष्ठा नृत्तमूर्तेश्च प्रोक्ता चेह विशेषतः[१] ॥ १२३ ॥
चन्द्रशेखरमूर्तेस्तु स्थापनं शृणु चानल[२]।

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तरूपस्थापनपटलः [एकोनचत्वारिंशत्तमः][३] ॥

---

१. 123c चेह] A^1, B^4, D^2, येह A^2, च हि C^1, च ह D^1.

२. 124a °मूर्तेस्तु] A, B^4, C^2, D, °मूर्तेषु C^1.

३. A^2: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तमूर्तिस्थापनपटलो द्वात्रिंशतिः।
B^4 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तमूर्तिस्थापनपटलो द्वात्रिंशतम् (हरिः ओं ।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे ++ मूर्तिस्थापनविधिरेकत्रिंशः पटलः।
C^2: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तमूर्तिस्थापनविधिरेकत्रिंशत्पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तमूर्तिस्थापनपटलद्वात्रिंशतिः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे नृत्तरूपस्थापनपटलः त्रिंशतितमः।

[चत्वारिंशत्तमः पटलः]
[चन्द्रशेखरस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि चन्द्रशेखरमूर्तिनः[२]।
स्थापनं भुक्तिदं प्रोक्तं राजराष्ट्रविवर्धनम्[३] ॥ १ ॥

[१. चन्द्रशेखरप्रतिष्ठाकालः]

उत्तरायणकाले तु शुक्लपक्षे शुभे दिने।
स्थापयेद्देशिको धीमाञ्शुभवारे तिथौ तथा[४] ॥ २ ॥

[२. रत्नन्यासः]

[५]मण्डपे मण्डिते रम्ये स्थण्डिलं शालिभिः कुरु।
तण्डुलैः शोभितं कृत्वा दिग्देवानभितो यजेत् ॥ ३ ॥
तन्मध्ये तु न्यसेत्पीठं नवकोष्ठसमन्वितम्[६]।
सर्वातोद्यसमायुक्तं रत्नानि क्रमशो न्यसेत्[७] ॥ ४ ॥
वज्रं मरकतं नीलं वैडूर्यं च प्रवालकम्[८]।
स्फटिकं पुष्परागं च मौक्तिकं तु विशेषतः[९] ॥ ५ ॥
महादिक्षु न्यसेदेतान्माणिक्यं मध्यमे न्यसेत्[१०]।
ततो देवं समावेश्य स्निग्धं कृत्वा यथाविधि[११] ॥ ६ ॥
गौरीपीठे न्यसेद्देवीं स्निग्धं कृत्वा विशेषतः[१२]।

---

१. Manuscrits utilisés : A^{1}, A^{2}, B^{4}, B^{5}, C^{1}, C^{2}, D^{1}, D^{2}, E, G.

२. 1a °मूर्तिनः] A (etc.), °मूर्तिना B^{5}.

३. 1c भुक्तिदं] A (etc.), मुक्तिदं C^{2}.

४. 2c स्थापयेद्देशिको] A (etc.), स्थापने ++को C^{1}, स्थापयेद्दे +को C^{2}.

५. G omet 3b-5a.

६. 4a तु न्यसेत्पी°] A (etc.), विन्यसेत्पी° B^{4}.

७. 4c सर्वातोद्य°] A, C, D^{2}, E, lacune B^{4}, D^{1}, सर्ववाद्य° B^{5}.

८. 5a वज्रं] A (etc.), चन्द्रं E ; 5b वैडूर्यं] A, B^{5}, C^{2}, D, lacune C^{1}, स्थण्डिलं G.

९. 5c पुष्परागं] A^{1}, पुष्यरागं A^{2} (etc.).

१०. 6a न्यसेदेतान्°] A, E, न्यसेद्देवान्° $B^{4\text{-}5}$, C, D ; 6b मध्यमे] B^{5} (etc.), मध्यतो A, E, lacune B^{4}.

११. 6c देवं समावेश्य] A, G, देवान्समायोज्य $B^{4\text{-}5}$, C^{2}, E, lacune D.

१२. 7a °पीठे] G, °पीठं A, B^{4}, D, E, °बीजं C ; न्यसेद्देवीं] B^{5}, न्यसेद्देवं A (etc.).

[३. नयनमोक्षणम्]

शुद्धिं कृत्वा यथान्यायं कुर्यान्नयनमोक्षणम्[१] ॥ ७ ॥
प्रच्छन्नपटसंयुक्ते मण्डपे समलङ्कृते[२]।
[३]शालिभिः स्थण्डिलं कुर्यात्तण्डुलैः समलङ्कृतम्[४] ॥ ८ ॥
तस्य मध्ये न्यसेद्देवं प्राङ्मुखं हृदयेन तु[५]।
तस्यैव वामतो भागे स्थाप्य गौरीं विचक्षणः ॥ ९ ॥
परितोऽष्टौ घटान्न्यस्त्वा सवस्त्रान्वारिपूरितान्[६]।
लोकपालाधिदैवत्यान्पूज्य गन्धादिना बुधः[७] ॥ १० ॥
सर्वातोद्यसमायुक्तं हेमसूच्याभिलेखयेत्[८]।
पक्ष्मरेखां पुरा कृत्वा ततो वै कृष्णमण्डलम्[९] ॥ ११ ॥
ज्योतिर्मण्डलमालिख्य नेत्रमन्त्रमुदाहरन्।
तर्जन्यनामिकामध्यैः प्रोतहेमनखेन तु[१०] ॥ १२ ॥
मधुना तर्पयित्वा तु नेत्रमन्त्रमुदाहरन्।
हृदयेन घृतं तर्प्य गौर्याप्येवं समाचरेत्[११] ॥ १३ ॥
मधुक्षीरघृतं चैव दर्शयेद्बीजमुख्यया[१२]।
गौर्धेनुभव्यमन्त्रेण दर्शयेद्धेनुमुत्तमाम्[१३] ॥ १४ ॥

---

१. 7c शुद्धिं] A^2 (etc.), शुद्धं A^1 ; 7d कुर्यान्नयन°] A (etc.), lacune B^4, आस्यं नयन° D^1,

२. 8a °संयुक्ते] B^5, °संयुक्त° A (etc.).

३. G omet 8cd.

४. 8d °लङ्कृतम्] A (etc.), °लङ्कृतैः B^5.

५. 9a तस्य मध्ये] A, B^5, C, D, E, lacune B^4, तन्मध्यमे G.

६. 10a ऽष्टौ] A (etc.), ऽष्ट° B^5 ; °न्यस्त्वा] A (etc.), °स्थाप्य E,

७. 10c °दैवत्यान्°] A^2 (etc.), °दैवत्या A^1, E ; 10d गन्धादिना] B^5, C, D, E, हासानिना A, lacune B^4, भासानिना G.

८. 11a सर्वातोद्य°] A (etc.), सर्ववाद्य° B^5 ; 11b °सूच्याभि°] A (etc.), °सूच्या वि° E.

९. 11c पक्ष्म°] A, B^5, G, lacune B^4, पक्ष° C, D, E.

१०. 12c °मध्यैः] Eds., °मध्ये A (etc.) ; 12d प्रोतहेम°] A^1(var.), $B^{4\text{-}5}$, D, G, प्रोक्तहेम° A, प्रोतहैम° E, प्रतर्होम° C^1, प्रोतहोम° C^2.

११. 13a तर्प्य] A (etc.), गव्यं B^5 ; 13d °प्येवं] A, B^4, एवं C, D, E, ह्येवं B^5, G.

१२. 14b °मुख्यया] A (etc.), °मुद्रया A^1(var.), B^5, C^1 (var.), lacune B^4.

१३. 14c गौर्धेनुभव्य°] A (etc.), गौर्धेनुगव्य° B^5, गोर्धेनुहव्य° G ; 14d °मुत्तमाम्] A (etc.), °मन्त्रतः B^5.

[१]ब्रह्मजज्ञानमन्त्रेण ब्राह्मणान्संप्रदर्शयेत्[२]।
प्रच्छन्नपटमावर्ज्य जनान्सर्वांश्च दर्शयेत्[३] ॥ १५ ॥

[४. प्रतिमाशुद्धिः ग्रामप्रदक्षिणं च]

[४]शुद्धिं कृत्वा ततो देवं देवीं पञ्चमृदम्भसा[५]।
व्योमव्यापि समुच्चार्य पञ्चगव्येन सेचयेत्[६] ॥ १६ ॥
शुद्धैरुक्थेति मन्त्रेण शुद्धतोयेन सेचयेत्[७]।
अभिषिच्य ततो देवीं गौरीगायत्रिमन्त्रतः[८] ॥ १७ ॥
वस्त्राभरणमालाभिर्देवं देवीं च भूषयेत्[९]।
ग्रामप्रदक्षिणं कुर्यात्तूर्यघोषसमन्वितम्[१०] ॥ १८ ॥
पिञ्छचामरसंयुक्तं धूपदीपसमाकुलम्।

[५. जलाधिवासः]

जलाधिवासनं कुर्यान्नद्यां वाप्यामथापि वा[११] ॥ १९ ॥
[१२]तीरे समतले स्थाप्य पूजयित्वा हृदा बुधः।
आवेष्ट्याहतवस्त्रेण देवं देवीं विशेषतः[१३] ॥ २० ॥
जलमध्ये प्रपां कृत्वा चतुष्पादसमन्विताम्।
तस्य मध्ये न्यसेद्देवं स्थितं वा शयितं तु वा[१४] ॥ २१ ॥

---

१. C^1 et C^2 omettent 15b-17a.

२. 15b ब्राह्मणान्संप्र°] B^{4-5}, D, E, ब्राह्मणानां च A, ब्राह्मणानपि G.

३. 15c °सर्वांश्च] A, G, lacune B^4, °भुक्तांश्च B^5, °भक्तांश्च D, E.

४. G omet 16b-17c.

५. 16a देवं] A (etc.), देवीं G ; 16b °मृदम्भसा] Eds, °मृतं तथा A^1, °मृताम्भसा A^2, B^{4-5}, E, °मृताम्भवान् D^1, °मृताम्भसान् D^2.

६. 16c °व्यापि समुच्चार्य] A, °व्यापिनमुच्चार्य B^4 (etc.) ; 16d °गव्येन] A (etc.), °गव्याभि° B^5.

७. 17a °क्थेति] A^2, D^2, °त्थेति A^1, lacune B^4 °द्धेति B^5, °केति D^1, E.

८. 17d °गायत्रिमन्त्रतः] A, °गायत्रिया तथा B^{4-5}, C^1, D, E, °गायत्रितास्तथा C^2.

९. 18b च भूषयेत्] A, G, सुभूषयेत् B^{4-5} (etc.).

१०. 18c कुर्यात्°] A, B^4, कृत्वा B^5, C, D, E, G ; 18d °तूर्यघो°] A, E, lacune B^4, °कुर्याद्घो° B^5, C, D.

११. 19c वाप्यामथापि वा] A, C, D, E, lacune B^4, वा दीर्घिकासु वा G.

१२. B^5 et C omettent 20ab-21cd.

१३. 20d देवं] B^5, देव° A (etc.).

१४. 21c शयितं] G, शयनं A (etc.).

[६. मण्डपादिकल्पनम्]

[६.१. मण्डपलक्षणम्]

आलयस्याग्रतः कुर्यान्मण्डपं विधिपूर्वकम्।
दशद्वादशहस्तं वा दर्पणोदरसन्निभम्॥ २२॥
षोडशस्तम्भसंयुक्तं चतुर्द्वारविभूषितम्।
अष्टमङ्गलसंयुक्तमष्टदिग्ध्वजशोभितम्[१]॥ २३॥
एकाशीतिपदं कृत्वा मध्यमे नव वेदिका[२]।
रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम्॥ २४॥

[६.२. कुण्डकल्पनम्]

परितः कल्पयेत्कुण्डं चतुरश्रं चतुर्दिशि।
आग्नेयादिषु कोणेषु योन्याकारं प्रकल्पयेत्॥ २५॥
प्राक्कुण्डवेदिकामध्ये कुण्डं प्राधानिकं कुरु।
मेखलात्रयसंयुक्तं द्वित्रिभिश्चतुरङ्गुलैः॥ २६॥
गोमयालेपनं कृत्वा पर्यग्निकरणं कुरु[३]।

[६.३. स्नानश्वभ्रकल्पनम्]

आनीय देवं देवीं च तीरे समतले जलात्[४]॥ २७॥
मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत्।
द्विमेखलासमायुक्तं नालावटसमन्वितम्[५]॥ २८॥
श्वभ्रमध्ये न्यसेद्देवं देवीं चैव हृदा बुधः[६]।
शुद्धिं कृत्वा विशेषेण भूषयेद्भूषणार्हकैः॥ २९॥

---

१. 23d °ध्वज°] A (etc.), °गज° B^5.

२. 24b नव°] B^5 (etc.), °न च A, lacune B^4 .

३. 27b कुरु] A, ततः B^4 (etc.).

४. 27c आनीय] A, E, G, आनयेद्° B^4, C, D, आग्नेये B^5 ; 27d तीरे समतले जलात्] A (etc.), शिबिकायां रथेऽपि वा G.

५. 28c द्विमेखला°] A (etc.), त्रिमेखला° G ; 28d नालावट°] A, E, नानापट° B^4, नानापाद° C^1, नानापद° C^2, नानावट° B^5, D, तालावट° G.

६. 29b चैव हृदा बुधः] A, G, वै हृदयेन तु B$^{4-5}$, C, D, E.

[७. अधिवासः]

[७.१. शयनकल्पनादि]

स्थण्डिलं कल्पयेद्वेद्यां शालिभिस्तण्डुलैः सह[१]।
ततो लाजैस्तिलैर्दर्भैर्भूषयित्वा समन्ततः॥ ३०॥
अभ्यर्च्य हृदयेनैव शयनं कल्पयेत्तदा[२]।
अण्डजैर्मुण्डजैश्चैव रोमजैश्चर्मजैरपि[३]॥ ३१॥
उपर्युपरि संयुक्तं शयनं परिकल्पयेत्[४]।
शन्नो देवीति मन्त्रेण शाययेच्चन्द्रशेखरम्॥ ३२॥
शयनं पूर्ववत्कल्प्य देवीमुत्तरतो न्यसेत्।
रक्तवस्त्रेण संवेष्ट्य देवं देवीं कुशैः सह॥ ३३॥
ईशानशक्रयोर्मध्ये न्यसेत्कुम्भं च वर्धनीम्[५]।
सकूर्चं सापिधानं च सवस्त्रं हेमरत्नकम्[६]॥ ३४॥
चूतपल्लवसंयुक्तं चन्दनोदकपूरितम्[७]।
कुम्भमध्ये न्यसेद्बीजं तद्रूपं भावयेद्घटे[८]॥ ३५॥
उमाबीजं च वर्धन्यां ध्यात्वा चैव मनोन्मनीम्[९]।
तत्तद्बीजं समुच्चार्य पूज्य गन्धादिना बुधः॥ ३६॥
अभितः कलशानष्टावष्टविद्येश्वरात्मकान्।
द्रोणार्धतोयसंपूर्णान्हेमवस्त्रसमन्वितान्[१०]॥ ३७॥

---

१. 30a °वेद्यां] A^2 (etc.), °विद्वान् A^1.

२. 31b °त्तदा] A, C^1, G, °त्ततः B^5, C^2, E, lacune B^4, D.

३. 31d °जैश्चर्मजै°] A (etc.), °जैर्मर्मजै° A^1.

४. 32b शयनं परि°] B^5, C, D, E, G, शयनोपरि° A, B^4.

५. 34b च वर्धनीम्] G, सवर्धनीम् A (etc.).

६. 34d : les deux composés au pluriel dans tous les manuscrits.

७. 35a चूतपल्लव°] A, E, G, आम्रपल्लव° $B^{4\text{-}5}$, C, ++पल्लव° D.

८. 35c न्यसेद्बीजं] A (etc.), न्यसेद्देवं E.

९. 36b चैव] A, $B^{4\text{-}5}$, G, शैव° C, D, E,.

१०. 37d °हेमवस्त्र°] G, °हेम्ना चास्त्र° A, B^5, D^2(?), E, lacune B^4, °हेमशास्त्र° C^1, °हेमशस्त्र° C^2, °हेममाचास्त्र°(?) D^1.

सवस्त्रान्कूर्चसंयुक्तान्सापिधानान्सपल्लवान्[१]।
विन्यसेच्चाष्टवर्धन्यीः तत्तत्कुम्भान्तरालके[२]॥ ३८॥
गन्धपुष्पादिना पूज्य नैवेद्यान्तं विशेषतः।

[७.२. वियोगस्थापनविशेषः]

सहितस्थापनं ह्येतद्वियोगं शृणु चानल[३]॥ ३९॥
योन्याकाराणि कुण्डानि दिग्वर्धन्या विना तथा।
एवमेतत्क्रमाद्भिन्ने मण्डपे चाधिवासयेत्[४]॥ ४०॥

[७.३. होमः]

दिशास्वध्ययनं कुर्यात्ततो होमं समारभेत्[५]।
समिदाज्यचरुं लाजांस्तिलसर्षपवैणवान्॥ ४१॥
कुलत्थमाषमुद्गांश्च प्रत्येकं जुहुयाच्छतम्[६]।
अश्वत्थोदुम्बरप्लक्षाशोकबिल्वं च खादिरम्[७]॥ ४२॥
शमीमायूरसमिधः प्रोक्ता दिक्षु विदिक्षु च[८]।
पलाशं तु प्रधानं स्याच्छतमर्धार्धमेव वा॥ ४३॥
अयं त इध्म मन्त्रेण इध्मं हुत्वा पृथक्पृथक्[९]।
ईशानेन घृतं हुत्वा देवस्यत्वा चरुं हुनेत्॥ ४४॥
लाजं हुत्वा तु वामेन त्र्यम्बकेन तिलं हुनेत्।
गौरी शन्नेति मन्त्राभ्यां सर्षपं वैणवं हुनेत्[१०]॥ ४५॥

---

१. 38a सवस्त्रान्कूर्च°] A (etc.), सवस्त्रकूर्च° B^5.

२. 38d °कुम्भान्तरालके] $B^{4\text{-}5}$, C, D^2, E, °कुम्भानुरूपकैः A.

३. 39d °वियोगं शृणु चानल] A (etc.), lacune B^4, °वियोगस्थापनं शृणु G.

४. 40c एवमेतत्क्र°] A (etc.), एवमेव क्र° B^5 ; °भिन्ने] B^5, C, D, E, °भिन्नं A, °भिन्न° G.

५. 41b समारभेत्] A, B^5, C^2, E, G, समाचरेत् B^4, C^1, lacune D.

६. 42b °च्छतम्] A (etc.), °त्क्रमात् E.

७. 42cd °प्लक्षाशोकबिल्वं च] A^2, °प्लक्षशोकबिल्वं च A^1, G, °प्लक्षमशोकं बिल्व° $B^{4\text{-}5}$, C, D, E.

८. 43a °मायूरसमिधः] C, °माङ्गरसमिध° A^1, °सूरसमिधा A^2, °मायूरसमिधं B^4, °मायूरसमिधं B^5, lacune D, °मधूकसमिधः E, °कुशसमित्प्रोक्तं G ; 43b प्रोक्ता दिक्षु विदिक्षु च] C^2, °प्रोक्ताश्च दिग्विदिक्षु च] C^1, दिक्षु विदिक्षु च (*v.f.*) A, lacune B^4, संप्रोक्तादिग्विदिक्षु च B^5, क्तधिदिश्विदिक्षु च D, प्रोक्तदिक्षु विदिक्षु च E, क्रमाद्दिक्षु विदिक्षु च, G.

९. 44a अयं त इध्म] Eds, अयं तमिध्म A (etc.), अपन्तमिध्म B^5, अनन्तमिध्म G.

१०. 45c मन्त्राभ्यां] C^2, मन्त्रेण A (etc.), शन् नेत्रमन्त्रेण E, G ; 45d वैणवं] A (etc.), वैष्णवं G.

हृच्छिरश्शूलिकामन्त्रैः कुलत्थान्माषमुद्गकान्[१]।
प्रत्येकं व्याहृतिं हुत्वा पूर्णाहुतिमथाचरेत्॥ ४६॥
गौरीगायत्रिया चैव घृतं हुत्वा विचक्षणः।
गौर्या ब्रह्मषडङ्गैश्च प्रत्येकं तु दशाहुतिः[२]॥ ४७॥

[८. अधिवासानन्तरदिवसकृत्यम्]

प्रभाते स्नानं कुर्वीत आचार्यो मूर्तिपैः सह[३]।
पूर्ववद्धोमयेद्धीमान्ब्रह्माङ्गैश्च विशेषतः[४]॥ ४८॥

[८.१. स्नानश्वभ्रे प्रतिमाविन्यासः]

[५]स्नानश्वभ्रे न्यसेत्पीठं दारवं कूर्चसंयुतम्[६]।
तत्रासनत्रयं कल्प्य पूज्य शक्तिसमन्वितम्॥ ४९॥
आचार्यं पूजयेत्तत्र मूर्तिपानथ पूजयेत्।
शयनाद्देवमुत्थाप्य ततो देवीं समुद्धरेत्॥ ५०॥
पूर्वाभिमुखमास्थाप्य पूजयित्वा यथाविधि।
देवं देवीं विशेषेण शिवकुम्भं च वर्धनीम्[७]॥ ५१॥
उद्धृत्य हृदयेनैव प्रासादस्य तु प्रदक्षिणम्[८]।
[९]स्नानश्वभ्रे न्यसेद्देवं देवीं तस्योत्तरे न्यसेत्[१०]॥ ५२॥
भिन्ने श्वभ्रेऽथवा स्थाप्य कलाङ्गानि ततो न्यसेत्[११]।

---

१. 46a हृच्छिरश्शूलिका°] A (etc.), lacune B^4, प्रक्शिरश्शूलिका° C^2, हृच्छिरःकुलिका° E ; 46b कुलत्थान्माष-मुद्गकान्] Eds., कुलस्थान्माषमुद्गकान् A (etc.), कुलुत्थं माषमुद्गकम् B^5.

२. 47d तु दशाहुतिः] A, G, lacune B^4, शतं हुनेत् B^5, D, E, ++तं हुनेत् C^1.

३. 48a प्रभाते स्नानं] A (etc.), स्नानं प्रभाते G.

४. 48d °ब्रह्माङ्गैश्च] A^2 (etc.), °ब्रह्मांश्चैव A^1.

५. Les manuscrits A omettent 49-52ab.

६. 49b दारवं] B^4, C, D, E, चारवं B^5.

७. 51d शिवकुम्भं] $B^{4\text{-}5}$, C, D, देवं कुम्भं E.

८. 52b प्रासादस्य] Eds, प्रासादं तु A (etc.).

९. G omet 52cd-53cd.

१०. 52d तस्योत्तरे] A (etc.), तत्रैवे C^2.

११. 53a भिन्ने] B^5, D, E, भिन्न° A, B^4, भित्ते C^1, भित्तौ C^2.

गौरीब्रह्मं ततोऽङ्गं च न्यस्त्वा देव्यां विशेषतः[१] ॥ ५३ ॥
घृतं शिरोर्पणं कुर्याद्दिवं देवीं विशेषतः[२]।

[८.२. बीजन्यासः]

सुमुहूर्ते सुलग्ने तु सर्वातोद्यसमायुतम्॥ ५४ ॥
[३]कुम्भाद्बीजं समादाय प्रतिमाया हृदि न्यसेत्[४]।
वर्धन्या बीजमादाय देव्याश्च हृदि विन्यसेत्[५] ॥ ५५ ॥
मूर्तिकुम्भैः शिवं स्नाप्य वर्धनीभिरुमां तथा[६]।

[८.३. स्नपनादि]

तदन्ते स्नपनं कुर्यादर्चनोक्तं समर्चयेत्[७] ॥ ५६ ॥
हविर्निवेदयित्वा तु ताम्बूलं च निवेदयेत्।
विवाहं कारयेदन्ते पूर्वोक्तविधिना सह॥ ५७ ॥
उत्सवं कारयेद्धीमाञ्शास्त्रदृष्टेन कर्मणा।

[९. चन्द्रशेखरस्थापनफलम्]

एवं यः कुरुते मर्त्यो भोगमोक्षमवाप्नुयात्॥ ५८ ॥
एतद्वै स्थापनं प्रोक्तमर्धनारीमथ शृणु[८]।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनपटलः [चत्वारिंशत्तमः][९] ॥

---

१. 53c °ब्रह्मं] A (etc.), °ब्रह्म B^{5}.

२. 54b विशेषतः] A, G, विधानतः B^{4-5}, C, D, E.

३. B^{4-5}, C, et D omettent 55b-55c.

४. 55b प्रतिमाया] A^{1} (var.), G, प्रतिमस्य A^{1} प्रतिमस्यं E.

५. 55d देव्याश्च हृदि विन्यसेत्] G, देव्यायाश्च हृदि न्यसेत् A, देव्यास्तु हृदये न्यसेत् B^{4-5}, C, D, E.

६. 56a °कुम्भैः] C, D, G, °कुम्भां A, °कुम्भे B^{4-5}, E ; स्नाप्य] B^{4} (etc.), स्थाप्य A, G.

७. 56c कुर्याद्°] Eds, कुम्भं A (etc.) ; 56d समर्चयेत्] A (etc.), विशेषतः C^{2}, lacune B^{4}, D.

८. 59b नारीमथ शृणु] A, E, नारीं शृणुष्व + B^{4}, नारीं शृणुष्व हि B^{5}, C^{1}, D^{2}, नारीं शृणुष्व वै C^{2}, नारीं शृणुष्वपि D^{1}, नारीं ततः शृणु G.

९. A^{1}, D^{2}, E : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनपटलः।
A^{2} : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनपटलत्रयस्त्रिंशतिः।
B^{4} : ... चन्द्रशेखरस्थापनपटलस्त्रयस्त्रिंशतिम् ।
B^{5} : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनविधिपटलः त्रयस्त्रिंशत्तमः।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनविधिः द्वात्रिंशः पटलः।
D^{1} : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनविधिपटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे चन्द्रशेखरस्थापनपटलः समाप्तः।

[एकचत्वारिंशत्तमः पटलः]
[अर्धनारीश्वरस्थापनम्[१]]

अतः परं प्रवक्ष्यामि स्थापनं चार्धनारिणः[२]।
शुभदं कामदं लोके पुत्रपौत्रविवर्धनम्॥ १॥

[१. प्रतिमालक्षणम्]

मानोन्मानप्रमाणानि पूर्वोक्तविधिना कुरु[३]।
दक्षिणांशे हरं कुर्यादुमां वै वामके कुरु[४]॥ २॥
कुञ्चितं दक्षिणं पादं वामपादं तु सुस्थितम्[५]।
परशुं हरिणं सव्ये वामे वै दर्पणोत्पलम्[६]॥ ३॥
कृत्तिवासधरः शर्वो दुकूलवसना उमा[७]।
उमायाः सुस्तनं कुर्यात्सुकेशं चालकान्वितम्[८]॥ ४॥
नयनार्धं ललाटे तु हरार्धे तु जटायुतम्[९]।
एवं लक्षणतः कृत्वा ततः स्थापनमारभेत्॥ ५॥

[२. अङ्कुरार्पणं रत्नन्यासश्च]

अङ्कुराण्यर्पयेत्पूर्वं पूर्वोक्तविधिना सह[१०]।

---

१. Manuscrits utilisés : A^1, A^2, C^1 , C^2 , D^1, D^2, E, G.

२. 1b चार्धनारिणः] A, C^1, D, G, चार्धनारिणम् C^2, चार्धनारिणा E.

३. 2a मानोन्मान°] A, E, G, मानोजान° C, D ; 2b °विधिना] A (etc.), °विना (*v.f.*) D^1.

४. 2c दक्षिणांशे] A, E, G, प्रदक्षिणांशे (*v.f.*) C, lacune D ; 2d वामके] A, G, वामतः C, D, E.

५. 3a कुञ्चितं दक्षिणं पादं] A (etc.), किञ्चिद्दक्षिणपादं वा (*v.f.*) C^1, किञ्चिद्दक्षिणपादं C^2 ; 3b तु सुस्थितम्] A, G, ऋजुस्थितम् C, D, E.

६. 3c हरिणं] A, C^2, G, हरिणे C^1, D, E ; 3d वामे वै दर्पणोत्पलम्] D, G, वामे वै दक्षिणोत्पलम् A^1, वामे वै दक्षिणो++ A^2, वामं वै दर्पणोत्पलम् C^1, वामे वै दर्पणोत्पले C^2, याम्ये वै दर्पणो भवेत् E.

७. 4a °वासधरः शर्वो] A^2, E, °वासधरः सर्वो A^1, °वासे धरः शर्वो C^1, °वासाधरः शर्वो C^2, °वासोधरः शि + D^1, °वासोधरः शर्वो D^2, °वासोधरं शर्वं G ; 4b दुकूलवसना उमा] A, C, E, lacune D, दुकूलवसनामुमाम् G.

८. 4c उमायाः सुस्तनं] A^1, उमास्ते सुस्तनं A^2, उमार्धे सुस्तनं C^1, D, E, उमार्धे सुस्तनीं C^2, उमां तु सुस्तनीं G ; 4d °सुकेशं चालकान्वितम्] C^1, D^2, E, °सुस्तनं चालकाञ्चितम् A^1, °सुस्तनं चालकान्वितम् A^2, °सुकेशीं चालकान्विताम् C^2, °सुकेशं चालकाञ्चितम् D^1, °सुकेशां चालकान्विताम् G.

९. 5a नयनार्धं] A^1, C, D^2, नयना + A^2, नयनार्यं D^1, शयनार्धं E, नयनार्ध° G.

१०. 6a °राण्यर्पयेत्पूर्वं] E, °रार्पणपूर्वे तु A, °रान्यर्पयेत्पूर्वे C, D, °रानर्पयेत्पूर्वं G.

पिण्डिकां विन्यसेन्मध्ये मण्डपे समलङ्कृते[१] ॥ ६॥
नवपदानि कृत्वा तु रत्नानि विधिवन्न्यसेत्[२]।
माणिक्यं पद्मरागं च वैडूर्यं च प्रवालकम्[३] ॥ ७॥
महादिक्षु न्यसेदेतान्मध्यमे हैमकूर्चकम्[४]।
तत्र देवं समायोज्य सुस्निग्धं कारयेत्ततः ॥ ८॥

[३. नेत्रमोक्षणम्]

शालिभिः स्थण्डिलं कृत्वा तिलदर्भैः परिस्तरेत्।
तन्मध्ये विन्यसेद्देवमभितोऽष्टघटान्न्यसेत्[५] ॥ ९॥
सकूर्चान्वसुदैवत्यान्सवस्त्रान्वारिपूरितान्[६]।
पूजयित्वा स्वनाम्ना तु धूपदीपसमन्वितम्[७] ॥ १०॥
अक्षिद्वययुते ऋक्षे नेत्रमोक्षणमारभेत्[८]।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत्[९] ॥ ११॥
[१०]कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्।
नेत्रमन्त्रं समुच्चार्य प्रोतहैमनखेन तु[११] ॥ १२॥
नेत्राणि मधुना तर्प्य मधुवातेति मन्त्रतः[१२]।

---

१. 6c पिण्डिकां] A^1 (etc.), पिण्डिका D^1.

२. 7a नवपदानि कृत्वा तु] C, D, E, G, नवं पदे तु कृत्वा तु A^1, नवपदे तु कृत्वा तु A^2 ; 7b विधिवन्न्यसेत्] A, G, विविधा न्यसेत् C, D^1, E, विविधान्न्यसेत् D^2.

३. 7c माणिक्यं] A^1, C^1, G, माणिक्कं A^2, C^2, D, मणिक्कं E.

४. 8a °दिक्षु न्यसेदेतान्°] A, E, °दिक्षु न्यसेद्देवं C^1, °दिक्षु न्यसेद्देवान्° C^2, °दिक्षु न्यसेदातान्° D^1, °निष्कं न्यसेदेतान्° D^2, lacune G ; 8b हैमकूर्चकम्] A^1, G, हैमकूर्चकान् A^2, हेमकूर्चकम् C, D, हेतुकूर्चकम् E.

५. 9c विन्यसेद्देवम°] A^2, C^1, D, E, विन्यसेद्देव्यान° A^1, न्यसेद्देवम° (*v.f.*) C^2, lacune G ; 9d °अभितोऽष्टघटान्न्यसेत्] A^2, °सवस्त्रान्वारिपूरितान् A^1, °अभितोऽष्टौ घटान्न्यसेत् C, D, E, +++ष्टौ घटान्न्यसेत् G.

६. 10a °वसुदैवत्यान्°] A (etc.), °वसुदेवत्यान्° D^1, °सुदेवत्यान्° (*v.f.*) E.

७. 10c स्वनाम्ना] A (etc.), सुनाम्ना E.

८. 11a अक्षिद्वययुते ऋक्षे] A^1, C^2, G, अक्षद्वययुते ऋक्षे A^2, अक्षद्वययुते प्लक्षे C^1, अक्षिद्वययुते प्लक्षे D, अक्षद्वयहिते ऋक्षे E.

९. 11c °सूचि] A^2, C, D, E, °सूची° A^1, G ; 11d पक्ष्म°] A, C^1, D^2, G, पक्ष° C^2, D^1, E.

१०. C^2, D^1 omettent 12ab.

११. 12d °हैमनखेन तु] A^1, °हेमनखेन तु A^2, °होमे नवैरपि C^1, °होमनखैरपि C^2, °हेमनवैरपि D, °हेमनखैरपि E, °हेमनवेन तु G.

१२. 13a मधुना] A (etc.), मधुन D^1.

सुवर्णदूर्वया विद्वान्तर्प्य नेत्रं घृतं हृदा[१] ॥ १३॥
गौर्धेनुभव्यमन्त्रेण सवत्सां गां प्रदर्शयेत्[२]।
[३]ब्रह्मजज्ञानमन्त्रेण ब्राह्मणानपि दर्शयेत्[४] ॥ १४॥
[५]प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत्।

[४. शुद्धिः प्रदक्षिणं च]

शुद्धिं कृत्वा विशेषेण पञ्चगव्यकषायकैः[६] ॥ १५॥
पञ्चब्रह्मं समुच्चार्य पञ्चगव्याभिषेचनम्[७]।
कषायं हृदयेनैव चन्दनोदकसंयुतम्॥ १६॥
स्रग्वस्त्रभूषणैर्भूष्य कुर्याद्ग्रामप्रदक्षिणम्[८]।
नानातोद्यसमायुक्तं नानादीपसमाकुलम्॥ १७॥
[९]नानापिञ्छसमायुक्तं नृत्तगेयसमाकुलम्[१०]।

[५. जलाधिवासः]

कण्ठदघ्ने जले धीमान्प्रपां कृत्वातिसुन्दराम्[११] ॥ १८॥
वितानध्वजमालाभिर्दर्भमालासमाकुलम्[१२]।
तन्मध्ये विन्यसेद्देवं नववस्त्रेण वेष्टयेत्[१३] ॥ १९॥

---

१. 13c सुवर्णदूर्वया] C (etc.), स्वर्णं च दूर्वया A ; 13d °तर्प्य नेत्रं] A, °तर्प्य नेत्र° C, D, E, °तल्प्य नेत्रं G.

२. 14a गौर्धेनुभव्य°] C, गोर्धेनुभव्य° A, G, गौर्धेनुभव्या° D^1, गौर्धेनुहव्या° D^2, गोधेनुहव्य° E ; 14b सवत्सां] A (etc.), सावत्सां E.

३. C^2 omet 14cd-15ab.

४. 14c ब्रह्मजज्ञानमन्त्रेण] A, G, प्रच्छन्नपटमावर्त्य D^1.

५. A et G omettent 15ab ; D^1 omet 15a.

६. 15c विशेषेण] A (etc.), विशेष D^2 (*v.f.*) ; 15d °कषायकैः] A (etc.), °क्षयायकैः D.

७. 16a °ब्रह्मं] A^1, C^1, D, E, °ब्रह्म A^2, G, °गव्य C^2 ; 16b °षेचनम्] C (etc.), °षेचयेत् A.

८. 17a स्रग्वस्त्र°] A^2, D^2, E, G, सुवस्त्र° A^1, C^2, स्रगस्त्र° C^1, सृश्वस्त्र° D^1 ; °भूष्य] A^2 (etc.), °भूष्यैः A^1.

९. A^2 omet 18ab.

१०. 18a °पिञ्छ°] A^1, C^2, E, G, °पिच्छ° C^1, °पिञ्चि° D^1, °पिञ्छि° D^2 ; 18b नृत्त°] A^1 (etc.), नृत्य° D^2 ; °समाकुलम्] A^1, G, °समन्वितम् C, D, E.

११. 18c °दघ्ने जले धीमान्°] E, G, °दघ्ने जले धीमा A^1, °मग्ने जले धीमान्° A^2, C, D^1, °मग्ने जलेद्धीमान्° D^2 ; 18d °तिसुन्दराम्] D, E, °तिसुन्दरम् A, C, तु सुन्दराम् G.

१२. 19b °मालासमाकुलम्] A, G, °मालाविभूषितम् C, D, °मालैर्विभूषितम् E.

१३. 19d वेष्टयेत्] A, G, वेष्टितम् C, D, E.

[६. मण्डपकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं दशहस्तकम्[१]।
[२]षोडशस्तम्भसंयुक्तं चतुर्द्वारसमायुतम्॥ २०॥
चतुस्तोरणसंयुक्तं दर्भमालाविभूषितम्।
तन्मध्ये वेदिकां कुर्यात्त्रिभागैकेन भागया[३]॥ २१॥
रत्निमात्रसमुत्सेधं दर्पणोदरसन्निभम्।
मानुषे कल्पयेत्कुण्डं दिशासु विदिशासु च[४]॥ २२॥
दिशासु चतुरश्रं स्याद्विदिशासु भगाकृतिः।
प्राक्कुण्डेशानयोर्मध्ये वृत्तं प्राधानिकं भवेत्[५]॥ २३॥
मेखलात्रयसंयुक्तं प्रत्येकं स्यात्त्रियङ्गुलम्[६]।
नाभियोनिसमायुक्तं विस्तारं हस्तमात्रकम्[७]॥ २४॥
मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत्[८]।
हस्तमात्रप्रविस्तारं मेखलात्रयभूषितम्॥ २५॥

[७. अधिवासः]

[७.१. शयनकल्पनादि]

स्थण्डिलं कारयेद्धीमानष्टद्रोणैश्च शालिभिः[९]।
[१०]तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि॥ २६॥
मध्यमे शयनं कल्प्य चर्मजादौरनुक्रमात्[११]।

---

१. 20a °दस्याग्रतः] C^{2}, D, E, G, °दादग्रतः A^{1}, °दाग्रतः A^{2} (*v.f.*), lacune C^{1}.

२. A et G omettent 20c-24a.

३. 21a वेदिकां कुर्यात्°] C, D^{2}, E, वेदिका कुर्यं D^{1} ; 21b त्रिभागैकेन भागया] C, D^{2}, E, मण्डपं दशहस्तकम् D^{1}.

४. 22c °कुण्डं] C, D^{1}, E, °धीमान्° (*v.f.*) D^{2}.

५. 23c प्राक्कुण्डेशान°] C^{1}, D, E, प्रागिन्द्रेशान° C^{2} ; 23d भवेत्] C^{2}, lacune C^{1}, स्मृतम् D, E.

६. 24b त्रियङ्गुलम्] C^{1}, त्रयाङ्गुलम् A^{1}, C^{2}, त्र्यङ्गुलम् A^{2}, D, E, तु त्र्यङ्गुलम् (*v.f.*) G.

७. 24d °मात्रकम्] A, G, °संयुतम् C, D, E.

८. 25a पार्श्वे] A, G, देशे C, D, E ; 25b स्नान° A (etc.), स्तार° D^{2}.

९. 26b °मानष्टद्रोणैश्च शालिभिः] A, G, lacune C, D, °मान्तण्डुलैश्च तिलैरपि E.

१०. E omet 26cd.

११. 27a कल्प्य] A^{2} (etc.), कल्प्यं A^{1} ; 27b °जादौ°] A^{2} (etc.), °चादौ° A^{1}, C^{1}, D^{2}.

नवशक्तीर्न्यसेत्तस्मिन्प्रतिमां विन्यसेत्क्रमात्[१] ॥ २७ ॥
जलादानीय देवेशं वस्त्रेण परिवेष्टितम्।
पूजयेद्धृदयेनैव शिवकुम्भं तु विन्यसेत्॥ २८ ॥
बिम्बस्य वामभागे तु वर्धनीं च क्रमान्न्यसेत्[२]।
सकूर्चौ सापिधानौ च सवस्त्रौ रत्नहेमकौ[३] ॥ २९ ॥
शिवबीजं शिवकुम्भे शिवरूपं च विन्यसेत्[४]।
गौरीबीजं तु वर्धन्यां न्यस्त्वा रूपं तु भावयेत्[५] ॥ ३० ॥
अर्चयित्वा विधानेन तत्तन्मन्त्रमनुस्मरन्।
अभितः कलशानष्टौ अष्टौ विद्येश्वरात्मकान्[६] ॥ ३१ ॥
द्रोणार्धतोयसंपूर्णान्सवस्त्रान्सापिधानकान्[७]।
विद्येशबीजसंयुक्तान्पूजयित्वा यथाविधि[८] ॥ ३२ ॥
नैवेद्यं दापयेद्धीमान्प्रत्येकं प्रतिमां तथा[९] ।
पुनराचमनं दद्यात्ततो होमं समारभेत्[१०] ॥ ३३ ॥

[७.२. होमः]

पलाशखादिराश्वत्थवटाः पूर्वादितः क्रमात्[११]।

---

१. 27c °शक्तीर्न्यसेत्तस्मिन्] C^2, G, °शक्तिं न्यसेत्तस्मिन् A, C^1, E, lacune D^1, °शक्तिं न्यसेत्धीमान् D^2.

२. 29b क्रमान्न्यसेत्] A (etc.), न्यसेत्क्रमात् C^2.

३. 29c सापिधानौ] A, C, G, lacune D, सापिधानं E ; 29d रत्नहेमकौ] A^2, रक्तहेमकौ A^1, C, D, E, हेमरत्नकौ G.

४. 30a शिवकुम्भे] A^2, C, शिवं कुम्भे A^1, G, शिवकुम्भे तु (*v.f.*) D, E.

५. 30d न्यस्त्वा रूपं तु भावयेत्] A (etc.), न्यस्त्वा रूपं तु विभावयेत् (*v.f.*) C^1, न्यस्व रूपं च विन्यसेत् D^1.

६. 31d अष्टौ विद्येश्वरात्मकान्] A^2(etc.), अष्टविद्येश्वरात्मिकान् A^1.

७. 32a द्रोणार्ध°] A, C^2, D, G, द्रोणार्धं C^1, द्रोणार्धे E.

८. 32c विद्येश°] A (etc.), विदेश° G ; 32d पूजयित्वा यथाविधि] C, D, G, बीजयित्वा यथाविधि A^1, स्थापयित्वा यथाविधि A^2, पूजयित्वा यथाविधिः E.

९. 33a धीमान्°] A (etc.), विद्वान्° E ; 33b °प्रत्येकं] A (etc.), lacune C^1, °प्रत्येकः D^1 ; तथा] A, G, विना C, D, E.

१०. 33d समारभेत्] A (etc.), समाचरेत् E.

११. 34c °खदिराश्वत्थ°] C, D^2, °खादिराश्वत्थ° A, G, °खादिराश्वर्थ° D^1, °भेदिराश्वत्थ° E ; 34b °वटाः पूर्वादितः क्रमात्] A^1, C^1, D, °वटं पूर्वादितः क्रमात् A^2, G, °वटाः पूर्वादिविदिक्षु च C^2, °वटः पूर्वादितः क्रमात् E.

शमीबिल्वमपामार्गमशोकं च विदिक्षु वै[१] ॥ ३४ ॥
समिदाज्यचरुं लाजांस्तिलसर्षपमाषकान्[२] ।
मधु क्षीरं गुलं तत्र जुहुयात्क्रमशः पुनः[३] ॥ ३५ ॥
शिवाग्निं जनयेत्पूर्वं पूर्वोक्तविधिना सह ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरः शिव एव च[४] ॥ ३६ ॥
चतुर्दिक्षु प्रधाने च कुण्डानामधिदेवताः[५] ।
वामा ज्येष्ठा च रौद्री च काली चैव विदिक्षु वै[६] ॥ ३७ ॥
समिधो जुहुयाद्दिक्षु शिवगायत्रिमन्त्रतः[७] ।
गौरीगायत्रिमन्त्रेण विदिक्षु विनियोजयेत् ॥ ३८ ॥
आज्यादिगुलपर्यन्तं सद्यादिकवचान्तकैः[८] ।
मन्त्रैर्हुत्वा विधानेन प्रत्येकं तु शताष्टकम् ॥ ३९ ॥
घृतादिगुलपर्यन्तमुपाहुतिमथाचरेत्[९] ।
त्र्यम्बकेन घृतं हुत्वा अहमस्मि चरुं हुनेत्[१०] ॥ ४० ॥
धान्यं हुत्वाग्निमीलेति तिलं यत्तोयमेव च[११] ।
[१२]जातवेदेति मन्त्रेण सर्षपं जुहुयात्क्रमात् ॥ ४१ ॥

---

१. 34d वै] A (etc.), च C^2.

२. 35a °चरुं लाजांस्ति°] A, °चरून्लाजान्ति° C, °चरुं लाजान्ति° D, °चरुं लाजति° E, °चरून्लाजांस्ति° G.

३. 35c क्षीरं गुलं] A^1, C^1, क्षीरगुलान् A^2, D, E, क्षीरगुलं C^2, G.

४. 36c ब्रह्मा] A, C^1, D, G, ब्रह्म° C^2, E.

५. 37a प्रधाने] A (etc.), प्रधानं C^1 ; 37b कुण्डानामधि°] A, C^1, D, G, चण्डानामधि° C^2, कुण्डानामधि° E.

६. 37d वै] A, च C (etc.).

७. 38a समिधो] C, D, E, समिधा A, G ; 38b शिवगायत्रिमन्त्रतः] A (etc.), ++गायत्रिमन्त्रतः C^1, शिवगौर्वादितः क्रमात् C^2.

८. 39a आज्यादिगुल°] C, D, G, आज्यादिगुण° A, E.

९. 40a घृतादिगुल°] C (etc.), घृतादिगुण° A ; 40b °मुपाहुतिम्] A^2 (etc.), °मपाहुतिम् A^1.

१०. 40c त्र्यम्बकेन घृतं] A, C^2, D^1, E, G, त्रियम्बकेन घृतं (*v.f.*) C^1, त्र्यम्बकेन व्रतं D^2 ; 40d अहमस्मि] A, C^1, D, G, अहस्मि C^2, अहमस्मिन्° E.

११. 41a धान्यं] A (etc.), धान्यां C^1 ; °ग्निमीलेति] A, G, °ग्निमीलेन C^1, D, E, °ग्निमेकेन C^2 ; 41b यत्तोयमेव च] A^2, G, यत्नोऽयमेव च A^1, यत्तेयमेव च C^1, D^2, धत्ते यमेव च C^2, यत्नेयमेव च D^1, यतेन्वयनीति च E.

१२. D^2 omet 41d-43a.

आ वो राजा माषस्योक्तं मधुवाता मधुं हुनेत्[१]।
गोक्षीरं जुहुयात्तत्र आप्यायस्वेति मन्त्रतः[२] ॥ ४२॥
गौरीगायत्रिमन्त्रेण गुलं हुत्वा विचक्षणः।
गौरीब्रह्माङ्गबीजैश्च प्रत्येकं जुहुयाच्छतम्[३] ॥ ४३॥
रात्रौ जागरणं ह्येवं प्रभाते स्थापनं भवेत्[४]।

[८. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत्[५] ॥ ४४॥
स्नानश्वभ्रे विशेषेण कल्पयेदासनत्रयम्[६]।
शयनाद्देवमुत्थाप्य ततः स्थापनमारभेत्[७] ॥ ४५॥
[८]...
सुशुद्धे मण्डपे रम्ये नयेद्देवं विशेषतः[९]।
वस्त्राभरणमालाभिर्यजेत्पूर्वोक्तमार्गतः[१०] ॥ ४६॥
हविर्निवेदयेत्पश्चात्सोपदंशं गुलान्वितम्[११]।
पुनराचमनं दत्त्वा निर्माल्यं तु विसर्जयेत् ॥ ४७॥
ताम्बूलं दापयेत्पश्चाद्धृदयेन विचक्षणः।

---

१. 42a आ वो राजा माषस्योक्तं] Eds., आ वो राजा नमस्योक्तं A, आ वो राजन्यवस्योक्तं C^1, E, अघोराजन्यवस्योक्तं C^2, आ पो रजन्यवस्योक्तं D^1, आ पो राजा नमस्योक्तं G ; 42b मधुं हुनेत्] A, D^1, E, lacune C^1, मधु हुनेत् C^2, हुनेन्मधु G.

२. 42c °क्षीरं] A (etc.), °क्षीरं तु (*v.f.*) D^1 ; 42d आप्यायस्वेति] A, C^1, E, G, आप्ययस्वेति C^2, आप्यायस्येति D^1.

३. 43c गौरी°] A (etc.), गौरीं C^1.

४. 44a रात्रौ जागरणं] A, निशि जागरकं C^1, निशि मङ्गलकं C^2, निशिमाद्गरकं D^1, निशि मागरकं D^2, निशि जागरकं E, निशि जागरणं G ; ह्येवं] A, C^1, G, ह्येव C^2, D, E.

५. 44c सार्धं] A, C, E, G, साद्धीः D^1, सार्द्धं° D^2.

६. 45a °श्वभ्रे] A (etc.), °श्वभ्रं C ; 45b कल्पयेदा°] A (etc.), कारयेदा° C^2.

७. 45c शयनाद्देव°] A, C^2, E, G, शयने देव° C^1, D.

८. Lacune correspondant au transfert de la statue du pavillon à la fosse à bain et à l'imposition du germe extrait du vase.

९. 46b नयेद्देवं] A, C^2, E, G, lacune C^1, नयेदेवं D.

१०. 46d °यजेत्] A, C, E, G, °ध्यमेत् D^1, °यमेत् D^2.

११. 47a हविर्नि°] A (etc.), हविन्नि° D^1 ; 47b सोपदंशं गुलान्वितम्] A, C^1, G, उपदंशसमन्वितम् C^2, सोपदंशगुलान्वितम् D, E.

[१]आचार्यं पूजयेत्तत्र पूर्वोक्तविधिना सह[२] ॥ ४८ ॥
मूर्तिपान्पूजयेत्तत्र दैवज्ञमपि पूजयेत्[३] ।
उत्सवं कारयेत्पश्चाद्यथावित्तानुसारतः ॥ ४९ ॥
एवं यः कुरुते मर्त्यः शिवलोके महीयते[४] ।
नार्यर्धरूपिणः सूक्तं स्थापनं तु विशेषतः[५] ॥ ५० ॥
हर्यर्धस्थापनं वक्ष्ये शृणु वह्ने समाहित[६] ॥ ५१ ॥

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीश्वरस्थापनपटलः [एकचत्वारिंशत्तमः][७] ॥

---

१. C^1 et C^2 omettent 48d-49a.

२. 48d पूर्वोक्तविधिना] A (etc.), पूजयेत्पूर्वोक्तविधिना (*v.f.*) D^2.

३. 49b दैवज्ञमपि पूजयेत्] A^1, G, देवज्ञमपि पूजयेत् A^2, दैवज्ञम्पूजयेत्ततः C, D, देवज्ञम्पूजयेत्ततः E.

४. 50a एवं यः] A (etc.), एवं (*v.f.*)D^1.

५. 50c °रूपिणः सूक्तं] A^1, °रूपिणस्योक्तं A^2, °रूपिणः प्रोक्तं C, D^2, G, °रूपिणं प्रोक्तं D^1 °रूपिणः प्रोक्ता E.

६. 51b शृणु वह्ने] A, C^2, E, G, शृणु वह्नि C^1, D^2 शृणुवन्ति D^1 ; समाहित] C^2, समाहितः A (etc.).

७. A^1 : इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीश्वरस्थापनपटलः।
A^2 : इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीश्वरस्थापनपटलो चतुस्त्रिंशतिः।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीश्वरस्थापनविधिः त्रयस्त्रिंशः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीस्थापनविधिपटलः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीस्थापनविधिपटलः।
E : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अर्धनारीशस्थापनपटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रेऽर्धनारीश्वरस्थापनपटलः समाप्तः।

[द्विचत्वारिंशत्तमः पटलः]
[हर्यर्धस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि हर्यर्धस्य शिवस्य तु[२]।
स्थापनं चायुरारोग्यजयदं शृणु चानल[३]॥ १॥

[१. हर्यर्धप्रतिमालक्षणम्]

मानोन्मानप्रमाणेन प्रतिमां कारयेत्ततः[४]।
वामांशे तु हरिं कुर्याद्दक्षिणे शङ्करं कुरु[५]॥ २॥
[६]जटामकुटसंयुक्तमर्धचन्द्रविभूषितम्।
नागकुण्डलसंयुक्तं ललाटनयनार्धकम्[७]॥ ३॥
द्विपचर्माम्बरधरं मेखलाभिश्च शोभितम्[८]।
शिवरूपमिदं प्रोक्तं हरिरूपमतः शृणु[९]॥ ४॥
मकरैः कुण्डलैर्युक्तं किरीटमकुटान्वितम्[१०]।
पीताम्बरधरं रूपं हारकेयूरभूषितम्[११]॥ ५॥
अभयं दक्षिणं हस्तं वरदं वामहस्तकम्[१२]।
परशुं दक्षिणे हस्ते वामहस्ते सुदर्शनम्॥ ६॥
एवं कुर्याद्विशेषेण ततः स्थापनमारभेत्।

---

१. Manuscrits utilisés : A^1, A^2, B^2, B^3, B^4 (très lacunaire), C^1, C^2, D^1, D^2, E, G.

२. 1b हर्यर्धस्य] B^4, E, G, हरिरर्ध॰ A, $B^{2\text{-}3}$, D^1, हर्यर्धं च C, हर्यर्धं (*v.f.*) D^2.

३. 1c ॰रोग्य॰] A, B^2, C, G, ॰रोग्यं $B^{3\text{-}4}$, D, E.

४. 2a मानो॰] A^1(etc.), मानु॰ C^2.

५. 2c वामांशे] A^1(etc.), lacune D, ॰वामाङ्गे E ; 2d ॰दक्षिणे शङ्करं] A, $B^{2\text{-}4}$, G, ॰दक्षिणंशे हरं C, D, ॰दक्षिणाङ्गे हरं E.

६. B^3 omet 3b-4a et B^4 3cd-5ab.

७. 3d ॰नयनार्धकम्] A^1(etc.), ॰नयनोज्वलम् C^2.

८. 4a द्विपचर्माम्बरधरं] E, दिव्याम्बरधरं वामे A, $B^{2\text{-}3}$, G, दिवि चर्माम्बरधरं C, द्विचर्माम्बरधरं (*v.f.*) D ; 4b मेखलाभिश्च] G, मेखलैरुप॰ A^1(etc.).

९. 4d ॰रूपमतः] A^1, G, ॰रूपमथ A^2, ॰रूपं ततः B^2, B^3, C, D; E.

१०. 5a मकरैः कुण्डलैर्युक्तं] A, C^1, D, E, G, मकरकुण्डलसंयुक्तं (*v.f.*) B^2, B^3, माकरैः कुण्डलैर्युक्तं C^2.

११. 5c रूपं] A^1 (etc.), दिव्य॰ C^2.

१२. 6a दक्षिणं हस्तं] A^1(etc.), दक्षिणे हस्ते C^2 ; 6b ॰हस्तकम्] A^1 (etc.), ॰हस्तके C^2.

[२. रत्नन्यासः]

माणिक्यं पद्मरागं च वैडूर्यं च प्रवालकम्[१] ॥ ७ ॥
मौक्तिकं स्फटिकं वज्रमिन्द्रनीलं च पुष्पकम्[२] ।
माणिक्यं मध्यमे चैव पूर्वादीनि प्रदक्षिणम्[३] ॥ ८ ॥
न्यस्त्वा रत्नान्यशेषाणि नवबीजसमन्वितम्[४] ।

[३. अक्षिमोक्षणम्]

सुस्निग्धं कारयित्वा तु ततः कुर्वक्षिमोक्षणम्[५] ॥ ९ ॥
मण्डिते मण्डपे कुर्यात्स्थण्डिलं मण्डलान्वितम्[६] ।
तिलदर्भैः परिस्तीर्य मूर्तिं मन्त्रेण विन्यसेत्[७] ॥ १० ॥
लोकपालाधिदैवत्यान्कलशानभितो यजेत्[८] ।
ससूत्रान्सापिधानांश्च सवस्त्रान्वारिपूरितान्॥ ११ ॥
[९]गन्धादिभिः समभ्यर्च्य शिल्पिनं पूजयेत्ततः[१०] ।
तरङ्गेणापि संवेष्ट्य चाक्षिमोक्षणमारभेत्[११] ॥ १२ ॥
पक्ष्मरेखां पुरालिख्य हैमसूच्या समन्त्रकम्[१२] ।

---

१. 7c माणिक्यं] A^{1}, G, माणिक्कं A^{2} (etc.).

२. 8b पुष्पकम्] A^{1}, B^{3}, पुष्यकम् A^{2} (etc.), lacune B^{4}.

३. 8c माणिक्यं] A^{1}, G, माणिक्कं A^{2} (etc.) ; मध्यमे] A^{1} (etc.), मध्यमं B^{2-3} ; 8d पूर्वादीनि] B^{4}, C, D, E, पूर्वाद्यग्निं A, पूर्वादीश° B^{2-3}, पूर्वाद्यग्नि° G.

४. 9a रत्नान्यशेषाणि] A, रत्नानि शेषाणि B^{2-4} (etc.).

५. 9d कुर्वक्षिमोक्षणम्] A^{2}, B^{2-3}, C^{2}, E, कुर्वन्विमोक्षणम् A^{1}, lacune B^{4}, कृत्वाक्षिमोक्षणम् C^{1}, कूर्माक्षिमोक्षणम् D, स्यादक्षिमोक्षणम् G.

६. 10a मण्डपे] A (etc.), मण्डपं B^{2-3}, G ; 10b °स्थण्डिलं] (etc.), °स्थण्डिले A^{2}, B^{2-3} ; मण्डला°] A (etc.), मण्डपा° B^{2-3}, मण्डना° E.

७. 10d मूर्तिं मन्त्रेण] Eds., मूर्तिमन्त्रेण A, B^{2-3}, G, मूर्तिमन्त्रैश्च B^{4}, D, मूर्तिमन्त्रेषु C^{2}, मूर्तिमन्त्रैव E.

८. 11a लाधि°] A^{1}(etc.), °लादि B^{2-3}.

९. B^{2} et B^{3} donnent la version suivante de 12ab : फलपल्लवसंयुक्तान् अन्धपुष्पादिनार्चयेत्।

१०. 12a गन्धादिभिः] A^{1} (etc.), गन्धादिना C^{1}.

११. 12c °पि संवेष्ट्य] C, D, °थ वेष्ट्याथ A, G, °भिवेष्ट्याथ B^{2-3}, lacune B^{4}, °भिसंवेष्ट्य ; 12d चाक्षिमोक्ष°] A, C^{2}, G, अक्षिमोक्ष° B^{2-3}, E, lacune B^{4}, चतुर्मोक्ष° C^{1}, D.

१२. 13a पुरा] A^{1} (etc.), पुरो A^{2}, °बुना B^{2}, lacune C^{1} ; 13b समन्त्रकम्] C^{2}, E, °भिमन्त्रितः A, B^{2-3}, °पि मन्त्रकम् B^{4}, D, lacune C^{1}, °भिमन्त्रितम् G (cf. 37.15).

असितं मण्डलं लिख्य दृष्टिमण्डलमालिखेत्[१] ॥ १३ ॥
हिरण्यनखयुक्ताभिरङ्गुलीभिर्विशेषतः ।
तत्तन्नेत्रमनुस्मृत्य सुप्रोतं मधुना सह[२] ॥ १४ ॥
[३]मधुवाता ऋतायेति मधुपात्रं प्रदर्शयेत्[४] ।
घृतमिक्षेति मन्त्रेण घृतपात्रं प्रदर्शयेत्[५] ॥ १५ ॥
कपिलां दर्शयेत्पश्चाद्गौर्धेन्वित्यादि मन्त्रतः[६] ।
पुण्याहं वाचयेत्तत्र स्वस्तिसूक्तसमन्वितम्[७] ॥ १६ ॥

[४. प्रतिमाशुद्धिः]

प्रतिमाशुद्धिं कुर्वीत पञ्चमृत्पञ्चगव्यकैः[८] ।
विष्णुसूक्ते रुद्रसूक्तैरभिषेकं समाचरेत्[९] ॥ १७ ॥
शुद्धैरुक्थैः समुच्चार्य शुद्धतोयेन सेचयेत्[१०] ।
वस्त्राभरणमालाभिरलङ्कृत्य विशेषतः[११] ॥ १८ ॥
ग्रामप्रदक्षिणं कृत्वा शङ्खभेर्या रवैः सह[१२] ।

---

१. 13c असितं मण्डलं] B^{3-4}, C^2, अक्षिमण्डलमा° A^1, E, असितमण्डलं B^2, असितमण्डलमा° (*v.f.*) A^2, D, lacune C^1, आस्तीकमण्डलमा° G ; 13d दृष्टि°] A (etc.), lacune B^4, C^1, अक्षि° G.

२. 14c तत्तन्नेत्र°] B^{3-4} (etc.), तत्र नेत्र° A, B^2 ; 14d सुप्रोतं] A, B^2, सुप्रोत° B^3, E, G, सुप्रोथ° B^4, C^1, D, विप्रोऽथ C^2.

३. D^1 ajoute entre 14cd et 15 ab : घृटादिगुलपर्यन्तमुपहुतिमथाचरेत्। त्र्यम्बकेन घृतं हुत्वा अहमस्मि चरुं हुनेत्॥ धान्यं हुत्वाग्निमीलेति तिलं यत्तोयं एव च। जातवेदेति मन्त्रेण सर्षपं जुहुयात्क्रमात्॥ अपो राजन्य (lire राजेति) वस्योक्तम्मधुवातामधुं हुनेत्॥

४. 15b मधुपात्रं] B^{2-4} (etc.), मन्त्रपात्रं A. (cf. 39.19, 53.18.)

५. 15c घृतमिक्षेति] (*sic*, voir p. 30)A^1, E, घृतमिमिक्षेति (*v.f.*) A^2, घृतं मिमिक्षे B^2, G, घृतं मिमिक्ष° B^3, lacune B^4, घृतं मिमिक्षेति C, D ; 15d घृतपात्रं] A, B^{2-4}, G, घृतं तत्र C, D, E.

६. 16b °गौर्धेन्वित्यादि] C, D^2, °गोर्धेन्वानिति A^1, °गोर्धेन्वाति A^2, °गौर्धेन्वाद्यादि B^{2-3}, °गौर्धेनित्यादि B^4, °गोर्धेनात्यादि D^1, °गौर्धेन्विद्यादि E, °गोर्धेनोरादि G.

७. 16d स्वस्तिसूक्त°] A^1 (etc.), स्वस्तिमन्त्र° G.

८. 17a प्रतिमाशुद्धिं कुर्वीत] A^1 (etc.), कुर्वीत प्रतिमाशुद्धिं G.

९. 17d समाचरेत्] A^1 (etc.), समारभेत् C^2.

१०. 18a शुद्धैरुक्थैः] Eds., शुद्धैरुद्धैः A^1(etc.), E, G, शुद्धैर्गन्धं C^2, शुद्धैरुकथं (*v.f.*) D.

११. 18d °कृत्य] A^2 (etc.), °कृत्वा A^1.

१२. 19a ग्राम°] B^4, C, D, E, शनैः A, B^{2-3}, शङ्ख° G.

[५. जलाधिवासः]

जलाधिवासनं कुर्यान् नद्यां वाप्यां तटाकके[१] ॥ १९ ॥
तीरे समतलं कृत्वा स्थाप्य स्नाप्य यथाविधि[२]।
वस्त्रेण वेष्टयित्वा तु जलमध्ये निवेशयेत्॥ २०॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम्[३]।

[६. मण्डपादिकल्पनम्]

[६.१. मण्डपलक्षणम्]

[४]प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्॥ २१॥
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्[५]।
षोडशस्तम्भसंयुक्तं दर्पणोदरसंनिभम्॥ २२॥
वितानध्वजसंछन्नं मुक्तादामैरलङ्कृतम्[६]।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम्॥ २३॥
दर्भमालासमायुक्तं फलपल्लवशोभितम्।
तन्मध्ये वेदिकां कुर्यात् पञ्चतालप्रमाणकम्॥ २४॥
द्वितालं वेदिकोत्सेधं दर्पणोदरसंनिभम्।

[६.२. कुण्डादिलक्षणम्]

कुण्डानि परितः कुर्यान्मानुषे तु पदे बुधः॥ २५॥
चतुरश्रं धनुर्वृत्तं त्रिकोणं च दिशासु वै।
आग्नेयादीशकोणान्तं पद्माकारं प्रकल्पयेत्[७] ॥ २६॥
मेखलात्रयसंयुक्तं प्रत्येकं तु त्रयाङ्गुलम्[८]।
नाभियोनिसमायुक्तं हस्तमात्रं तु विस्तरम्॥ २७॥

---

१. 19c कुर्यान्] A^{1} (etc.), कृत्वा A^{2}, $B^{2\text{-}3}$, G ; 19d वाप्यां] A^{1}(etc.), lacune B^{4}, वापि C^{1}.

२. 20a कृत्वा] A (etc.), स्थाप्य D, E ; 20b स्थाप्य स्नाप्य] A^{1}(etc.), स्थाप्य स्नानं C, स्नानं कृत्वा D, E.

३. 21b जलोषितम्] A^{1}(etc.), जलोदितम् D^{1}.

४. D^{2} omet 21cd-22cd.

५. 22b °हस्ताष्टहस्तकम्] E, G, °हस्ताष्टकं भवेत् A, lacune $B^{2\text{-}3}$, °हस्ताष्टकं पुनः B^{4}, C, D^{1}.

६. 23a °संच्छन्नं] A, B^{3}, E, G, °संच्छिन्नं B^{2}, °संयुक्तं B^{4}, C, D ; 23b °दमैरलङ्कृतम्] A^{1} (etc.), °दामविभूषितम् G.

७. 26c °दीशकोणान्तं] B^{4}, C^{1}, D, °दीशकोणेषु A, $B^{2\text{-}3}$, G, °दिशिकोणान्तं C^{2}, E.

८. 27b तु] A^{1} (etc.), द्वि° G.

[१]ईशानशक्रयोर्मध्ये कुण्डं प्राधानिकं कुरु।
गोमयालेपनं कृत्वा मण्डपाभ्यन्तरं बहिः[१] ॥ २८ ॥
[२]पर्यग्निकरणं कृत्वा पुण्याहं वाचयेत्ततः।

[७. अधिवासः]

[७.१. शयनकल्पनादि]

स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शलिभिः[३] ॥ २९ ॥
तण्डुलैः शोभितं कृत्वा तिलदर्भैः परिस्तरेत्[४]।
शयनं कल्पयेत्तत्र चाण्डजाद्यैरनुक्रमात्[५] ॥ ३० ॥
गौरीगायत्रिमन्त्रेण शयनं चाभिमन्त्रयेत्।
अर्चयित्वा यथान्यायं मूर्तिं तत्रैव शाययेत्[६] ॥ ३१ ॥
प्राक्शिरस्कं न्यसेद्धीमानूर्ध्ववक्त्रं सपिण्डिकम्[७]।
रक्तवस्त्रेण संवेष्ट्य पूजयित्वा हृदा बुधः[८] ॥ ३२ ॥

[७.२. कुम्भस्थापनम्]

ईशानशक्रयोर्मध्ये शिवकुम्भं च वर्धनीम्।
अभितः कलशानष्टौ स्थापयेद्वसुदेवतान्॥ ३३ ॥
द्रोणार्धतोयसंपूर्णान् सवस्त्रान्वारिपूरितान्[९]।
सकूर्चान्सापिधानांश्च हेमपङ्कजसंयुतान्॥ ३४ ॥
तत्तत्कुम्भे तु तद्बीजं न्यस्त्वा देवं तु भावयेत्[१०]।

---

९. C^1 : lacune 28a-31b.

१. 28d मण्डपाभ्यन्तरं] A^1 (etc.), मण्डपानन्तरं B^{2-3}.

२. C^2 omet 29b-31a.

३. 29d °द्रोणैश्च] B^{2-4}, G, °द्रोणेन A, D, E.

४. 30b तिल°] A, B^4, D, G, तिलैर्° B^{2-3}, तिलं E.

५. 30d चाण्डजाद्यै°] A, D, E, G, अण्डजाद्यै° B^{2-3}, चाण्डजा+ B^4.

६. 31d मूर्तिं तत्रैव] B^4, C, D, मूर्तिमन्त्रैव A^1, B^{2-3}, मूर्तिमत्रैव A^2, मूर्तिमन्त्रे च E, मूर्तिमन्त्रैश्चैव G.

७. 32b सपिण्डिकम्] A^1 (etc.), सपीठकम् B^2.

८. 32d हृदा बुधः] A^1, C, D, E, G, यथा बुधः A^2, B^{2-3}, यथा विधि B^4.

९. 34b °वारिपूरितान्] A^1 (etc.), lacune C^1 °सपिधानकान् G.

१०. 35a °कुम्भे तु] A, E, G, °कुम्भेषु B^{2-3}, °कुम्भेन B^4, C^2, D, lacune C^1 ; 35b भावयेत्] A^1(etc.), भ्रामयेत् G.

पूजयित्वा स्वनाम्ना तु नैवेद्यान्तं विशेषतः ॥ ३५॥

[७.३. होमः]

तत्तन्मूर्तिं दिशाकुण्डे ध्यात्वा होमं समाचरेत्।
अर्कश्च खादिराश्वत्थोदुम्बरप्लक्ष एव च[१] ॥ ३६॥
न्यग्रोधं चैव मायूरं समिधः संप्रकीर्तिताः[२]।
[३]शिवाग्नौ चैव पालाशमर्घ्यपाद्यादि निक्षिपेत्[४] ॥ ३७॥
समिदाज्यचरुं लाजान्सक्तुं च गुलसर्षपान्[५]।
नीवारं तिलमुद्गं च होमयेत्तु विधानतः[६] ॥ ३८॥
शोधनं क्षालनं चैव शोषणं पाचनं तथा।
कुण्डसंस्कारकं सर्वमग्निकार्योक्तमाचरेत्[७] ॥ ३९॥
शिवाग्निं जनयेत्पूर्वं दिशाहोममतः परम्।
शिवाग्नौ समिधो हुत्वा ईशानेन तु मन्त्रतः[८] ॥ ४०॥
समिधो जुहुयाद्दिक्षु त्र्यम्बकेन च मन्त्रतः[९]।
[१०]शन्नो देवीति मन्त्रेण विदिक्षु जुहुयात्ततः ॥ ४१॥
शतमर्धं तदर्धं वा तन्मन्त्रेण घृतं हुनेत्[११]।
शिवाङ्गैश्चैव विद्याङ्गैः शिवबीजेन होमयेत्[१२] ॥ ४२॥

---

१. 36c अर्कश्च] D, E, अर्कं च A, G.

२. 37ab मायूरं समिधः] A, B^{4}, C, D, E, मायूरखादिरं B$^{2\text{-}3}$, मायुरं खादिरं G.

३. C^{1} lacune 37d-38c.

४. 37d °मर्घ्यपाद्यादि] B$^{3\text{-}4}$, D, E, G, °मर्घ्यपात्रादि A, B^{2}, °मघवादि C^{2}.

५. 38a लाजान्स°] B$^{2\text{-}4}$, C^{2}, D, G, लाजांश° A^{2}, लाजाः स° A^{1}, लाजस° E ; 38b सक्तुं च गुलसर्षपान्] Eds., तच्चूर्णगुलसर्षपान् A, B^{4}, C^{2}, चणकं गुलसर्षपम् B$^{2\text{-}3}$, तच्चूर्णगुलसर्षपम् D, चूर्णं गुलसर्षपम् (*v.f.*) E, तच्छूणु गुकसर्षपम् G.

६. 38c नीवारं] A, D, G, नीवार° B$^{2\text{-}3}$, C^{2}, E ; तिलमुद्गं च] D, E, तण्डुलं मुद्गं A^{1}(etc.); 38d विधानतः] A (etc.), विचक्षणः B^{4}, C^{2}.

७. 39c °संस्कारकं] A^{1}(etc.), °संस्कारजं B^{4} ; 39d °क्तमाचरेत्] A, B^{4}, C, D, E, °क्तमार्गतः B$^{2\text{-}3}$, G.

८. 40c समिधो] G, समिधौ A, समिधं B$^{2\text{-}3}$, C^{2}, E, समिधा B^{4}, C^{1}, D.

९. 41a समिधो] B^{4}, C, D, E, G, समिधौ A, समिधं B$^{2\text{-}3}$; 41b त्र्यम्बकेन च] B$^{2\text{-}3}$, त्र्यम्बको नाम A^{1}, त्र्यम्बकेन (*v.f.*) A^{2}, lacune B^{4}, C^{1}, त्र्यम्बकेन तु C^{2}, D, त्र्यम्बकेनैव (*v.f.*), त्रियम्बकेन G.

१०. B^{4} omet 41cd-42cd.

११. 42b घृतं] A, D, हृदा B$^{2\text{-}3}$, G, गुरुर्° C^{2}.

१२. 42c शिवाङ्गैश्चैव] A^{1}(etc.), lacune A^{2}, शिवाङ्गं चैव C^{1} ; 42d °बीजेन] A, B$^{2\text{-}4}$, G, °बिजैश्च C, D.

[१]लाजं यो रुद्र मन्त्रेण सक्तुं चैव हृदा हुनेत्[२]।
गणानां त्वा गुलं हुत्वा कद्रुद्रायेति सर्षपम्॥ ४३॥
इमा रुद्राय नीवारं इदं विष्ण्वेति वै तिलम्[३]।
आ वो राजेति मन्त्रेण मुद्गं हुत्वा विचक्षणः[४]॥ ४४॥
घृतमिक्षेति मन्त्रेण घृतहोमं समाचरेत्[५]।
अन्नं प्राणेति मन्त्रेण हविर्हुत्वा विचक्षणः[६]॥ ४५॥
द्रव्यान्ते व्याहृतिं हुत्वा हृदा पूर्णाहुतिं ददेत्।
एवं जागरणं रात्रौ प्रभाते स्थापनं भवेत्[७]॥ ४६॥

[८. अधिवासानन्तरदिवसकृत्यम्]

स्नानत्रयं पुरा कृत्वा देशिको मूर्तिपैः सह।
दिक्कुम्भान्मूर्तिकुम्भांश्च अग्निमूर्तिं च पूजयेत्[८]॥ ४७॥
ब्रह्माङ्गैर्बीजमुख्यैश्च दशबीजैश्च होमयेत्।
जयादिरभ्याधानं च राष्ट्रभृत्स्विष्टकृद्धुनेत्[९]॥ ४८॥

[८.१. दक्षिणा]

वस्त्रहेमाङ्गुलीयैश्च यज्ञसूत्रैश्च हैमकैः[१०]।

---

१. B^{4} place 43ab-44ab entre 45cd et 46ab ; C^{1} place 43 après 45cd et omet 44ab-44cd ; C^{2}, D et E placent 43ab-44 entre 45cd et 46ab.

२. 43a लाजं यो रुद्र°] C^{2}, लाज यो रुद्र° A^{1}, B^{2-3}, C^{1}, D, E, लजयोः रुद्र° A^{2}, lacune B^{4}, लाजहोम (?) G ; 43b सक्तुं] A^{2}, B^{2-3}, C^{1}, D, E, G, सक्थुं A^{1}, C^{2}, lacune B^{4}.

३. 44a इमा] B^{3-4}, C^{2}, E, इमं A, उमा° B^{2}, D, इमां G ; रुद्राय] A, B^{2-3}, G, रुद्रेति B^{4}, D, E, कद्रेति C^{2}.

४. 44d हुत्वा] A (etc.), दत्वा B^{4}.

५. 45a घृत°] A^{1}, घृतं A^{2} (etc.), lacune B^{4} ; °मिक्षेति] ((*sic, voir p. 30)* A, D^{1}, मिमक्ष° B^{2-3}, lacune B^{4}, मिमिक्षेति C^{1}, D^{2}, E, मिमिक्षा C^{2}, मिमिक्षे G.

६. 45c अन्नं] A (etc.), अनन्तं (*v.f.*) C ; 45d हविर्हुत्वा] A (etc.), हविं हुत्वा D.

७. 46a जागरणं] A^{1} (etc.), चाभरकं D^{1}, जागरकं D^{2}, E ; 46d स्थापनं भवेत्] A (etc.), स्थापनक्रिया B^{3}.

८. 47c °कुम्भांश्च] A^{2} (etc.), °भांश्चैव A^{1}, lacune C^{1} ; 47d पूजयेत्] B^{2-3}, C^{2}, D, E, होमयेत् A, C^{1}, G, lacune B^{4}.

९. 48d स्विष्टकृद्धुनेत्] B^{2-4}, C^{2}, D^{2}, E, G, स्विष्टं होमयेत् A, D^{1}, lacune C^{1}.

१०. 49b यज्ञ°] A (etc.), जानु° C^{2}, यजन° (*v.f.*) D ; हैमकैः] A^{2}, B^{4}, G, होमकैः A^{1}, E, हेमकैः B^{2-3}, हेमजैः C^{2}, हैमिके D.

स्वर्णैश्च धनधान्यैश्च देशिकं पूजयेत्क्रमात्[१] ॥ ४९ ॥
मूर्तिपान्पूजयेत्तत्र अध्येतॄंश्च प्रपूजयेत्[२] ।
भक्तांश्च परिचारांश्च दैवज्ञमपि पूजयेत्[३] ॥ ५० ॥

[८.२. कलान्यासादि]

उत्थाप्य शयनाद्देवं शकुनं सूक्तमुच्चरन्[४] ।
स्नानश्वभ्रे विशेषेण कल्पयेदासनत्रयम्[५] ॥ ५१ ॥
स्नानवेद्यां समानीय स्थापयेद्विष्टरोपरि ।
आनीय शिवकुम्भं तु वर्धनीमूर्तिकुम्भकैः[६] ॥ ५२ ॥
नृत्तगेयसमायुक्तं सर्वातोद्यसमन्वितम्[७] ।
ब्रह्मघोषसमायुक्तं स्वस्तिमङ्गलवाचकैः ॥ ५३ ॥
अष्टत्रिंशत्कलान्यासमङ्गैरङ्गानि कल्पयेत् ।

[८.३. बीजन्यासः]

[८]मुहूर्तं निरिक्ष्य दैवज्ञो गुरवे तन्निवेदयेत्[९] ॥ ५४ ॥
शिवकुम्भात्समादाय शिवबीजं हृदि न्यसेत्[१०] ।
वर्धन्या बीजमादाय गौर्याश्च हृदि विन्यसेत्[११] ॥ ५५ ॥
अभिषिच्य हृदा मन्त्री वसुकुम्भैर्यथाक्रमम्[१२] ।

---

१. 49c स्वर्णैश्च] A, B^{2-4}, C^1, G, सुवर्ण° C^2, स्वर्ण° (*v.f.*) D, E.

२. 50b अध्येतॄंश्च प्र°] A, E, G, अध्यानाञ्च B^{2-3}, lacune B^4, अध्येत्रयश्च C^1, D, अध्येतॄंश्चापि C^2.

३. 50c भक्तांश्च परिचारांश्च] Eds, भक्तानां परिचाराणां A (etc.) ; 50d °ज्ञमपि पूजयेत्] A, B^{2-4}, G, °ज्ञं पूजयेत्क्रमात् C, D, E.

४. 51b शकुनं सूक्तमुच्चरन्] C^1, D, E, शकुने सुमुहूर्तके A, G, सुमुहूर्ते सुलग्नके B^{2-3}, lacune B^4.

५. 51c स्नान°] A^1 (etc.), स्थान° B^2, lacune B^4 ; 51d °त्रयम्] A^1 (etc.), °क्रमम् B^2, lacune C^1.

६. 52d वर्धनी°] A^1, B^2, C, D, E, वर्धनीं A^2, B^3, G, lacune B^4.

७. 53b °समन्वितम्] A, B^4, C, D, E, °समायुतम् B^{2-3}, G.

८. Vers faux dans tous les manuscrits.

९. 54d तन्निवेदयेत्] A, B^{2-3}, G, सन्निवेदयेत् B^4, C, D^1, E, lacune D^2.

१०. 55a °समादाय] A^1 (etc.), °समानीय C^1.

११. 55d °श्च हृदि विन्यसेत्] A^1 (etc.), वामस्तने न्यसेत् B^{2-3}, lacune C^1.

१२. 56b वसु°] B^{3-4}, C^2, D, E, वस्त्र° A, B^2, G, lacune C^1 ; °क्रमम्] A, B^{3-4}, C^2, E, G, °विधि B^2, lacune C^1, D.

स्नपनं कारयेदन्ते[१]

[८.४. पूजादि]

शुद्धदेशे न्यसेत्ततः[२] ॥ ५६ ॥
पादैराचमनीयार्घ्यैर्गन्धपुष्पैश्च धूपकैः[३]।
वस्त्राभरणमालाभिरर्चनोक्तं समर्चयेत्॥ ५७॥
नैवेद्यं पायसं दद्यात्पुनराचमनं ददेत्।
ताम्बूलं दापयित्वा तु हृदयं मन्त्रमुच्चरन्[४] ॥ ५८ ॥
उत्सवं कारयेदन्ते पूर्वोक्तविधिना सह[५]।

[९. हर्यर्धस्थापनफलम्]

सर्वलोकहितं पुण्यं सर्वकामार्थसाधनम्[६] ॥ ५९ ॥
हर्यर्धस्थापनं प्रोक्तं चण्डेशस्थापनं शृणु[७] ॥ ६० ॥

॥ इति दीप्ताशास्त्रे प्रतिष्ठातन्त्रे हर्यर्धस्थापनपटलः [द्विचत्वारिंशत्तमः][८] ॥

---

जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्॥ २९॥
उत्थापयेत्ततो देवं शयनात्कुम्भसंयुतम्।
प्रदक्षिणं ततः कृत्वा प्रासादं घोषसंयुतम्[१]॥ ३०॥
स्नानवेद्यां न्यसेद्देवमासनोपरि देशिकः।
मुहूर्तं निरीक्ष्य दैवज्ञो गुरवे संनिवेदयेत्॥ ३१॥
कुम्भाद्बीजं समादाय प्रतिमस्य हृदि न्यसेत्[२]।
[३]व्योमव्यापिनमुच्चार्य अभिषेकं समाचरेत्[४]॥ ३२॥
कलाङ्गानि ततो न्यस्त्वा पूजयित्वा विधानतः[५]।
स्नपनं कारयेदन्ते यथाशक्ति विशेषतः[६]॥ ३३॥
अचलं चालये स्थाप्य प्रोक्षणेनैव शुद्ध्यति[७]।
शुद्धदेशे समादाय पूजयेद्विधिना सह[८]॥ ३४॥
आचार्यं मूर्तिपांश्चैव पूजयित्वा यथाविधि[९]।

[६. दक्षिणामूर्तिस्थापनफलम्]

एवं यः कुरुते मर्त्यो ज्ञानमुक्तिमवाप्नुयात्[१०]॥ ३५॥
राजराष्ट्रं विवर्धन्ते पुत्रपौत्रविवर्धनम्[११]।

---

१. 30d प्रासादं घोषसंयुतम्] A^1 (etc.), lacune A^2, सर्वघोषसमन्वितम् F^1.

२. 32b प्रतिमस्य हृदि न्यसेत्] B^4, D, E, तत्तद्दिशि सुविन्यसेत् A, G, प्रतिमे हृदि विन्यसेत् F^1.

३. F^1 ajoute entre 32ab et 32 cd : दिशिकुम्भं दिशि स्थाप्य तत्तद्बीजं दिशि न्यसेत्।

४. 32c °व्यापिनमु°] A^1 (etc.), °व्यपिं समु° F^1, G.

५. 33a कलाङ्गानि] A (etc.), कलशाङ्गानि (*v.f.*) D ; 33b विधानतः] A^1 (etc.), यथा विधिः F^1, G.

६. 33d यथाशक्ति] A (etc.), यथाङ्गत्रि° F^1.

७. 34a आचलं चालये] A^1, G, अचलं त्वालये A^2, B^4, अचलस्त्वालये D, E, अवलं चेदापयेत् F^1 ; 34b प्रोक्षणेनैव] Eds., प्रोक्षणं देव A, प्रोक्षणादेव B^4, D, E, प्रोक्षणा देह° F^1, lacune G.

८. 34c पूजयेद्°] A (etc.), सपूजा° D.

९. 35a आचार्यं मूर्तिपांश्चैव] E, G, आचार्यो मूर्तिपैश्चैव A, आचार्यमूर्तिपांश्चैव B^4, D, आचार्यो मूर्तिपानां च F^1.

१०. 35d °वाप्नुयात्] A^1 (etc.), °वापयेत् F^1.

११. 36a °राष्ट्रं विवर्धन्ते] A, B^4, D, F^1, °राष्ट्राणि वर्धन्ते E, °राष्ट्रविवृद्धिः स्यात् G ; 36b °पौत्रविवर्धनम्] A (etc.), °भ्रात्रकलत्रकैः F^1.

स्थापनं दक्षिणामूर्तेः प्रोक्तं भिक्षाटनं शृणु[१] ॥ ३६ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दक्षिणामूर्तिस्थापनपटलः [षट्चत्वारिंशत्तमः][२] ॥

---

१. 36c प्रोक्तं भिक्षाटनं शृणु] B^4, D, E, G, प्रोक्तं भिक्षाटनस्य तु A, भिक्षाटनमथ शृणु F^1.

२. A, E : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दक्षिणामूर्तिस्थापनपटलः।
B^4 : इति दीप्ते शास्त्रे प्रतिष्ठातन्त्रे दक्षिणामूर्तिस्थापनपटल एकोनचत्वारिंशतिमः।
D: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दक्षिणामूर्तिस्थापनपटल एकोनचत्वारिंशतितमः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां दक्षिणामूर्तिस्थापनपटलः।
G: इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दक्षिणामूर्तिस्थापनपटलः समाप्तः।

[सप्तचत्वारिंशत्तमः पटलः]
[भिक्षाटनस्थापनम्[१]]

[२]अतः परं प्रवक्ष्यामि यागं भिक्षाटनस्य तु[३]।
आयुरारोग्यफलदं पुत्रश्रीकीर्तिवर्धनम्॥ १॥

[१. भिक्षाटनस्य द्वौ भेदौ]

भिक्षाटनं द्विधा प्रोक्तं कपालं कङ्कालमेव च[४]।

[१.१. कपालभेदः]

ब्रह्मकच्छेदने भिक्षां निष्कृत्यर्थं समाचरेत्[५]॥ २॥
पादे पादुकसंयुक्तं नानानागविभूषितम्[६]।
[७]त्रिणेत्रं चतुर्भुजं रूपं किञ्चिद्वै गमनोन्मुखम्[८]॥ ३॥
डमरुं दक्षिणे हस्ते वामहस्ते तु पिञ्छकम्[९]।
हरिणीमुखगं हस्तं वामहस्ते कपालकम्[१०]॥ ४॥
नग्नरूपं विभूषाङ्गं नागभूषासमन्वितम्[११]।
[१२]कपालमधुना ख्यातं कङ्कालमथ वक्ष्यते[१३]॥ ५॥

---

१. Manuscrits utilisés : A^1, A^2, B^1, B^2, B^4, B^5, C^1, C^2, D^1, D^2, E, F^1, G.

२. C^1 et C^2 omettent les vers 1ab-53a.

३. 1a अतः परं] A (etc.), अथाहं सं॰ B^5 ; 1b भिक्षाटनस्य तु] A^2 (etc.), भीक्षातनेन तु A^1.

४. 2b कपालं] A, B^5, D, E, G, कवा॰ (*v.f.*) B^1, कपाल॰ B^2, कङ्कालं F^1 ; कङ्कालमेव च] A, B^{1-2}, G, कङ्कालकं तथा B^4, D, E, कङ्कालं तथा B^5, कापालं तथा F^1.

५. 2c ॰कच्छेदने] A, D, E, G, शिरच्छेदने (*v.f.*) B^{1-2}, F^1, ॰कच्छेदनो B^4, ॰कच्छेदिने B^5 ; 2d निष्कृत्यर्थं] $B^{1,4-5}$, D^2, F^1, G, निष्कृष्यर्थं A^1, D^1, निष्कलार्थं A^2, निष्कर्पत्वं (?) B^2, निष्क्रम्यर्थं E.

६. 3a पादे] A (etc.), पादौ F^1 ; 3b नानानाग॰] A (etc.), नागनाग॰ A^1 (var.), B^5.

७. G omet 3cd-5ab.

८. 3d गमनो॰] A (etc.), कमलो॰ D^2, E.

९. 4a डमरुं] A, B^{4-5}, D, डमरुकं (*v.f.*) B^{1-2}, E, F^1.

१०. 4c ॰मुखगं] A, $B^{1,4-5}$, D^2, E, ॰मुखं (*v.f.*) B^2, D^1, ॰मुखगतं (*v.f.*) F^1 ; 4d कपालकम्] A (etc.), कपालधृक् F^1.

११. 5a नग्न॰] A (etc.), नष्ट॰ F^1 ; विभूषाङ्गं] A (etc.), वृषाङ्का हि F^1 ; 5b नागभूषा॰] A^1 (var.), नानाभूषा॰ A (etc.), नानाभूत॰ F^1.

१२. B^1 répète 3cd avant 5cd.

१३. 5c ख्यातं] A (etc.), द्योतं B^2 ; 5d ॰थ वक्ष्यते] A, B^{1-2}, G, ॰धुनोच्यते B^{4-5}, D, F^1.

[१.२. कङ्कालभेदः]

[१.२.१. कङ्कालकथा]

मध्यमे देवगङ्गायाः सलिलाशयमाविशेत्[१]।
[२]नारदो नाम महर्षिर्धौम्यपुत्रो महातपाः[३] ॥ ६॥
अतिवेगेन सा गङ्गा सहस्रमुखमार्गतः[४]।
[५]दिवो निभ्रंशनेनैव पतिता हरमूर्धनि[६] ॥ ७॥
[७]तस्याश्च वेगेनोत्क्षिप्तो मुनिवरो महातपाः[८]।
शिवहस्तमनुप्राप्तः शूलं मूर्धनि उत्पतन्[९] ॥ ८॥
सद्यो मरणमाप्नोति तस्य निष्कृतिकारणम्।
भिक्षाटनवशात्प्राप्तं लोकानां स्थितिकारणात्[१०] ॥ ९॥

[१.२.२. कङ्कालस्वरूपम्]

त्रिणेत्रं चतुर्भुजं रूपं जटामकुटमण्डितम्।
पादे पादुकसंयुक्तं किञ्चिद्द्वै गमनोन्मुखम्[११] ॥ १०॥

---

१. 6a देवगङ्गायाः] A^1, B^5, देवगङ्गाया A^2, $B^{1-2,4}$, D^1, G, देवं गङ्गाया D^2, देवगङ्गायां E, F^1 ; 6b सलिलाशयमा°] E, सलिलं वशमा° A^1, lacune A^2, स्थलिले विशमा° B^1, G, सलिलेऽपि समा° B^2, सलिलाल्लयमा° B^4, सलिलोल्लयमा° B^5, सलिलाशतमा° D^1, शलिलाग्रयमा° D^2, सालाशयमला° F^1 ; °विशेत्] A^1 (etc.), °शयेत् F^1.

२. F^1donne cette version de 6cd : नारो नाम ऋषीयां तु पुत्रं महातपाहति।

३. 6c महर्षिर्धौम्यपुत्रो] B^2, महर्षि धौम्यपुत्रो A^1, G, महर्षी धौम्यपुत्रे A^2, महर्षि सौम्यपुत्रो B^1, D^1, महिः सौम्यपुत्रो B^4, °र्षिः सौम्यपुत्रो B^5, र्षि सौम्यपुत्रो D^2, E.

४. 7a अतिवेगेन सा गङ्गा] A (etc.), वेगेन समगङ्गायां F^1 ; 7b °मार्गतः] A (etc.), °मग्रतः B^1, lacune B^2, °यागतः F^1.

५. F^1 : जवोति भूषणेनैव पतिनागारमूर्तिनः।

६. 7c दिवो निभ्रंशनेनैव] Eds., दिव्यातिश्रमणेनैव A^1, दिव्योतिभ्रमणेनैव A^2, B^{1-2}, G, दिवो निभृणेनैव B^4, दिवानिभ्रमणेनैव B^5, D^1, दिवो निभ्रमणेनैव D^2, दिवो दिग्भ्रमणेनैव E.

७. F^1 donne cette version de 8ab : स्याद्य वै गमनोगषमुनिना रोगमगातपा।

८. 8a तस्याश्च] A, $B^{1,5}$, D^2, E, G, तम्यां च B^2, तस्यां च B^4, D^1; °क्षिप्तो] A^1, B^5, G, °क्षिप्तं A^2, B^{1-2}, D, °क्षिप्ते B^4, वोक्तं E ; 8b °तपाः] A (etc.), °तपः B^1, °तपाम् D^1.

९. 8c °प्राप्तः] A, $B^{1,5}$, °प्राप्तं B^2, D^2, E, F^1, °प्राप्त° B^4, G, °प्राप्ते D^1 ; 8d °शूलं] A (etc.), °जलं B^2 ; उत्पतन्] Eds., उत्पतत् A^1 (etc.), चापतत् F^1.

१०. 9c °टनवशात्प्राप्तं] A^2, B^5, °टनवशात्प्राप्त° A^1, B^{1-2}, G, °टनवशात्प्राप्ता B^4, D, E, °टनं शिवं ध्यात्वा F^1.

११. 10c पादे] A^1 (etc.), पादौ F^1 ; 10d °द्वै गमनोन्मु°] A (etc.), °द्वेकमानो मु° F^1.

जटामकुटसंयुक्तं चन्द्रालङ्कृतशेखरम्[१]।
द्विपचर्माम्बरधरं क्षुरिकाभिरलङ्कृतम्[२]॥ ११॥
हारकेयूरसंयुक्तं यज्ञसूत्रविभूषितम्।
आतोद्यं वामहस्ते तु ब्रह्मघ्नं दक्षिणे करे[३]॥ १२॥
पिञ्छं वै वामहस्ते तु हरिणीमुखगं परम्[४]।
नानाभुजङ्गसंयुक्तं नानाभूतसमाकुलम्॥ १३॥
भिक्षादेयोन्मुखस्त्रीभिः समन्ताच्च समाकुलम्[५]।
एवं कृत्वा विशेषेण स्थापनं हि समाचरेत्[६]॥ १४॥

[२. रत्नन्यासः]

शैलजे मृण्मये बिम्बे लोहजे दारुजेऽथवा[७]।
रत्नन्यासं प्रकर्तव्यं भित्तिचित्रपटेऽथवा[८]॥ १५॥
शूलस्थापनकाले तु न्यसेद्रत्नानि मृण्मये।
भद्रपीठे न्यसेल्लोहे मध्यमादि समाहितः[९]॥ १६॥
माणिक्यमिन्द्रनीलं च वैडूर्यं स्फटिकं तथा[१०]।
मरकतं पद्मरागं च प्रवालं शङ्खमौक्तिकम्[११]॥ १७॥
दिग्बीजेन न्यसेद्धीमान्ब्रह्ममन्त्रेण मध्यमे[१२]।

---

१. 11b चन्द्रालङ्कृत°] A, B^{1}, G, चन्द्रार्धकृत° B^{4-5}, D, E, F^{1}.

२. 11c द्विप°] A (etc.), गज° B^{2}, द्वीपि° B^{4-5}.

३. 12c °हस्ते तु] A, B^{4}, D, E, °हस्तं तु B^{5}, °हस्तेन F^{1} ; 12d ब्रह्मघ्नं] A^{1}, ब्रह्मकं A^{2}, ब्रह्मणं $B^{1-2,5}$, G, प्रहारं B^{4}, D, E, F^{1}.

४. 13b °मुखगं परम्] A^{2}, °मुखगतं परम् (*v.f.*) A^{1}, G, उद्गतं परम् B^{1-2}, °मुखगतं करम् B^{4}, D, E, °मुखगं करम् B^{5}, °मुखवत्करः F^{1}.

५. 14a भिक्षादेयोन्°] B^{4}, भिक्षादेयो° A^{1}, E, G, भिक्षादानोन्° A^{1} (var.), A^{2}, भिक्षां ज्ञेयोन्° B^{1}, भिक्षां देयोन्° B^{2}, भिक्षादये° B^{5}, भिक्षाटदेयो° D^{1}, भिक्षाटनोन्° D^{2}, भिक्षाटने F^{1} ; 14b समन्ताच्च] A^{2}, B^{1}, B^{4}, समन्ताश्च A^{1}, B^{5}, D, F^{1}, समन्तोच्च B^{2}, समा चिन्ता E, lacune G.

६. 14d समाचरेत्] A^{1} (etc.), समारभेत् F^{1}.

७. 15b ऽथवा] A (etc.), तथा F^{1}.

८. 15d °चित्र°] A, E, F^{1}, °चित्रे $B^{1-2,4-5}$, D, G ; ऽथवा] A^{1} (etc.), ऽपिवा F^{1}.

९. 16c भद्र° A (etc.), तत्र E.

१०. 17a माणिक्य°] A^{1}, B^{5}, G, माणिक्क° A^{2} (etc.).

११. 17c मरकतं] A^{1}, B^{5}, D^{1}, मरतकं A^{2} (etc.).

१२. 18a दिग्बीजेन] B^{4-5}, दिग्बीजानि A, B^{1-2}, G, तत्तद्बीजे D, दिग्बीजे तु F^{1} ; 18b °ब्रह्ममन्त्रेण] A^{1},

[३. नयनमोक्षणम्]

ततोऽक्षिमोक्षणं कुर्यान्मण्डपे समलङ्कृते॥ १८॥
स्थण्डिलं तत्र कुर्वीत शालिभिश्चतुरङ्गुलम्।
[१]तण्डुलैश्च तिलैश्चैव दर्भैश्चैव परिस्तरेत्॥ १९॥
तत्र देवं समायोज्य प्राङ्मुखं भूतसंयुतम्[२]।
अभितः कलशानष्टौ स्थापयेच्च यथाक्रमम्॥ २०॥
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्।
[३]पूजयित्वा स्वनाम्ना तु लोकपालाधिदेवतान्॥ २१॥
[४]पूर्वोक्तविधिना चैव आचार्यं पूजयेत्ततः।
अक्षिद्वययुते ऋक्षे नेत्रमोक्षणमारभेत्॥ २२॥
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत्[५]।
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्॥ २३॥
हिरण्यनखयुक्ताभिरङ्गुलीभिर्विचक्षणः।
नेत्रमन्त्रं समुच्चार्य प्रोतनेत्रेषु देशिकः[६]॥ २४॥
सुवर्णदूर्वया विद्वान्मध्वाज्याभ्यां च तर्पयेत्[७]।
मधुना पूरितं पात्रं मधुवातेति दर्शयेत्[८]॥ २५॥
घृतं वै दर्शयेद्धीमान्घृतमिक्षेति मन्त्रतः[९]।

B^{1-2}, D, G, °पूर्वमन्त्रेण B^4, °प्रश्मेन्द्रणिभि (?) F^1.

१. F^1 omet 19cd.

२. 20a समायोज्य] A (etc.), समास्थाप्य F^1, G ; 20b भूतसंयुतम्] A (etc.), कल्पयेत्सुधिः F^1.

३. A^1 et A^2 omettent 21cd.

४. E donne cette version de 22ab : आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः। et F^1 : आचार्यं पूजयेत्तत्र शील्पिनं पूजयेत्ततः।

५. 23b पक्ष्म°] A, $B^{1-2,4}$, D^2, E, पक्ष° D^1, F^1, पद्म° B^5, G ; समालि°] A^1, F^1, पुनर्लि° A^1 (var.) (etc.), पुरा° (*v.f.*) B^2.

६. 24d प्रोत°] A, B^5, E, F^1, G, प्रोक्त° $B^{1,4}$, D^2, प्रोक्तं B^2, D^1.

७. 25b च] A, G, न B^{1-2}, तु B^{4-5}, D, E, F^1.

८. 25d दर्शयेत्] B^4, D, E, F^1, तर्पयेत् A, B^{1-2}, G, दृशयेत् B^5.

९. 26b °घृतमिक्षेति] (*sic, voir p. 30*)A^1 (etc.), °घृतं मिमिक्षेति (*v.f.*) E, °घृतं मिक्षेण F^1, °घृतं मिमिक्षे G ; मन्त्रतः A^1 (etc.), दर्शयेत् F^1.

[१]सप्तबीजानि संदर्श्य बीजमन्त्रमनुस्मरन्[२] ॥ २६ ॥
[३]गौर्धेनुभव्यामन्त्रेण धेनुं दृष्ट्वा सवत्सकाम्[४] ।
ब्रह्मसूक्तेन मन्त्रेण ब्राह्मणान्दर्शयेत्ततः[५] ॥ २७ ॥
प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत्[६] ।
अचले तत्स्थानदेशे कुर्यान्नयनमोक्षणम्[७] ॥ २८ ॥
पूर्वोक्तविधिना कुर्यात्

[४. प्रतिमाशुद्धिः]

प्रतिमाशुद्धिमाचरेत् ।
पञ्चगव्यैः कषायैश्च मृत्तोयैर्गन्धतोयकैः[८] ॥ २९ ॥
पवमानं समुच्चार्य पञ्चगव्याभिषेचनम्[९] ।
यत इन्द्रेति मन्त्रेण शुद्धतोयेन सेचयेत्[१०] ॥ ३० ॥
[११]पुण्याहं वाचयेत्तत्र पूजयित्वा यथाविधि ।
महाव्योमेति मन्त्रेण प्रोक्षयेदचलं बुधः ॥ ३१ ॥

[५. ग्रामप्रदक्षिणम्]

[१२]चलं चेत्तदलङ्कृत्य कुर्याद्ग्रामप्रदक्षिणम् ।

---

१. F^1 omet 26cd.

२. 26c संदर्श्य] $B^{1-2,5}$, G, संदृश्य A, B^4, D, E ; 26d बीज°] A, B^{1-2}, E, G, पीठ° B^{4-5}, D.

३. E omet 27b-27c.

४. 27a गौर्धेनुभव्या°] $B^{1-2,4-5}$, D, E, गोधेनुभव्य° A^1, गोर्धेनुभव्य° A^2, G, गौर्धेनुभाव्य F^1 ; 27b °काम्] B^{4-5}, G, °गाम् A, B^{1-2}, D.

५. 27c ब्रह्मसूक्तेन मन्त्रेण] A^1, B^{1-2}, E, G, सुमुहूर्तेन मन्त्रेण B^4, ब्रह्मसूक्ष्मोक्तेन मन्त्रेण D, ब्रह्ममन्त्रं समुच्चार्य F^1 ; 27d °णान्दर्शयेत्ततः] A, B^{1-2}, G, °णान्सं प्रदर्शयेत् B^{4-5}, D, °णाभंश्च दर्शयेत् E, °णानां सुदर्शयेत् F^1.

६. 28b जनसङ्घान्°] A^1, E, G, जनान्सर्वान्° D^2, F^1.

७. 28c अचले] A (etc.), अचलं F^1 ; तत्स्थानदेशे] A, स्थानतदेशे B^{1-2}, स्थानदेशे तु B^{4-5}, तत्स्थानदेशेषु (*v.f.*) D, स्थानदेशेषु E, स्थाप्य देवेशं F^1, तत्स्थानदेशे तु G.

८. 29c °गव्यैः कषायैश्च] A (etc.), °गव्ये कषाये च B^1 ; 29d °गन्ध°] A (etc.), °शुद्ध° F^1.

९. 30a पवमानं] A^2 (etc.), +वमानं A^1 ; 30b °षेचनं] A, E, F^1, G, °षेचयेत् $B^{1-2,4-5}$, lacune D.

१०. 30c यत इन्द्रेति] B^{1-2}, G, इत इन्द्रेण A, एतो विन्द्रेति B^4, एत इन्द्रेति B^5, एतो विभ्रेण D^1, एतो विन्द्रेण D^2, एतोन्विमन्त्रेण E, एतोन्विन्द्रेति F^1.

११. F^1 donne cette version de 31ab : तत्रैव पूजयित्वा तु यथाविधि पुरःसरम् ।

१२. E donne cette version de 32a : भूषणैः समलङ्कृत्य et F^1 celle-ci : अलङ्कृत्य विशेषेण.

[१]सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम्[२] ॥ ३२॥
पिञ्छचामरसंकीर्णं धूपदीपसमाकुलम्।
तीरे समतले स्थाप्य शुद्धिं कृत्वा तु पूर्ववत्॥ ३३॥

[६. जलाधिवासः]

नद्यां वापि तटाके वा ह्रदे वाप्यामथापि वा[३]।
जलाधिवासनं कुर्यात्कण्ठदघ्नजले बुधः[४] ॥ ३४॥
[५]जलमध्ये प्रपां कुर्याद्वितानध्वजभूषिताम्[६]।
चतुष्पादीं न्यसेन्मध्ये तस्य मध्ये न्यसेद्धरम्[७]॥ ३५॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वाधिवासयेत्।
जलाधिवासनं नोक्तं मृण्मये भित्तिचित्रके॥ ३६॥

[७. मण्डपकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चातिभूषितम्[८]।
[९]दशहस्ताष्टहस्तं वा नवहस्तमथापि वा॥ ३७॥
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्[१०]।
चतुस्तोरणसंयुक्तं वितानैरुपशोभितम्[११] ॥ ३८॥
[१२]दर्भमालासमायुक्तं ध्वजमालोपशोभितम्।
मण्डपस्य त्रिभागैकं वेदीविस्तारमुच्यते॥ ३९॥
रत्निमात्रसमुत्सेधं दर्पणोदरसंनिभम्।

---

१. B^{2} omet 32cd.

२. 32c सर्वातोद्य°] A (etc.), सर्ववाद्य° B^{5}.

३. 34b ह्रदे] A (etc.), ह्रदये (*v.f.*) D, ह्रदौ E ; वाप्यामथापि वा] A (etc.), वाप्यथ पुष्करे B^{1-2}.

४. 34d °दघ्न°] A^{1}, G, °मग्ने A^{2}, B^{4-5}, °लग्न° B^{1-2}, lacune D^{1}, °मनै D^{2}, °दघ्ने E, °दग्धे F^{1}.

५. B^{5} omet 35ab-35cd.

६. 35b °भूषिताम्] A (etc.), °शोभितम् B^{4}.

७. 35c चतुष्पादीं] A (etc.), चतुर्थादि B^{4}, D ; 35d न्यसेद्धरम्] $B^{1-2,4}$ (etc.), न्यसेश्वरम् A, B^{5}, न्यसेद्धरिम् D.

८. 37b चातिभूषितं] A^{1}, नातिदूरतः A^{2} (etc.).

९. F^{1} donne cette version de 37cd : दशहस्तं नवहस्तं वा अष्टहस्तमथापि वा।

१०. 38a °संयुक्तं] A (etc.), °युक्तं च B^{1} ; 38b °समन्वितम्] A (etc.), °समायुक्तम् F^{1}, G.

११. 38d वितानैरुप°] A, B^{1-2}, G, वितानोपरि B^{4-5}, D, E, F^{1}.

१२. B^{2} omet 39ab-39cd ; D^{1} omet 39ab.

[१]परितः कल्पयेत्कुण्डान्मानुषे तु पदे क्रमात्[२] ॥ ४० ॥
हस्तमात्रप्रविस्तारं खातं हस्तस्य मात्रकम्[३] ।
[४]...
चतुस्त्रिद्व्यङ्गुलोत्सेधं विस्तारं तावदेव तु ॥ ४१ ॥
चतुरश्रं चतुर्दिक्षु विदिक्षु परिमण्डलम् ।
मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत् ॥ ४२ ॥
नालावटसमायुक्तं मेखलाद्वयभूषितम्[५] ।

[८. अधिवासः]

[८.१. शयनकल्पनादि]

जलादुत्तीर्य देवेशं पूर्ववच्छुद्धिमाचरेत् ॥ ४३ ॥
स्थण्डिलं कारयेद्वेद्यामष्टद्रोणैश्च शालिभिः[६] ।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि[७] ॥ ४४ ॥
तन्मध्ये पद्ममालिख्य तिलदर्भैः परिस्तरेत्[८] ।
शयनं तस्य मध्ये तु कल्पयेच्छक्तिमन्त्रतः[९] ॥ ४५ ॥
[१०]शक्तिबीजेन संपूज्य प्राक्शिरस्कं निवेशयेत्[११] ।
रक्तवस्त्रेण संवेष्ट्य हरिणीभूतसंयुतम्[१२] ॥ ४६ ॥

---

१. D^{2} répète 38cd-40ab avant 40cd.

२. 40c °कुण्डान्] F^{1}, G, °कुण्डं A (etc.).

३. 41b खातं] A^{1} (etc.), अखातं E ; हस्तस्य मात्रकम्] A, $B^{1-2,4}$, D, G, हस्तार्धप्रमाणकम्° B^{5}, हस्तमात्रकम् E, हस्तप्रमाणतः F^{1}.

४. Lacune probable correspondant au début de la description des *mekhalā*.

५. 43a नालावट°] A^{2}, B^{2}, G, नालाकट° A^{1}, नालपट° B^{1}, नालावलि° B^{4-5}, D, E, नालावद° F^{1} ; 43b °द्वयभूषितम्] A, D, G, च विभूषितम् B^{1-2}, F^{1}, °द्वयशोभितम् B^{4-5}, °त्रयभूषितम् E.

६. 44a स्थण्डिलं] A (etc.), स्थण्डिले B^{1} ; 44b °द्रोणैश्च] A (etc.), °द्रोणेन D, E.

७. 44d °धैश्च तिलैरपि] A, B^{1-2}, G, °धैश्च तिलैर्युतम् B^{4-5}, D, E, °धैस्तिलसंयुतम् F^{1}.

८. 45a तन्मध्ये पद्ममा] A (etc.), मुख्ये पद्म समा° F^{1} ; 45b तिल°] E, कुश° A (etc.).

९. 45d °छक्तिमन्त्रतः] A (etc.), °छतमन्त्रकम् F^{1}.

१०. F^{1} ajoute entre 45cd et 46ab : अण्डजैर्मुण्डजैश्चैव रोमजै ... मूजैरपि। दय्यास्तरणे शैव शयनं परिकल्पयेत्।

११. 46a °बीजेन संपूज्य] A (etc.), °बीजसमायुक्तं E ; 46b निवेशयेत्] B^{1-2}, G, निवेदयेत् A, न्यसेच्छिवम् B^{4-5}, D, E, F^{1}.

१२. 46d हरिणी°] A^{2}, B^{5}, F^{1}, हरिर्णीं A^{1}, हरिणं $B^{1-2,4}$, D, E, G.

पूजयित्वा यथान्यायं हृदयं मन्त्रमुच्चरन्।

[८.२. कुम्भविन्यासः]

[१]ईशानशक्रयोर्मध्ये शिवकुम्भं च वर्धनीम्॥ ४७॥
स्थापयेत्तौ विशेषेण रत्नहेमसमन्वितौ[२]।
[३]सकूर्चौ सापिधानौ च सवस्त्रौ वारिपूरितौ॥ ४८॥
पूजयित्वा स्वनाम्ना च गन्धपुष्पादिना बुधः[४]।
अभितः कलशानष्टावष्टविद्येश्वरात्मकान्[५]॥ ४९॥
सकूर्चान्सापिधानांश्च सवस्त्रान्वारिपूरितान्[६]।
हेमटङ्कसमायुक्तान्तत्तद्बीजसमायुतान्[७]॥ ५०॥
[८]नैवेद्यं दापयेद्धीमानुपदंशसमन्वितम्[९]।
ताम्बूलं दापयेत्पश्चात्ततो होमं समारभेत्[१०]॥ ५१॥
[११]शयनोपरि न्यसेत्कूर्चमचलं चेत्स्वनामभिः[१२]।

[८.३. होमः]

अश्वत्थोदुम्बरप्लक्षवटाः पूर्वादितः क्रमात्[१३]॥ ५२॥
[१४]शम्यर्कखदिराबिल्वाः प्रधानस्य पलाशकम्[१५]।

---

१. F^1 déplace 47cd-49ab après 50cd.

२. 48a स्थापयेत्तौ] A (etc.), स्थापयित्वा F^1 ; 48b °समन्वितौ] B^1, G, °समन्वितम् A (etc.).

३. E omet 48d-50a ; F^1 remplace 48ab par : … सकूर्चानिति पूर्ववत्।

४. 49a स्वनाम्ना च] A (etc.), स्वनामेन F^1.

५. 49d °त्मकान्] A^2, B^4, D, F^1, °त्मिकान् A^1, B^{1-2}, °ष्टकम् B^5, °न्वितान् G.

६. 50a सकूर्चान्°] A, $B^{2,4-5}$, D, सवस्त्रान्° B^1, E ; 50b वारि°] F^1, G, उदक° (*v.f.*) A, B^4, D.

७. 50d °समायुतान्] A, B^{1-2}, G, °समन्वितान् B^{4-5}, D, E, F^1.

८. F^1 omet 51ab.

९. 51a दापये°] A^1 (etc.), दर्शये° G ; 51b °वितम्] A^1 (etc.), °वितान् A^2.

१०. 51d °ततो होमं] A^1 (etc.), °तत्तद्धोमं G ; समारभेत्] A (etc.), समाचरेत् B^{1-2}.

११. Vers faux selon tous les manuscrits.

१२. 52b °नामभिः] A, B^{1-2}, G, °नामतः B^{4-5}, D, E, F^1.

१३. 52d °वटाः] A^1, B^2, °वटं A^2, B^{4-5}, D, E, F^1, G, °वटा° B^1.

१४. Le texte des manuscrits C reprend avec 53b.

१५. 53a शम्यर्कखादिरबिल्वाः] A^1, शम्यर्कखादिरो बिल्वः A^2 (etc.), शमिखदिरबिल्वं च F^1, शम्यकं खदिरो बिल्वम् G ; 53b प्रधानस्य पलाशकम्] A (etc.), प्रधानं स्यात्पलाशकम् C^2, प्रधानं धूपशालकम् D^2, पालशं

समिदाज्यचरुं लाजान्सक्तुमाषतिलानपि[१] ॥ ५३ ॥
यवसिद्धार्थगोधूमं प्रत्येकं जुहुयाच्छतम्।
शिवाग्निं जनयेद्धीमान्पूर्वोक्तविधिना सह[२] ॥ ५४ ॥
प्रणीताग्निं समानीय दिक्कुण्डेषु विनिक्षिपेत्[३]।
सद्यादिभिश्चतुर्दिक्षु विदिक्षु हृदयादिभिः[४] ॥ ५५ ॥
समिधो जुहुयादग्नौ पञ्चमेन हुनेच्छिवे[५]।
हृदयेन हुनेदाज्यं शिरसा च चरुं हुनेत् ॥ ५६ ॥
[६]हुत्वा लाजं तु शिखया सक्तुं वै कवचेन तु[7]।
[८]माषमस्त्रेण जुहुयान्नेत्रेण तु तिलाहुतिम्[९] ॥ ५७ ॥
यवं हुत्वा तु सद्योन सिद्धार्थं गुह्यकेन वै[१०]।
पुरुषेण तु गोधूमं प्रत्येकं तु शतं हुनेत्[११] ॥ ५८ ॥
उपाहुतिं तथा कुर्याद्द्रव्यं प्रतिविशेषतः[१२]।
त्र्यम्बकेन घृतं हुत्वा देवस्य त्वा चरुं हुनेत्[१३] ॥ ५९ ॥

च प्रधानकैः F^1.

१. 53d °सक्तु°] A^2 (etc.), °सक्थु° A^1.

२. 54c °येद्धीमान्°] A, B^{1-2}, G, °येत्पूर्वं B^{4-5}, C, E, D, F^1 ; 54d सह] A (etc.), बुधः C.

३. 55a प्रणीता°] A (etc.) , प्रधाना° F^1, lacune G ; समानीय] A^1, समादाय A^2 (etc.) ; 55b दिक्कुण्डेषु] A (etc.), शिवकुम्भे F^1.

४. 55c सद्यादिभिश्चतु°] A^2 (etc.), सर्वादिश्च चतु° A^1, विद्यादिभिश्चतु° B^5, सद्यादीनि चतु° F^1, lacune G.

५. 56a समिधो] A^1, C, D, E, G, समिधौ A^2, B^{4-5}, समिदा B^1, समिधं B^2, समिधाय F^1 ; °ग्नौ] A (etc.), °ष्टौ G ; 56b हुनेच्छिवे] A (etc.), हुनेच्छये (?) B^5, हुनेच्छिवौ E, हुनेच्छिवम् F^1.

६. C^1 et C^2 omettent 57ab-58cd ; F^1 : लाजं तु शिखया हुत्वा सक्तुकं वै कवचेन तु (*v.f.*).

७. 57b सक्तुं] A^2 (etc.), सक्थुं A^1.

८. F^1 donne cette version de 57cd : माषमस्त्रेण जुहुयादस्त्रेण तु तिलाहुतिम्।

९. 57c माषमस्त्रेण] Eds (*cf.* F^1), उमामन्त्रेण A^1 (etc.), उमास्त्रेण G ; 57d °हुतिम्] B^{4-5}, D, E, G, °हुतिः A, B^{1-2}.

१०. 58a यवं] A (etc.), एवं B^1 ; 58b गुह्यकेन वै] A (etc.), येन गुह्यतः F^1.

११. 58c पुरुषेण तु] A, B^{1-2}, C, G, पुरुष्टुतेन B^4, पुरुषे तेन D^1, पुरुषतेन D^2, पुरुषसूक्तेन E, पुरुषमन्त्रेण F^1.

१२. 59b °विशेषतः] A, B^{1-2}, G, °विचक्षणः B^{4-5}, C^2, D, E, F^1, lacune C^1.

१३. 59c त्र्यम्बकेन] A^2 (etc.), त्रियम्बके A^1, त्र्यम्बके (*v.f.*) B^1.

लाजं हुत्वाग्निमा वाह्य शन्नो देवीति सक्तु च[१४]।
[१५]यस्त्वा हृदा हुनेन्माषं कद्रुद्राय तिलं हुनेत्[१] ॥ ६० ॥
[२]यवं यो रुद्रमन्त्रेण त्वं नो अग्नेति सर्षपम्[३]।
गोधूमं जुहुयाद्विद्वान्गायत्रीमन्त्रमुच्चरन् ॥ ६१ ॥
द्रव्यान्ते व्याहृतिं हुत्वा व्याहृत्यन्ते स्पृशेच्छिवम्[४]।
एवं जगरणं रात्रौ प्रभाते स्थापनं भवेत्[५] ॥ ६२ ॥

[९. अधिवासानन्तरदिवसकृत्यम्]

आचार्यो मूर्तिपैः सार्धं स्नानत्रयमथाचरेत्[६]।
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात् ॥ ६३ ॥
आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः।
दक्षिणां दापयेत्तस्मै पूर्वोक्तविधिना सह ॥ ६४ ॥
मूर्तिपान्पूजयित्वा तु दैवज्ञमपि पूजयेत्।
स्विष्टाहुतिं ततः कुर्याद्देवमुत्थापयेद्धृदा[७] ॥ ६५ ॥
आसनं कल्पयेद्धीमान्स्नानश्वभ्रे च दारवे[८]।
आनीय प्रतिमां तत्र शिवकुम्भं च वर्धनीम्[९] ॥ ६६ ॥

---

१४. 60a देवीति सक्तु च] B^{2}, C^{2}, °ग्निमावाह्य A (etc.), °ग्निम्सदृशं B^{2}, °ग्निमायाहि B^{4} ; 60b देव्याः तु सक्तुकम् B^{4}, C^{1}, D, देव्याश्च सक्थु च A^{1}, देव्याश्च सक्तु च A^{2}, B^{1}, देवीस्तु सक्तुकम् B^{5}, देव्यात्तु सक्तुकम् E, देव्येति सक्थुकम् F^{1}, देव्या तु सक्तु च G.

१५. B^{1} omet 60cd.

१. 60c यस्त्वा हृदा] A (etc.), हुत्वाग्निं च B^{2}.

२. B^{5} omet 61ab-61cd.

३. 61a यो रुद्रमन्त्रेण] A (etc.), यवं यो रुद्रेति मन्त्रेण C^{2}.

४. 62b व्याहृत्यन्ते स्पृशे°] B^{4-5}, D, E, F^{1}, द्रव्यन्ते स्पर्शये° A, B^{1-2}, C^{1}, G.

५. 62c रात्रौ] A (etc.), कृत्वा C^{2} ; 62d प्रभाते] A (etc.), प्रपान्ते D^{2}.

६. 63a °त्रयमथाचरेत्] A (etc.), °त्रयं समाचरेत् B^{5}.

७. 65d °पयेद्धृदा] A (etc.), °पयेत्तदा A^{1}, D^{1}.

८. 66b च दारवे] A, B^{1-2}, E, G, ऽव तारयेत् B^{4-5}, °व दारयेत् C^{1}, D, °व धारयेत् C^{2}, विशेषतः F^{1}.

९. 66c आनीय प्रतिमां] A^{1}, $B^{1-2,4}$, G, आनियात्प्रथमं C, आनीयात्प्रतिमां D, E, आदाय प्रतिमात् F^{1}.

[१]दिक्कुम्भानि समुत्थाप्य कारयित्वा प्रदक्षिणम्[२]।
सर्वातोद्यसमायुक्तं स्वस्तिसूक्तसमन्वितम्॥ ६७॥
स्नानवेद्यां न्यसेद्देवं मृगभूतसमन्वितम्[३]।
अष्टत्रिंशत्कलान्यासं ब्रह्माङ्गानि ततो न्यसेत्[४]॥ ६८॥
[५]हरिणीभूतहृदये स्वनामाद्याक्षरं न्यसेत्[६]।
मूर्तिबीजं न्यसेद्धीमान्प्रागादीशान्तमेव च॥ ६९॥
[७]स्नपनं कारयेदन्ते यथाशक्त्या विशेषतः[८]।
पाद्यमाचमनं चार्घ्यं हृदयेन प्रदापयेत्॥ ७०॥
विशुद्धे मण्डपे स्थाप्य पूजयित्वा यथाविधि।
नैवेद्यं दापयेद्विद्वानुपदंशसमन्वितम्[९]॥ ७१॥
पुनराचमनं दद्यान्निर्माल्यं च विसर्जयेत्[१०]।
ताम्बूलं दापयेत्पश्चादुत्सवं कारयेत्ततः[११]॥ ७२॥

[९. भिक्षाटनस्थापनस्य फलम्]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात्।
राजा विजयमाप्नोति पुत्रपौत्रविवर्धनम्[१२]॥ ७३॥

---

१. F^1 remplace 67ab-67cd par : नृत्तगेयसमायुक्तं सर्वदोभ्यसमाङ्गुलम्। ब्रह्मघोषसमायुक्तं स्वस्तिसूक्तसमन्वितम्। प्रदक्षिणं ततः कृत्वा प्रासादं गुरुणा सह।

२. 67b °कुम्भानि] A (etc.), °कुम्भांश्च C^2 ; समुत्थाप्य] A, B^{1-2}, G, समुद्धृत्य B^{4-5}, C, D, E.

३. 68b मृगभूतसमन्वितम्] A, B^{1-2}, मृगभूतसमायुतम् B^{4-5}, C, D, E, हरिणीभूतसंयुतम् F^1, मृगभूतिसमन्वितम् G.

४. 68d ब्रह्माङ्गानि] A (etc.), बिम्बाङ्गानि B^1.

५. F^1 ajoute cinq demi-vers entre 68cd et 69ab : गन्धादिनां समभ्यर्च्य हृदयं मन्त्रमुच्चरन्। घृतशिरोर्पणं कुर्यात्पूर्वोक्तविधिना सह। मुहूर्ते निरीक्षदेवज्ञो गुरवे संनिवेदयेत्। कुम्भाद्बीजं समादाय प्रतिमे हृदि विन्यसेत्। वर्धनी बीजमादाय पिण्डिकायां तु विन्यसेत्।

६. 69a °हृदये] A^2 (etc.), °हृदयं A^1 ; 69b स्वनामाद्याक्षरं न्यसेत्] A (etc.), स्वनामं न्यसेद्बुधः F^1.

७. F^1 ajoute entre 69cd et 70ab : अचलं प्रोक्षयेद्विद्वाञ्चलं वै स्नापयेत्ततः।

८. 70b °शक्त्या] A, $B^{1-2,4}$, C^1, F^1, °शक्ति B^5, C^2, E, G, °शक्तिं D^1, °शक्त्यां D^2.

९. 71c दापयेद्°] A, B^{1-2}, G, पायसं B^{4-5} (etc.).

१०. 72a दद्यान्°] A^1, B^{1-2}, G, दत्वा B^4 (etc.) ; 72b च] A^1, तु A^2(etc.).

११. 72d °ततः] $B^{2,4-5}$, C, D, E, °तदा A, B^1, F^1, G.

१२. 73d पौत्रविवर्धनम्] A (etc.), पौत्रादिभिः सह F^1,

भिक्षाटनमिदं प्रोक्तं व्यक्ताव्यक्तमतः शृणु[१] ॥ ७४ ॥

॥ इति श्रीदीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनस्थापनपटलः [सप्तचत्वारिंशत्तमः][२] ॥

१. 74d °व्यक्तमतः] A[1], C, D, F[1], G, °व्रक्रमतः B[4], °व्यक्तमिदं E.

२. A[2] : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनवि . .पटलः।
B[1-2] : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनः पटलः।
B[4] : इति दीप्ते शास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनपटलचत्वारिंशतिमः।
B[5] : इति दीप्ते शास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनपटलचत्वारिंशत्तमः।
C[1], C[2] : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनविधिरेकोनचत्वारिंशः पटलः।
D[1] : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनमूर्तिस्थापनपटलचत्वारिंशत्तमः।
D[2] : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनस्थापनपटलचत्वारिंशत्तमः।
E : इति दीप्ते शास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनस्थापनपटलः।
F[1] : इति श्रीदीप्तशास्त्रे प्रतिष्ठायां भिक्षाटनविधिरष्टचत्वारिंशत्पटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भिक्षाटनस्थापनपटलः समाप्तः।

[अष्टचत्वारिंशत्तमः पटलः]
[मुखलिङ्गस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि मुखलिङ्गस्य चैव हि[२]।
स्थापनं परमं गुह्यं पुत्रपौत्रविवर्धनम्॥ १॥

[१. मुखलिङ्गलक्षणम्]

[१.१. चतुर्मुखलिङ्गम्]

द्वारमानेन वा कुर्याद्गर्भमानेन वा पुनः[३]।
उक्तं लिङ्गस्य यन्मानं तन्मानेनैव कारयेत्[४]॥ २॥
उत्सेधं तु त्रिधा कृत्वा पूजाभागं त्रिधा भवेत्[५]।
मध्यमांशे मुखं कुर्यान्मौलिं चैवोर्ध्वभागया[६]॥ ३॥
अधो ग्रीवां भुजांश्चैव भागेनैकेन कारयेत्[७]।
लिङ्गायामत्रिभागेन भुजनिर्गमनं भवेत्[८]॥ ४॥
ब्रह्मांशं नवधा कृत्वा संत्यजेद्भागपञ्चकम्[९]।
मुखनिर्गमनार्थं च चतुर्भागं मुखं भवेत्[१०]॥ ५॥

---

१. Manuscrits utilisés : A^1, A^2, B^2, B^3, B^4, C^1, C^2, D^1, D^2, E, F^1, G.

२. 1b चैव हि] A, B^{2-3}, G, चानल B^4, C^2, D, E, चानलम् C^1, चानलः F^1.

३. 2a द्वारमानेन वा] A (etc.), lacune B^4, वारमानेन वा C, द्वारमानेन वत्° F^1.

४. 2c उक्तं लिङ्गस्य] F^1, उक्तलिङ्गस्य A (etc.), उक्तलिङ्ग° C ; यन्मानं] A, B^{2-4}, E, F^1, G, यजानं C, D^1, यजनान्° D^2 ; 2d तन्मानेनैव] A (etc.), तज्ञानुनेनैव (*v.f.*) C, तजानेनैव D.

५. 3a उत्सेधं तु] A (etc.), lacune C^1, उत्सवेयं E ; कृत्वा] A (etc.), lacune C^1, भज्य C^2 ; 3b °भागं त्रिधा] A^2, B^2, C, D^2, E, °भागंस्त्रिधा A^1, B^3, lacune·B^4, °भागश्रिया D^1, °भागत्रयो F^1, °भागस्त्रिधा G.

६. 3c मध्यमांशे] A (etc.), वर्धन्यंशे C^2 ; 3d °मौलिं] A, B^{2-4}, D^1, °मौलीं C^1, D^2, E, F^1, °मौर्वीं G ; चैवोर्ध्वभागया] A^2, C^1, D^2, E, चैव स्वभागया A^1, चैवोर्ध्वभागतः B^{2-3}, C^2, G, चैवोर्ध्वभोगया B^4, चैवोर्ध्वभागधा D^1, च वोर्ध्वभागया F^1.

७. 4a अधो] B^{2-4} (etc.), अथ A^1, अधा° A^2, अथो F^1 ; ग्रीवां] A^1, ग्रीवं A^2 (etc.), ग्रीव° B^{2-3}, C^2, G ; भुजांश्चै°] A^1, भुजोश्चै° A^2, भुजे चै° B^2, C^1, G, भुजो चै° B^3, D^1, भुजौ चै° B^4, E, F^1, भुजं चै° C^2, अभुजो चै° (*v.f.*) D^2 ; 4b °केन कारयेत्] A^1, °केन कल्पयेत् A^2 (etc.), lacune C, °वेन कल्पयेत् F^1.

८. 4c लिङ्गायाम°] G, लिङ्गायामं A, C, D^2, लिङ्गमायं B^{2-3}, lacune B^4, लिङ्गाधं (*v.f.*) D^1, लिङ्गमायां E, लिङ्गयाम° F^1.

९. 5a ब्रह्मांशं] A (etc.), ब्रह्माङ्गं E, ब्रह्मांशे F^1 ; 5b °पञ्चकम्] A (etc.), °पञ्चमम् F^1.

१०. 5c मुख°] A^1 (etc.), मुखं° A^2, मुखे E ; च] A (etc.), स्याच्° B^4, C, D, F^1, वा E ; 5d चतुर्भागं] B^4, C^2, चतुर्भाग° A (etc.), स्याच्चतुर्भाग° (*v.f.*) E.

[१]भुजभागस्तथैकेन मध्यभागे मुखं भवेत्[२]।
कृष्णांशं चतुरश्रं स्याद्ब्रह्मांशाष्टाश्रकं भवेत्[३] ॥ ६ ॥
जटामकुटसंयुक्तं चन्द्रार्धकृतशेखरम्[४]।
वसुश्रोत्रं चतुर्नासि लोचनैर्द्वादशैर्युतम्[५] ॥ ७ ॥
चतुर्मुखस्य लिङ्गस्य नाथोऽयं त्रिमुखं शृणु[६]।

[१.२. त्रिमुखलिङ्गमेकमुखलिङ्गं च]

ब्रह्मांशं नवधा कृत्वा चतुर्भागं मुखं भवेत्[७] ॥ ८ ॥
[८]एकैकं मुखमानं स्याद्भुजभागं द्विभागया[९]।
अथैकवक्त्रकं कुर्यात्त्रिभागाभिर्विशेषतः[१०] ॥ ९ ॥

[१.३. चतुर्मुखलक्षणम्]

भद्रेश्वरमुखं पूर्वं दक्षिणं भीषणं मुखम्[११]।
पश्चिमास्यं तथा सौम्यं विरागं चोत्तरं मुखम्[१२] ॥ १० ॥

---

१. E omet le vers 6ab.

२. 6a भुज°] A, B^{2-3}, G, भुजो B^4, C, D, भुजौ F^1 ; °भागस्तथैकेन] A, B^{2-3}, C, D, lacune B^4, भागौ तथैतेन F^1, °भागे तथैकेन G.

३. 6c कृष्णांशं] A^1 (etc.), कृष्णाश्रं A^2, कृष्णाचं F^1 ; चतुरश्रं] A (etc.), चतुरं (*v.f.*) D ; 6d °ब्रह्मांशाष्टाश्रकं] A^1, B^{2-4}, D, E, G, °ब्रह्माङ्गाष्टाश्रकं A^2, C, °ब्रह्माचाष्टांशकं F^1 ; भवेत्] A (etc.), विदुः F^1.

४. 7a °युक्तं] A (etc.), °युक्तां F^1 ; 7b चन्द्रार्ध°] A^1 (etc.), चन्दार्ध° B^2, चन्द्रार्धं D^2.

५. 7c चतुर्नासि] A^1, B^{2-3}, D, चतुर्नासी A^2, C^2, lacune B^4, C^1, F^1, चतुर्नासं E, चतुर्नाभि G ; 7d लोचनैर्द्वादशै°] A (etc.), लोचनं द्वादशै° C^2, लोचनैर्द्वादशभि° (*v.f.*) F^1.

६. 8a लिङ्गस्य] A (etc.), न्यायोऽयं E ; 8b नाथोऽयं त्रि°] A, B^{2-4}, C, न्याधोऽयं त्रि° D, लिङ्गस्यन्त्र° E, न्याया वै (*v.f.*) F^1, न्यासोऽयं त्रि° G.

७. 8c ब्रह्मांशं] A (etc.), ब्रह्माणं B^4, lacune C^1, ब्रह्माङ्गं E, ब्रह्मांशा F^1.

८. C^2 répète 4cd-5cd entre 8cd et 9ab.

९. 9b भुजभागं द्विभागया] A, G, भुजभागद्विभागया B^{2-3}, भुजो भागं द्विभागतः B^4, D^2, भुजो भागद्विभागतः C^1, D^1, भुजो भागो द्विभागतः C^2, भुजौ भागद्विभागतः E, भुजभागविभागतः F^1.

१०. 9c अथैकवक्त्रकं कुर्यात्°] A, B^{2-3}, G, अथैकवक्त्रं कुर्यात्तु B^4, अथैकवक्त्रं कुर्यात्° (*v.f.*) C^1, D, अथैकवस्त्रं तत्कुर्यात्° C^2, अथैवक्त्रं वा कुर्यात्° (*v.f.*) E, अथैव वक्त्रं वा कुर्यात्° F^1 ; 9d त्रिभागाभि°] A (etc.), तत्त्रिभागै° C^2, त्रिभागा हि D.

११. 10a भद्रे°] A (etc.), रुद्रे° B^{2-3} ; °श्वरमुखं] A (etc.), °श्चरदुःखं C^1, D ; पूर्वं] A (etc.), पूर्व° B^{2-3}, पूर्वा F^1 ; 10b दक्षिणं भीषणं] A, B^{2-3}, G, अभितः षण्मु + B^4, lacune C, D, द्वितीयं भीषणं E, भीषणं दक्षिणा F^1.

१२. 10c पश्चिमास्यं ततो] F^1, पश्चिमस्य तथा A (etc.) ; सौम्यं] A, B^4, E, F^1, G, सौम्ये B^{2-3}, सौम्य° C, D ; 10d विरागं चोत्तरं] A, D, G, वीरगं चोत्तरं B^{2-3}, विरागं चोत्तरा° B^4, lacune C, वीराभं चोत्तरं E, विभागं

पूर्ववक्त्रमतिश्यामं दक्षिणं चाञ्जनप्रभम्[१]।
सुशुक्लं पश्चिमं वक्त्रं वामवक्त्रं तु रक्तकम्[२]॥ ११॥

[१.४. मुखलिङ्गानां स्थानम्]

चतुरास्यं त्रिरास्यं वा प्रासादे स्थाप्य लिङ्गवत्[३]।
एकवक्त्रमतिशुक्लं स्थापयेच्चलवद्बुधः[४]॥ १२॥
पद्मे वा भद्रपीठे वा ब्रह्मभागं विनिक्षिपेत्[५]।
प्रतिमालक्षणं प्रोक्तं स्थापनं शृणु चानल[६]॥ १३॥

[२. मुखलिङ्गस्थापनम्]

[२.१. अङ्कुरार्पणादि]

अङ्कुराण्यर्पयेद्धीमान्निर्दिष्टदिनपूर्वके[७]।
अचले निक्षिपेद्रत्नं चले रत्नं न निक्षिपेत्[८]॥ १४॥

[२.२. नेत्रमोक्षणम्]

[९]स्थण्डिलं शालिभिः कुर्यात्तिलदर्भसमन्वितम्[१०]।
[११]तस्य मध्ये न्यसेद्देवं सर्वातोद्यसमन्वितम्॥ १५॥

चोत्तरा F^1 ; मुखम्] A (etc.), क्षिपेत् F^1.

१. 11a °वक्त्रमति°] A (etc.), °वक्त्रमिति B^{2-3}, E, °वक्त्रमुखं F^1.

२. 11c सुशुक्लं पश्चिमं वक्त्रं] B^{2-3}, C, D, E, G, सुशुक्लं पश्चमं वक्त्रं A^1, सुशुद्धं पश्चिमं वक्त्रं A^2, सुशुक्लं पश्चिमं ++ B^4, शुक्लं पश्चिमवक्त्रं वा F^1.

३. 12a °स्यं त्रिरास्यं वा] A, B^{2-3}, C^2, F^1, G, lacune B^4, C^1, °भ्यस्त्रीरास्यं वा D^1, °स्यस्त्रीरास्यं वा D^2, °स्य त्रिरास्यं वा E, °स्यं त्रिरास्यं स्यात् F^1.

४. 12c एकवक्त्रमति°] A^2, B^4, D^1, एकवक्त्रमतिं A^1, एकवक्त्रमती° B^{2-3}, G, एवं वक्त्रमतिः C^1, एवं वक्त्रमति° C^2, एवक्त्रमति° D^2, एकवक्त्रं मति° E, एवं वक्त्रमीतं F^1.

५. 13a भद्र°] A^2 (etc.), पद्म° A^1, F^1, lacune C^1 ; 13b ब्रह्मभागं वि°] A (etc.), lacune B^4, ब्रह्माङ्गं वापि F^1.

६. 13d चानल] A, B^{2-4}, C, D^1, E, G, चानलम् D^2, चानले F^1.

७. 14b °निर्दिष्ट°] A (etc.), °निष्ट° (*v.f.*) C^2.

८. 14c अचले] A (etc.), अचने C^1 ; रत्नं] A (etc.), उक्तं B^4 ; 14d चले रत्नं न] A^2, G, चले रत्नानि A^1 (etc.), अचले रत्न F^1.

९. F^1 place 20cd-21ab entre 14cd et 15ab.

१०. 15b °दर्भसमन्वितम्] A, B^{2-3}, C^1, G, °दर्भसमायुतम् B^4, E, °दर्भसमं युतम् C^2, lacune D, °दर्भैः समायुतम् F^1.

११. F^1 ajoute entre 15ab et 15cd : स्थण्डिलं शोभितं कुर्याद्दलाष्टकसमन्वितम्।

अभितः कलशानष्टौ द्रोणतोयेन पूरितान्[१]।
सकूर्चान्सापिधानांश्च कल्पयेत्तु यथाक्रमम्[२] ॥ १६ ॥
गन्धादिना समभ्यर्च्य नेत्रमोक्षणमारभेत्[३]।
हेमसूचिप्रहाराभ्यां पक्ष्मरेखां समालिखेत्[४] ॥ १७ ॥
कृष्णमण्डलमालिख्य ज्योतिर्मण्डलमालिखेत्।
नेत्रमन्त्रं समुच्चार्य प्रोतहेमनखेन च[५] ॥ १८ ॥
वामाघोरसमन्त्राभ्यां मध्वाज्याभ्यां च तर्पयेत्[६]।
पञ्चगव्यैः कषायैश्च मृद्भिरद्भिः प्रसेचयेत्[७] ॥ १९ ॥
पुण्याहं वाचयेदन्ते

[२.३. ग्रामप्रदक्षिणं जलाधिवासश्च]

पूज्य गन्धादिना बुधः[८]।
रथमारोपयेन्मूर्तिं कुर्याद्ग्रामप्रदक्षिणम्[९] ॥ २० ॥
रथरङ्गं तथा कुर्यादीशानेनैव पूजयेत्[१०]।

---

१. 16b °तोयेन] A (etc.), lacune C^{1}, °तोय प्र° F^{1}.

२. 16d कल्पयेत्तु य°] A (etc.), कल्पयेयुर्य° F^{1}.

३. 17a गन्धादिना] A (etc.), नवादीनां F^{1}, गन्धादिभिः G ; 17b नेत्रमोक्षण°] A (etc.), नेत्रमन्त्र + C^{1}, अक्षिमोक्षण° F^{1}.

४. 17c हेमसूचि°] B^{2-3} (etc.), हैमसूचि° A^{2}, हैचसूची° A^{1}, हेमसूची° B^{4}, हेमसूच्या E, हैमसूची G ; °प्रहारा°] A^{2} (etc.), °प्रकारा° A^{1}, F^{1}, °प्रभार° D^{1} ; 17d पक्ष्मरेखां] A (etc.), पक्षरेखं C^{2}, D^{1}, पक्षिरेखा F^{1}.

५. 18d °हेमनखेन च] A, B^{2-3}, G, °हेमनखै ++ B^{4}, °हेमनखैः क्रमात् C^{1}, E, °हैमनखैः क्रमात् C^{2}, D^{2}, °भैमन वै क्रमात् D^{1}, lacune F^{1}.

६. 19a वामाघोरस°] A, B^{2-3}, G, lacune B^{4}, C^{1}, वामाराघोर° C^{2}, वाघोर° (*v.f.*) D^{1}, वाखोर° (*v.f.*) D^{2}, वामाघोर° (*v.f.*) E, वामघोरेण F^{1} ; 19b मध्वाज्याभ्यां] A^{2} (etc.), मध्यमाभ्यां A^{1}, C^{2}, मध्वाभ्यां (*v.f.*) D, मध्वभ्यां (*v.f.*) E ; च] A, B^{2-3}, G, तु B^{4} (etc.).

७. 19c °व्यैः कषायै°] A, B^{2-4}, C, D^{2}, E, °व्यैः क्षाधै° (*v.f.*) D^{1}, °व्यकषायै° F^{1}, G ; 19d मृद्भिरद्भिः प्रसेचयेत्] A^{1}, B^{2-4}, E, G, मृद्भिरब्भिः प्रसेचयेत् A^{2}, मृद्भिरशोचयेत् (*v.f.*) C^{1}, पञ्चमृद्भिश्च शोधयेत् C^{2}, मृद्भिरद्भिः प्रशेचयेत् D, अभिषेकं तु कारयेत् F^{1}.

८. 20a वाचयेदन्ते] A (etc.), lacune C^{1}, वाचयित्वा येदन्ते (*v.f.*) F^{1} ; 20b पूज्य गन्धादिना] A (etc.), lacune B^{4}, पुण्यगन्धादिना C^{2}, पूज्य गन्धानिना F^{1}.

९. 20c °रोपयेन्° A , B^{2-3}, C, D^{2}, G, lacune B^{4}, °रोपये D^{1}, °रोप्य तन्° E, F^{1}.

१०. 21a रथरङ्गं तथा] A^{1}, B^{2-3}, G, रथं रङ्गं तथा A^{2}, रथं गहेति तं B^{4}, रथरङ्गे तथा C, रथरङ्गे ततः D, E, रथभङ्गं ततः F^{1} ; 21b °शानेनैव पूजयेत्] B^{2-3}, °शानेन शताहुतिः A, C, °शानेन शतैरितिम् B^{4}, °शानेन शताहुतिं D, E, G, °शानेन शतहुतिः F^{1}.

वस्त्रकूर्चसमायुक्तं जले चैवाधिवासयेत्[१] ॥ २१ ॥
एकरात्रं द्विरात्रं वा त्रिरात्रं वा जलोषितम्[२] ।

[२.४. मण्डपकल्पनम्]

[३]प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम् ॥ २२ ॥
दशद्वादशहस्तं वा नवहस्ताष्टहस्तकम्[४] ।
षोडशस्तम्भसंयुक्तं चतुर्द्वारसमन्वितम्[५] ॥ २३ ॥
चतुस्तोरणसंयुक्तं वितानध्वजसंयुतम्[६] ।
तन्मध्ये वेदिकां कुर्यात्त्रिहस्तं विस्तरं क्रमात्[७] ॥ २४ ॥
रत्निमात्रसमुत्सेधं तालमात्रमथापि वा ।
चतुरश्राणि कुण्डानि दिक्षु कुर्याद्यथाक्रमम्[८] ॥ २५ ॥
आग्नेयादीशकोणान्तं वृत्तकुण्डानि कारयेत्[९] ।
ईशानशक्रयोर्मध्ये वृत्तं प्राधानिकं कुरु[१०] ॥ २६ ॥
सर्वेषां हस्तविस्तीर्णं गाम्भीर्यं तत्समं भवेत्[११] ।
मेखलात्रयसंयुक्तं नाभियोनिसमन्वितम् ॥ २७ ॥
गोमयालेपनं कृत्वा शालिपिष्टैर्विचित्रयेत्[१२] ।

---

१. 21c °कूर्चसमायुक्तं] A (etc.), °कूर्चसमायुक्त° D^{2}, °कूर्चे समावेष्ट्य F^{1} ; 21d °धिवासयेत्] A (etc.), °शलादिधिमासयेत् (*v.f.*) D^{1}.

२. 22b जलोषितम्] A^{1} (etc.), lacune A^{2}, D, जलोष्ठितम् F^{1}.

३. $B^{2\text{-}3}$ omettent 22d à 24c.

४. 23a दशद्वादशहस्तं] A, F^{1}, G, द्वादशं दशहस्तं B^{4}, C^{2}, D, E, lacune C^{1} ; 23b °ष्टहस्तकम्] A, E, F^{1}, G, °ष्टकं पुनः B^{4}, C, D.

५. 23c षोडशस्तम्भसंयुक्तं] A (etc.), तोरणस्तम्भसंयुक्तां F^{1}.

६. 24b वितानध्वजसंयुतम्] A (etc.), lacune C^{1}, विमानध्वजभूषितम् F^{1}.

७. 24d विस्तरं क्रमात्] A, $B^{2\text{-}3}$, G, विस्तरं ततः B^{4}, C, D, E, चैव विस्तरम् F^{1}.

८. 25d कुर्याद्यथा] A, $B^{2\text{-}4}$, C^{2}, E, G, कुर्यात्तथा C^{1}, D, कुण्डं यथा F^{1}.

९. 26a आग्नेयादीश°] A, $B^{2\text{-}4}$, C, F^{1}, G, आग्नेयादि° (*v.f.*) D, आग्नेय्यां दिशि E ; 26b वृत्तकुण्डानि कारयेत्] A (etc.), वृत्ताकाराणि कल्पयेत् F^{1}.

१०. 26c °शक्रयो°] A^{1} (etc.), °क्रमयो° A^{2} ; 26d वृत्तं प्राधानिकं] A (etc.), वृत्तं प्रधानकं $B^{2\text{-}3}$, F^{1}.

११. 27a सर्वेषां हस्त°] A (etc.), सर्वेषामस्त° B^{2}, lacune C^{1}, सर्वतो हस्त° F^{1} ; 27b गाम्भीर्यं तत्समं भवेत्] B^{4}, C, D, E, गम्भीरं तत्समं भवेत् A, $B^{2\text{-}3}$, G, गाम्भीरेण तु तत्समम् F^{1}.

१२. 28b शालिपिष्टै°] A (etc.), lacune C^{1}, शालीपिष्टै° D^{1}.

[२.५. अधिवासः]

[२.५.१ शयनकल्पनादि]

स्थण्डिलं वेदिकामध्ये तण्डुलैः सह कल्पयेत्॥ २८॥
तिलदर्भैः समाकीर्य शयनं तत्र कल्पयेत्[१]।
तन्मध्ये विन्यसेद्देवं प्राक्शिरस्कमधोमुखम्[२] ॥ २९॥
गन्धपुष्पादिना पूज्य रक्तवस्त्रेण वेष्टयेत्[३]।

[२.५.२. कुम्भन्यासः]

[४]शिवकुम्भं वर्धनीं च तत्तद्देशे तु विन्यसेत्[५] ॥ ३०॥
[६]पूर्वोक्तं शिवमन्त्रं तु शिवकुम्भे तु विन्यसेत्[७]।
वर्धन्यां वर्धनीबीजं तत्तद्रूपं तु भावयेत्[८] ॥ ३१॥
अभितोऽष्टघटान्न्यस्त्वा शिवतोयेन पूरयेत्[९]।
सवस्त्रान्सापिधानांश्च लोकपालाधिदैवतान्[१०] ॥ ३२॥
[११]बीजानि लोकपालांश्च तत्तत्कुम्भेषु विन्यसेत्[१२]।

---

१. 29a समाकीर्य] A, B^4, D^2, E, G, समाकीर्णं B^2, C, समाकीर्ण° B^3, समाकस्य D^1, समास्तीर्य F^1 ; 29b तत्र] A (etc.), lacune B^4, C^1, परि° C^2.

२. 29d °शिरस्कमधोमुखम्] A^1 (etc.), °शिस्कमधोमुखम् (*v.f.*) A^2, °शिरस्कं न्यसेद्बुधः B^{2-3}, °शिरस्कं त्वयोन्मुखम् F^1.

३. 30a पूज्य] A (etc.), पूर्व° E.

४. F^1 omet 30cd-31cd.

५. 30c च] A, B^{2-4}, G, चैव (*v.f.*) C, D^2, E, चै° D^1 ; 30d तत्तद्देशे] A^2, तत्तदीशे A^1, B^{2-3}, G, तत्त्वस्येशे B^4, तत्वस्यैशे C, D^2, E, °व तन्मध्ये D^1.

६. D^2 omet 31ab-32ab ; E remplace 31ab par : शिवकुम्भं तु पूर्वोक्तं शिवमन्त्रेण विन्यसेत्।

७. 31a पूर्वोक्तं] C, D^1, पूर्वोक्त° A, B^{2-3}, G, lacune B^4.

८. 31c वर्धन्यां वर्धनीबीजं] A, B^{2-4}, E, G, वर्धन्यां वर्धनीं धीमान्° C^1, वर्धन्यां वर्धनीं धीमत्° C^2, बन्धन्यां वर्धनी ++ D^1; 31d तत्तद्रूपं तु भावयेत्] B^4, C, D^1, E, तद्रूपं तु विभावयेत् A, तद्रूपं भावयेत्बुधः B^{2-3}, G.

९. 32a अभितोऽष्टघटान्°] A, G, अभितोऽथ घटान्° B^2, अभितोदघटान्° B^3, अभितोऽष्टौ घटान्° B^4, C^2, E, F^1, lacune C^1, अभितष्टौ घटा D^1.

१०. 32d °दैवतान्] A, C, D, G, °देवतान् B^{2-4}, E, F^1.

११. F^1 ajoute entre 32cd et 33ab trois vers et demi qui donnent les mantra de Śiva (K-Ṣ-Ī-M-R) et de la déesse (G-R-Ī) mais sont rendus inutiles par le *pūrvokta* de 31ab (voir chap. 1) : शिवकुम्भवर्धनीं तत्वात्स्थापयेदीशदेशतः। कूटमीकारसंयुक्तं (texte काट°) षष्ठवर्गान्तसंयुतम्॥ बिन्दुनादसमायुक्तमग्निबीजसमन्वितम्। शिवमन्त्रमिति प्रोक्तं शिवकुम्भे तु विन्यसेत्॥ कान्तान्तं रेफसंयुक्ताश्चतुर्थस्वरसंयुतम्। बिन्दुनादसमायुक्तं गौरीबीजमिति स्मृतम्॥ वर्धनीमध्यमे न्यस्त्वा तत्तद्रूपं प्रभावयेत्॥

१२. 33a बीजानि] A (etc.), बीजादि° G ; 33b °कुम्भेषु विन्यसेत्] A (etc.), °कुम्भेषिषु विन्यसेत् (*v.f.*)

पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः[१] ॥ ३३ ॥
दिशास्वध्ययनं कुर्यात्ततो होमं समाचरेत्[२] ।

[२.५.३. होमः]

समिदाज्यचरुं क्षीरं लाजं चापि तथा मधु[३] ॥ ३४ ॥
अपूपं फलसिद्धार्थं तिलं वै जुहुयात्क्रमात्[४] ।
पलाशोदुम्बराश्वत्थवटाः पूर्वदितः क्रमात्[५] ॥ ३५ ॥
शम्यर्कखादिरं बिल्वं विदिक्षु परिकल्पयेत्[६] ।
पलाशं तु प्रधानस्य प्रत्येकं जुहुयाच्छतम्[७] ॥ ३६ ॥
शिवकुण्डे शिवः प्रोक्तः दिक्कुण्डेषु भवादिकान्[८] ।
शिवाग्निं जनयेत्पूर्वं पञ्चसंस्कारसंयुतम् ॥ ३७ ॥
प्रणीताग्निं समादाय दिक्कुण्डेषु विनिक्षिपेत्[९] ।
सद्यादि जुहुयाद्दिक्षु विदिक्षु हृदयादयः[१०] ॥ ३८ ॥

B^{3}, °कुम्भे तु भावयेत् F^{1}.

१. 33c यथान्यायं] A (etc.), यथान्याय D^{1} ; 33d विशेषतः A, विचक्षणः B^{2-4} (etc.), विचक्षणम् D.

२. 34a °स्वध्ययनं] A (etc.), °स्वाध्याचनं D^{1}, lacune D^{2}, °स्वाध्यायनं F^{1} ; 34b समाचरेत्] A, B^{2-3}, G, समारभेत् B^{4}, C, D, E, F^{1}.

३. 34c समिदाज्यचरुं] A, B^{4}, C, D, E, समिधाज्यचरुं B^{2}, समिदाज्यचरून् B^{3}, समिधाज्यचरु° F^{1}, G ; 34d लाजं चापि] A^{1}, G, लाजां चापि A^{2}, लाजांश्चापि B^{2-3}, C, लाजाश्चापि B^{4}, D, जलाजाश्च E, °लाजा शालि° F^{1} ; तथा मधु] G, यथा मधु A, B^{2-4}, E, यथा मधुः C^{1}, यथाविधि C^{2}, यथा मधुम् D, °यवा बुधः F^{1}.

४. 35a अपूपं फल°] A^{1}, E, G, धूपफल° (*v.f.*) A^{2}, अपूपफल° B^{2-4}, C, अदुपल° (*v.f.*) D^{1}, आर्द्रपल° (*v.f.*) D^{2}, अपूपाफल° F^{1} ; °सिद्धार्थं] A^{1} (etc.), lacune A^{2}, सिद्धार्थ° D^{2} ; 35b तिलं] A (etc.), तैलं B^{2} ; क्रमात्] A, B^{2-3}, G, पृथक् B^{4}, C, D, E, F^{1}.

५. 35c पलाशोदुम्बराश्वत्थ°] A^{2}, B^{2-4}, C, F^{1}, G, पलाशौदुम्बराश्वत्थ° A^{1}, E, पलाशोम्बराश्चार्थं D^{1}, पलाशोदुम्बराश्वत्थं D^{2} ; 35d °वटाः] A^{1}, C, °वटं A^{2} (etc.).

६. 36a शम्यर्कखादिरं बिल्वं] A, B^{2-3}, G, शम्यर्कं खदिरं बिल्वं B^{4}, शम्यर्कखदिरो बिल्वं C^{1}, D^{2}, F^{1}, शम्याकः खदिरो बिल्वो C^{2}, शम्यकं खादिरो बिल्वं D^{1}, शम्यर्कखादिरो बिल्वा E ; 36b परिकल्पयेत्] A, B^{2-3}, F^{1}, G, परिकल्पितम् B^{4}, C^{1}, D, E, परिकल्पितः C^{2}.

७. 36c पलाशं तु प्रधानस्य] A, B^{2-4}, C^{1}, D, G, पलाशं तु प्रधानं स्यात् C^{2}, E, प्रधाने तु पलाशं स्यात् F^{1}.

८. 37a शिवकुण्डे] B^{4} (etc.), वैकुण्डे च A^{1}, चैककुण्डे A^{2}, वृत्तकुण्डे B^{2-3}, वेदिकुण्डे G ; शिवः प्रोक्तः] C^{2}, शिवं प्रोक्तं A (etc.), शिवप्रोक्तं F^{1} ; 37b दिक्कुण्डेषु] A (etc.), दिशाकुण्डे F^{1}, दिक्कुण्डेऽष्ट° G ; भवादिकान्] A^{1}, B^{2-3}, G, भवाधिकान् A^{2}, दिशाधिपा B^{4}, दिशाधिपान् C^{1}, F^{1}, दिशाधिपाः C^{2}, D, दिशाधिपः E.

९. 38a प्रणीताग्निं] A, B^{4}, C, D^{2}, G, प्रणीताग्नि B^{2-3}, प्रणिताग्निं D^{1}, प्रणीतादि E, प्रधानाग्निं F^{1} ; समादाय] A (etc.), समाधाय F^{1} ; 38b दिक्कुण्डेषु वि°] A (etc.), दिक्कुण्डे वि° (*v.f.*) B^{4}, दिक्षु कुण्डे च F^{1}.

१०. 38c सद्यादि जुहुयाद्°] A, B^{2-3}, E, G, सिद्धादि जुहुयाद्° B^{4}, C, D, समित्सद्यादिभिर्° F^{1} ; 38d हृदयादयः] A^{2}, B^{2-3}, G, हृदयादथ A^{1}, च हृदा बुधः B^{4}, C, D^{2}, E, च हृदा पुनः D^{1}, हृदयादिभिः F^{1}.

आज्यादितिलपर्यन्तं ब्रह्माङ्गैर्जुहुयात्क्रमात्[१]।
[२]रुद्रसूक्तैर्ब्रह्मसूक्तैर्विष्णुसूक्तैश्च होमयेत्[३] ॥ ३९ ॥
एवं जागरणं रात्रौ प्रभाते स्थापनं भवेत्[४]।

[२.६. अधिवासानन्तरदिवसकृत्यम्]

[५]आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ४० ॥
जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्[६]।
स्विष्टान्तं होमयित्वा तु ततः स्थापनमारभेत्[७] ॥ ४१ ॥
[८]उत्थाप्य शयनाद्देवं शन्नो देवीति मन्त्रतः[९]।
अचलं गर्भगेहे तु स्नानवेद्यां न्यसेच्चलम्[१०] ॥ ४२ ॥
रत्नन्यासं ततः कुर्याद्गर्भगेहे विधानतः।
आसनं कल्पयेद्धीमान्स्नानश्वभ्रे विशेषतः ॥ ४३ ॥
तत्र देवं समायोज्य कलाङ्गानि ततो न्यसेत्[११]।
सुमुहूर्ते सुनक्षत्रे सुतिथौ स्थापयेद्बुधः ॥ ४४ ॥
शिवकुम्भात्समादाय प्रासादं प्रतिमस्य च[१२]।

---

१. 39a आज्यादितिलपर्यन्तं] A (etc.), आज्योदितिलपर्यन्तं D, आज्यतन्निरूपर्यन्ता F^1 ; 39b ब्रह्माङ्गैर्जु°] A (etc.), ब्रह्मांशे जु° F^1.

२. E omet les vers 39cd-41ab

३. 39c रुद्रसूक्तैर्ब्रह्मसूक्तै°] A (etc.) F^1, G, ब्रह्मसूक्तैर्विष्णुसूक्तै° B^{2-3}, lacune C^1 ; 39d विष्णुसूक्तै°] A, B^4, C, D, G, रुद्रसूक्तै° B^{2-3}, lacune F^1.

४. 40a जागरणं] A, B^{2-4}, C^2, F^1, G, जागरकं C^1, D ; 40b स्थापनं भवेत्] A, B^{2-3}, C, G, स्थापनं चरेत् B^4, स्थापनमारभेत् (*v.f.*) D^1, स्थापनमाचरेत् (*v.f.*) D^2, स्नानमाचरेत् F^1.

५. F^1 remplace 40d par : मूर्तिपानथ पूजयेत्।

६. 41a °भ्याधानं च] A^2 (etc.), °भ्यधानं च A^1, C^2, G, °भ्याधानश्च B^3 ; 41b हुनेत्क्रमात्] A, B^4, C, D, क्रमाद्धुनेत् B^{2-3}.

७. 41d ततः स्थापन° A (etc.), तत्र स्नान° (*v.f.*) F^1.

८. B^4, C et D omettent 42ab-43cd.

९. 42a °द्देवं] A (etc.), °देवं F^1.

१०. 42c अचलं गर्भगेहे तु] A (etc.), गर्भगेहाचलं स्थाप्य F^1 ; 42d °वेद्यां न्यसेच्चलम्] A, B^2, E, G, °वेद्यान्यथे फलम् B^3, °वेद्या न्यसेच्चलम् F^1.

११. 44b कलाङ्गानि] A (etc.), कालाङ्गानी D^1, कालाङ्गानि D^2.

१२. 45a °कुम्भात्°] A (etc.), °कुम्भान्° C, °कुम्भं F^1 ; 45b प्रतिमस्य च] A, B^4, C, D, E, मन्त्रमेव च B^{2-3}, प्रतिमे हृदि F^1, प्रतिमासु च G.

[१]हृदये विन्यसेद्धीमान्पिण्डिकायां तु वर्धनीम्[२] ॥ ४५ ॥
दिशाकुम्भैश्च संस्नाप्य व्योमव्यापिमुदाहरन्[३] ।
शुद्धदेशं समानीय वस्त्राभरणमालया[४] ॥ ४६ ॥
अर्चनोक्तं समभ्यर्च्य नैवेद्यान्तं हृदा बुधः[५] ।
मुखवासं ततो दद्याद्धृदयेन तु मन्त्रतः[६] ॥ ४७ ॥
एकाहमुत्सवं कुर्यात्सप्ताहं वापि कारयेत्[७] ।

[३. मुखलिङ्गस्थापनफलम्]

एवं यः कुरुते मर्त्यः पुत्रपौत्रकलत्रकैः ॥ ४८ ॥
इह लोके सुखं प्राप्य देहान्ते मुक्तिमाप्नुयात्[८] ।
[९]व्यक्ताव्यक्तं इदं प्रोक्तं लिङ्गोद्भवमतः शृणु[१०] ॥ ४९ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटलः [अष्टचत्वारिंशत्तमः][११] ॥

---

१. F^1 remplace 45c par : न्यसेत्समाहितो भूत्वा.

२. 45d पिण्डिकायां तु वर्धनीम्] A (etc.), चण्डिका ++वर्धनीम् B^2, lacune B^3, ++कायां तु वर्धनीम् C^1, पिच्छिकायां तु वर्धनीम् D^2, पिण्डिकायां तु वर्धनी F^1.

३. 46a दिशाकुम्भैश्च] C^2, दिशाकुम्भानि A, B^4, C^1, D, E, शिवकुम्भाद्भिः B^{2-3}, दिशाकुम्भेन F^1, शिवकुम्भात्° (*v.f.*) G ; संस्नाप्य] B^{2-4} (etc.), संस्थाप्य A, C^1, °समादाय (*v.f.*) G ; 46b व्योमव्यापिमु°] A^2 (etc.), व्योमव्यापीमु° A^1, व्योमव्यापी उ° G.

४. 46c °देशं समानीय] A^1, °देशे समानीय A^2 (etc.), °देशे समानीया F^1 ; 46d °भरणमालया] A, B^{2-3}, F^1, G, °भरणमालभेत् B^4, °भरणमालि च C^1, D^1, °भरणमाल्यकैः C^2, °भरणमालि चा D^2, °भरणमालयोः E.

५. 47b हृदा] A (etc.), तदा C, हृदाद्° D^2.

६. 47c ततो दद्याद्°] B^{2-4}, C, E, हृदा दद्याद्° A, G, ततो तद्युद्° D^1, ततो द्युद्° (*v.f.*) D^2, च ताम्बूलं F^1 ; 47d मन्त्रतः] A (etc.), lacune B^4, दापयेत् F^1.

७. 48a एकाह°] A (etc.), lacune B^4, एका° (*v.f.*) D^2.

८. 49b देहान्ते मुक्तिमा°] A^1, सोऽन्ते मुक्तिमवा° A^2, C, D, E, सोऽन्ते सायुज्यम् B^{2-4}, G, lacune F^1.

९. B^{2-3} omettent 49cd.

१०. 49c व्यक्ताव्यक्तं] A, C, D^2, E, G, व्यक्तलिङ्गं B^4, व्यक्ताप्यं (*v.f.*) D^1, lacune F^1 ; 49d लिङ्गोद्भवमतः] A^2 (etc.), लिङ्गोद्भवमथ A^1, C^2, लिङ्गोत्सेधमतः C^1, लिङ्गोद्भवमत D^1, ++भवमथ F^1.

११. A, E, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटलः।
B^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनः पटलः। शिवाय नमः।
B^3 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटलः।
B^4 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटल ए ... त्वारिंशतिम्। मुत्तुलिखितम्।
C : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनविधिः चत्वारिंशः पटलः।
D^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटल एकचत्वारिंशतितमः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे मुखलिङ्गस्थापनपटल एकचत्वारिंतितमः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां मुखलिङ्गस्थापनं एकोनपञ्चाशत्पटलः।

[नवचत्वारिंशत्तमः पटलः]
[लिङ्गोद्भवस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि यागं लिङ्गोद्भवस्य च[२]।
पुत्रपौत्रा विवर्धन्ते राजराष्ट्रविवर्धनम्[३]॥ १॥

[१.लिङ्गोद्भवमूर्तिकथा]

कल्पान्ते प्रापिते काले जलौघैरमरादिभिः[४]।
नष्टास्तु देवताः सर्वा जगत्स्थावरजङ्गमाः[५]॥ २॥
हरिब्रह्माऽण्डमध्यस्थौ विवादं चक्रतुस्तदा[६]।
जगदीशोऽह्यहं ब्रह्मा विष्णुमाह च सोऽपि तम्[७]॥ ३॥
दृष्ट्वा विवादमुभयोर्विस्मितः प्रभुरव्ययः[८]।
[९]महाजलौघमध्ये तु स्थूणस्तेजोमयः स्थितः[१०]॥ ४॥
[११]दृष्ट्वा स्थितं तथापन्नौ विस्मयं परमं ततः[१२]।

---

१. Manuscrits utilisés : A^1, A^2, B^4, B^5, C^1, C^2, D^1, D^2, E, F^1, G.

२. 1b यागं लिङ्गोद्भवस्य च] A^1 (etc.), यागलिङ्गोत्सवं शृणु F^1.

३. 1c विवर्धन्ते] A, B^4, C, D, E, °भिवृद्ध्यन्ते B^5, विवृध्यर्थं F^1, विवृद्धिः स्याद्° G.

४. 2a प्रपिते काले] A, C, G, प्रपितः कलो B^4, प्रपिते(?) कालो B^5, प्रपितो काले D, प्रपिते लोको E, प्रपिते लोके F^1 ; 2b जलौघैरम°] B^4, C, जलौघोरम° A, B^5, जलोघैरम° D, G, जले चैवाम° E, lacune F^1.

५. 2c नष्टास्तु देव°] A^1, नष्टाः स्युर्देव° A^2 (etc.), अष्टासुर्देव° B^5, अष्टाः स्युर्देव° D^2 ; सर्वा] A^1 (etc.), सर्वे A^2, सर्वाः B^4, C^1 ; 2d जग°] A^1 (etc.) भज° F^1 ; °जङ्गमाः] A^2, B^4, D, E, °जङ्गमम् A^1, C^2, F^1, G, °जङ्गमा B^5, °जङ्गमः C^1.

६. 3a °ब्रह्माऽण्डमध्यस्थौ] C, D, G, °ब्रह्मौ मध्यस्थौ (*v.f.*) A^1, lacune A^2, °ब्रह्माण्डमध्यस्थितौ (*v.f.*) B^{4-5}, °ब्रह्मावमध्यस्थो E, °ब्रह्माण्डमध्ये स्थौ F^1 ; 3b विवादं] A^1 (etc.), पितामहौ F^1 ; °तदा] A (etc.), °सदा C^1, F^1, °तथा C^2.

७. 3d विष्णुमाह च सोऽपि तम्] A (etc.), lacune C^2, विष्णुमालह च शोभितम् B^5, विष्णुमाह च स्थोऽपि तम् D^1, विष्णुमाह च सोपितः D^2, अहं विष्णु पितामहः F^1.

८. 4a विवाद°] A (etc.), विपाक° C^2 ; 4b °विस्मितः प्रभुरव्ययः] E, °विस्मितः प्राह चाव्ययम् A^1, °विस्मितं प्रहा चाव्ययं A^2, °विस्थितः प्रभुरव्ययः B^4, C^2, D, °विस्तथा वृषरप्ययः B^5, °विस्थिरप्रसव्ययः C^1, °द्विरेयं प्रभुरागमम् F^1, °विहितं प्राह चाव्ययम् G.

९. G omet 4cd-6ab.

१०. 4c °जलौघ°] A^1 (etc.), °जलौघैर् F^1 ; 4d स्थूणस्तेजो°] B^4, C, D^2, गुणतेजो° A, स्थाणुतेजो° B^5, स्मृणस्तेजो° D^1, स्थाणुस्तेजो°° E, स्तम्भं तेजो° F^1 ; 4d °मयः] A^1, B^{4-5}, °मया° A^2, D^2, °मय° C, D^1, E, °मयं F^1 ; स्थितः] A^1 (etc.), स्थितम् F^1.

११. F^1 remplace 5ab-5cd par तदापिस्त्रयमानो संप्रसार्य परस्परम्।

१२. 5a तथापन्नौ] A^1, तदापन्नौ A^2, E, तदापन्नो B^4, C, D, तदः पन्तो B^5 ; 5b परमं] A^1 (etc.), परं (*v.f.*)

परस्परं संप्रधार्य ब्रह्मा विष्णुश्च तावुभौ[१] ॥ ५॥
विष्णुर्वराहरूपेण निर्मज्ञति दिदृक्षया[२]।
ब्रह्मा तु हंसरूपेण दिवं प्राप्तो दिदृक्षया[३] ॥ ६॥
[४]तौ च नागमतां शम्भोरन्तं विस्मयमागतौ[५]।
समेत्य तौ हरिब्रह्मा लिङ्गं तुष्टावतुस्तदा[६] ॥ ७॥
आविर्बभूव तन्मध्ये रूपं वै चन्द्रशेखरम्।
कृताञ्जलिपुटौ भूत्वा स्तुतौ देवं त्रियम्बकम्[७] ॥ ८॥
तदा प्रभृति ब्रह्माद्या लिङ्गं संस्थाप्य पूजिताः[८]।
[९]असुरा राक्षसा दैत्या गन्धर्वाः सर्व एव च[१०] ॥ ९॥
ऋषयः किन्नरा यक्षा यातुधाना नरास्तथा ।
लिङ्गं संस्थाप्य चादाय पूजयन्ति यथाविधि[११] ॥ १०॥

[२. प्रतिमालक्षणम्]

सौवर्णैराजतैर्वापि ताम्रैश्चैवारकूटकैः[१२]।

D^2 ; ततः] A, C, D, E, गतः B^5.

१. 5c संप्रधार्य] B^4, E, संप्रसार्य A, B^5, संप्रधार्यं C^1, सप्रधार्य C^2, D^2, समप्रधार्य D^1.

२. 6b निर्मज्ञति दि॰] A^1, D^2, E, निर्ममज्ञदि॰ A^2, B^5, D^1, lacune B^4, निर्मज्ञ च (*v.f.*) C^1, निर्मज्य च (*v.f.*) C^2, निमज्ञ सिद्धि F^1.

३. 6c ब्रह्मा तु हंस॰] A^1, ब्रह्मापि हंस॰ A^2, F^1, G, ब्रह्मादि विद्व॰ C^2, ब्रह्मापि द्वि॰ D, ब्रह्मापि द्विज॰ B^5, E ; 6d दिवं प्राप्तो दि॰] A (etc.), दिवं प्रप्नोति D, यद्गच्छा (*v.f.*) F^1.

४. F^1 remplace 7ab-8ab par : ब्रह्माहरिसमावेत्रि लिङ्गं तु ततः सदा। आदित्यत्पिब ... शेकररूपिणम्।

५. 7a च नागमतां] A, C^2, D, E, G, च नमननं B^4, चे नमननं B^5 ; 7b ॰न्तं विस्मयमागतौ] B^{4-5}, C^2, D, E, ॰न्तरे विस्मयं गतौ A^1, G, ॰न्तरे विस्मयागतौ A^2, ॰न्तं विसमयमागतः C^1.

६. 7c समेत्य तौ] A^1 (etc.), समेत्यासौ G ; हरिब्रह्मा] A (etc.), हरिर्ब्रह्मा C^2, G, ; 7d तुष्टावतुस्तदा॰] A^2, B^4, C, E, दृष्ट्वा वतुस्तदा॰ A^1, G, तुष्टुवृतुस्तदा॰ B^5, कृषुवतुस्तदा॰ D^1, कृष्टवतुस्तदा॰ D^2.

७. 8c ॰पुटौ] B^{4-5}, C^2, E, G, ॰पुटो A, C^1, D^2, F^1, ॰पुटे D^1 ; भुत्वा] A^1 (etc.), मत्त्वा D^1 ; 8d स्तुतौ] F^1, स्तुत्वा A, E, G, स्तुतो B^{4-5}, C^1, D, ततो C^2.

८. 9a प्रभृति] A^1 (etc.), प्रकृति C ; 9b संस्थाप्य] A^1 (etc.), प्रतिष्ठितं F^1 ; पूजिताः] A^2, E, G, पूझिताः A^1, पूजिता B^{4-5}, D, पूजितम् C^1, पूजितः C^2, न्यसेत् F^1.

९. F^1 remplace 9cd-10ab par असं राराक्षसा दैत्या दानवा मानुषादयः।

१०. 9c दैत्या] A^1 (etc.), देवा E ; 9d गन्धर्वाः] A^2 (etc.), गन्धर्वा A^1 ; एव च] A^2, C^1, G, येव च A^1, एव तु B^{4-5}, D, E, एव हि C^2.

११. 10c लिङ्गं संस्थाप्य चादाय] A^1 (etc.), स्थाप्य लिङ्गं सदाकालं F^1.

१२. 11b ताम्रैश्चैवारकूटकैः] A^2, G, ताम्रैश्च वारकूटकैः A^1, ताम्रैश्चारकूटकैस्तथा (*v.f.*) B^4, ताम्रैरारकटैस्तथा B^5, ताम्रैरारकूटैस्तथा C, D, F^1, ताम्रैः कुहारदे सत्य (?) E.

शिलामृद्दारुभिः कुर्याद्धरिब्रह्मसमन्वितम्[१] ॥ ११ ॥
गर्भगेहसमं वापि गर्भार्धं वा त्रिपादकम्[२] ।
तद्द्वारोत्सेधमानं वा स्तम्भमानमथापि व[३] ॥ १२ ॥
एतल्लिङ्गोच्छ्रयं मानं नाहमर्धेन कारयेत्[४] ।
[५]स्तम्भत्रिभागमानेन स्तम्भान्तः प्रतिमां कुरु[६] ॥ १३ ॥
परशुं कृष्णमृगं च वरदाभयहस्तकम्[७] ।
चन्द्रशेखरवत्कुर्याद्धरिं ब्रह्माणमेव च[८] ॥१४ ॥
ब्रह्माणं दक्षिणे कुर्याद्विष्णुं वामे तु कल्पयेत्[९] ।
हृदयेऽञ्जलिसंयुक्तौ तौ द्वौ तु विकृताननौ[१०] ॥ १५ ॥
एवं कृत्वा विशेषेण ततः स्थापनमारभेत् ।

[३. अक्षिमोक्षणम्]

रत्नन्यासं न कर्तव्यं कर्तव्यं चाक्षिमोक्षणम्[११] ॥ १६ ॥
मण्डपे स्थण्डिलं कुर्याच्छालिभिस्तण्डुलैः सह[१२] ।
तिलदर्भैः समाकीर्य लिङ्गं तत्रैव शाययेत्[१३] ॥ १७ ॥
ब्रह्माणं दक्षिणे स्थाप्य विष्णुं वै वामदेशतः ।

---

१. 11c °मृद्दारुभिः कुर्याद्ध°] A[1] (etc.), °मृद्दारुस्वर्णभ्योद्ध° E.

२. 12a °गेह°] A[2] (etc.), °गृहे A[1], D, E, lacune C[1], °गेहं C[2].

३. 12c तद्द्वारोत्सेधमानं वा] A[1] (etc.), तलद्वारोत्सेधमानं C[2].

४. 13a एतल्लिङ्गो°] A[1] (etc.), स्थितलिङ्गो° C[2] ; °च्छ्रयं] A[1] (etc.), °घयं A[2], °त्सेधं B[4] ; 13b नाह°] A[1] (etc.), नाभि° D[2], E ; °मर्धेन] Eds., °मध्येन A (etc.).

५. F[1] omet 13cd-15ab.

६. 13c स्तम्भ°] A (etc.), स्तम्भात्° B[4], E ; 13d स्तम्भान्तः] B[4], C, D, E स्तम्भान्तं A, B[5], G.

७. 14a कृष्णमृगं च] Eds., कृष्णमृगं चैव (*v.f.*) A, B[4-5], E, G, कुत्रकं चैव C[1], कुमुकं चैव C[2], कृमृगं चैव D[1], कूमृगं चैव D[2].

८. 14c °शेखरवत्° A[1]] (etc.), °शेखरकं B[5].

९. 15a कुर्याद्°] A[1] (etc.), भागे E ; 15b वामे तु] A[1] (etc.), वामेन B[5].

१०. 15d द्वौ तु विकृताननौ] A, lacune B[4-5], C, D[1], द्वावकताननौ D[2], द्ववबताननौ E, तावेतानेताननौ (*v.f.*) F[1], द्वौ विकृताननौ (*v.f.*) G.

११. 16c रत्नन्यासं न] A[2] (etc.), करन्यासं च A[1], रत्नन्यासं (*v.f.*) B[5], रक्तन्यासं न D[2], रत्नन्यासोन G ; 16d कर्तव्यं] A, B[4-5], G, नयनं C[2], lacune C[1], D, F[1] ; चाक्षि°] A[1] (etc.), नाक्षि° F[1].

[४]पुण्याहं वाचयेत्तत्र पवमानेन प्रोक्षयेत्।

[७. मण्डपकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं नातिदूरतः॥ २४॥
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्।
[५]वितानोपरिसञ्छन्नं ध्वजयूथैः समाकुलम्[६]॥ २५॥
रत्नदामैः स्वर्णदामैर्मुक्तादामैर्विभूषितम्[७]।
तन्मध्ये वेदिकां कुर्याद्रत्निमात्रसमुच्छ्रयाम्[८]॥ २६॥
कुण्डानि कारयेद्धीमान् चतुर्दिक्षु च चक्रवत्[९]।
आग्नेयादिषु कोणेषु योन्याकाराणि कारयेत्[१०]॥ २७॥

---

१. 21b गोमूत्रेणाभिषेचयेत्] A^1, lacune A^2, गोमूत्रमभिषेचयेत् F^1, G.

२. 22a वस्त्राभरणमाल्यं च] A, वस्त्रमाभरणं माल्यं F^1, वस्त्राभरणमाल्यानि G ; 22b स्वनामाद्येन] A, G, स्नानमध्येन F^1.

३. 23b नरयूथैः सहानल] A^1, नारयुथैः समाकुलम् A^2, न पूतैः समाकुलम् (*v.f.*) F^1, नागयुथैः समाकुलम् G.

४. F^1 donne cette version de 24ab : पुण्याहं वाचयेत्पश्चाद्घोषश्छिवयोगिनाम्.

५. F^1 ajoute entre 25ab et 25cd : युगद्वारसमायुक्तं युगतोरणभूषितम्। दर्भमालासमायुक्तं नवपल्लवशोभितम्॥

६. 25c वितानोपरिसञ्छन्नं] A, G, विताने परिसञ्छिन्न F^1.

७. 26a °दामैः स्वर्णदामैर्मु°] A, F^1, °दामस्वर्णदामं मु° G ; 26b °दामैर्विभूषितम्] A, F^1, °दामनिभूषितम् G.

८. 26d °समुच्छ्रयाम्] G, °समुच्छ्रयम् A, °समन्वितम् F^1.

९. 27b च चक्रवत्] A, G, कलोपमम् F^1.

१०. 27c आग्नेयादिषु] F^1, G, आग्नेयादि त्रि° A.

[८. अधिवासः]

[८.१. शयनकल्पनम्]

स्थण्डिलं कारयेद्विद्वानष्टद्रोणेन शलिना[१]।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि[२] ॥ २८ ॥
[३]लाजपुष्पकुशैश्चैव क्रमेणैव परिस्तरेत्।
स्वनाम्ना चैव मन्त्रेण शाययेज्जगदीश्वरम्[४] ॥ २९ ॥
गन्धाद्यैरर्चयित्वा तु रक्तवस्त्रेण वेष्टयेत्।
महिषीं वामपार्श्वे तु शाययेदूर्ध्ववक्त्रकाम्[५] ॥ ३० ॥
उर्वशीं मेनकां रम्भां तिलोत्तमामभितो न्यसेत्[६]।

[८.२. नृपबेरस्य नानाविषयाः]

जितिर्वैरजितिर्वापि नृपबेरं सुकारयेत्[७] ॥ ३१ ॥
[८]सहशक्तिसमायुक्तं वजिति जीव तु वा।
नृपाणां मरणकाले स्त्रियश्च मरणं विना[९] ॥ ३२ ॥

[८.३. कुम्भविन्यासः]

राजकुम्भं शिरःस्थाने स्थाप्य देवीघटं तथा[१०]।
लोकपालाधिदैवत्यानभितोऽष्टघटान्न्यसेत्[११] ॥ ३३ ॥
सकूर्चान् सापिधानांश्च सवस्त्रान् पल्लवैर्युतान्[१२]।

---

१. 28a °विद्वान°] A, G, °वेद्याम° F^1.

२. 28c °भूष्य] A, G, °पुष्यं F^1 ; 28d तदर्धैश्च तिलैरपि] A, G, तदर्धं तिलसंयुतम् F^1.

३. F^1 donne cette version de 29ab : लाजदर्भसमायुक्तं क्रमेणैवाण्डजादिनाम्।

४. 29c °नाम्ना चैव मन्त्रेण] A, G, °नाम्नि वा च संपुज्य F^1.

५. 30c महिषीं] A, G, हिमा (*v.f.*) F^1 ; 30d शाययेदूर्ध्ववक्त्रकाम्] A, न्याययेदूर्ध्ववस्त्रकम् F^1, शाययेदूर्ध्वकञ्चुकाम् G.

६. 31a उर्वशीं मेनकां रम्भां] A^1, उर्वशी मेनका रम्भा A^2, उर्वशि नै+रम्भादि F^1, ऊर्वशीं मेनकां रम्भां G; 31b vers faux dans tous les manuscrits.

७. 31c जितिर्वैर जितिर्वापि] A, जीतिपैर्व अजीपैर्वा F^1, रितिर्वैराजिनिर्वापि G.

८. A et G omettent 32ab.

९. 32d स्त्रियश्च] A, G, शक्तिना F^1.

१०. 33b स्थाप्य देवीघटं] A, G, स्थाप देवघटं F^1.

११. 33c °धिदैवत्यान°] G, °धिकैवत्यम° A^1, °धिदैवत्यम° A^2, F^1 ; 33d ऽष्टघटान्°] A, G, ऽष्टौघटा F^1.

१२. 34a °कूर्चान् सा°] A^2, F^1, G, °वस्त्रं सा° A^1 ; 34b °वस्त्रान् पल्लवैर्युतान्] G, °कूर्चं पल्लवैर्युतम् A^1,

सहिरण्यान्वारिपूर्णान्विन्यसेत्तु स्वनामतः[१] ॥ ३४ ॥
स्वनामाद्यं समुद्धृत्य षष्ठस्वरसमायुतम्[२]।
औकारस्वरसंयुक्तं बिन्दुनादसमन्वितम्॥ ३५ ॥
इदं बीजं समुद्धृत्य घटमध्ये तु विन्यसेत्।
एवमेवं समुद्धृत्य शक्तिकुम्भे तु विन्यसेत्॥ ३६ ॥
[३]धनुः शरं च खड्गं च खेटकं क्षुरिका ततः[४]।
कृत्वा सौवर्णकं छत्रं नृपकुम्भे तु विन्यसेत्[५] ॥ ३७ ॥
शुद्धसौवर्णकं पद्मं देवीकुम्भे तु विन्यसेत्।
पूजयित्वा यथान्यायं नैवेद्यान्तं विशेषतः ॥ ३८ ॥

[८.४. अध्ययनम्]

रुद्रसूक्तं पुरुषसूक्तं विष्णुसूक्तं तथैव च।
[६]पवमानं हिरण्यं च चतुर्होता तथैव च[७] ॥ ३९ ॥
सप्तहोता दशहोता आ वो राजा तथैव च[८]।
अरुणं वह्निहोतारं शतरुद्रं क्रमेण च[९] ॥ ४० ॥
ब्रह्मसाम ज्येष्ठसाम देवं ब्राह्म समुच्चरन्[१०]।
चतुर्दिक्ष्वध्ययनं कुर्याद्बीजमुख्यास्त्रसंयुतम्[११] ॥ ४१ ॥

---

lacune A², °कूर्चान्पल्लवैर्युतम् F¹.

१. 34c सहिरण्यान्वारिपूर्णान्] G, हिरण्यान्वारिसंपूज्य A¹, सहिरण्यान्वारिसंपूर्णान् (*v.f.*) A², सहिरण्यान्वारिसंपूर्णा F¹.

२. 35a स्वनामाद्यं] F¹, G, स्वनामाद्यं A.

३. A et G omettent 37ab-37cd.

४. 37b क्षुरिका ततः] Eds, क्षुरकातकः F¹.

५. 37c सौवर्णकं छत्रं] Eds, सौवर्णं चत्र (*v.f.*) F¹.

६. F¹ omet 39cd.

७. 39d चतुर्होता] A, चतुस्तोता G.

८. 40b आ वो] A², F¹, आ पो A¹, G.

९. 40d °रुद्रं क्रमेण च] A¹, °रुद्रमेव च A², lacune F¹, °रुद्रकमेव च G.

१०. 41a ज्येष्ठसाम] G, ज्येष्ठसामां A, ज्येष्ठसामं F¹ ; 41b देवं ब्रह्म] A, देवब्राह्मं G, देवबृन्दं F¹.

११. 41c चतुर्दिक्ष्वध्ययनं] A, F¹, दिक्षुचाध्ययनं G ; 41d °मुख्यास्त्र°] A, G, °मुख्यार्थ° F¹.

[८.५. होमः]

[१]पलाशखादिराश्वत्थवटं पूर्वादितः क्रमात्[२]।
शमीबिल्वमशोकं च मयूरं च विदिक्षु वै[३] ॥ ४२॥
समिदाज्यं चरुं चैव लाजं वै तिलसर्षपान्[४]।
त्रिमधुमधुरैर्द्रव्यैर्द्रव्यान्ते होमकर्मणि[५] ॥ ४३॥
अग्निसंस्कारकं सर्वं हृदयादिं समाचरेत्[६]।
[७]हृदयेन समिद्धोममीशानेन घृतं हुनेत्[८] ॥ ४४॥
[९]चरुं हुत्वास्त्रमन्त्रेण लाजं वै घोरमन्त्रतः।
तिलं पाशुपतास्त्रेण सर्षपं चास्त्रमन्त्रतः ॥ ४५॥
[१०]मधुवातेति मन्त्रेण मधु चैव हुनेद्बुधः।
प्रत्येकं तु शतं हुत्वा रात्रौ जागरणं बुधः ॥ ४६॥

[९. अधिवासानन्तरदिवसकृत्यम्]

प्रभाते मूर्तिपैः सार्धं स्नानत्रयमथाचरेत्[११]।
आचार्यं पूजयेत्तत्र मूर्तिपानथ पूजयेत् ॥ ४७॥
भगणं पूजयेदन्ते अध्ययनं तदन्तके[१२]।
शयनान्नृपमुत्थाप्य महिषीं चाप्सरोगणान्[१३] ॥ ४८॥

---

१. F^1 ajoute entre 41cd et 42ab : मूर्तिहोमं ततः कुर्याद्वास्तुहोमनिरन्तरम्।

२. 42a °श्वत्थवटं] A^2, F^1, G, °श्वत्थवटाल A^1.

३. 42c °बिल्वम°] A, G, °पल्लवा° F^1 ; 42d मयूरं] A^1, F^1, G, मधूकं A^2.

४. 43b लाजं] A, G, लाजा F^1.

५. 43c °मधुमधुरैर्द्रव्यैर्द्र°] Eds, °धाममधुरैर्द्रव्यैर्द्र° A^1, °मधुम्मधुरेन्द्रस्य द्र° A^2, °मधुरमधुमेन्द्रव्या द्र° F^1, °मधुरं मधुरेन्द्रं स्याद्द्र° G.

६. 44a °संस्कारकं] A, G, °संस्कारके F^1.

७. F^1 ajoute entre 44ab et 44cd : शिवसंस्कारहोमं स्याच्छिवमन्त्रेण होमयेत्।

८. 44d °मीशानेन] A, G, °मीशमन्त्रं F^1.

९. F^1 donne cette version de 45ab : चरुं हुत्वाक्षमन्त्रेण लाजाघोरास्त्रकं हुनेत्

१०. F^1 donne cette version de 46ab-cd : मधुवातेति मन्त्रेण हृदयादिषु +बुधः। होमाध्ययन शितेश्वनृत्तं जागरकान्नयेत्।

११. 47a प्रभाते मूर्ति°] A, G, प्रभातैर्मूर्ति° F^1.

१२. 48b अध्ययनं तदन्तके] G, अध्ययेनं तदन्तके A^1, lacune A^2, अध्ययनं तदनन्तरम् F^1.

१३. 48c शयनान्नृपमुत्थाप्य] A, G, नृपेन्द्रं शयनोत्थाप्य F^1 ; 48d महिषीं चाप्सरोगणान्] A, महीं चाप्सरसो

ततः स्विष्टाहुतिं कुर्यात्पूर्णाहुतिमथाचरेत्[१]।
स्नानवेद्युपरि न्यस्त्वा नृपं शक्तिसमन्वितम्[२] ॥ ४९ ॥
न्यासं कुर्यान्नृपं शक्तिं हृदयादि विचक्षणः[३]।
हृदये हृदयं न्यस्य शिरः शिरसि विन्यसेत् ॥ ५० ॥
शिखायां तु शिखां न्यस्त्वा कवचं स्तनमध्यतः।
अस्त्रं हस्तप्रदेशे तु नेत्रं नेत्रे तु विन्यसेत्[४] ॥ ५१ ॥
एवं न्यस्त्वा विशेषेण देव्याश्च परिवारकैः[५]।
सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम् ॥ ५२ ॥
नृपकुम्भात्समुत्थाप्य तद्बीजं हृदि विन्यसेत्[६]।
देवीबीजं तथा न्यस्त्वा एवमेव क्रमेण तु ॥ ५३ ॥
स्नानासने समारोप्य स्नानकुम्भोदकं न्यसेत्।
स्वर्णादिलोहकैश्चैव चित्राभासं तथैव च[७] ॥ ५४ ॥
दर्पणे चाभिषेकं तु ; तन्मन्त्रं हृदि विन्यसेत्[८]।
तत्तन्मन्त्रं समुच्चार्य प्रतिमां चाभिषेचयेत्[९] ॥ ५५ ॥
वस्त्रमाभरणं माल्यं हृदयेन तु दापयेत्[१०]।
गन्धादिं धूपदीपांश्च दद्याद्धृदयमन्त्रतः[११] ॥ ५६ ॥
स्थापयेन्मूलहर्म्ये तु प्राङ्मुखोदङ्मुखक्रमात्।

गणाम् F¹, महीं च अप्सरोगणान् G.

१. 49a स्विष्टाहुतिं कुर्यात्॰] A, G, सविष्टाहुतीर्था F¹.

२. 49c ॰वेद्युपरि] A², G, ॰वेद्योपरि A¹, F¹ ; 49d नृपं शक्तिसमन्वितम्] Eds., नृपमूर्तिपसंयुतम् A, G, नृपशक्तिसमन्वितम् F¹.

३. 50a न्यासं] A¹, lacune A², न्यायं G.

४. 51c हस्तप्रदेशे] F¹, G, अस्त्रप्रदेशे A ; 51d नेत्रं] A, G, नेत्रे F¹.

५. 52b देव्याश्च] A¹, G, देव्यायां A², F¹ ; परिवारकैः] A, G, परिवारके F¹.

६. 53a नृपकुम्भात्॰] A¹, नृपं कुम्भं A², नृपकुम्भैः F¹, नृपकुम्भं G.

७. 54c स्वर्णादिलोहकैश्चैव] A², F¹, स्वरादिलोहजश्चैव A¹, G ; 54d ॰भासं तथैव च] A¹, G, ॰भारस्तथैव च A², ॰भास तथैव च F¹.

८. 55a दर्पणे] A, G, दर्पणं F¹ ; 55b तन्मन्त्रं हृदि विन्यसेत्] A, G, प्रतिकुम्भोदकं भवेत् F¹.

९. 55d प्रतिमां] A, G, भवनं F¹.

१०. 56a वस्त्रमाभरणं माल्यं] A¹, वस्त्रैराभरणैर्माल्यं A², वस्त्रैराभरणैर्मल्यै F¹, G.

११. 56c ॰दिं धूपदीपांश्च] A¹, ॰दौर्धूपदिपैश्च A², F¹, G.

ततो देवीं समुद्धृत्य नृपपार्श्वे विनिक्षिपेत्[१] ॥ ५७ ॥
नैवेद्यं पायसं दद्यात्ताम्बूलं तु निवेदयेत्।
उत्सवं च ततः कुर्यात्सर्वातोद्यसमन्वितम्॥ ५८ ॥

[१०.शिवभक्तस्थापनम्]

एवमेव क्रमेणैव शिवभक्तांश्च स्थापयेत्[२]।
स्थापयेत्तु विशेषेण तत्तन्मन्त्रं समुच्चरन्[३] ॥ ५९ ॥

[११. सकलार्चनम्]

सकलार्चामहं वक्ष्ये लोकशान्त्यैककारणम्[४]।
स्नानत्रयं पुरा कृत्वा आचम्य विधिवत्ततः ॥ ६० ॥
प्रदक्षिणत्रयं कृत्वा आलयं तु प्रवेशयेत्।
अङ्गन्यासं करन्यासं पूर्वोक्तविधिना सह[५] ॥ ६१ ॥
अस्त्रमन्त्रं समुच्चार्य कवाटोद्घाटनं कुरु।
प्रविश्य गर्भगेहे तु यवनीमपनीय च[६] ॥ ६२ ॥
स्थानशुद्धिं ततः कुर्यात्पात्रशुद्धिं च कारयेत्[७]।
द्रव्यशुद्धिं ततः कृत्वा बिम्बशुद्धिं समाचरेत्[८] ॥ ६३ ॥
अस्त्रमन्त्रं समुच्चार्य प्रोक्षयेत्सकुशेन तु[९]।
[१०]वस्त्रं दद्याद्धृदा मन्त्री गन्धं वामेन योजयेत्[११] ॥ ६४ ॥
पुष्पं कवचमन्त्रेण पुष्पं दद्यात्सुगन्धिकम्।

---

१. 57c ततो देवीं समुद्धृत्य] A, G, दे++न्ततः परस्तिं च F^1 ; 57d विनिक्षिपेत्] A, G, निवेदयेत् F^1.

२. 59b °भक्तांश्च स्थापयेत्] A, G, °भक्ताञ्चितश्रितान् F^1.

३. 59d तत्तन्मन्त्रं] A, F^1, स्वस्त्रमन्त्रं G ; समुच्चरन्] A, G, देशिकः F^1.

४. 60a सकलार्चामहं] Eds, सकलार्चनमहं (*v.f.*) A, F^1, कलार्चनमहं G ; 60b °शान्त्यैक°] A^1, °शान्त्यर्थ° A^2, F^1, °शान्त्यथ G.

५. 61d सह] A, G, कुरु F^1.

६. 62c प्रविश्य] A^2, F^1, G, प्रवेश्य A^1 ; 62d यवनीमपनीय च] A^1, lacune A^2, यनीकामपनीयकम् F^1, यवनिकामपनीय च G.

७. 63a स्थान°] A^2, G, स्नान° A^1, F^1.

८. 63c कृत्वा] A, G, कुर्याद्° F^1.

९. 64b प्रोक्षयेत्सकुशेन तु] A^1, प्रोक्षयेत्तु कुशेन तु A^2, G, वस्त्रमाला विसर्जयेत् F^1.

१०. F^1 ajoute entre 64ab et 64cd : सद्यमन्त्रं समुच्चार्य प्रोक्षणाम्भकुशेन तु।

११. 64c मन्त्री] A, G, मन्त्रि F^1.

धूपं दद्याद्धृदा मन्त्री दीपं तु दशबीजतः[१] ॥ ६५ ॥
द्वारस्य दक्षिणे भागे गङ्गां यमुनामुत्तरे[२]।
श्रीदेवीमूर्ध्वदेशे तु द्वारस्याधः क्षितीश्वरीम्[३] ॥ ६६ ॥
तत्प्रासादस्य परितो लोकपालान्समर्चयेत्।
नैवेद्यं दापयेद्राज्ञो देवस्य त्वेति मन्त्रतः[४] ॥ ६७ ॥
हृदा चाचमनं दद्यान्नैवेद्यं तु विसर्जयेत्[५]।
ताम्बूलं दापयेद्विद्वान्फलत्रयसमन्वितम् ॥ ६८ ॥
शिवगायत्रिमन्त्रेण नित्याग्निं च समाचरेत्[६]।
एककालं द्विकालं वा त्रिकालं चार्चयेत्क्रमात्[७] ॥ ६९ ॥
यस्मिन्राष्ट्रे कृतं ह्येवं सर्वशान्तिकरं परम्[८]।
लोकपालाः प्रियाः सर्वे सर्वे देवगणाः प्रियाः[९] ॥ ७० ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे क्षत्रियस्थापनपटलः [द्विपञ्चाशत्तमः][१०] ॥

---

१. 65c मन्त्री] A, मन्त्रि F^1 ; 65d तु] A^1, F^1, G, त्रि° A^2; °बीजतः] A, G, °बीजकम् F^1.

२. 66b गङ्गां यमुनामुत्तरे] Eds., गङ्गामुत्तरतोयमाम् A, G, गङ्गायां यमुनोत्तरे F^1.

३. 66c °देवीमूर्ध्वदेशे] A^1, G, °देवीं पृष्ठदेशे A^2, °देवीमूर्ध्वदेवी F^1 ; 66d °श्वरीम्] G, °श्वरम् A, °श्वरः F^1.

४. 67c दापयेद्राज्ञो] A, G, धूपदीपार्घ्यै F^1.

५. 68a °दा चाचमनं] A^2, G, °दाचमनं A^1, F^1 ; 68b °नैवेद्यं] A, F^1, °निर्माल्यं G ; विसर्जयेत्] A, G, समर्चयेत् F^1.

६. 69b नित्याग्निं च] A, G, नित्याग्निश्च F^1.

७. 69cd द्विकालं वा त्रिकालं चार्चयेत्] A, G, त्रिकालं वा द्विकालं वा अर्चयेत् F^1.

८. 70a कृतं] F^1, कृते A, G ; 70b °करं परम्] A, G, °कराय च F^1.

९. 70c °पालाः प्रियाः सर्वे] A, G, °पालान्प्रियायां च F^1 ; 70d सर्वे देवगणाः प्रियाः] A^1, सर्वदेवगणप्रियाः A^2, देवसर्वे गुणान्विता F^1, सर्वदेवगणाः प्रियाः G.

१०. A : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे क्षत्रियस्थापनपटलः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां क्षितीश्वरस्थापनपटलषष्ट्येकोध्यायः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे क्षत्रियस्थापनपटलः सनाप्तः।

[त्रिपञ्चाशत्तमः पटलः]
[महर्षिस्थापनविधिः[१]]

अतः परं प्रवक्ष्यामि ऋषीणां स्थापनं परम्।
आयुरारोग्यजयदं पुत्रपौत्रविवर्धनम्[२] ॥ १ ॥

[१. ऋषिनामानि]

वसिष्ठं काश्यपं कालमगस्त्यं कौशिकं तथा[३]।
अङ्गिराः पराशरश्च आर्या वै मुनिसत्तमाः[४] ॥ २ ॥
सनकश्च सनन्दश्च सनत्कुमारः पुलस्त्यकः च[५]।
भारद्वाजः कुमारश्च वाल्मीको भृङ्गिनारदौ[६] ॥ ३ ॥
रोमशश्च तथान्येषां स्थापनं शृणु चानल[७]।
प्रासादबाह्यके स्थाप्याः तत्तत्स्थानेऽथवापरे[८] ॥ ४ ॥

[२. मण्डपकल्पनम्]

प्रासादस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्।
षोडशस्तम्भसंयुक्तं चतुर्द्वारविभूषितम् ॥ ५ ॥
विचित्रे मण्डपे रम्ये वितानोपरिशोभिते[९]।
दिग्ध्वजैः पुष्पमालाभिर्धूपदीपैः समाकुले[१०] ॥ ६ ॥

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 1c °जयदं] A, G, + बलं F^1 ; 1d पुत्रपौत्रविवर्धनम्] A, G, सर्वशास्त्रसमुद्धृतम् F^1.

३. 2a वसिष्ठं काश्यपं] A^2, वासिष्ठं काश्यपं A^1, वासिष्ठः काश्यप F^1, वासिष्ठं कश्यपं G ; 2b कालमगस्त्यं] G, कालमागस्त्यं A, गत्वा अगस्त्यः F^1 ; तथा] A, G, स्मृतम् F^1.

४. 2c अङ्गिराः पराशरश्च] G, अङ्गिराश्च पराशश्च A^1, अङ्गिरा च पराशश्च A^2, अङ्गिराय पराशश्च F^1 ; 2d आर्या वै मुनिसत्तमाः] Eds, आयुर्या मुनिसत्तमाः A^1, अङ्गि + मुनिसत्तमः A^2, आर्यो वै मुनिसत्तमाः F^1, आयुर्यो मुनिसत्तमः G.

५. 3a °च सनन्दश्च] A^1, G, °च सनन्तश्च A^2, सनन्तश्चैव F^1 ; 3b पुलस्त्यकः] (*v.f.*) F^1, पुलस्त्य च (*v.f.*) A, पुलस्त्यः (*v.f.*) G.

६. 3c °द्वाजः] A^1, G, °द्वाज° A^2, F^1 ; 3d वाल्मीको भृङ्गिनारदौ] G, पाल्यङ्को भृङ्गनारदः A^1, वाल्मीको भृङ्गिनारदः A^2, वल्मीको भृङ्गनादमः F^1.

७. 4a रोमशश्च तथान्येषां] A, G, रोमश्चैव तथा ह्येषां F^1.

८. 4c स्थाप्याः] Eds, स्थाप्य A (etc.) ; 4d ऽथवापरे] A^1, च वापरे A^2, G, °व वा पुनः F^1.

९. 6b वितानो°] A, F^1, वितान° G.

१०. 6d °कुले] A^1, G, °कुलम् A^2, °कुलैः F^1.

तन्मध्ये विन्यसेद्देवं विधिवद्विन्यसेद्बुधः।
अष्टदिक्षु च कुण्डानि चतुरश्राणि विन्यसेत्॥ ७॥
दिशासु चतुरश्राणि वृत्तानि विदिशासु वा।

[३. रत्नन्यासः]

मृण्मये चित्रके चैव भित्तिचित्रपटे तथा[१]॥ ८॥
रत्नन्यासः प्रकर्तव्यः कर्तव्यः शैलजादिषु[२]।
सौवर्णं राजतं ताम्रमारकूटं च कांस्यकम्[३]॥ ९॥
प्रतिमां कारयेद्धीमानृषितालैर्विशेषतः[४]।
पीठबन्धं न्यसेत्पश्चाद्रत्नन्यासं तु कारयेत्[५]॥ १०॥
माणिक्यं मध्यमे स्थाप्य पूर्वादीनि प्रदक्षिणम्[६]।
इन्द्रनीलं च वैडूर्यं नीलं स्फटिकमौक्तिकम्[७]॥ ११॥
प्रवालं पद्मरागं च पुष्परागं नवाक्षरैः[८]।
पीठे संयोजयेद्विद्वान्सुदृढं कारयेत्ततः[९]॥ १२॥

[४. अक्षिमोक्षणम्]

नेत्रद्वययुते ऋक्षे दृष्टिमोक्षणमारभेत्[१०]।
पूर्वाभिमुखमास्थाय ऋषीन्संस्थापयेद्बुधः[११]॥ १३॥

---

१. 8c मृण्मये चित्रके चै°] A, G, मृण्मयैश्चित्रकैश्चै° F^1 ; 8d °चित्रपटे तथा] A^2, °श्चित्रपठे तथा A^1, °चित्रपटेऽपि वा F^1, °चित्रे पटेऽथवा G.

२. 9a °न्यासः प्रकर्तव्यः] G, °न्यासं प्रकर्तव्यं A, F^1 ; 9b कर्तव्यः] G, कर्तव्यं A, lacune F^1 ; °जादिषु] A^1, G, °जाद्रिषु A^2, lacune F^1.

३. 9d ताम्रमारकूटं च कांस्यकम्] A, G, ताम्रं कास्यं वा वारकूटकम् F^1.

४. 10a प्रतिमां] A, G, प्रतिमान्° F^1 ; 10b °मानृषितालैर्विशे°] A, G, °मान्भागहस्तविशे° F^1.

५. 10c °पश्चाद्°] A, G, °धीमान्° F^1.

६. 11a माणिक्यं] A^1, G, माणिक्कं A^2, F^1 ; 11b पूर्वादीनि] A, G, सर्वादीनि F^1.

७. 11d नीलं स्फटिकमौक्तिकम्] A, G, निस्फटिकसन्निभम् (*v.f.*) F^1.

८. 12b पुष्प°] A^1, पुष्य° A^2, F^1, G.

९. 12c संयोजयेद्विद्वान्°] A^1, G, सुयोजयेद्विद्वान्° A^2, संयोजयेद्धीमान्° F^1 ; 12d सुदृढं कारयेत्ततः] A, G, सरस्विकारयेत्तमः F^1.

१०. 13a °युते ऋक्षे] A, G, °ऋते नृक्षे F^1.

११. 13c °मुखमास्थाय] A^2, G, °मुखमास्थाप्य A^1, °मुख संस्थाय F^1 ; 13d ऋषीन्संस्थापयेद्बुधः] G, ऋषीणां स्थापयेत्सुधीः A^1, F^1, ऋषीण स्थापयेत्सुधीः A^2.

स्थण्डिलोपरि विन्यस्य कलशांश्च विदिक्षु च।
गन्धतोयेन संपूर्णान्वस्त्ररत्नसमन्वितान्[१] ॥ १४॥
सकूर्चान्सापिधानांश्च सवस्त्रान्पल्लवैर्युतान्[२]।
पूजयेन्मुनिमन्त्रेण स्वनामाद्येन वा पुनः ॥ १५॥
हेमसूचीप्रहाराभ्यां पक्ष्मरेखां समालिखेत्[३]।
कृष्णमण्डलमालिख्य ततो वै दृष्टिमण्डलम्[४] ॥ १६॥
तर्जन्या दक्षिणे नेत्रे प्रोतहेमनखेन च[५]।
वामे त्वनामिकया च नेत्रद्वययुतं लिखेत्[६] ॥ १७॥
[७]मध्वाज्यैस्तर्पयेद्धीमान्हेमदूर्वाङ्कुरेण तु[८]।
मधुवाता ऋतायेति मधुपात्रं प्रदर्शयेत्॥ १८॥
घृतं मिमिक्षे मन्त्रेण घृतसूक्तेन वा पुनः[९]।
गौर्धेनुभव्यामन्त्रेण सवत्सां गां प्रदर्शयेत्[१०] ॥ १९॥
ब्राह्मणान्दर्शयेद्धीमान्ब्रह्मजज्ञानमन्त्रतः[११]।
प्रच्छन्नपटमावर्ज्य जनसङ्घान्प्रदर्शयेत्[१२] ॥ २०॥

[५. शुद्धिः]

पुण्याहं वाचयित्वा तु पञ्चगव्याभिषेचनम्[१३]।
पञ्चगव्येन संप्रोक्ष्य पवमानमुदीरयन्॥ २१॥

---

१. 14d वस्त्ररत्नसमन्वितान्] A^{2}, G, कुमारा विन्यसे + तम् F^{1}.

२. 15a °कूर्चान्°] A, G, °कूर्चं F^{1} ; 15b °पल्लवैर्युतान्] A^{2}, G, °पलवैर्युतान् A^{1}, °वारिपूरितान् F^{1}.

३. 16a °सूचीप्रहाराभ्यां] A^{1}, G, °सूचिप्रहाराभ्यां A^{2}, °सूचिप्रकारार्थं F^{1}.

४. 16c °मालिख्य] A, G, °व्याख्याता F^{1}.

५. 17a तर्जन्या] A, G, तममन्यां (*v.f.*) F^{1} ; 17b °नखेन च] A, G, °नखेल्लिखेत् F^{1}.

६. 17c वामे त्वनामिकया च] A^{1}, वामे त्वनामिकयाश्च A^{2}, G, वामनेत्रे त्वनामि स्यान्° F^{1} ; 17d °द्वययुतं लिखेत्] A, G, °द्वनयुतं भवेत् F^{1}.

७. F^{1} propose en 18b : भौद्धेर्धं चञ्चमन्त्रतः (altération de 19c ?), et omet 18cd-19.

८. 18a मध्वाज्यैस्°] G, मध्वाज्यं A, मध्वान्° (*v.f.*) F^{1} ; 18b °ङ्कुरेण तु] Eds, °ङ्कुराक्षतैः A (etc.).

९. 19a घृतं मिमिक्षे] G, घृतमिक्षेति A^{1}, घृतं मिमिक्षेति (*v.f.*) A^{2}.

१०. 19c गौर्धेनुभव्या°] Eds., गोधेनुभव्य° A^{1}, गोधेनुभव्या° A^{2}, गोर्धेनुभव्या° G.

११. 20ab °जज्ञान°] A^{2}, F^{1}, G, °जज्ञानं A^{1}.

१२. 20c °वर्ज्य] A, G, °च्चाद्य F^{1} ; 20d जनसङ्घान्°] A, G, जनान्सर्वान्° F^{1}.

१३. 21b °षेचनम्] A, G, °षेचयेत् F^{1}.

[1]एतद्द्रव्येन संप्रोक्ष्य गन्धतोयेन सेचयेत्।
[2]शुद्धिं कृत्वा विशेषेण कुर्याद्ग्रामप्रदक्षिणम्॥ २२॥

[६. जलाधिवासः]

जलतीरे समास्थाप्य पूर्ववच्छुद्धिमाचरेत्[3]।
वस्त्रयुग्मेन संवेष्ट्य कुशपुष्पैस्तु वेष्टयेत्॥ २३॥
अधिवास्य जले मध्ये चतुष्पाद्युपरि न्यसेत्।

[७. मण्डपकल्पनम्]

आलयस्याग्रतः कुर्यान्मण्डपं चतुरश्रकम्[4]॥ २४॥
द्वादशं दशहस्तं वा नवहस्ताष्टहस्तकम्[5]।
पूर्वोक्तविधिना कल्प्य मण्डपं कारयेद्बुधः[6]॥ २५॥
नवहोमं पञ्चहोमं त्रीणि चैकमथापि वा[7]।
मण्डपस्योत्तरे पार्श्वे स्नानश्वभ्रं प्रकल्पयेत्[8]॥ २६॥
तालत्रयं तु विस्तारं मेखलाभ्यामलङ्कृतम्।
एकैकं चतुरङ्गुल्यं विस्तारोत्सेधतत्समम्[9]॥ २७॥
उत्तरे जलमार्गं स्यान्मध्यमे योगपीठिका[10]।
मण्डपं मण्डयेद्धीमान्वितानध्वजशोभितम्॥ २८॥
स्थण्डिलं कारयेद्वेद्यामष्टद्रोणेन शालिना।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि[11]॥ २९॥

---

१. A^2 répète 21cd sous la forme : एतद्द्रव्येन संप्रोक्ष्य पवमानमुदीरयन्।

२. F^1 omet 22cd-24ab.

३. 23a समास्थाप्य] A^1, समास्थाय A^2, G.

४. 24c आलयस्याग्रतः] A, G, गव्याधिवासनं F^1.

५. 25a द्वादशं दशहस्तं] A, दशहस्तं द्वादशं F^1, दशद्वादशहस्तं G.

६. 25c कल्प्य] A^2, F^1, G, कल्प° A^1.

७. 26b त्रीणि चैकमथापि वा] A^1, G, त्रीणि ++ मथापि वा A^2, त्रिण्ये + केऽथवा पुनः F^1.

८. 26d स्नान°] A, G, स्तन° F^1.

९. 27d °समम्] A, G, °क्रमम् F^1.

१०. 28a जलमार्गं] A^1, G, lacune A^2, जलमङ्ग° F^1.

११. 29c °तण्डुलैर्भूष्य] A, °स्थण्डिलैः पुष्य F^1, °स्तण्डुलैर्भूष्यं G ; 29d °श्च तिलैरपि] A, G, °स्थण्डिलसर्षपैः (*v.f.*) F^1.

[८. अधिवासः]

[८.१. शयनकल्पनादि]

जलादुत्तीर्य च मुनीञ्छुद्धिं कृत्वा विशेषतः[१]।
शयनं कल्पयेद्धीमानृषिमन्त्रमनुस्मरन्॥ ३०॥
अण्डजाद्यैरनुक्रम्य शयने शाययेन्मुनीन्[२]।
मुनीन्संपूजयेद्धीमान्पुष्पादिभिर्विशेषतः[३]॥ ३१॥
पूजयित्वा हृदा मन्त्री रक्तवस्त्रेण वेष्टयेत्।
[४]अभितः कलशानष्टौ सकूर्चान् +++++ [५]॥ ३२॥
ऋषीकुम्भं न्यसेद्दिक्षु विदिक्षु विन्यसेद्बुधः[६]।
गन्धादिभिः समभ्यर्च्य नैवेद्यं तु निवेदयेत्॥ ३३॥

[८.२. मुनीनां ध्यानम्]

ध्यात्वा सर्वान्मुनींश्चैव मुन्येकं वा यथाक्रमम्[७]।
अगस्त्यं प्रथमं न्यस्त्वा अन्यांस्तु तदनन्तरम्[८]॥ ३४॥
अभयं दक्षिणं हस्तं वरदं वामहस्तकम्[९]।
कुम्भमध्ये न्यसेद्बीजं बीजमुद्रां प्रदर्शयेत्॥ ३५॥

[८.३. होमः]

[१०]...

होमद्रव्याणि सप्तैव जुहुयात्क्रमशः पुनः[११]।

---

१. 30a °त्तीर्य] A, F¹, °त्तार्य G ; च मुनीन्°] G, मुनयो A, मुनीन F¹.

२. 31b °येन्मुनीन्] A¹, F¹, G, °येनृषीन् A².

३. 31c मुनीन्°] A, G, मुनिं F¹ ; 31d °पुष्पादिभिर्विशेषतः] A, °गन्धपुष्पादिभि स्थितः F¹, °पुष्पाद्यैश्च विशेषतः G.

४. F¹ remplace 32d-33ab par : +++बान्धपूरितम्। सकूर्चानित्यादि भ ऋषी कुम्भ न्यसेद्दिक्षु विन्यसेद्बुधः।

५. 32a est terminé par une glose de copiste (°इत्यादी ऋषिः).

६. 33a ऋषिकुम्भं न्यसेद्°] G, कुम्भे न्यसेद्विद्वि° A¹, कुम्भम्न्नयसे द्विद्वि° A² ; 33b विन्यसेद्°] A, च न्यसेद्° G.

७. 34a सर्वान्मुनींश्चैव] G, सर्वमुनीनां तु A, F¹ ; 34b मुन्येकं वा] A, मुन्येयं वा F¹, मुन्येकं च G.

८. 34d अन्यांस्तु तदनन्तरम्] G, अन्येषां तदनन्तरम् A¹, F¹, °प्यन्येषां तदनन्तरे A².

९. 35b वरदं] A, G, वारदं F¹ ; °हस्तकम्] F¹, G °हस्तके A.

१०. Lacune correspondant au début de la description de l'oblation.

११. 36a होमद्रव्याणि] A¹, G, F¹, महामुद्राणि A² ; सप्तैव] A, G, सप्ते वा F¹.

अग्निष्टोमादितत्सर्वं जुहुयात्तु यथाक्रमम्[१] ॥ ३६ ॥
ऋषिमन्त्रं जपित्वा तु द्रव्यान्ते व्याहृतिं हुनेत्[२] ।
स्वनामाद्यक्षरैर्युक्तं मायानलसमन्वितम् ॥ ३७ ॥
बिन्दुनादसमायुक्तं मुनिमन्त्रं समुद्धरेत्[३] ।
समिदाज्यचरून् लाजान्सर्षपांश्च यवांस्तिलान्[४] ॥ ३८ ॥
प्रत्येकं तु शतं हुत्वा इषे त्वोर्जेति मन्त्रतः[५] ।
ऋषिमन्त्रं जपित्वा तु स्पृष्ट्वा स्पृष्ट्वा तु होमयेत् ॥ ३९ ॥
[६]...

[९. अधिवासानन्तरदिवसकृत्यम्]

जयादिरभ्याधानं च राष्ट्रभृच्च हुनेत्क्रमात्[७] ।
आचार्यो मूर्तिपैः सार्धं निद्राकुम्भमथोद्धरेत्[८] ॥ ४० ॥
ततो मुहूर्तमन्वीक्ष्य ऋषिमन्त्रं समुच्चरन्[९] ।
शक्तिं तु प्रथमं कुर्याद्बिन्दुनादसमन्वितम् ॥ ४१ ॥
अगस्त्यमन्त्रमुच्चार्य तन्नाम ऋषि योजयेत्[१०] ।
एतद्बीजं समुच्चार्य ऋषीन् संस्थापयेद्गुरुः[११] ॥ ४२ ॥
महाभोजनसंयुक्तं तदन्ते स्नपनं कुरु[१२] ।
ब्राह्मणान्भोजयेत्तत्र पर्यष्टिपरिचारकान् ॥ ४३ ॥

---

१. 36c °दितत्सर्वं]A, G, °दियत्कर्म F^1.

२. 37b व्याहृतिं] A^1, G, lacune A^2, व्याहृतीं F^1.

३. 38b मुनिमन्त्रं समुद्धरेत्] A, G, मुनीनां मन्त्रमुद्धरेत् F^1.

४. 38c समिदाज्यचरून्] G, समिदाज्यचरुं A, समिधाज्यचरुं F^1 ; 38d °सर्षपांश्च यवांस्तिलान्] A, G, °सर्षपाश्च यवासिनाम् F^1.

५. 39a प्रत्येकं तु शतं] A, G, प्रकोटशतं (*v.f.*) F^1.

६. Lacune correspondant à la fin du séjour et au début des rites du lendemain.

७. 40a °भ्याधानं] A^2, F^1, °भ्यधानं A^1, G.

८. 40d °कुम्भमथोद्धरेत्] A^1, G, °कुम्भम्समुद्धरेत् A^2, °कुम्भानि वोद्धरेत् F^1.

९. 41a मुहूर्तमन्वीक्ष्य] A, G, भूक्तमन्विज्य (*v.f.*) F^1

१०. 42a अगस्त्यमन्त्रमु°] A^2, अस्त्रमन्त्रं समु° A^1, अगस्त्यमन्त्र उ° F^1, अगस्त्यमन्त्रं समु° (*v.f.*) G.

११. 42d ऋषीन्संस्थापयेद्गुरुः] G, ऋषीन्प्रस्थापयेद्गुरुः A^1, ऋषीन्स्थापयेद्गुरुः (*v.f.*) A^2, ऋषीणां स्थापयेत्कुरु F^1.

१२. 43b तदन्ते] A^1, F^1, G, तदन्त° A^2.

ताम्बूलं दापयेत्तत्र मुखवाससमन्वितम्।
ऋषीणां स्थापनं प्रोक्तं कालनिर्देशनं शृणु[१] ॥ ४४ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महर्षिस्थापनविधिपटलः [त्रिपञ्चाशत्तमः][२] ॥

१. 44c स्थापनं] A, G, स्थापयेत् F^1 ; 44d °निर्देशनं] A, G, °निर्देशिनं F^1.

२. A^2, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महर्षिस्थापनपटलः।
F^1 : इति दीप्तशास्त्रे स्थापनपञ्चषष्ठिपटलः।

[चतुष्पञ्चाशत्तमः पटलः]
[दुर्गास्थापनविधिः[१]]

वक्ष्ये दुर्गाप्रतिष्ठां तु राजवेश्मगृहादिषु[२]।

[१. कृतयुगादिभेदेन दुर्गास्वरूपम्]

युगे कृते त्वष्टभुजं श्वेतवर्णं प्रकीर्तितम्[३] ॥ १ ॥
त्रेतायां षड्भुजं कुर्याद्रक्तवर्णं प्रकीर्तितम्।
चतुर्भुजं द्वापरे च कृष्णवर्णमुदाहृतम्[४] ॥ २ ॥
चतुर्भुजं कलियुगे श्यामवर्णं प्रकीर्तितम्।
द्विभुजं कल्पयेद्धीमान्द्विजादीनां गृहार्चने[५] ॥ ३ ॥

[२. रूपलक्षणम्]

चक्रखड्गशरं चैव अभयं सव्यपार्श्वके[६]।
शङ्खं वै खेटकं चैव शार्ङ्गं वरदमेव च[७] ॥ ४ ॥
शूलं वै कल्पयेद्धीमान्तथैवाष्टभुजे क्रमात्[८]।
वक्ष्यते षड्भुजस्यैव खड्गं वै शरसंयुतम्[९] ॥ ५ ॥
अभयं सव्यके कुर्याच्छङ्खं शार्ङ्गं तथैव च[१०]।
वरदं कल्पयेत्तत्र एवं ध्यायेद्विचक्षणः[११] ॥ ६ ॥

---

१. Manuscrits utilisés : A^1, A^2, F^1, G ; dans ces quatre manuscrits les vers 10d-18ab se trouvent intégrés à la fin du chapitre 32 (voir ci-dessus p.150, note ad 32.131cd.

२. 1a वक्ष्ये दुर्गाप्रतिष्ठां] A, G, अथ वक्ष्ये प्रतिष्ठानां F^1.

३. 1c त्वष्टभुजं] G, त्वष्ठभुजं A^1, lacune A^2, त्वष्टभुजा F^1 ; 1d °वर्णं] A ; G, °वर्णा F^1.

४. 2d °वर्णमुदाहृतम्] A, G, °वर्णं प्रकीर्तितम् F^1.

५. 3d °जादीनां गृहार्चने] Eds, °जादीनस्त्रभावने A, °जातीनस्त्रभावने G, °जातीनं गृहाचनेत् F^1.

६. 4b सव्यपार्श्वके] A, G, सव्यदा भवेत् F^1.

७. 4c शङ्खं] A, G, पाशं F^1 ; 4d शार्ङ्गं वरदमेव] G, F^1, शार्ङ्ग +दनमेव A^1, शार्ङ्गं ववदमेव A^2.

८. 5b °भुजे क्रमात्] A^1, G, lacune A^2, °भुजं भवेत् F^1.

९. 5c षड्भुजस्यैव] A, G, षड्भुजं चैव F^1.

१०. 6a सव्यके] A, G, खड्गके F^1.

११. 6c वरदं कल्पयेत्तत्र] G, कदम्बकल्पमेवं तु A^1, कदम्बमेवं तु (*v.f.*) A^2, कदम्बवाममेवं तु F^1 ; 6d एवं ध्यायेद्°] G, कल्पयेत्तु A, F.

+++++++++दिनशास्त्रेषु वित्तमः[१२]।
शङ्खचक्राभयवरं चतुर्भुजे प्रकीर्तितम्[१] ॥ ७॥
अभयं वरदं चैव द्विभुजं परिकल्पयेत्[२]।

[३. राजधान्यादिषु दुर्गारूपम्]

चतुर्भुजं राजधान्यां यजेद्वै द्विभुजं गृहे[३] ॥ ८॥
द्विभुजं चतुर्भुजं चैव शान्तिपुष्टिश्रियं ददेत्।
वनेषु पर्वते चैव स्थाप्यमष्टभुजं भवेत्॥ ९॥
[४]षड्भुजे राजकाम ...[५]।
... चतुर्भुजं चाधुनोच्यते ॥ १०॥
राजवेश्मगृहे सर्वब्राह्मणादिगृहे गृहे।
प्रतिमां कारयेद्धीमान्श्रीकाम्यं तु जयार्थकम्॥ ११॥
नित्यं वाप्यायुषो वृद्धौ दुर्गादेवीं प्रपूजयेत्[६]।
एवं चतुर्भुजं वक्ष्ये श्रावयेच्छास्त्रवित्तमः ॥ १२॥
राजवेश्मगृहे वापि प्रासादे वा पृथग्यजेत्[७]।
कर्षणादिप्रतिष्ठान्तं कल्पयेत्स्थापकोत्तमः ॥ १३॥

[४. दुर्गामन्त्रः]

पञ्चवर्गतृतीयं तु पञ्चमस्वरभूषितम्[८]।
बिन्दुनादसमायुक्तं दुर्गादेव्या हृदि न्यसेत्[९] ॥ १४॥
पञ्चदुर्गेति मन्त्रेण उत्तरादि यथा क्रमम्।

---

१२. 7ab ... दिनशास्त्रेषु वित्तमः] A^1, दिन ... मः A^2, ... निशास्त्रेषु वित्तमः F^1, ... दीनि शास्त्रेषु वित्तमः G.

१. 7c °भयवरं] A, G, भयदं (*v.f.*) F^1.

२. 8a वरदं] A^2, G, F^1, वरवं A^1 ; 8b परिकल्पयेत्] A, G, कल्पयेत्सुधी F^1.

३. 8d यजेद्वै] A^2, G, F^1, याम्ये वै A^1 ; °भुजं गृहे] A^1, G, °भुजां गृहे A^2, °द्विजा ग्रहेत् F^1.

४. Une lacune entre 10ab et 10cd correspond à la fin des remarques sur le type à six bras.

५. षड्भुजे राजका ...] F^1, षड्भुजे राजकार्मे ... A, G.

६. 12b वाप्यायुषो वृद्धौ] G, वैप्यायुषो वृद्धौ A, वे वे आयुषाद्धे (?) F^1.

७. 13b प्रासादे वा] Eds, प्रासादेन A (etc.).

८. 14b °भूषितम्] G, °भूषणम् A, F^1.

९. 14d दुर्गादेव्या] A, G, दुर्गादेवीं F^1.

उमा दुर्गा च लक्ष्मी च सावित्री च सरस्वती॥ १५॥
स्वनामाद्येन मन्त्रेण पूजयेत्तु यथाक्रमम्।

[५. दुर्गार्चनफलम्]

दुर्गादेवीप्रतिष्ठा च अर्चनं वक्ष्यते मया[१]॥ १६॥
[२]सर्वशान्तिकरं श्रेष्ठं सर्वसिद्धिकराय च।
सर्वदोषनिवृत्यर्थं ग्रामवृद्धिकरं भवेत्[३]॥ १७॥
राजा विजयमाप्नोति सर्वशत्रुविनाशनम्।

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दुर्गास्थापनपटलः [चतुष्पञ्चाशत्तमः][४]॥

---

१. 16d अर्चनं] F^1, G, अर्घानां A^1, अर्चना A^2.

२. F^1 ajoute entre 16cd et 17ab : दुर्गास्थापन वक्ष्येत कारयेत्तु विचक्षणः।

३. 17d ग्रामवृद्धि°] A, ग्रामऋद्धि° F^1, G.

४. A : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दुर्गास्थापनपटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे दुर्गास्थापनपटलः समाप्तः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां दुर्गास्थापनविधिपटलः।

[पञ्चपञ्चाशत्तमः पटलः]

[स्नानविधिः[१]]

अतः परं प्रवक्ष्यामि स्नानमार्गविधिं परम्[२]।
मृत्पिण्डं गोमयं पुष्पं तिलमामलकं कुशम्॥ १॥
दन्तकाष्ठं गृहीत्वा तु नदीं गच्छेत्समाहितः।

[१. नद्यादि]

नद्यां वाप्यां तटाके वा कूपे वापि चतुर्विधम्[३]॥ २॥
कूपाद्दशगुणं वापि वापीस्नानं विधीयते[४]।
वाप्याः शतगुणं ज्ञेयं तटाकं तु यथाक्रमम्[५]॥ ३॥
तटाकात्सहस्रगुणं नद्याः स्नानं तदुत्तमम्[६]।
कोटिकोटिगुणं प्रोक्तं समुद्रसङ्गमं भवेत्[७]॥ ४॥

[२. पञ्चविधस्नानम्]

पञ्चस्नानानि विप्राणां विहितानि विशुद्धये[८]।
स्नानं वारुणमाग्नेयं दिव्यं वायव्यमानसे[९]॥ ५॥
वारुणं वारिणा स्नानमाग्नेयं भस्मना भवेत्[१०]।
वृष्ट्या सातपया दिव्यं वायव्यं राजसा गवाम्[११]॥ ६॥
मन्त्रस्नानमिति प्रोक्तं पञ्चधा स्नानमुत्तमम्[१२]।

---

१. Manuscrits utilisés : A^1, A^2, F^1, G.

२. 1b °विधिं] A^2, F^1, G, °विधिः A^1.

३. 2c वाप्यां] Eds, वापि° A (etc.) ; 2d चतुर्विधम्] A, G, चतुर्विधे F^1.

४. 3a कूपाद्दशगुणं] G, कूपदृशगुणं A, कूपदशगुणं F^1 ; 3b वापीस्नानं] A, G, स्नानं (*v.f.*) F^1.

५. 3c वाप्याः श°] A, G, वाप्या श° F^1.

६. 4a °गुणं] G, °गुणितं A, F^1 ; 4b नद्याः स्नानं तदुत्तमम्] A^1, नद्यास्नानमुत्तमम् (*v.f.*) A^2, नद्यां वा स्नानमुत्तमम् F^1, नद्यां तु स्नानमुत्तमम् G.

७. 4d समुद्रसङ्गमं] F^1, G, समुद्रसंगमं A.

८. 5b विहितानि] A, G, विहितान° F^1.

९. 5d °मानसे] G, °मानसम् A, F^1.

१०. 6a वारिणा] A, G, वारुण F^1.

११. 6d रजसा] A^2, F^1, G, राजसं A^1.

१२. 7a °मिति] A, F^1, °मिदं G ; 7b पञ्चधा स्नानमुत्तमम्] A, G, पञ्चस्नानं प्रकीर्तितम् F^1.

[३. वारुणस्नानम्]

अधुना वारुणं स्नानं शृणु तत्वेन चानल[१] ॥ ७ ॥
नद्यादीनि च यत्सिद्धं सम्भवस्नानमाचरेत्[२] ।

[३.१. दन्तशोधनादि]

शुचौ देशे समासीनः प्राङ्मुखोदङ्मुखक्रमात्[३] ॥ ८ ॥
प्लक्षोदुम्बरनिम्बाश्च अपामार्गं करञ्जकम्[४] ।
आम्रं वै सर्वसिद्धिः स्याद्विशेषात्सर्वकामदम्[५] ॥ ९ ॥
पाषाणं चेष्टकाचूर्णं मरीचेन परिच्छदम्[६] ।
उत्तरे दशने वामे दक्षिणे तदनन्तरम्[७] ॥ १० ॥
अधरे दक्षिणे वामे दन्तशुद्धिः प्रकीर्तिता[८] ।
निर्मलं दशनं यावत्तावद्वै दन्तधावनम्[९] ॥ ११ ॥
ततस्तालुविशोध्यं तु तैलं बिम्बेति शोधयेत्[१०] ।

[३.२. मृदालेपनम्]

पादप्रक्षालनं कृत्वा आचम्य विधिना बुधः[११] ॥ १२ ॥
जलतीरे विधातव्यं क्षालयित्वा तु देशिकः[१२] ।
शिरोऽवकुण्ठनं कृत्वा मौनेन तु विसर्जयेत् ॥ १३ ॥

---

१. 7c वारुणं स्नानं] A^{2}, वारुणाग्नेयं A^{1}, G, वरुणाग्नेये F^{1} ; 7d तत्वेन] A^{1}, F^{1}, G, तत्त्वेन A^{2}.

२. 8a °सिद्धं] A^{1}, F^{1}, G, °सिद्धिं A^{2} ; 8b °स्नानमाचरेत्] A^{1}, °स्थानमाचरेत् A^{2}, °स्नानमादिशेत् F^{1}, °स्थानमादिशेत् G.

३. 8c समासीनः] A, सुखासीनं F^{1}, समासीनं G ; 8d °दङ्मुख°] A^{2}, °दङ्मुख° A^{1}, °दङ्मुखं F^{1}, G.

४. 9a °निम्बाश्च] A, G, °निम्बश्च F^{1} ; 9b अपामार्गं करञ्जकम्] A, G, चापामार्गं श्रीकरमेव च F^{1}.

५. 9c °सिद्धिः स्याद्°] A^{1}, G, °सिद्धिं स्याद्° A^{2}, °सिद्धिं च F^{1} ; 9d °कामदम्] A, G, °कामिका F^{1}.

६. 10b मरीचेन परिच्छदम्] A^{1}, मरीचेन परिप्लुतम् A^{2}, G, मरिचेर परिप्लुतम् F^{1}.

७. 10c दशने] A, G, दक्षिणे F^{1}.

८. 11a अधरे] A, G, अथरे F^{1} ; 11b °शुद्धिः] Eds., °शुद्धिं A^{1}, °शुद्धि° A^{2}, F^{1}, G.

९. 11c निर्मलं] A, G, निर्जलं F^{1} ; 11d यावत्तावद्वै] A, G, यावत्तावद्वेत F^{1}.

१०. 12a °तालु°] A^{1}, F^{1}, G, °तालं A^{2} ; 12b तैलं बिम्बेति] A^{1}, lacune A^{2}, तैलपिबति F^{1}, तैलं विन्द्वति G.

११. 12d विधिना बुधः] A, G, पिबेत्पुनज F^{1}.

१२. 13a जलतीरे] A^{2}, F^{1}, G, कुण्डतीरे A^{1}.

नालिकेरफलमात्रं मृदं तत्र निवेशयेत्[१]।
हृदयेन तु मन्त्रेण कृत्वा भागत्रयं बुधः[२]॥ १४॥
दक्षिणोत्तरपूर्वं च पुरुषाघोरवामतः[३]।
पुरुषेण मृदं ग्राह्य सर्वाङ्गमपि लेपयेत्[४]॥ १५॥
वामदेवमृदं ग्राह्य तीर्थं तत्रैव निक्षिपेत्[५]।
गोमयं चाङ्गलेपं तु अङ्गं चैव तु मर्दयेत्[६]॥ १६॥
आमलकं शिरो लिप्यं पुष्पं हस्तेन संग्रहेत्[७]।
शिवमन्त्रं न्यसेत्तीर्थे तस्मिन्स्नानं समाचरेत्[८]॥ १७॥
अघमर्षं ततः कृत्वा ब्रह्माङ्गं तु जपेद्गुरुः[९]।

[४. मन्त्रस्नानम्]

जलस्नानं पुरा कृत्वा मन्त्रस्नानं ततः कुरु[१०]॥ १८॥
नाराचास्त्रप्रयोगेण प्रक्षिपेज्जलमध्यमे[११]।
एवं स्नात्वा तु तन्मध्ये उपस्पृश्य हृदा पुनः[१२]॥ १९॥
पुनर्वै गोमयेनैव सर्वाङ्गं संस्पृशेद्बुधः।
शिरो वैशानमन्त्रेण मुखं तत्पुरुषेण तु[१३]॥ २०॥

---

१. 14a नालिकेरफलमात्रं] A^{1}, F^{1}, नारिकेलजल +त्र A^{2}, नारिकेलफलं मात्रं G ; 14b मृदं तत्र] A, G, मृथस्तत्र F^{1}.

२. 14d कृत्वा भागत्रयं बुधः] A, G, मृद्भिस्त्रिभागमेव तु F^{1}.

३. 15b °वामतः] A, G, °वामता F^{1}.

४. 15d सर्वाङ्गमपि] A, सर्वाङ्गेन तु F^{1}, सर्वमङ्गं वि° G.

५. 16a °देवमृदं] A^{1}, °देवेन मृदं (*v.f.*) A^{2}, °देवे मृदं F^{1}, G ; ग्राह्य] A^{2}, F^{1}, G, ग्रह्य A^{1}.

६. 16d मर्दयेत्] A, G, वर्जयेत् F^{1}.

७. 17a आमलकं] A, F^{1}, आमलक्या G ; 17b संग्रहेत्] A, F^{1}, संहरेत् G.

८. 17c °त्तीर्थे] G, °त्तस्मिन् A^{1}, °तस्मिन् A^{2}, °त्तीर्थं F^{1}; 17d तस्मिन्स्नानं समाचरेत्] G, स्नानं नियममाचरेत् A^{1}, स्नानं समाचरेत् A^{2}, तत्र स्नानं भवेत्कुरु F^{1}.

९. 18a अघमर्षं] F^{1}, अघमर्षणं (*v.f.*) A, G ; 18b ब्रह्मा°] F^{1}, G, पूर्वा° A.

१०. 18c जलस्नानं] A^{1}, मलस्नानं A^{2}, F^{1}, G.

११. 19a नाराचास्त्र°] A, नानाशास्त्र° F^{1}, G ; 19b °मध्यमे] A, G, °मध्यमम् F^{1}.

१२. 19d °स्पृश्य हृदा पुनः] G, °स्पृश्य हृदेन तु A, °संस्पृश्य हृदयेन तु F^{1}.

१३. 20c वैशान°] A, F^{1}, ऐशान° G.

अघोरेण च हृल्लिप्य गुह्यं वामेन लेपयेत्[1]।
पादयोः सद्यमन्त्रेण लेपयित्वा तु मन्त्रवित्॥ २१॥
पवित्रैर्व्योममन्त्रेण धारयित्वा तु मार्जयेत्[2]।
प्रासादेन तु मन्त्रेण मार्जयेत्सप्तपञ्चसु[3]॥ २२॥
कलशमुद्रेण मन्त्रज्ञः प्रासादेनाभिषेचयेत्।
पञ्चविंशतिधा चाग्निपञ्चविंशति तर्पणम्[4]॥ २३॥
नाभिमात्रजले स्थित्वाभिमुखः सूर्यसंनिधौ[5]।
तर्पयित्वा तु तन्मध्ये सपवित्रशिवाङ्ककैः[6]॥ २४॥
विद्येश्वरशिवाङ्कं च रुद्रैकादश एव च[7]।
अष्टमूर्त्यधिपैश्चैव द्वादशादित्य एव च[8]॥ २५॥
तीर्थमासाद्य मन्त्रेण हृदिना शिवमन्त्रतः[9]।
सर्वाङ्गं लेपयित्वा तु मार्जयित्वा पवित्रकैः[10]॥ २६॥
स्थापयेज्जलमध्ये तु मर्षणं तु त्रिभिस्त्रिभिः[11]॥ २७॥

[५. मन्त्रः]

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः[12](१)। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः[13](२)। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्[14](३)।

---

१. 21a च हृल्लिप्य] A¹, हृदिं लिप्य A², हृदि लेप्य F¹, लेप्य हृदि G ; 21b गुह्यं] A, गुण्ये F¹, गुह्ये G.

२. 22b मार्जयेत्] A¹, F¹, G, मज्जयेत् A².

३. 22c प्रासादेन तु] A, G प्रासादेनैव F¹ ; 22d मार्जयेत्सप्तपञ्चसु] A², F¹, G, प्रोक्षयेत्पञ्च सप्तसु A¹.

४. 23c °धा चाग्नि] A, G, यागाग्नि F¹ ; 23d तर्पणम्] G, पर्पणात् A¹, तर्पणात् A², F¹.

५. 24a °मात्रजले] A, G, °मग्नजले F¹ ; 24b °भिमुखः] A, G, °भिमुख F¹.

६. 24c तन्मध्ये] A, तन्मन्त्रैः F¹, G ; 24d सपवित्रशिवाङ्ककैः] F¹, सपितृण्श्च शिखाङ्ककैः A¹, त्रपित्रः शिवङ्ककैः A², सवित्रः शि+पाङ्ककैः G.

७. 25a शिवाङ्कं च] A, शिवाङ्कैश्च F¹, G.

८. 25c °मूर्त्यधिपै°] A¹, G, °दिगधिपै° A², °मूर्ध्न्याधिपै° F¹ ; 25d द्वादशादित्य] A, G, द्वादशादत्य F¹.

९. 26b हृदिना शिवमन्त्रतः] A, मृदा चैव हृदिना शिव +ते F¹, हृदा तु शिवमन्त्रतः G.

१०. 26d पवित्रकैः] A², G, पवित्रकम् A¹, पवित्रा+ F¹.

११. 27b मर्षणं तु त्रिभिस्त्रिभिः] A, G, ऋषीणां तु स्त्रिभिस्त्रिभिः F¹.

१२. (1) तीर्थं मे देहि याचितः] A, G, तीर्थमे ये हि याजितः F¹.

१३. (2) यन्मया भुक्त°] A², G, यन्माभुक्त° A¹, म+आभुत° F¹.

१४. (3) यन्मे मनसा] A², G, यत्तेनमनसा A¹, इदं मे मनसा F¹ ; वा दुष्कृतम्कृतम्] A², G, वापि दुष्कृतम्

तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः[१](४) ॥

अथाञ्जलिना उपस्पृश्य[२] ॥ २८ ॥

सुमित्रा न आप ओषधयः सन्तु[३](१)। दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मः[४](२) ॥

एतन्मन्त्रं जपयित्वा त्वघमर्षणमाचरेत्[५]।

[६. अघमर्षणम्]

पञ्चब्रह्मशिवाङ्गैश्च त्रिपदैरघमर्षणम्[६] ॥ २९ ॥
अन्तर्जले विधानेन सर्वाङ्गेनैव दर्शयेत्।
दर्शयेच्च शरीरार्धं मुखमग्रे तु वा पुनः[७] ॥ ३० ॥
अर्धाङ्गस्य सहस्रं वै निमग्ने कोटिरुच्यते[८]।
ध्यानयुक्तोऽभिनिष्क्रम्य क्रमेण च ततः परम्[९] ॥ ३१ ॥
ततः सूर्य इति प्रातः मध्याह्ने आप उच्यते[१०]।
सायेऽग्निरिति जप्त्वा तु सन्ध्योपासनमारभेत्[११] ॥ ३२ ॥
मित्रः सत्ये इमं मेति सन्ध्यात्रयमुपासते[१२]।
स्थित्वोपास्यत मध्याह्ने उपन्यासीति पश्चिमम्[१३] ॥ ३३ ॥

A^1, दुष्कृतम्कृतम् F^1.

१. (4) वरुणो बृहस्पतिः] A^2, G, वरुणः A^1, ब्रहस्पति F^1 ; पुनः पुनः] A, G, पुनः F^1.

२. 28 उपस्पृश्य] A, G, च उपस्पृश्य F^1.

३. (1) सुमित्रा न] G, सुमित्रम् A^1, सुत्रा न A^2, lacune F^1.

४. (2) दुर्मित्रा°] G, दुंमित्रा° A^1, दुष्यत्रा° A^2, दुर्मित्रा F^1

५. 29a जपयित्वा] A^1, जपित्वा (*v.f.*) A^2, F^1, G.

६. 29c त्रिपदैरघ°] A^2, G, नृपदैरघ° A^1, त्रिः पुरे दघ° F^1.

७. 30c शरीरार्धं] G, शिरीरार्धं A, शरीरार्ध° F^1 ; 30d मुखमग्रे तु] A^2, मुखमग्नौ तु A^1, F^1, मुखाग्नौ तु + G.

८. 31a अर्धाङ्गस्य सहस्रं] A^1, G, अधिङ्गस्य सहस्रं A^2, अर्धाङ्गस्य सहस्रा F^1 ; 31b निमग्ने] A^2, F^1, G, निदग्ने A^1.

९. 31c °युक्तोऽभिनिष्क्रम्य] A^1, °युक्तोऽपि निष्ठत्त्व A^2, °युक्तौ विनिष्क्रम्य F^1, °युक्तो विनिष्क्रम्य G ; 31d क्रमेण च ततः] A^1, क्रमेणाचेवतः A^2, क्रमेणावैव तत्परम् F^1, G.

१०. 32a प्रातः] A, G, प्राता F^1.

११. 32c सायेऽग्निरिति जप्त्वा] Eds, सायाह्निरिति जप्त्वा A^1, सायाभिरिति जप्त्वा A^2, स+ग्निरिति जप्त्वा F^1, सायारिति जपित्वा G.

१२. 33a मित्रः] A, G, मित्रा F^1 ; 33b सन्ध्यात्रय°] A^1, सन्धित्रय° A^2, F^1, G.

१३. 33c स्थित्वोपास्यत] A^1, स्थित्वा वास्थमतं A^2, स्थित्वा वाति F^1, स्थित्वावहित G.

एकाहं तु यथाशक्त्या प्राणायामं ततो जपेत्[१]।
देवानृषीन्पितॄंश्चैव वामाघोरकसद्यकैः[२] ॥ ३४ ॥
तर्पयित्वा यथान्यायं यथा पूर्वोक्तलक्षणम्[३]।

[७. नानाविषयाः]

अप्रशस्तं निशि स्नानं रवेश्चान्यत्र दर्शनात्[४] ॥ ३५ ॥
वृत्रस्य रुधिरं नित्यं स्रवन्ति निशि निम्नगाः[५]।
तस्मात्स्नानं च पानं च न कुर्वीत कदाचन[६] ॥ ३६ ॥
न रात्रौ परिगृह्णीयाद्देवार्थं चात्मनार्थकम्[७]।
स्वर्णमग्निसमक्षं वा प्राणायामेन वा जलम् ॥ ३७ ॥
तस्माद्दिवैव गृह्णीयाद्देवार्थं चात्मनार्थं वै[८]।
एवं समाचरेन्नित्यं शिवमन्त्रं समुच्चरन्[९] ॥ ३८ ॥
फट्कारेण तु मन्त्रेण शिवतीर्थं समाददेत्[१०]।

[८. द्वारपूजा]

प्रोतवस्त्रं तु संगृह्य ग्राह्यवस्त्रं विसर्जयेत्[११] ॥ ३९ ॥
शिवधाम नयेत्पश्चात्प्रदक्षिणं तु कारयेत्[१२]।
प्रणम्य दण्डवद्भूमौ शिवं परमकारणम् ॥ ४० ॥

---

१. 34a °शक्त्या] A, °शक्त्यं F^1, °शक्ति G.

२. 34d वामाघोरक°] A^2, F^1, G, वामाघोरेण A^1.

३. 35b पूर्वोक्तलक्षणम्] A, G, पूर्वोत्तरक्षिणम् F^1.

४. 35d रवेश्चान्यत्र] A, रवेचोद्यत्र F^1, रवे चान्यत्र G.

५. 36a वृत्रस्य रुधिरं] A^2, रुद्रस्य रुधिरं A^1, पित्र+अधिकं F^1, पुत्रस्य रुधिरं G ; 36b स्रवन्ति] G, F^1, स्रुवन्ति A ; निम्नगाः] G, निम्नगात् A^1, निम्नगा A^2, F^1.

६. 36d न कुर्वीत] A^1, F^1, G, +कर्त्वयं A^2.

७. 37a न रात्रौ परिगृह्णीयाद्°] G, रात्रौ वा परिगृहीन्याद्° A^1, रात्रौ परिगृह्णीयाद्° A^2, रात्रौ वा परिग्रष्णीयाद्° F^1.

८. 38a दिवैव गृह्णीयाद्°] F^1, G, दिवैव गृहीन्याद्° A^1, दिवेव गृह्णीयाद्° A^2.

९. 38c समाचरेन्नि°] A^1, F^1, G, समाचरं नि° A^2 ; 38d समुच्चरन्] A, G, समुच्चरेत् F^1.

१०. 39a फट्कारेण] A, G, फाकारेण F^1 ; 39b समाददेत्] A^1, समोददेत् A^2, F^1, G.

११. 39c प्रोतवस्त्रं] A, G, धौतवस्त्रं F^1 ; तु संगृह्य] A^1, तु ग्राह्य (*v.f.*) A^2, संग्राह्य F^1, G ; 39d ग्राह्यवस्त्रं विसर्जयेत्] A^1, संग्राह्य वस्त्रवी A^2, आद्रवस्त्रं विसर्जयेत् F^1, आर्द्रवस्त्रं विसर्जयेत् G.

१२. 40a शिवधाम नयेत्पश्चात्प्र°] F^1, G, शिवधाम नयेत्पश्चां प्र° A^1, संज्ञयेत्शिवयानेयेत्पश्चात्प्र° A^2 ; 40b तु कारयेत्] A^2, F^1, G, तु च कारयेत् A^1.

यत्र यत्र गृहद्वारे कवाटद्वयमिष्यते[१]।
तत्र तत्र कवाटे तु सप्तदेवान्समर्चयेत्[२] ॥ ४१ ॥
भूवङ्गं च पतङ्गं च ऊर्ध्वाधः परिकल्पयेत्[३]।
[४]विमलं च सुबाहुं च कवाटस्थाधिदेवताः[५] ॥ ४२ ॥
श्रियं सरस्वतीं चैव ऊर्ध्वे तु परिकल्पयेत्।
तत्स्कन्धपट्टिकामध्ये विघ्नेशं पूजयेत्ततः ॥ ४३ ॥
स्वनामाद्येन मन्त्रेण गन्धपुष्पादिनार्चयेत्।
अस्त्रमन्त्रेण मतिमान्तन्मुद्रां च प्रदर्शयेत्[६] ॥ ४४ ॥

[९. मण्डपप्रवेशनम्]

कवाटोद्घाटनं कृत्वा प्रविशेन्मण्डपं बुधः।
ततश्च शोधनीं बध्वा हुंकारेण तु शोधयेत्[७] ॥ ४५ ॥
जलस्नानमिदं प्रोक्तं भस्मस्नानमथ शृणु[८] ॥ ४६ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे स्नानविधिपटलः [पञ्चपञ्चाशत्तमः][९] ॥

---

१. 41a गृहद्वारे] A, G, गृहद्वारे तु (*v.f.*) F^1 ; 41b °यमिष्यते] A^2, F^1, G, °यं मुहते A^1.

२. 41d सप्तदेवान्°] A, G, सप्तदेव F^1.

३. 42b ऊर्ध्वाधः] A, G, ऊर्ध्वता F^1.

४. F^1 omet 42cd-43cd.

५. 42c कवाटस्था°] A^1, कवाटस्या° A^2, G.

६. 44c अस्त्रमन्त्रेण मतिमान्°] A^1, F^1, अस्त्रमन्त्रं तु सर्वेषां A^2, अस्त्रमन्त्रेण मतिमांस् G ; 44d °तन्मुद्रां च] A^1, G, °तत्तन्मुद्रां A^2, °तद्रां च (*v.f.*) F^1.

७. 45c शोधनीं] G, शोधनं A, F^1.

८. 46a °मिदं] A, G, °मिति F^1 ; 46b °स्नानमथ] A^1, °स्नानविधिं A^2, G, °स्नानविधि F^1.

९. A^1, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे स्नानविधिपटलः।
A^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे जलस्नानविधिपटलः।
F^1 : इति प्रतिष्ठायां सप्तति स्नानविधि पटलः।

[षट्पञ्चाशत्तमः पटलः]
[भस्मस्नानविधिः[१]]

अतः परं प्रवक्ष्यामि भस्मस्नानविधिं परम्।

[१. पञ्चगव्योद्भवः]

नन्दा भद्रा च सुरभिः सुशीला सुमती स्मृताः[२] ॥ १ ॥
एवं पञ्च सुविख्याता देवतार्थेन निर्मिताः[३]।
देवब्राह्मनृपाणां च पञ्चगव्यं विशुद्धये॥ २॥
नन्दा क्षीरोद्भवं श्रेष्ठं भद्रायां दधिरुच्यते[४]।
[५]सुरभेर्घृतमेतद्धि सुशीला मूत्रमुच्यते ॥ ३॥
सुमती कपिला वर्णा गोमयं तद्विधीयते[६]।
कपिलागोमयं श्रेष्ठं सितागोमयमेव वा॥ ४॥

[२. भस्मकल्पनम्]

हस्ते संगृह्य हृदिना शुष्कं वै शिरसा पुनः[७]।
शिखामन्त्रेण दह्येत सद्योजातेन ग्राहयेत्[८] ॥ ५॥
मृत्कुम्भे वामतः स्थाप्य कवचेन तु रक्षयेत्[९]।
[१०]दक्षिणेन करेणैव वामहस्ते तु विन्यसेत्॥ ६॥
सद्यमन्त्रेण चैशान्यामभिमन्त्र्य सुसत्कृतम्[११]।

---

१. Manuscrits utilisés : A^1, A^2, F^1, G, F^1.

२. 1d सुमती] A^1, G, समनी A^2, सुति° (*v.f.*) F^1.

३. 2a एवं] A, G, गाव्या° F^1 ; सुवि°] A^1, F^1, G, विद्या° A^2 ; 2b देवतार्थेन] A, G, देवतात्वेन F^1.

४. 3b भद्रायां] A, G, भद्रा च F^1 ; दधिरुच्यते] A, F^1, उच्यते दधिर् G.

५. A et G omettent 3cd.

६. 4a कपिला] A^1, G, कपला A^2, कपिलो F^1 ; 4b गोमयं तद्वि°] A^2, गोमये तद्वि° A^1, गोमयेति द्वि° F^1, होमयेत्तद्वि° G.

७. 5a हृदिना] A, F^1, च हृदा G.

८. 5c दह्येत] G, दह्यात A, दह्ये तु F^1.

९. 6a वामतः] G, वामनं A, वामत° F^1 ; 6b रक्षयेत्] A, G, रक्षिता F^1.

१०. 56.6cd = 29.12ab.

११. 7a सद्य°] A, सर्व° F^1, तत्व° ; चैशान्या°] F^1, शैवान्या° A, G ; 7b सुसत्कृतम्] A^1, सकृत् सकृत् A^2, F^1, G.

भस्माधारे हृन्मन्त्रेण शङ्खे वा ताम्रपात्रके[१] ॥ ७॥

[३. भस्मपात्रम्]

श्रेष्ठं सौवर्णपात्रं स्याद्राजतं मध्यमं भवेत्।
कन्यसं ताम्रकं पात्रमलाभे मृण्मयं भवेत्[२] ॥ ८॥
अलाबुपात्रमधमं पैत्तलं वाथ मध्यमम्[३]।

[४. त्रिपुण्ड्रम्]

[४.१. देशिकादीनां त्रिपुण्ड्रस्थानम्]

[४]पञ्चब्रह्मषडङ्गैश्च व्योमव्यापिं जपेत्सकृत्॥ ९॥
शिर उद्धूलमीशेन मुखं तत्पुरुषेण तु[५]।
ग्रीवाकण्ठेऽप्यघोरेण हृदि बाहुप्रकोष्ठयोः[६] ॥ १०॥
जठरे नाभिकोर्परे पृष्ठेऽप्युरसि विन्यसेत्[७]।
बहुरूपेण मन्त्रेण धूलयेत्तु विशेषतः॥ ११॥
वामदेवेन मन्त्रेण गुह्यं चैव च धूलयेत्।
ऊरू च जानुनी चैव जङ्घयोः स्फिग्द्वयोरपि[८] ॥ १२॥
पादयोरुभयोश्चैव चाङ्गुष्ठे सद्यमन्त्रतः[९]।
देशिकादीनां सर्वेषां त्रिपुण्ड्रं तु विधीयते[१०] ॥ १३॥

---

१. 7c °धारे] A^2, F^1, G, °धार्ये A^1 ; हृन्मन्त्रेण] Eds, तु हृन्मन्त्रीA^1, F, तु हृन्मन्त्रं G.

२. 8c कन्यसं ताम्रकं] A, कनीयसं ताम्र° F^1, G.

३. 9b पैत्तलं] A^2, G, अपैन्तं A^1, पैत्तली F^1 ; वाथ मध्यमम्] A, G, चाधमाधमम् F^1.

४. 56.9cd = 29.12cd ; F^1 intercale après 9ab les vers 32.9cd-33c (passage traitant du labour du site), puis complète 32.33c par 56.6b et reprend avec 56.9cd.

५. 10a उद्धूलमी° A, उद्धूल्यदी° F^1, उद्धूल्यमी° G.

६. 10c ग्रीवा°] A^1, G, श्रव° A^2, श्रीव° F^1 ; °घोरेण] A^1, °घोरं च A^2, G ; 10d बाहु°] Eds, बाहौ A^1, G, बाह्वोः A^2.

७. 11a नाभिकोर्परे] G, नाभिरेकोर्परं A^1, नाभिजं घोरौ A^2, नाभिकोर्परं F^1 ; 11b पृष्ठेऽप्युरसि] F^1, पृष्ठोरसि A, G.

८. 12c ऊरू] A^1, ऊरौ A^2, F^1, G.

९. 13b चाङ्गुष्ठे] F^1, G, चामौष्ठे A^1, चाङ्कष्ठे A^2 ; °मन्त्रतः] A^2, G, °मन्त्र तु A^1, °मन्त्रवित् F^1.

१०. 13c देशिकादीनां] F^1, देशिकादीनि A, G.

[४.२. अन्येषां त्रिपुण्ड्रस्थानम्]

मूर्ध्नि ग्रीवाललाटे तु कर्णे बाहुप्रकोष्ठके[१]।
कोर्परे हृदये चैव नभौ पार्श्वद्वयोरपि[२] ॥ १४॥
त्रिपुण्ड्रं षोडशस्थाने कारयेद्वै शिवाश्रमी[३]।
[४]भस्मस्नानं हि शुद्धं हि अर्चनायोग्यमेव हि[५] ॥ १५॥
[६]...
नृपाणां चैव वैश्यानां त्रिपुण्ड्रं कारयेद्बुधः।
तुर्याङ्गुलं द्विजानां तु शूद्राणां तु त्रियङ्गुलम्[७] ॥ १६॥
मूर्ध्नि ललाटे कण्ठे च कर्णे हृदयनाभिके[८]।
हस्तयोरुभयोः षड्भिः पादयोरुभयोरपि॥ १७॥
एषु स्थानं परे न्यस्त्वा शूद्राणां तु विधीयते।

[४.३. सामन्यविषयः]

त्रिपुण्ड्रं भस्मस्नानं च त्रिपुण्ड्रं वा समाचरेत्[९] ॥ १८॥
सर्वपापविशुद्धिः स्याच्छिवेन सह मोदते[१०]।
त्रिपुण्ड्रस्थानमेवोक्तं त्रिपुण्ड्रदैवतं शृणु[११] ॥ १९॥

[४.४. त्रिपुण्ड्राधिदेवताः]

[१२]शिरःस्थाने स्वयं ब्रह्मा ललाटे स्कन्ददेवता[१३]।

---

१. 14a ग्रीवाललाटे तु] A, ललाटग्रीवे च F^1, ग्रीवाललटे च G ; 14b कर्णे] Eds, कण्ठे A, G, F^1.

२. 14c कोर्परे] A, G, कोर्परौ F^1 ; 14d पार्श्वद्वयोरपि] A, G, नचपरेश्चकेऽपिवा F^1.

३. 15b शिवाश्रमी] F^1, G, शिवाश्रमम् A^1, शिवाग्रकम् A^2.

४. F^1 donne cette version de 15cd : भस्मनं तु शुद्धं हृदयं नहि अर्चना योममेव हि।

५. 15c हि शुद्धं हि] A^1, तु शुद्धं हि A^2, G.

६. Lacune correspondant aux emplacements et dimensions des *tripuṇḍra* pour les *nṛpa* et *vaiśya*.

७. 16c तुर्याङ्गुलं] Eds, तुर्याकार° A^1, F^1, तुर्याणां र° (?) A^2 तुर्याकारं G.

८. 17a मूर्ध्नि ललाटे A, F^1, ललटे मूर्ध्नि G ; कण्ठे] A^1 (etc.), कर्णे F^1 ; 17b कर्णे] G, कले A^1, कटौ A^2, करे A^1 (var.), कण्ठे F^1.

९. 18c °स्नानं च] Eds, °नामानि A^1, °नानि (*v.f.*) A^2, °स्नानी (*v.f.*) F^1, °स्नानानि G.

१०. 19a °शुद्धिः स्याच्°] G, °शुद्धन्ति A^1, °शुद्धान्ति A^2, F^1.

११. 19c °मेवोक्तं] A^2, F^1, G, °मेवोक्ति A^1.

१२. 56.20ab-21cd très proches de 29.22ab-23cd.

१३. 20b °देवता] A^1, F^1, G, °दैवतम् A^2.

कण्ठे विनायकप्रीतिरश्विन्योः श्रोत्रयोरपि[१] ॥ २० ॥
हृदये तु ममप्रीतिर्बाह्वोर्विष्णुप्रियं भवेत्[२] ।
नाभौ वसुन्धरा चैव पृष्ठे च पितरस्तथा[३] ॥ २१ ॥

[४.५. त्रिपुण्ड्रविस्तारः]

नवाङ्गुलं तु विस्तारं देशिकानां विधीयते[४] ।
सप्ताङ्गुलं तु विस्तारं ब्राह्मणानां प्रशस्यते ॥ २२ ॥
पञ्चाङ्गुलं तु विस्तारं क्षत्रियाणां त्रिपुण्ड्रकम् ।
चतुरङ्गुलं तु वैश्यानां त्रिपुण्ड्रं सर्वकामिकम्[५] ॥ २३ ॥
त्रियङ्गुलं तु शूद्राणां स्त्रीणामेकाङ्गुलं भवेत् ।
तत्तज्जातीयस्त्रीणां तु तत्तदेव विधीयते[६] ॥ २४ ॥

[५. भस्मोद्धूलनविधिः]

पञ्चब्रह्मषडङ्गैश्च भस्म चैवाभिमन्त्रयेत्[७] ।
भस्म सव्येन गृह्णीयाद्वामहस्ते तु विन्यसेत्[८] ॥ २५ ॥
शिवीकृतेन तोयेन तद्भस्मना तु योजयेत्[९] ।
उभयोर्हस्तयोर्बध्वा भस्म पीड्य सकृत्सकृत् ॥ २६ ॥
मूर्धादिपादपर्यन्तं भस्मोद्धूल्य यथाक्रमम्[१०] ।
स्नाने तु शिवमन्त्रेण स्नानमाग्नेयमुत्तमम्[११] ॥ २७ ॥

---

१. 20d °श्विन्योः श्रोतयो° A^1, F^1, °श्विन्यो श्रोतयो° A^2, °श्विन्योरुभयो° G.

२. 21a मम°] A, F^1, G (cf.29.23a), यम° A (var.) ; 21b °बाह्वोर्वि°] A, °पार्श्वौ वि° F^1, °बाहौ वि° G.

३. 21d पृष्ठे] Eds, पृष्ठौ, A, F^1, G ; °तथा A, F^1, °स्थिताः G.

४. 22b देशिकानां] A^2, G, देशिकायां A^1, देशिकां तु F^1.

५. 23d सर्वकामिकम्] F^1, साधकाय वै A^1, G, lacune A^2.

६. 24c °जातीयस्त्रीणां] G, °जातिस्त्रियाणां A, F^1.

७. 25b चैवा°] A, G, नैवा° F^1.

८. 25c सव्येन] A^1, सद्येन A^2, F^1, G.

९. 26a शिवीकृतेन] G, शिवं तु तेन A^1, शिखीकृतेन A^2, शिखी तु ते F^1.

१०. 27b भस्मोद्धूल्य] A^2, F^1, G, भस्मोद्धूलु A^1.

११. 27a स्नाने तु] A, स्नात्वा तु F^1.

[१]तस्माद्वारुणमुत्सृज्य स्नानमाग्नेयमाचरेत्[२]।
भस्मस्नानमिदं प्रोक्तं सर्वसंपत्करं नृणाम्[३] ॥ २८ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भस्मस्नानविधिपटलः [षट्पञ्चाशत्तमः][४] ॥

---

१. F^1 omet 28ab.

२. 28a तस्माद्वारुणमुत्सृज्य] G, भस्मोद्धारणमृत्स्नान° A^1, भस्माचारुणमृत्स्नान° A^2.

३. 28d सर्वसंपत्करं नृणाम्] A, अर्चनाङ्गमथ शृणु F^1.

४. A : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भस्मस्नानविधिपटलः ।;
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायामेकसप्तति स्नानविधीह्पटलः ।;
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे भस्मस्नानविधिपटलः समाप्तः ।

[सप्तपञ्चाशत्तमः पटलः]
[अष्टबन्धनविधिः[१]]

अतः परं प्रवक्ष्यामि अष्टबन्धविधिक्रमम्।
आयुरारोग्यदं चैव पुत्रपौत्रविवर्धनम्[२] ॥ १॥
सर्वारिष्टविनाशार्थं सर्वशान्तिकरं परम्।

[१. अष्टबन्धनार्थः]

लिङ्गपीठान्तरे योज्यमष्टबन्धं प्रकीर्तितम्[३] ॥ २॥
[४]लिङ्गपीठान्तरे तोयं स्रवन्तं राष्ट्रनाशनम्[५]।
सर्वसस्यविनाशं तु सर्वरोगविवर्धनम्॥ ३॥
तद्दोषशमनार्थं तु अष्टबन्धं प्रकारयेत्[६]।

[२. अष्टबन्धनद्विभेदौ]

[२.१. पक्वभेदः]

गुललाक्षामधूच्छिष्टं परागा कीर्तिका समाः[७] ॥ ४॥
[८]एतेषां तु समं ज्ञेयं शुद्धसर्जरसं तथा[९]।
तदर्धं चेष्टकाचूर्णं घनचूर्णमिति स्मृतम्[१०] ॥ ५॥
पलेन पाचयित्वा तु क्रमेण इति योजयेत्[११]।

---

१. Manuscrits utilisés : A^1, A^2, F^1, G, K (pour l'appendice voir ci-dessous).

२. 1c °रोग्यदं चैव] A^1, F^1, G, °रोग्यकं चैव A^2, °रोग्यजयदं K ; 1d °पौत्रवि°] A, F^1, G, °पौत्राभि° K.

३. 2c लिङ्गपीठान्तरे योज्य°] G, रङ्गपीठान्तरे योज्य° A^1, लिङ्गपीठान्तरयो + A^2, गपीठान्तं रेशि याज्य° F^1, लिङ्गपीठकान्तरं योज्य° (*v.f.*) K.

४. F^1 omet 3ab-4ab.

५. 3b स्रवन्तं] Eds, स्रवन्ते A, G, K.

६. 4a °नार्थं तु] A^1, °नार्थाय A^2, G, K ; 4b प्रकारयेत्] A, प्रकल्पयेत् G, प्रकीर्तितम् K.

७. 4c गुल°] A, G, गुला F^1, गुलं K ; 4d परागा] A, अष्टपराङ्गा F^1, K, परगाः G ; समाः] G, स्मृता A^1, समा A^2, F^1, K.

८. K ajoute avant 5ab नवधा अष्टधा भज्य त्रिधा वा पञ्चधा भवेत्।

९. 5b °सर्जरसं] K, °सत्वरसं A^1, °सञ्जरसं A^2, G, °सममसरं F^1.

१०. 5c चेष्टका°] G, K, lacune A^1, F^1, शर्करा° A^2 ; 5d °चूर्णमिति] A (etc.), °पूर्णमिति G.

११. 6a पलेन] A^1, फलेन A^2, F^1, G, lacune K.

[१]लाक्षा सर्जरसं सिक्था कुरुविन्दं सगुग्गुलुम्[२] ॥ ६॥
नारङ्गगुलतैलेन अष्टबन्धं प्रकीर्तितम्[३]।
एवं क्रमेण संपृच्य ताम्रपात्रे तु योजयेत्[४] ॥ ७॥
एतेषां बन्धनं कृत्वा पक्वं चैवाष्टबन्धनम्।
[५]पक्वबन्धमिदं ज्ञेयमपक्वमधुनोच्यते[६] ॥ ८॥

[२.२. अपक्वभेदः]

त्रिफलां शङ्खचूर्णं च दध्याज्यगुलसंयुतम्[७]।
कदलीफलसंयुक्तमपक्वं चाष्टबन्धनम्[८] ॥ ९॥
एवं चैवामृतं कुर्यात्सर्वसिद्धिकरं परम्।

[३. अष्टबन्धनक्रिया]

अष्टबन्धे कृते काले सर्वद्रव्याणि लेपयेत्[९] ॥ १०॥
नववस्त्रेण संवेष्ट्य पीठलिङ्गावृतेन तु[१०]।
चतुर्दिक्षु च कुण्डेषु होमं कुर्याद्विचक्षणः[११] ॥ ११॥
चतुरध्ययनं कुर्युश्चतुरो वेदपारगाः[१२]।
[१३]श्रीसूक्तं पुरुषसूक्तं रुद्रहोतारमेव च॥ १२॥

---

१. 57.6cd-7ab = *Raurava* Kp.61.9cd-10ab et *Ajita* 76.33cd-34ab.

२. 6c सर्जरसं सिक्था] A^1, सज्ञरसं सिक्तं A^2, G, सजरसं सक्तं F^1, सज्ञरसिस्क्तं च K ; 6d कुरुविन्दं सगुग्गुलुम्] A, F^1, G, करविन्दं सगुल्गुलम् K.

३. 7a नारङ्गगुलतैलेन] A, lacune F^1, नारङ्गं गुलतैलं च G, K.

४. 7c संपृच्य] Eds, संपूज्य A (etc) ; 7d ताम्रपात्रे तु] Eds, ताम्रपात्रेण A (etc).

५. K place 10ab une première fois avant 8cd.

६. 8c पक्वबन्धमिदं] A^1, G, पक्वबन्धमिति F^1, पक्वाष्टबन्धनं K ; 8d ज्ञेयमपक्वमधुनो°] A^1, G, ज्ञेयं पक्व + मधुनो A^2, ज्ञेयमपक्वं चाधुनो° F^1, K.

७. 9a °फलां शङ्ख°] A^2, °फलां शख° A^1, °फलाशङ्ख° F^1, G, lacune K ; 9b दध्याज्य°] A, G, दध्यादि° F^1, K.

८. 9d °क्तमपक्वं चाष्ट°] F^1, G, °क्तं पक्वं च अष्ट° A^1, °क्तं पक्वं चाष्ट° (*v.f.*) A^2, K.

९. 10c °बन्धे] A, °बन्ध° F^1, °बन्धं K ; 10d लेपयेत्] A, K, दापयेत् F^1.

१०. 11a °वस्त्रेण] G, °वस्त्राणि A (etc.).

११. 11c चतुर्दिक्षु च कुण्डेषु] G, lacune A, F^1, शान्तिकुम्भं तथा कुर्याद्° K.

१२. 12a चतुरध्ययनं कुर्युश्च°] A^1, चतुर्वेदाध्ययनं कुर्याच्° (*v.f.*) A^2, F^1, चतुर्वेदं च चतुर्दिक्षु K ; 12b °चतुरो] A, °चत्वारो F^1, K, lacune G ; °पारगाः] A^2, F^1, G, °पारगान् A^1, K.

१३. F^1 omet 12cd-13cd.

शान्तिद्वयं पवमानं ज्येष्ठसाम रथंतरम्[१]।
बृहतन्नीलरुद्रं च वेदवेदेषु पारगान्[२] ॥ १३॥
पुण्याहं वाचयित्वा तु शान्तिहोमं तु कारयेत्।
स्नपनं तत्र कुर्वीत ब्राह्मणान्भोजयेत्तदा[३] ॥ १४॥
पञ्चवर्णहविर्दद्यात्पञ्चवक्त्रे विशेषतः[४]।

[४. बालस्थानम्]

अष्टबन्धकृते काले बालस्थानं प्रकल्पयेत्॥ १५॥
लिङ्गे तु चलिते भिन्ने पीठे तु चलितेऽथवा[५]।
प्रासादे चलिते भिन्ने बालस्थानं तु कारयेत्[६] ॥ १६॥
ग्रामारम्भस्य काले तु बालस्थानं तु कारयेत्[७] ॥ १७॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे अष्टबन्धनविधिपटलः [सप्तपञ्चाशत्तमः][८] ॥

[अनुबन्धः]
[अष्टबन्धनप्रायश्चित्तविधिः[९]]

अथ वक्ष्ये विशेषेण अष्टबन्धविधिक्रमम्[१०]।
सर्वशान्तिकरं पुण्यं सर्वकामफलप्रदम्[११] ॥ अनु॰ १॥
सर्वैश्वर्यकरं पुंसां सर्वकार्यार्थसाधनम्[१२]।

---

१. 13a पावमानं] A^{2}, पवमाने च A^{1}, पावमानं च (*v.f.*) G, K ; 13b ज्येष्ठसाम] A^{1}, G, ज्येष्ठासाम॰ A^{2}, K.

२. 13c बृहतन्नील॰] A^{1}, ब्रह्म नीलं च A^{2}, G, K.

३. 14c तत्र] A, G, तत्॰ (*v.f.*) K ; 14d तदा] A^{1}, ततः A^{2}, G, K.

४. 15b ॰वक्त्रे] A^{2}, G, ॰वर्णो A^{1}, ॰मूर्ध्नि F^{1}, ॰मूर्तौ K ; विशेषतः] A, G, K, निवेदयेत् F^{1}.

५. 16a लिङ्गे तु] A, F^{1}, G, लिङ्गे च K ; 16b तु चलितेऽथवा] A, G, तु चलितेऽपि वा F^{1}, च चलिते तथा K.

६. 16c भिन्ने] A, F^{1}, G, भग्ने K.

७. 17a ग्रामारम्भस्य] A^{2}, ग्रामारम्भं च A^{1}, G, भ्रामारम्भण॰ F^{1}, धामारम्भण॰ K.

८. A^{2} : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आष्टबन्धनपटलः।
F^{1} : इति दीप्तशास्त्रे प्रतिष्ठायामाष्टबन्धनपटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रेऽष्टबन्धनविधिपटलः समाप्तः।
K : इति दीप्तशास्त्रे आष्टबन्धनप्रायश्चित्तविधिपटलः।

९. Manuscrits utilisés pour l'Appendice : L^{1}, L^{2}, M^{1}, M^{2}, M^{3}, M^{4}.

१०. App. 1ab विशेषेण अष्टबन्ध॰] L, $M^{1,4}$, विशेषेणाष्टबन्धन॰ M^{3}.

११. App. 1d ॰काम॰] $M^{3\text{-}4}$, ॰काम्य॰ L, M^{1}.

१२. App. 2b ॰कार्या॰] L^{2}, $M^{1,3\text{-}4}$, ॰कामा॰ L^{1}.

[१. बन्धनाभवफलम्]

[१]विष्णुभागे तु निर्माल्यं नृपस्यायुर्विनाशनम्[२] ॥ अनु॰ २॥
ब्रह्मभागे तु निर्माल्यं ब्रह्मवर्गविनाशनम्[३]।
शिलाभागे तु निर्माल्यं गर्भनाशकरं भवेत्[४] ॥ अनु॰ ३॥
नन्द्यावर्तशिलाभागे दुर्भिक्षं जायते नृणाम्[५]।
हर्म्यं चैव प्रवेशं तु विट्शूद्रसर्वनाशनम्[६] ॥ अनु॰ ४॥

[२. बन्धनकालः]

यत्काले बन्धने जीर्णे तत्काले तु दृढं कुरु [७]।
[८]दिनवारमुहूर्तं तु वर्जयेत्तु विचक्षणः ॥ अनु॰ ५॥

[३. अष्टबन्धकल्पनम्]

[९]कार्पासतूलनवनीतसुशर्कराणां लाक्षामधूच्छिष्टसुकुन्दुरुष्कम्[१०]।
काषायपाषाणगुलं समानं लिङ्गस्य पीठे विवरेऽष्टबन्धम्[११] ॥ अनु॰ ६॥
लाक्षा शर्करपाषाणं सुसिक्थं कुरुविन्दकम्[१२]।

---

१. App.2cd-4cd se retrouvent dans le *Kāraṇa* (I.253, voir *Raurava* t. III, p. 171-2, n. 22).

२. App. 2c विष्णुभागे] *Kāraṇa*, विष्णुभागं L^1 (etc.).

३. App. 3a ब्रह्मभागे] *Kāraṇa*, ब्रह्मभागं L^1 (etc.).

४. App. 3c शिलाभागे] *Kāraṇa*, शिवभागं L^1 (etc.).

५. App. 4a नन्द्यावर्तशिलाभागे] *Kāraṇa*, तस्याधारशिलायां तु L^1, तस्याधारशिवान्ते तु L^2, $M^{1,3}$; App. 4b नृणाम्] L^1, भुवि L^2, $M^{1,3}$.

८. 45c अम्बी चैव गणांबी च] A^{2}, G, अम्बी चैव गुणांबी च° A^{1}, अम्बी गणांबी गौरी च D, अष्टगणाम्बि गौरी च E ; 45d °गौरी प्रज्ञादितः] A^{1}, गौरीप्रज्ञा चेन्द्रादितः (*v.f.*) A^{2}, प्रज्ञा चेन्द्रादितः D, E, G.

९. A et G omettent 46ab.

१०. 46b आदौ] D, आतो E.

११. 47a तस्यैवोपरि योगः स्याद्°] A^{1}, D, तस्यैवोपरि योगं स्याद्° A^{2}, तस्यै चोपरि योगह्याद्° E, तस्योपरि +योगः स्याद्° G.

१२. 47c चित्रकोज्ज्वल°] Eds, चित्रकज्ञाल° A, G, चित्रकं जल° D^{1}, lacune D^{2}, छत्रकज° (*v.f.*) E.

१३. 48a समं वा] E, समयं A, D, G ; 48b खड्गाकारं] E, खड्गाकार° A^{1}, G, खड्गागार° A^{2}, खगाकारं D ;

[१]पद्मपत्रासमाकारं विमलं तु तदूर्ध्वतः ॥ ४८ ॥
स्थापनार्चनकाले तु अनन्तादि यथाक्रमम्[२]।
अनन्तेन योगसाम्मिश्रं योगं योगेन कीर्तितम् ॥ ४९ ॥
सिंहेन गात्रसंयुक्तं तस्मात्सिंहासनं स्मृतम्।
पद्मं पद्मसमाकारं विमलं विमलं स्मृतम्[३] ॥ ५० ॥

[६. पञ्चकृत्यम्]

तत्तत्स्थानं समाख्यातं पादभागं प्रचक्ष्महे[४]।
[५]अनन्तं सृष्टिबन्धं स्यात्सिंहाख्यं स्थितिसंभवम्[६] ॥ ५१ ॥
सिंहासनं पदार्थं स्यात्परमेण परं पदम्[७]।
विमलं विमलं ज्ञानमेतदीश्वरविग्रहम् ॥ ५२ ॥

[७. पीठभेदः]

नागरे नागरं पीठं द्राविडे द्राविडं भवेत्[८]।
वेसरे वेसरं पीठं सर्वसंपत्करं नृणाम्[९] ॥ ५३ ॥
[१०]नागरे वेसरं पीठं वृद्धिवर्धनमारभेत्[११]।
समखण्डे महालिङ्गे पद्मपीठमुदाहृतम्[१२] ॥ ५४ ॥

सिंहासनम्] Eds, सुखासनम् A (etc.).

१. A et G omettent 48d-50c.

२. 49a स्थापनार्चनकाले तु] E, स्थापनाद्यश्च न काले D.

३. 50c पद्मं पद्म°] D, पद्मपत्र° E ; 50d विमलं स्मृतम्] A^2 (etc.), विमला स्मृतम् A^1.

४. 51a पादभागं प्रचक्ष्महे] A, पदभागं प्रवक्षुभे D, पदभागं प्रचक्ष्महे E, G.

५. Les vers 51cd-52 sont probablement à lire ainsi :
अनन्तं सृष्टिबन्धं स्याद्योगाख्यं स्थितिसंभवम्। सिंहासनं संहारं स्यात्पद्ममेवं तिरोभवम्॥
विमलं विमलं ज्ञानमेतदीश्वरानुग्रहम्।

६. 51c अनन्तं सृष्टिबन्धं स्यात्] A^1, D^1, अनन्तसृष्टिबन्धं स्यात् A^2, G, अनन्तं सृष्टिबद्धस्य D^2, अनन्तं सृष्टिबद्धं स्यात् E ; 51d °सिंहाख्यं] A, G, °सिंहोग्रं D, °सिंहाग्रं E.

७. 52a सिंहासनं पदार्थं स्यात्] A^1, G, सिंहसं+++र्थं स्यात् A^2, सिंहं संपदार्थं स्या D, सिंहासनं परार्धं स्यात् E ; 52b °परमेण] G, °परमेन A, D, E.

८. 53a नागरं] A (etc.), नागरे D ; 53b द्राविडे] A^2, D, E, द्रविडे A^1, द्राविडं G.

९. 53c सर्वसंपत्करं] A, G, lacune D, सर्वं सुखकरं E.

१०. D et E insèrent après 54ab : नागरेन्द्राविडं (D^2 : द्राविद्धं) पीठं राजवृद्धिकरं परम् (D^2 : पदम्).

११. 54a वृद्धिवर्धन°] A^1, E, G, +द्धिवर्धन° A^2, वृद्धिवर्तन° D.

१२. 54c समखण्डे] A, D, समखण्ड° E, समवर्णे G.

शिवाधिके महालिङ्गे सिंहयुक्तं तु पद्मकम्[1]।
पङ्कजं वर्धमाने तु योगादीनि यथाक्रमम्[2]॥ ५५॥
एतत्त्रैराशिकं कुर्याद्भेदमेकेन तत्र वै[3]।
त्रिकोणं चार्धचन्द्रं च पद्मं चैव शिवाधिके॥ ५६॥
धर्मार्थकाममोक्षार्थं क्रमात्पीठं त्रिधा पुनः[4]।
पूर्णचन्द्रसभद्रा च वेदी चैव तु नागरे[5]॥ ५७॥
श्रेयो लक्ष्मीं च पीठं च स्थण्डिलं चैव द्राविडे[6]।
दैविके वेदिभद्रं स्यात्स्वयंभूते तु वेदिका[7]॥ ५८॥
यापि यक्ष्मा शशाङ्के च आर्षे च यज्ञसंज्ञके[8]।
मानुषे मिश्रकं पीठं कामं तत्र बहूनि वै[9]॥ ५९॥
धारालिङ्गस्य पीठं हि वेदिभद्रं न संशयः[10]।
गोकर्णकुम्भपीठं स्यात्स्वस्तिबन्धमतः परम्[11]॥ ६०॥
पीठभेदं विदित्वा तु धामभेदं विदुर्बुधाः[12]।
[13]धामभेदं विदित्वा तु मन्त्रभेदं विदुर्बुधाः[14]॥ ६१॥

---

१. 55a °युक्तं] A^1 (etc.), °वृत्तं A^2.

२. 55c वर्धमाने तु] A^1, G, वर्धमानं तु A^2, वर्धमानेन D, E.

३. 56a भेदमेकेन] A^2 (etc.), भेदकेन तु A^1.

४. 57a °मोक्षार्थं] A^2, D^2, G, °मोक्षार्थ° A^1, D^1, °मोक्षं च E.

५. 57c पूर्णचन्द्रसभद्रा] A^1, D, पूर्णचन्द्रसभद्रं A^2, पूर्णं चन्द्रं च भद्रा E, पूर्णचन्द्रसुभद्रा G ; 57d वेदी चैव तु नागरे] A^2, E, वेदिर्वै च तु नागरे A^1, वेदि वै चतुरनागरे (*v.f.*) D, वेदिर्वै चतुरागमे G.

६. 58a श्रेयो लक्ष्मीं च पीठं च] A^1, G, श्रेयो लक्ष्मीश्च पीठश्च A^2, गेयक्ष्मी च वा पीठ° (*v.f.*) D^1, श्रे यक्ष्मी च वा पीठ° (*v.f.*) D^2, श्यक्षी च वामपीठस्य E ; 58b स्थण्डिलं चैव] A^1, °ण्डण्डिला चैव A^2, स्थण्डिला चैव D, E, स्थण्डिलावेव G ; द्राविडे] A^2, E, G, द्राविले A^1, D.

७. 58c दैविके वेदि°] A, D, G, देविके देवि° E ; 58d °भूते] A, D, G, °भूवे E.

८. 59a यापि] E, वापि A (etc.) ; 59b च यज्ञ°] G, यज्ञस्य A^1, यज्ञ° (*v.f.*) A^2, D, E ; °संज्ञके] A^1 (etc.), °संज्ञिके (*v.f.*) A^2.

९. 59d बहूनि] A^1 (etc.), बहूनृ A^2.

१०. 60a धारालिङ्गस्य पीठं] A, G, आधारलिङ्गस्य पीठं हि D, धारालिङ्ग+++ E.

११. 60c स्यात्°] A, D, G, स्यां E ; 60d °बन्ध°] A, D^1, G, °बद्ध° D^2, E ; °मतः] A, D, E, °मितः G.

१२. 61a °भेदं] A^2, °बन्धं A^1, D^1, G, °बद्धं D^2, E ; 61b धामभेदं] A^2 (etc.), धामभेदा A^1.

१३. D^1 omet 61cd.

१४. 61c मन्त्र°] A, D^2, G, अश्र° E.

मन्त्रभेदं विदित्वा तु मन्त्रेणार्चयते शिवम्[१]।
अर्चयेद्देवदेवेशं सर्वप्राणिहितावहम्[२] ॥ ६२॥
स्थापनेनार्चयेत्कार्यं तेन मन्त्रेण साधयेत्[३]।
स्थापयित्वा विधानेन देवदेवं महेश्वरम्[४] ॥ ६३॥
[५]...(?)

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आसनविधिपटलः [षष्टितमः][६] ॥

---

१. 62b मन्त्रेणार्चयते शिवम्] A, G, मन्त्रेणार्चयेच्छिवम् (*v.f.*) D, lacune E.

२. 62d °हितावहम्] A, G, °सुखावहम् D, E.

३. 63a स्थापनेनार्चयेत्कार्यं] A, G, स्थापने चार्चने कार्ये D, स्थापने स्नपने कार्यं E.

४. 63c स्थापयित्वा] A, G, साधयित्वा D, E.

५. Le texte s'interrompt brutalement dans tous les manuscrits.

६. A^2, G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आसनपटलः।
D^1 : इति दीप्तागमे जीर्णोद्धार आवाहनविद्धिपटलः। चतुर्दशः।
D^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आसनपटलश्चतुराशीति तमः।
E : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे आसनभेदपटलः।

[एकषष्टितमः पटलः]
[महास्नपनविधिः[१]]

अतः परं प्रवक्ष्यामि महास्नपनमुत्तमम्।
अपमृत्युप्रशमनमायुरारोग्यवर्धनम्॥ १॥
[२]दुःखत्रयनिवृत्त्यर्थं सर्वशत्रुविनाशनम्[३]।

[१. महास्नपनकालः]

अयने विषुवे चैव ग्रहणे चोत्सवान्तके[४]॥ २॥
यागान्ते चाश्वमेधान्ते षडशीतिमुखेषु च।
राजाभिषेककाले तु प्रारब्धे राजधानिके[५]॥ ३॥
अवग्रहे प्रतिष्ठान्ते ज्वरमार्युद्भवे भवेत्[६]।
एषु स्नपनं कर्तव्यं द्रव्यदेवसमन्वितम्[७]॥ ४॥

[२. स्नपनमण्डपः]

[२.१. मण्डपलक्षणम्]

प्रासादपुरतः कुर्यात्पृष्ठतो वाथ दक्षिणे[८]।
उत्तरे वाथ कर्तव्यं स्नानमण्डपमुत्तमम्[९]॥ ५॥
मानाङ्गुलप्रमाणेन द्वाविंशद्धस्तसंयुतम्[१०]।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, D^2, E, F^1, G.

२. E remplace 2a par पुत्रपौत्रविवृध्यर्थं.

३. 2a दुःख°] A (etc.), मुख° C^1 ; °निवृत्त्य°] A^1, G, °निवृत्य° A^2, C, D.

४. 2d चोत्सवान्तके] A^1, G, चोत्सवान्तिके A^2, C, D, E, चोत्सवान्तरे F^1.

५. 3d प्रारब्धे] Eds, प्रारम्भे A (etc.) ; राजधानिके] A (etc.), राजधान्यपि F^1.

६. 4a अवग्रहे] C, D, E, F^1, G, अग्रहे च A^1, lacune A^2 ; 4b °र्युद्भवे भवेत्] A^1, °र्युद्भुते भवेत् A^2, G, °र्याद्भुतो भवेत् C^1, °र्याद्भुतादिषु C^2, °र्याथुतो भवे D^1, °र्याद्भुतोद्भवे D^2, E, °र्यादिगोभवेत्F^1.

७. 4c एषु] A, D, एष C^1, एतत् C^2, एतेषु E, G, तेषु F^1 ; स्नपनं कर्तव्यं] A, C, D, स्नपनं कुर्याद्° E, स्नानं प्रकर्तव्यं F^1, स्नपनं कार्यं G.

८. 5a कुर्यात्°] A (etc.), वापि F^1 ; 5b वाथ दक्षिणे] A^1, G, lacune A^2, वा प्रदक्षिणे C, D, E, वापि दक्षिणे F^1.

९. 5c वाथ कर्तव्यं] A, G, वा प्रकर्तव्यं C, D, E, F^1 ; 5d स्नान°] F^1, स्नपन° (*v.f.*) A (etc.).

१०. 6b °विंशद्धस्त°] A, C^1, D^1, E (?), °विंशस्तद्धस्त° C^2, °विंशुद्धस्नपन° D^2, °विंशस्तम्भ° G ; °संयुतम्] A (etc.), °विस्तृतम् F^1.

[१]चतुर्दिक्षु चतुर्द्वारं तोरणैरुपशोभितम्[२] ॥ ६ ॥
द्वारकुम्भसमायुक्तं दर्भमालाविभूषितम्।
वितानोपरि संछन्नमष्टदिग्ध्वजलम्बितम्॥ ७ ॥
अष्टपर्वतसंयुक्तमष्टमङ्गलसंयुतम्।

[२.२. व्यूहानां सूत्रताडनम्]

गोमयालेपनं कृत्वा पिष्टैः सूत्रं प्रताडयेत्[३] ॥ ८ ॥
पञ्चाधिकं चत्वारिंशत्सूत्रं तालान्तरं न्यसेत्[४]।
उदगग्रं ततः कृत्वा परितः पादमाहरेत्[५] ॥ ९ ॥
[६]स्तम्भांस्तु विन्यसेत्तत्र द्वादशं चान्तरेण तु[७]।
[८]षद्वञ्चाधिकसङ्ख्या तु मध्ये तु द्विशतं पदम्[९] ॥ १० ॥
वीथीमृजुं त्यजेद्वीमानभितो गोमयेन तु[१०]।
चतुर्दिक्षु न्यसेद्वीमान्विंशत्यूर्ध्वं शतं पदम्[११] ॥ ११ ॥
प्रत्येकं तु शतं कोणे शेषाणि परिलोपयेत्।

---

१. C et D omettent 6cd-8ab.

२. 6d तोरणैरुपशोभितम्] E, F^{1},G, तोरणे द्रुमशोभितम् A.

३. 8c गोमयालेपनं] A (etc.), गोमयैर्लेपनं C^{2} ; 8d °ताडयेत्] A, G, °दापयेत् C, D, °कल्पयेत् E, °पातयेत् F^{1}.

४. 9a पञ्चाधिकं चत्वारिंशत्°] A^{2}, C, D, E, G, पञ्चाधिकं च चत्वारि A^{1}, पञ्चदशाधिकसप्त° F^{1} ; 9b °सूत्रं तालान्तरं] A, G, °सूत्रं तालान्तरे C, D^{2}, E, °सूत्रान्तलान्तरे D^{1}, °सूत्रालन्तरे F^{1} ; न्यसेत्] A (etc.), भवेत् C^{2}.

५. 9c कृत्वा] A, G, कल्प्य C, D, F^{1} ; 9d °हरेत्] A (etc.), °रभेत् D^{1}, E.

६. F^{1} ajoute avant 10ab : षड्विंशच्छतके हीनद्विसहस्रपदं भवेत्।

७. 10a स्तम्भांस्तु विन्यसेत्°] G, स्तम्भानि विन्यसेत्° A (etc.), स्तम्भानपि न्यसेत्° F^{1} ; 10b चान्तरेण] D^{1}, E, चोत्तरेण A, C, D^{2}, F^{1}, G.

८. F^{1}donne cette version de 10cd-11ab : षद्वञ्चशदधिकं मध्ये च शतद्वयं न्यसेत्। चतुर्विधं त्यजेद्धीमान्यितो गोमयेन तु।

९. 10c षद्वञ्चाधिक°] A, G, षद्वञ्चाशदृषिः C, षद्वञ्चशत्नषि° D^{1}, षद्वञ्चशदृषि° D^{2}, षद्वञ्चाशवृष्टि° E ; 10d तु द्विशतं] A^{1}, G, एकशतं A^{2}, द्वितलं C, तद्वितं (?) D^{1}, तद्विदं D^{2}, शतं द्विशतं E.

१०. 11a वीथीमृजुं त्यजेद्°] C, D, विधिमृज्य न्यसेद्° A^{1}, +धिमृज्य त्यजेद्° A^{2}, विधिमृज्यं न्यसेद्° E, वीथीशतं त्यजेद्° G.

११. 11d °विंशत्यू° A^{1}, C^{2}, G, °विंशदू° A^{2}, E, F^{1}, °नरंशत्यू° C^{1}, D^{2}, °नरंशत्रू° D^{1}.

[२.३. व्यूहलक्षणम्]

[१]मध्यमे व्यूहके लुप्या द्विपदं चतुरन्तरे[२] ॥ १२ ॥
एवं कृते पदाः सम्यक्प्रत्येकं षोडशं भवेत्।
षोडशानां पदानां तु मध्ये लुप्य चतुष्पदम्॥ १३ ॥
[३]ऊर्ध्वव्यूहेन लुप्यं तु परितोऽष्टौ तु लोपयेत्[४]।
तन्मध्ये वेदिकां कुर्याद्धस्तमात्रसमुच्छ्रयाम्॥ १४ ॥
तद्व्यूहमानविस्तारमभितोऽष्टोपवेदिका[५]।
तालमात्रसमुत्सेधं दर्पणोदरसंनिभम्॥ १५ ॥
एवं व्यूहक्रमः प्रोक्तः व्यूहाधिपानथ शृणु[६]।

[२.४. व्यूहाधिपाः]

मध्यमं तु शिवव्यूहं पदानां चैव षोडश[७] ॥ १६ ॥
पूर्वादीशानपर्यन्तमनन्ताद्यष्टमूर्तयः[८]।
तद्बाह्ये लोकपालाश्च स्वे स्वे स्थाने विशेषतः[९] ॥ १७ ॥

[२.५. कुण्डानि]

परितः कल्पयेत्कुण्डं स्थण्डिलैर्वाद्रवालुकैः[१०]।

---

१. E omet 12cd-14ab.

२. 12c मध्यमे व्यूहके] A^1, D^1, मध्यमे परुके A^2, मध्ये वरुणके C, मध्यवरूहके D^2, मध्यमे वहके F^1, मध्यमव्यूहके G.

३. F^1 omet 14ab-16cd.

४. 14a ऊर्ध्वव्यूहेन लुप्यं तु] A^2, ऊर्ध्वव्यूहेन लुप्य तु A^1, मध्यं वरुणलुप्यं तु C, मध्यवस्तम्भेन D^1, मध्यवरूहेन D^2, मध्यव्यूहेन लुप्य तु G ; 14b परितोऽष्टौ] C, D, G, परितोषौ A^1, lacune A^2.

५. 15a °विस्तारम°] A, C, °विस्ताराद° D, G ; 15b °भितोऽष्टोप°] A^1, °भितोऽष्टौप° A^2, G, परितोऽष्टौ तु C, °भितोऽष्टौ तु D, E.

६. 16a व्यूहक्रमः] A, C^2, E, G, वरुणक्रमं (*v.f.*) C^1, वरूहकं D^1 ; 16b व्यूहाधिपानथ] Eds, व्यूहाधिपतयः A, वरुणाधिपतेः C, वरूहाधिपमतः D^1, वरूहाधिपतः D^2, व्यूहाधिपमतः E, व्यूहाधिपमथ G.

७. 16c मध्यमं] A, G, मध्यं तु C^1, D, मध्यमे E ; °व्यूहं] A, C^2, G, °वरुणं (*v.f.*) C^1, D^2, °रूहं (?) D^1.

८. 17b °नन्ताद्यष्टमूर्तयः] C^1, °नन्तं त्वष्टमं शतम् A^1, °नन्ताद्यष्टमं पदम् A^2, °नन्ताद्यष्टशक्तयः C^2, D, E, F^1, °नन्ताद्यष्टमं भवेत् G.

९. 17cd लोकपालाश्च स्वे स्वे] A^1, D, लोकपालान्व्यूहं देव° A^2, lacune C^1, कलशे बाला C^2, लोकपालाः स्युः स्वे स्वे E, लोकपालस्य स्वे स्वे F^1, लोकपालव्यूहं स्वे स्वे G.

१०. 18b °वार्द्रवालुकैः] C^2, D, E, °वालुकादिभिः A, G, ++वालुकैः C^1, °चत्र वालुकैः F^1.

त्रिमेखलं प्रकर्तव्यमेकमेखलमेव वा[१] ॥ १८ ॥
इन्द्राग्निव्यूहयोर्मध्ये याम्याग्निव्यूहयोरपि[२] ।
याम्यनैर्ऋतयोर्मध्ये निर्ऋतिवरुणयोरपि[३] ॥ १९ ॥
[४]वरुणवायुमध्ये तु मध्ये वै वायुसोमयोः[५] ।
[६]ईशानसोमयोर्मध्ये ईशानशक्रयोरपि[७] ॥ २० ॥
[८]हस्तमात्रप्रमाणेन कुण्डानि परिकल्पयेत् ।

[३. कुम्भादिलक्षणम्]

सौवर्णमुत्तमं कुम्भं राजतं मध्यमं भवेत् ॥ २१ ॥
[९]ताम्रकुम्भं तु हीनं स्यान्मृण्मयं चाधमं भवेत्[१०] ।
[११]द्रोणतोयेन संपूर्णं कुम्भस्यार्धं तु वर्धनी ॥ २२ ॥
आढकेन तु संपूर्णं कलशं ग्राह्य देशिकः[१२] ।
द्वारं तु नन्दिदैवत्यं कण्ठं कालाधिदैवतम्[१३] ॥ २३ ॥
पार्श्वे पशुपतिश्चैव पृष्ठे भूमिः प्रतिष्ठिता[१४] ।

---

१. 18c त्रिमेखलं] A, G, द्विमेखलं C, D^1, F^1 ; प्रकर्तव्य°] C, वा कर्तव्य° A, F^1, G, lacune D.

२. 19a इन्द्राग्निव्यूहयो°] Eds, इन्द्रादीशानयो° A^1, इन्द्रव्यूहाग्नयो° A^2, E, F^1, इन्द्रं वरुणान्नयो° C^1, इन्द्रं वरुणाग्नयो° C^2, इन्द्रव्यूहाग्न° G ; 19b याम्याग्निव्यूहयोरपि] Eds, याम्यव्यूहाग्नयोः A^2, E, F^1, याम्यव्यूहानयोः A^1, याम्यं वरुणाग्नयोः C^1, यामं वरुणान्नयोः C^2, याम्यं व्यूहं तयोः G.

३. 19c याम्य°] A^1, D, E, F^1, G, lacune A^2, याम्यं C^1, यम° C^2 ; 19d निर्ऋतिवरुणयोरपि] A^2, C^2, D, E, G, नैर्ऋति त्रणयोरपि A^1, निर्ऋतिवरुणयोर्++ C^1, रक्षो वरुणयोरपि F^1.

४. F^1 : वरुणानिलयोर्मध्ये सोमवायव्ययोर्मध्ये ।

५. 20a वरुण°] C^1, D, G, वरुणं A, C^2, वारुण्यां E.

६. C^1 et C^2 : lacune 20c-22a.

७. 20d ईशानशक्रयो°] A^2, D, E, G, ईशानं शक्रयो° A^1, चक्र ईशानयो° F^1.

८. D^2 répète 19cd-20cd après 20cd.

९. F^1 : कन्यसं ताम्रपात्रं तु मृण्मयं त्वधमाधमम् ।

१०. 22a तु हीनं] E, विहीनं A (etc.).

११. F^1 : द्रोणपूर्णेन तोयेन कुम्भं तस्यार्धं तु वर्धनी ।

१२. 23a आढकेन तु] A^1, आढकोदक° A^2, D^1, F^1, G, अर्धोदकं च C^1, शुद्धोदकं च C^2, अर्धकोदक° D^2, E.

१३. 23c नन्दिदैवत्यं] A^2 (etc.), नन्दिवैदन्यं A^1 ; 23d कण्ठं] A, C^1, D, E, G, कर्णं C^2, कण्ठ° F^1.

१४. 24a पशुपतिश्चैव] Eds, पशुपतिं चैव A, D, E, F^1, G, च पतितं C^1, तु पतितं C^2 ; 24b पृष्ठे] A (etc.), पूर्ण° F^1 ; भूमिः प्रतिष्ठिता] A, D, E, G, भूमिपतिं तदा C, भूमिं प्रतिष्ठिता F^1.

कलशानि शरावाणि सप्तदशघटं तथा[१] ॥ २४ ॥

वर्धनीनवसंयुक्तं वस्त्रेण परिवेष्टयेत्[२] ।

[४. आचार्यलक्षणम्]

[३]आचार्यः शिल्पिसंयुक्तो नाङ्गहीनशिवद्विजः ॥ २५ ॥

शिवाचारसमायुक्तो ज्ञानवान्शिष्यवत्सलः ।

सर्वमन्त्रविधानज्ञः शुक्लयज्ञोपवीतवान्[४] ॥ २६ ॥

[५]हारकेयूरसंयुक्तः सोष्णीषः सोत्तरीयकः ।

हेमकुण्डलसंयुक्तो हेमयज्ञोपवीतवान् ॥ २७ ॥

[५. स्थण्डिलानां लक्षणं कल्पनं च]

कपिलागोमयं ग्राह्य सर्वत्र परिलेपयेत्[६] ।

धूपदीपैरलङ्कृत्य द्वारकुम्भाङ्कुरैरपि[७] ॥ २८ ॥

शालिभिः स्थण्डिलं कुर्यात्सर्वव्यूहेष्वनुक्रमात्[८] ।

तत्तत्पदस्य मध्ये तु चतुरश्रं सुशोभनम् ॥ २९ ॥

त्रिप्रस्थमुत्तमं ज्ञेयं द्विप्रस्थं मध्यमं भवेत् ।

प्रस्थं कन्यसमित्युक्तं तदर्धं तण्डुलं तिलम्[९] ॥ ३० ॥

[६. कलशादिविन्यासः]

स्थण्डिलस्योत्तरे पार्श्वे कलशान्साधयेत्क्रमात्[१०] ।

पञ्चपञ्चैव कलशानुपर्युपरि विन्यसेत्[११] ॥ ३१ ॥

---

१. 24c कलशानि] A (etc.), शैलजानि E ; 24d घटं] A, C^1, D, E, G, घटास्° C^2, lacune F^1 ; तथा] A, F^1, G, ततः C, D^1, E, तदा D^2.

२. 25b वस्त्रेण] A, सूत्रेण C, D, E, F^1, अस्त्रेण G.

३. A^2 donne cette version de 25cd : आचार्यः शिल्पिसंयुक्तवेनाङ्गहीनः शिवद्विजः ।

४. 26c सर्व°] A^2 (etc.), शिव° A^1, C^1.

५. C^1 et C^2 omettent 27ab-27cd.

६. 28a ग्राह्य] D, E, G, ग्राह्यं A, C, F^1 ; 28b परिलेपयेत्] G, परिकल्पयेत् A (etc.).

७. 28d °कुम्भाङ्कुरै°] A^2, C, D, F^1, G, °कुम्भान्तरै° A^1, °कुम्भान्कुशै° E.

८. 29a स्थण्डिलं कुर्यात्°] F^1, स्थण्डिलं कृत्वा A, G, तण्डुलैः कुर्यात्° C, E, स्थण्डिलैः कुर्यात्° D.

९. 30c °त्युक्तं] A, G, °त्याहुः C, D, E, F^1 ; 30d तिलम्] A, C^1, D^1, E, F^1, G, तलम् C^2, D^2.

१०. 31b °साधयेत्°] D, E, °स्थापयेत्° A,C, G, °सादयेत्° F^1.

११. 31c कलशानु°] A^2 (etc.), कलशान्यु° A^1 ; 31d विन्यसेत्] A, G, साधयेत् C, D^1, E, सादयेत् F^1.

इमा आपः शिवायेति प्रोक्षयेद्धृदयेन तु[१]।
अष्टदिक्षु जलावर्तं स्थापयेदुत्पलोदकैः[२] ॥ ३२॥
शीताहारिं च तक्कोलं लवङ्गं तिम्पुपत्रकम्[३]।
आलोड्य निक्षिपेदम्बु हृन्मन्त्रं तु समुच्चरन्[४] ॥ ३३॥

[७. शिवव्यूहः]

[७.१. शिवकुम्भस्थानम्]

[५]मध्यमे वेदिकामध्ये षोडशानां पदेष्वथ[६]।
मध्ये चतुष्पदं पद्मं चतुष्पत्रं सकर्णिकम्॥ ३४॥
दर्भैः परिस्तरेत्पश्चाल्लाजापुष्पसमन्वितम्[७]।
गन्धादिभिः समभ्यर्च्य वक्त्रमन्त्रं समुच्चरन्॥ ३५॥
आपूर्य शिवतोयेन शिवकुम्भं च वर्धनीम्।
कर्णिकोपरि संस्थाप्य वामभागे तु वर्धनीम्[८] ॥ ३६॥

[७.२. शिवकुम्भे रत्नन्यासः]

सर्वातोद्यसमायुक्तं नृत्तगेयसमाकुलम्।
[९]ईशानेन तु मन्त्रेण स्थापयेत्स्थापकोत्तमः ॥ ३७॥
माणिक्यं मुक्तावैडूर्यं वज्रं माहेन्द्रनीलकम्[१०]।
[११]हृदयमन्त्रमुच्चार्य कुम्भमध्ये विनिक्षिपेत्[१२] ॥ ३८॥

---

१. 32a इमा] A (etc.), उमा F^1, G.

२. 32d स्थापयेदुत्पलो°] A, G, स्थाप्य पर्योत्पलो° C, D, E, स्थाप्य पूर्योत्पलो° F^1.

३. 33a शीताहारिं च] A, शिवाभिरिञ्चि C, शिलाभिरिञ्च D, शिलाहरिं च E, G, एलागरुश्च F^1 ; 33b तिम्पुपत्रकम्] A, तीन्युपत्रकम् C^1, कन्तान्युपलकम् C^2, तीन्युपत्रकम् D, निम्बपत्रकम् E, त्रिपुत्रकम् F^1, तिमचूर्णकम् G.

४. 33c °दम्बु] A^1, G, lacune A^2, F^1, °दप्सु C, D ; 33d हृन्मन्त्रं तु समुच्चरन्] G, हृदमन्त्रं समुच्चरन् A, हृदि मन्त्रं पृथङ्न्यसेत् C, हृदादिमन्त्रं पृथङ्न्यसेत् D, E, स्पृपाणि मन्त्रं प्रविन्यसेत् F^1.

५. A et G omettent 34ab-35cd.

६. 34b पदेष्वथ] C^1, पदेष्वधः C^2, D, पदेष्वधि E, पदेष्वपि F^1.

७. 35a परिस्तरेत्°] D^2, E, F^1, परिस्तरैः C, D^1.

८. 36d वाम°] C, D, E, F^1, G, मध्य° A.

९. F^1 omet 37cd-40ab.

१०. 38a माणिक्यं] A^1, G, माणिक्कं A^2, C, D, E.

११. D^2 omet 38d-41c.

१२. 38c हृदयमन्त्रमु°] C, हृदयमन्त्रं समु° (*v.f.*) A^1, D, E, हृदामन्त्रं समु° A^2, हृद्मन्त्रं च समु° G.

[७.३. शिवध्यानादि]

त्रिणेत्रं चतुर्भुजं देवं चन्द्रार्धकृतशेखरम्।
कृष्णापरशुहस्तं च वरदाभयहस्तकम्[१] ॥ ३९ ॥
क्षौमवस्त्रधरं देवं कुम्भमध्ये तु भावयेत्।
ईशानेन तु मन्त्रेण न्यस्त्वा कूर्चं विनिक्षिपेत्[२] ॥ ४० ॥
[३]पिधाय तच्छरावेण पुरुषमन्त्रमुच्चरन्[४]।
क्षुरिकामन्त्रमुच्चार्य वस्त्रेण परिवेष्टयेत्[५] ॥ ४१ ॥
बीजमुख्येन गन्धादि धूपादि दशबीजकैः[६] ।
मुकुलीपद्ममुद्रां च शूलमुद्रां प्रदर्शयेत्[७] ॥ ४२ ॥

[७.४.वर्धनीन्यासः]

वर्धन्यां विन्यसेद्धेममम्बिकायेति मन्त्रतः[८]।
गौरीबीजं न्यसेन्मध्ये गौरीं तत्रैव विन्यसेत्[९] ॥ ४३ ॥
[१०]सुस्तनां चारुवदनां सुकेशां शोभनाम्बराम्[११]।
गन्धादिना समभ्यर्च्य बीजमुद्रां प्रदर्शयेत्॥ ४४ ॥

[७.५.कोणकलशन्यासः]

एलालवङ्गसंयुक्तं पाद्यमग्निदले न्यसेत्[१२]।
चन्दनोशीरकर्पूरयुक्तमाचमनीयकम्॥ ४५ ॥

---

१. 39c कृष्णापरशुहस्तं च] G, कृष्णेन परशुं चैव A^1, कृष्णापरशुं चैव (*v.f.*) A^2, कृष्णं च परशुं चैव C, D^1, E.

२. 40d विनिक्षिपेत्] A^2, तु विनिक्षिपेत् (*v.f.*) A^1, विशेषतः C, D, E, शिवेन तु F^1, विलिक्षिपेत् G.

३. F^1 : अपिधाय शरावेण गायत्रीमन्त्रं समुच्चरन्।

४. 41a तच्छरावेण] A^2, G, तच्छरावाणि A^1, च शरावेण C, D^1, E.

५. 41c क्षुरिकामन्त्रमुच्चार्य] C (etc.), क्षुरमन्त्रं समुच्चार्य A.

६. 42b °बीजकैः] A^2 (etc.), °बीजके A^1.

७. 42d शूल°] A (etc.), मूल° A^2 ; प्रदर्शयेत्] A (etc.), च दर्शयेत् F^1.

८. 43a °धेम°] A^1 (etc.), °देव° A^2 ; °ममम्बिकायेति A^1, °मं गणाम्बिकायेति (*v.f.*) A^2 (etc.).

९. 43c °बीजं] A (etc.), °मध्ये F^1 ; 41d गौरीं तत्रैव] C, D, E, F^1, गौरीमन्त्रैव A, G.

१०. D^2 remplace 44b par स्वकेशाङ्गी भवनां परां।

११. 44b °बराम्] A, C, G, °वराम् D^2, E, °पराम् F^1.

१२. 45a °संयुक्तं] A (etc.), °कर्पूरं F^1.

नैर्ऋते तु दले न्यस्त्वा आपः क्षीरकुशाक्षतम्[१]।
[२]तिलसिद्धार्थयवांश्च वायव्येऽर्घ्यं सुविन्यसेत्[३] ॥ ४६ ॥
गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्।
कुम्भं पूर्णमथो ग्राह्य स्थापयेदीशकोणके[४] ॥ ४७ ॥

[७.६.बाह्यद्वादशकलशन्यासः]

क्षीरं दधि कुशाम्भश्च तिलं वै सर्षपं तथा[५]।
मृद्भस्मबिल्बपत्राम्बुनालिकेरफलोदकम्[६] ॥ ४८ ॥
घृतमुष्णोदकं चैव परितो द्वादश न्यसेत्[७]।

[८. विद्येश्वरव्यूहाः]

[८.१. विद्येश्वरकलशानां द्रव्याणि]

वज्राम्बु हैमतोयं च नवनीतं शङ्खमेव च[८] ॥ ४९ ॥
[९]पद्मं लाजं च रजनी शकृच्चूर्णं रजःस्थिताः[१०]।
सितार्कं च शमी बिल्बं वैडूर्यं चन्दनं तथा[११] ॥ ५० ॥
आर्द्रामोचरसं जाति पनसोशीर एव च[१२]।

---

१. 46a तु दले] A, G, दलके C, D, E, F^1 ; 46b °पः क्षीरकुशाक्षतम्] A, G, °पक्षीरकुशाक्षतम् C^1, D, E, °पक्षीरकुशाक्षताः C^2, °पक्षीरकुशाक्षतैः F^1.

२. F^1 : तिलसर्षपसव्रीहि वायौ चार्घ्यं सुविन्यसेत्।

३. 46c तिल°] A, D, E, तल° C ; 46d वायव्येऽर्घ्यं सु°] A, G, वायव्यार्घ्यं सु° C^1, D, E, वायव्यमर्घ्यकं C^2.

४. 47c °भं पूर्णमथो] A, C^1, D, E, G, °भकोणमथो C^2, °भकर्णा कुशो F^1 ; ग्राह्य] A, D, E, F^1, G, ग्राह्यं C.

५. 48a कुशाम्भश्च] C, च कुम्भं च A, कुशाम्भं च D, E, कुशोदं च F^1, घृतं कुम्भं G ; 48b तिलं] A (etc.), कुलं C^2.

६. 48c °बिल्ब°] A (etc.), °कुश° F^1.

७. 49b द्वादश] A, C, G, द्वादशे D, द्वादशं F^1.

८. 49c वज्राम्बु] A (etc.), वज्रं च F^1 ; 49d शङ्खमेव च] A (etc.), सङ्खपद्मकौ (*v.f.*) F^1.

९. F^1 : सुलाजरचनी चैव चतुर्पूर्णाञ्जनीं ततः।

१०. 50a पद्मं लाजं] C, पद्मलाजं A, D, E, पद्मजालं G ; 50b शकृच्चूर्णं] C^1, G, शङ्कुचूर्णा A^1, शक्तुचूर्णा A^2, शक्रचूर्णं C^2, शकुचूर्ण° D, E.

११. 50c सितार्कं च शमी°] A (etc.), सितालाजं चन्द्र° F^1.

१२. 51a आर्द्रामोचर°] A, G, आम्रमोजर° C, D, F^1, आम्रमौशिन E ; 51b °शीर] A, C, D^1, E, G, °चिर D^2, °जीरम् F^1.

तिलं सक्तुं तथा श्यामं नीवारं श्वेतसर्षपम्[१] ॥ ५१ ॥
गोधूममिन्द्रनीलं च माषं यवं प्रियङ्गवः[२] ।
सिन्धुवेणुं च तुलसी पुन्नागोत्पलपाटली[३] ॥ ५२ ॥
अगरुतक्कोलकच्छोलं स्फटिकं नागपुष्पकम्[४] ।
कर्पूरं कुङ्कुमं चेष्टिह्रीबेरं च गुलं मुरम्[५] ॥ ५३ ॥
तकरं हिरण्यं चैव नन्द्यावर्तं तु गोक्षुरम्[६] ।
लोध्रं मुक्ता च धात्री च विष्णुक्रान्ती च धूर्धुरम्[७] ॥ ५४ ॥
स्थलारविन्दं श्वेतार्कमञ्जनं च मनःशिला ।
व्याघ्रनखी शताबेरी बला चातिबला तथा[८] ॥ ५५ ॥
महानीलं शिरीषं च जीवनी पञ्चकर्णिका[९] ।
स्वप्नपर्णी रुद्रपर्णी पूर्वादूर्वहरीतकी[१०] ॥ ५६ ॥
मल्लिका देवदारुं च लवङ्गं काश्मर्यं तथा[११] ।
इन्दुकान्तं मयूरं च करवीरं पद्मकान्तकम्[१२] ॥ ५७ ॥

---

१. 51c सक्तुं] A^2, C^1, D, E, G, सक्थुं A^1, C^2, F^1.

२. 52a °ममिन्द्र°] D^1, °मं चन्द्र° A, D^2, E, G, °मं च (*v.f.*) C^1, °मं चैव C^2, °मं चैन्द्र° F^1 ; 52b प्रियङ्गु वै] A^1, प्रियङ्गवः A^2 (etc.).

३. 52c सिन्धुवेणुं] A^2, शिम्बुवेणुं A^1, G, शमीबिल्वं च C, शमिवेणुं D^1, शमी बिवेणुं च D^2, शम्बरवेणुं E, शिबिं वेणुं F^1 ; 52d °पाटली] A (etc.), °डाडिमी F^1.

४. 53a °तक्कोलकच्छोलं] A (etc.), °तक्कोलक् ... C^1, °तक्कोलकशो C^2 ; 53b °पुष्पकम्] A^2 (etc.), °पुष्पिकम् A^1, G.

५. 53c कुङ्कुमं चेष्टि°] A, G, कुङ्कुमाञ्जिष्टं C, D^1, F^1, कुङ्कुमं जेष्ठि° D^2, E ; 53d °ह्रीबेरं च] A, G, °हिरिबेरं C, °हरिबेरं D, F^1, °ह्रीबेरं E.

६. 54a तकरं हिरण्यं] (*v.f.*) Eds, करं हिरण्यकं A^1, करम्भरेणुकं A^2, तकरं हिरेणुकं (*v.f.*) C^1, D, E, G, तकरं रेणुकं C^2, ताराहरिणकं F^1.

७. 54c लोध्रं मुक्ता] C, D, E, लोध्रमुत्तं A^1, लोध्रमुक्तं A^2, G, लोध्रमत्ता F^1 ; 54d धूर्धुरम्] A, D, E, F^1, G, धुत्तुरम् C^1, धुर्धुरम् C^2.

८. 55c °नखी शताबेरी] A, D, F^1, G, °नखं च कावेरीं C^1, °नखीं च कावेरीं C^2, °नखा शतावारि E ; 55d बला चातिबला] A, C^2, E, G, बलावातिबला C^1, D, अतिबाला च बला F^1 ; तथा] A, G, सह C (etc.).

९. 56b जीवनी] A (etc.), श्रीपर्णी F^1.

१०. 56c स्वप्न°] A (etc.), सप्त° F^1 ; रुद्रपर्णी] C^2, D, E, F^1, नद्रुपर्णी A, G, lacune C^1 ; 56d पूर्वादूर्व°] A^1, G, पूर्वामुर्वा° A^2, दूर्वदूर्वा° C, D, E, दूर्वा चैव F^1.

११. 57a मल्लिका] A^1, C^2, D, E, F^1, G, मञ्जुका A^2, मम्मिकां C^1 ; 57b लवङ्गं काश्मर्यं] C^2, D, E, लवं काश्मीरकं A, लवङ्गं काश्मयं C^1, तिलकाष्कर्यम् F^1, लवकं कश्मिरकं G.

१२. 57c इन्दुकान्तं] A^1, इन्द्रकान्तं A^2, C^2, D, E, G, lacune C^1, तिन्दुकां च F^1 ; मयूरं च] A, मधुरं च

महाद्रोणं च द्रोणं च लक्ष्मीस्थलारविन्दकम्[१]।
[२]तेजोवती रुद्रभयं कालनीलमलं तथा[३] ॥ ५८ ॥
प्रवालं चाभ्रघोरं च गन्धचूर्णं तिलं तथा[४]।
सल्लकी चतुरङ्गुल्यं जपा चम्पकमाधवी[५] ॥ ५९ ॥
इक्षुद्वयं च रजनीं स्थापयेत्स्थापकोत्तमः।

[८.२. विद्येश्वरव्यूहद्रव्याणि]

[६]रत्नाद्युष्णोदकान्तं च शिवव्यूहे तु विन्यसेत्[७] ॥ ६० ॥
वज्रादिबिल्वपर्यन्तमनन्तव्यूहके न्यसेत्।
वैडूर्यादि गोधूमान्तं सूक्ष्मव्यूहे तु विन्यसेत्[८] ॥ ६१ ॥
इन्द्रनीलं समारभ्य कच्छोलान्तं तथैव च[९]।
शिवोत्तमस्य व्यूहे तु विन्यसेद्देशिकोत्तमः ॥ ६२ ॥
स्फटिकादिलोध्रपर्यन्तं एकाक्षीव्यूहके न्यसेत्[१०]।
[११]मौक्तिकादिसहान्तं तु एकरुद्रेति विन्यसेत् ॥ ६३ ॥
[१२]महानीलं समारभ्य काष्मार्यान्तं तथैव च[१३]।

C, D, E, समाधूकं F^{1}, च मयूरं G ; 57d पद्मकान्तकम्] A, C, D^{1}, पद्मकार्धकम् D^{2}, E, च पद्मकम् (*v.f.*) F^{1}, पद्मकं तथा G.

१. 58a महाद्रोणं] A, C, D^{1}, E, G, महाद्रोणीं D^{2}, महाद्रोणी F^{1} ; द्रोणं] C, D^{2}, E, G, पुष्पं A, lacune D^{1}, लक्ष्मी° F^{1} ; 58b °स्थला°] A^{2} (etc.), °स्थाना° A^{1}.

२. F^{1} : तेजोवती च कुटजं करवीरवालं तथा।

३. 58c तेजो] A^{2} (etc.), तेजा° A^{1}.

४. 59a चाभ्रघोरं] A, C^{2}, G, च भृघेरं C^{1}, चान्द्रयोरं D^{1}, चार्द्रघोरं D^{2}, चाग्रेचरं E, च व्यचोव्यं F^{1} ; 59b °चूर्णं] A, C^{1}, G, °पूर्णं C^{2}, lacune D^{1}, °चूर्ण° D^{2}, E, F^{1}.

५. 59c सल्लकी] A, E, F^{1}, G, चल्लकी C, D ; 57d जपा] C, D, E, F^{1}, G, मृपा A.

६. D^{2} ajoute avant 60cd une première version de 63ab (स्फटिकादिलोर्ध्वतान्तं तु एकरुद्रेति विन्यसेत्) ; C^{1} et D^{2} remplacent 60d par : त्वेकाक्षीव्यूहे विन्यसेत् (cf. 63b).

७. 60d °व्यूहे] E, F^{1}, G, °व्यूहं A, C, D.

८. 61d सूक्ष्मव्यूहे तु] A^{2}, G, सूक्ष्मं हेतु A^{1}, सूक्ष्मव्यूहेति C, D, E, F^{1}.

९. 62b कच्छोलान्तं] A^{1}, G, कच्छोलं हन् (?) A^{2}, कच्चोलान्तं C, D, कूर्चालान्त E, lacune F^{1}.

१०. 63a लोध्रपर्यन्तं] A^{1}, G, लोद्ध्रपर्यन्तं A^{2}, लोर्ध्वकान्तं तु C^{1}, D^{1}, लोध्वकान्तं तु C^{2}, लोर्ध्वतान्तं तु D^{2}, लोध्रकान्तं तु E, lacune F^{1} ; 63b एकाक्षी°] A^{1}, E, G, lacune A^{2}, एकाक्षिं C, D.

११. A et G omettent 63cd-66ab, C^{1} et C^{2} omettent 63cd.

१२. F^{1} : महानीलादिकाष्मर्या त्रिमूर्तिव्यूहके न्यसेत्।

१३. 64b काष्मार्यान्तं] C^{1}, काषयन्तिं C^{2}, lacune D^{1}, काष्ठर्यन्तं D^{2}, E.

[१]त्रिमूर्तिव्यूहके चैव विन्यसेद्देशिकोत्तमः ॥ ६४॥
इन्दुकान्तं समारभ्य आमलक्यन्तमेव च[२]।
श्रीकण्ठव्यूहदेशे तु विन्यसेद्देशिकोत्तमः[३] ॥ ६५॥
प्रवालादिरजन्यन्तं शिखण्डिव्यूहके न्यसेत्।

[८.३. वामादिवर्धन्यो द्वादशादित्यकलशाश्च]

वामविद्येशकुम्भाद्यमष्टलोहसमायुतम्[४] ॥ ६६॥
वर्धन्यष्टौ समास्थाप्य स्वस्वमन्त्रं समुच्चरन्[५]।
[६]राजतं ताम्रकं सीसं द्रावकं भ्रामकं तथा[७] ॥ ६७॥
सिद्धकांस्यारकूटं च वर्धनीषु च विन्यसेत्[८]।
शिवकुम्भे शिवः प्रोक्तः वर्धन्यां च मनोन्मनी[९] ॥ ६८॥
पूर्वादीशान्तके व्यूहे अष्टविद्येश्वराः स्मृताः।
शक्तयश्चैव वामादि विन्यसेत्कुम्भवामके॥ ६९॥
शेषास्तु द्वादशादित्या ज्ञातव्यास्तु विशेषतः[१०]।
सकूर्चान्सापिधानांश्च सवस्त्रानधिदैवतान्[११] ॥ ७०॥
[१२]पूजयेत्तु विशेषेण गन्धपुष्पादिभिः क्रमात्[१३]।

---

१. F^1 remplace 64cd-65cd par तिन्दुकाञ्चस्यमालकं ... के न्यसेत्।

२. 65b आमलक्यन्त°] C^1, आमलक्कान्त° C^2, आमलत्थान्त° D^1, आमलत्यान्त° D^2, आमलभ्यान्त° E.

३. 65c °व्यूहदेशे] Eds, +++ शे C^1, व्यू + न C^2, ++डेशे D, E.

४. 66cd °द्यमष्टलोह°] C^1, D, E, °द्याष्टमलोह° A, °द्या मण्डलोह° C^2, °नामष्टलोह° F^1, °द्य माद लेह° G.

५. 67a वर्धन्यष्टौ समा°] C, D, E, F^1, वर्धन्यामष्टमं A, G.

६. C^1 donne cette version de 67cd : +++ताम्रकांसीतं द्रावकं भ्रामकं तथा ; C^2 : राजतन्तात्र कांसीतं द्रावकं तथा।

७. 67d भ्रामकं] A, D^1, E, F^1, द्रामकं D^2, भावकं G.

८. 68a सिद्ध°] A^1, G, शुद्ध° C, D, E, F^1, lacune A^2.

९. 68c शिवकुम्भे शिवः प्रोक्तः] F^1, शिवं च शिवकुम्भं च A, D^2, G, शिवं च शिवस्य कुम्भं D^1, शिवं च शिवकुम्भस्य C, E ; 68d वर्धन्यां च] A, F^1, G, वर्धन्याश्च C, D^2, E, lacune D^1.

१०. 70b ज्ञातव्यास्तु] A (etc.), ज्ञानवास्तु C^2.

११. 70d °वस्त्रानधि°] A, °वस्त्रान्साधि° C (etc.).

१२. E ajoute entre 70cd et 71 ab : सहैमान्यलवोपेतान्द्रव्ययुक्तान्विशेषतः।

१३. 71a पूजयेत्तु] A (etc.), पूजयित्वा E.

[९. लोकपालव्यूहाः]

[९.१. इन्द्रव्यूहः]

विंशत्यूर्ध्वशतानां तु प्रधानं चैव मध्यमे[१] ॥ ७१ ॥
[२]इन्द्रव्यूहस्य तन्मध्ये षोडशस्य तु मध्यमे।
[३]कदलीपनसं चैव आम्रं चात्वारिके न्यसेत्॥ ७२ ॥
अभितो द्वादशे कोष्ठे ब्रह्मकूर्चं क्रमान्न्यसेत्।
पूर्वे तु द्वादशे मध्ये हरिबेरद्वयं न्यसेत्[४] ॥ ७३ ॥
अग्नौ तु द्वादशे मध्ये कपित्थौ द्वौ तु विन्यसेत्।
याम्यके षोडशे मध्ये चत्वारि कलशान्न्यसेत्[५] ॥ ७४ ॥
[६]चतुरश्चतुरं न्यस्त्वा कलशानां तु विन्यसेत्[७]।
अश्वत्थोदुम्बरप्लक्षवटं च क्रमशो न्यसेत्॥ ७५ ॥
नैर्ऋतौ द्वादशे मध्ये द्वौ कुम्भौ बदरीफलम्।
वारुणे द्वादशे मध्ये द्वौ तु बिल्बफले न्यसेत्[८] ॥ ७६ ॥
वायव्ये द्वादशे मध्ये न्यस्त्वा नारङ्गकं फलम्[९]।
[१०]सौम्ये तु षोडशे मध्ये भुवं तुष्य चतुर्ष्वपि[११] ॥ ७७ ॥
ईशाने द्वादशे मध्ये द्वौ चामलकं विन्यसेत्[१२]।

---

१. 71c विंशत्यूर्ध्व° A, D^2, G, विंशदूर्ध्व° C, D^1, E, शतादूर्ध्वं F^1.

२. C^1omet 72ab.

३. F^1 est le seul manuscrit à fournir 72cd-74cd.

४. 73d हरिबेर°] Eds, हरिद्वार° F^1.

५. 74c षोडशमध्ये] Eds, षोडग्निशमध्ये F^1.

६. F^1 omet 75ab.

७. 75a चतुरश्चतुरं] A^1, C, D, चरश्चतुरं (*v.f.*) A^2, चतुरं चतुरं E, चतुतश्चतुरो G.

८. 76d °फले] A, E, G, °फलं C, F^1, °फला D^1, °फलान्° D^2.

९. 77b नारङ्गकं] A (etc.), नङ्गारकं C ; फलम्] A (etc.), द्वयम् F^1.

१०. F^1 ajoute avant 77cd चत्वारिकलशाण्ण्यस्त्वा गुलं चैवास्त्रयम् (?)। अभितो द्वादशे कोस्थे क्षीरपूर्णघटं न्यसेत्।

११. 77c सौम्ये] A^1, सोमे A^2 (etc.) ; 77d भुवं तुष्य°] A, G, भुपं तुष्क° C^1, lacune C^2, भवन्तुष्क° D^1, E, हवन्तुष्क° D^2, कुम्भं (*v.f.*) F^1.

१२. 78a द्वौ] A^2 (etc.), स्वौ A^1 ; 78b चामलकं विन्यसेत्] C, चामलककं भवेत् A, चम्पकं न्यसेत् D^1, चामलकं न्यसेत् (*v.f.*) D^2, द्वौ चामलकं न्यसेत् E, तु वामलकं न्यसेत् F^1, चामलके (*v.f.*) G.

[१]शिवाद्भिः पूरयेच्छेषान्कलशान्देशिकोत्तमः[२] ॥ ७८ ॥

[९.२. अग्निव्यूहः]

अग्निव्यूहे गते चैव षोडशस्य तु मध्यमे[३]।
[४]चत्वारि कलशान्न्यस्त्वा दूर्वाश्चैव रसत्रयम्[५] ॥ ७९ ॥
अभितो द्वादशे कोष्ठे रजनीचूर्णकं न्यसेत्[६]।
इन्द्रे च द्वादशे मध्ये दूर्वादीनि विनिक्षिपेत्[७] ॥ ८० ॥
अग्नेः तु नवके मध्ये तिलोदं कलशे न्यसेत्[८]।
याम्ये तु द्वादशे मध्ये तिलं यवं च विन्यसेत्[९] ॥ ८१ ॥
नैर्ऋते नवमे मध्ये गैरिकं तत्र विन्यसेत्[१०]।
वारुणे द्वादशे मध्ये द्वौ कुम्भौ भस्मसंज्ञितौ[११] ॥ ८२ ॥
वायव्ये नवके मध्ये निर्यासं परिकल्पयेत्।
सौम्ये तु द्वादशे मध्ये द्वौ कुम्भौ सर्षपद्वयम् ॥ ८३ ॥
ईशाने नवके मध्ये सितायुक्तघटान्न्यसेत्[१२]।
शिवाम्भसा तु संपूर्य शेषांश्च कलशान्क्रमात्[१३] ॥ ८४ ॥

---

१. C^1 et C^2 remplacent 78cd par : ऐन्द्रे तु द्वारयेच्छेषान्कलशान्देशिकोत्तमः।

२. 78c °च्छेषान्°] D, E, F^1, °त्तेषां A, G.

३. 79a अग्निव्यूहे गते चैव] A (etc.), अष्टौ व्यूहे शते मध्ये F^1.

४. F^1 remplace 79cd-80a par la répétition de 72cd-73ab.

५. 79c चत्वारि कलशान्°] A, C, D, चत्वारिंशत्कलां E, चतुरः कलशान्° G ; 79d दूर्वाश्चैव] A^1, जतु चैव A^2, ऋतुश्चैव C, जन्तुश्चैव D^1, जतुश्चैव D^2, E, जतुं चैव G ; °त्रयम्] C^1, D, E, °श्रियम् A, G, °त्रयः C^2.

६. 80a द्वादशे] A^1 (etc.), द्वादशो A^2, lacune G.

७. 80c इन्द्रे च] A, ऐन्द्रे तु C (etc.), पूर्वे तु F^1 ; 80d दूर्वादीनि विनिक्षिपेत्] C, D, E, पूर्वादीनि विनिक्षिपेत् A, G, मृद्भिर्दूर्वाद्यथो न्यसेत् F^1.

८. 81a अग्नेः तु] A, अग्नौ च C, D^1, अग्नौ D^2, आग्नेयां E, अग्नौ तु F^1, आग्नेये G ; 81b तिलोदं] F^1, तिलके A^1, तिलकं A^2, C, D, E, G.

९. 81c याम्ये तु] A (etc.), याम्यां तु E ; 81d यवं च] A, G, यवौ तु C, D, E, द्वयं F^1.

१०. 82a नवमे] A, G, तु नवे C^1, D, तु रवेर्° C^2, नवके E, F^1 ; 82b गैरिकं] C^1, D, E, गौरिकं A, G, C^2, गौरीं (*v.f.*) F^1.

११. 82d भस्म°] A (etc.), हेम° F^1.

१२. 84a ईशाने] G, ईशानं A^1, ईशान° A^2, C^1, D, E, ईशान्यां F^1 ; 84b °घटान्°] Eds, °वटान्° A, D, E, G, °वरान्° C^1, °घटा C^2, lacune F^1.

१३. 84c संपूर्य] A, G, संपूज्य C, D, E, F^1 ; 84d शेषांश्च] F^1, शेषांशं A, C, D, G, अशेषान्° E ; कलशान्°] A^1 (etc.), कलशा A^2, °कवशात्° D^1, कलशं G.

[९.३. यमव्यूहः]

विंशत्यूर्ध्वे शते याम्ये व्यूहे षोडशमध्यमे[१]।
[२]चत्वारि कलशान्न्यस्त्वा कल्हारोत्पलकं तथा[३] ॥ ८५॥
किञ्जल्केन्दीवरं सर्वमाग्नेयादिक्रमान्न्यसेत्[४]।
अभितो द्वादशे कोष्ठे पञ्चगव्यं क्रमान्न्यसेत्॥ ८६॥
तत्पूर्वे षोडशे मध्ये पञ्चमूर्तिक्रमान्न्यसेत्[५]।
आग्नेयां द्वादशे मध्ये द्वौ कुम्भौ गोक्षीरद्वयम्[६] ॥ ८७॥
याम्ये तु द्वादशे मध्ये द्विकोष्ठे बृहतीद्वयम्।
नैरृते द्वादशे मध्ये द्वौ कुम्भौ चन्दनद्वयम्॥ ८८॥
[७]वारुणे षोडशे कोष्ठे चत्वारि कलशान्न्यसेत्[८]।
मदयन्ती शताबेरी विष्णुक्रान्ति सहा तथा[९] ॥ ८९॥
[१०]वायव्ये द्वादशे मध्ये द्वौ कुम्भौ पार्थिकद्वयम्।
[११]सौम्ये तु द्वादशे मध्ये कुम्भेऽशोकद्वयं न्यसेत्[१२] ॥ ९०॥
ईशाने द्वादशे मध्ये पुलस्त्यौ द्वौ तु विन्यसेत्।
शेषांश्च कलशान्सर्वाञ्शिवतोयेन पूरयेत्॥ ९१॥

---

१. 85a विंशत्यू°] A^1, C, D, E, F^1, विंशद्° A^2, G ; शते] A, C, E, F^1, शत D ; 85b व्यूहे] E, F^1, व्यूहः A^1, व्यूह° A^2, C^1, D.

२. D^1 répète 79d-85ab après 85ab.

३. 85c चत्वारि कलशान्°] A^1, C, D, F^1, चत्वारिंशत्कलान्° A^2, E, चतुरः कलशान्° G.

४. 86a किञ्जल्केन्दीवरं] Eds, जलको जीवकं A (etc.), किंचित्केन्दीवरं F^1.

५. 87a तत्पूर्वे] F^1, तदूर्ध्वे A (etc.) ; 87b °मूर्ति°] A (etc.), °मूर्तिं D^2, G.

६. 87d द्वौ कुम्भौ] F^1, यवकुम्भे (*v.f.*) A (etc.) ; °क्षीरद्वयम्] F^1, °षुरद्वयम् A, D^1, G, °क्षुरद्वयम् C, D^2, °क्षुकद्वयं E.

७. F^1 omet 89ab-90ab.

८. 89b चत्वारि कलशान्°] A (etc.), चत्वारिंशत्कलान्° C.

९. 89c शताबेरी] A (etc.), शतवेनि D^2.

१०. C^1 et C^2 remplacent (?) 90b-92a par : शोदशस्य तु मध्यमे। चम्पकापाटलीजातिमल्लिका-कुसुमान्न्यसेत्। अभितो द्वादश्कोष्ठे कषायं परिकल्पयेत्। तदूर्ध्वे द्वादशे मध्ये॥

११. E omet 90cd-104cd.

१२. 90d कुम्भेऽशोक°] A, क्रचाशोक° D^1, कुचाशोक° D^2, कुतजाशोक° F^1, कुहाशोक° (?) G.

[९.४. निर्ऋतिव्यूहः]

[१]नैर्ऋते शतके मध्ये षोडशस्य तु मध्यमे[२]।
चम्पकापाटलीजातीमल्लिकाकुसुमान्न्यसेत्॥ ९२॥
अभितो द्वादशे कोष्ठे कषायं परिकल्पयेत्।
पूर्वे तु द्वादशे मध्ये हरीतकीविभीतकौ[३]॥ ९३॥
आग्नेयां नवमे मध्ये नवनीतं तु विन्यसेत्।
[४]याम्ये द्वादशके मध्ये सल्लकी चतुरङ्गुलौ[५]॥ ९४॥
नैर्ऋते नवके मध्ये गन्धपत्रं सुविन्यसेत्।
वारुणे द्वादशे मध्ये द्वौ पात्रद्वयं विन्यसेत्[६]॥ ९५॥
[७]वायौ तु नवके मध्ये एकपत्रारविन्दकम्।
सोमे तु द्वादशे मध्ये विन्यसेत्तु बलाद्वयम्[८]॥ ९६॥
ईशाने नवके मध्ये न्यस्तव्यं पिप्पलीद्वयम्[९]।
शिवाद्भिः पूरयेच्छेषान्कलशान्देशिकोत्तमः॥ ९७॥

[९.५. वरुणव्यूहः]

विंशत्यूर्ध्वे शते कोष्ठे वरुणव्यूहके बुधः।
तन्मध्ये षोडशे मध्ये चत्वारि कलशान्न्यसेत्[१०]॥ ९८॥
[११]फलत्रयं च कर्पूरमाग्नेयादिषु विन्यसेत्[१२]।

---

१. Les manuscrits A omettent 92b-93c.

२. 92a शतके] F^{1}, द्वादशे A (etc.).

३. 93c पूर्वे तु] F^{1}, तदूर्ध्वे D, G ; 93d °कीविभीतकौ] A^{1}, C^{1}, °द्विहीनकौ A^{2}, °कीविहीतकौ C^{2}, D, F^{1}, °कीविहीनकौ G.

४. G omet 94d-96c.

५. 94c द्वादशके] A, तु द्वादशे C^{1}, F^{1}, च द्वादशे C^{2}, D^{1}.

६. 95d द्वौ] A (etc.), द्वये F^{1} ; पात्रद्वयं] F^{1}, योगद्वयं A (etc.).

७. D^{2} omet 96ab-96cd.

८. 96c सोमे] A^{1}, सोमौ A^{2}, सौम्ये C, D^{1}, F^{1}.

९. 97b न्यस्तव्यं] A, F^{1}, G, न्यस्त्वं वै C, D.

१०. 98d चत्वारि कलशान्न्यसेत्] A (etc.), राजावर्तामृकं द्वयं F^{1}, चतुरः कलशान्न्यसेत् G.

११. F^{1} omet 99ab-99cd.

१२. 99a फल°] A^{2} (etc.), पल° A^{1}.

तद्बाह्ये द्वादशे कोष्ठे मधुं सर्वत्र विन्यसेत्[१] ॥ ९९ ॥
[२]तदूर्ध्वे द्वादशे मध्ये श्वेतार्कं कुरवो न्यसेत्[३]।
पावके द्वादशे मध्ये लघुकोष्ठं तु विन्यसेत्॥ १०० ॥
दक्षिणे षोडशे मध्ये राजावर्ताभ्रकद्वयम्[४]।
नैरृते द्वादशे मध्ये द्वौ कोष्ठौ लोध्रकद्वयम्[५] ॥ १०१ ॥
पश्चिमे द्वादशे मध्ये न्यसेत्पद्मद्वयं क्रमात्।
वायव्ये द्वादशे मध्ये भृङ्गराजद्वयं न्यसेत्[६] ॥ १०२ ॥
सोमे तु षोडशे मध्ये चत्वारि कलशान्न्यसेत्[७]।
आग्नेयादीशपर्यन्तं जतु वै माषकत्रयम्[८] ॥ १०३ ॥
ईशानद्वादशे मध्ये लक्ष्मीं च गिरिकर्णिकाम्।
शेषांस्तु कलशान्सर्वान्पूरयेच्छिवतोयकैः[९] ॥ १०४ ॥

[९.६. वायुव्यूहः]

वायौ शतपदे धीमान्षोडशस्य तु मध्यमे।
चत्वारिकलशान्न्यस्त्वा अष्टमृद्भिः समायुतान्॥ १०५ ॥
[१०]अभितो द्वादशे कोष्ठे न्यसेदिक्षुरसं क्रमात्।
तत्पूर्वे द्वादशे मध्ये न्यस्त्वापामार्गमूलकौ[११] ॥ १०६ ॥
पावके नवके मध्ये मातुलुङ्गद्वयं न्यसेत्।

---

१. 99c द्वादशे] A, G, षोडशे C, D ; 99d मधुं] Eds, मध्यं A^1, C^1, G, मध्ये C^2, lacune A^2, समर्यं (*v.f.*) D^1, समूलं (*v.f.*) D^2.

२. A^1 et F^1 omettent 100ab-101ab ; D^1 et D^2 omettent 100b-101c.

३. 100b श्वेतार्कं कुरवो न्यसेत्] C, श्वेतार्ककरं विन्यसेत् A^2, lacune G.

४. 101a दक्षिणे षोडशे] C, G, दक्षिणद्वादशे A^2.

५. 101d लोध्र°] D, F^1, लोघ्र° A^1, C^2, G, लोद्ध्र° A^2, C^1.

६. 102d °राजद्वयं न्यसेत्] G, °रद्वयं विन्यसेत् A, lacune C^1, °राजं द्वयं न्यसेत् C^2, D, F^1.

७. 103a सोमे] A, G, सौम्ये C, D, F^1.

८. 103d जतु वै] A^2, ऋतुर्वै A^1, C^1, G, जतुर्वै C^2, D, ऋतुर्वे F^1 ; माषक°] A (etc.), माक्षिक° F^1.

९. 104c °सर्वान्°] A, C, F^1, G, °पूर्वान्° D.

१०. C^1 et C^2 omettent 106ab.

११. 106d °मूलकौ] A (etc.), °मूलकम् C^1, °पूर्वके F^1.

दक्षिणे द्वादशे मध्ये न्यसेद्वै वेणुकद्वयम्[१] ॥ १०७ ॥
नैर्ऋते नवके मध्ये लवङ्गं तु विचक्षणः[२]।
वारुणे द्वादशे मध्ये तुलसीं च तपस्विनीम् ॥ १०८ ॥
वायव्ये नवके मध्ये कुङ्कुमं च प्रकल्पयेत्[३]।
उत्तरे द्वादशे मध्ये धातकीकरवीरकौ ॥ १०९ ॥
ईशाने नवके मध्ये चन्दनं परिकल्पयेत्।
शिवाद्भिः पूरयेच्छेषान्कलशान्देशिकोत्तमः ॥ ११० ॥

[९.७. सोमव्यूहः]

विंशत्यूर्ध्वे शते कोष्ठे सौम्यव्यूहे तु विन्यसेत्[४]।
मध्यमे षोडशे मध्ये चत्वारि कलशान्न्यसेत्[५] ॥ १११ ॥
श्वेतशालिमहाशालिगण्डशालिरक्तशालिकाः[६]।
अभितो द्वादशे मध्ये दधि सर्वत्र विन्यसेत् ॥ ११२ ॥
पूर्वे तु षोडशे मध्ये जम्बू वै कर्णिकारकम्[७]।
श्रेष्ठान्तकं च भूर्जत्वक्पावकादिषु विन्यसेत्[८] ॥ ११३ ॥
पावके द्वादशे मध्ये कारण्डकद्वयं न्यसेत्[९]।
दक्षिणे द्वादशे मध्ये करवीरद्वयं न्यसेत् ॥ ११४ ॥
नैर्ऋते द्वादशे मध्ये नन्द्यावर्तद्वयं न्यसेत्।

---

१. 107d वेणुकद्वयम्] A^2, C^2, D^2, G, वेण्यकद्वयम् A^1, चणकद्वयम् C^1, D^1, वनके द्वयम् E, चण्डनायकम् F^1.

२. 108b लवङ्गं तु विचक्षणः] A^1, लवं कृत्वा विचक्षणः A^2, G, कलवङ्कत्व विचक्षणः C, D, लवङ्कस्य तवचं न्यसेत् E, लवकं च घटे न्यसेत् F^1.

३. 109b च प्रकल्पयेत्] A, G, परिकल्पयेत् C, D, E, F^1.

४. 111b सौम्य°] A^2, C, D^2, E, G, सौम्यं A^1, सौम्ये D^1, सोम° F^1.

५. 111c मध्यमे] A (etc.), तन्मध्ये E.

६. 112a श्वेतशालि°] A (etc.), श्वेतमाली° C ; 112b °गण्डशालि] A, °गन्धशाली C^1, D^1, E, G, °गलशालि D^2, °सौगन्धी F^1 ; °रक्तशालिकाः] F^1, तथैव च A (etc.).

७. 113a पूर्वे तु] A, G, सर्वे तु C, D, E, तत्पूर्वे F^1.

८. 113c श्रेष्ठान्तकं] A, C, D, G, श्लेष्मान्तकं E, इष्टादर्कं च F^1 ; भूर्ज°] A (etc.), जम्बु° F^1 ; °त्वक्°] A^2 (etc.), °त्वकं A^1.

९. 114b कारण्डकद्वयं] G, रण्डाच द्वयं A^1, lacune A^2, कारण्डद्वयोर्° C^1, E, कारण्ड्वयोर्° C^2, कारण्डद्वयो D^1, कोरण्डद्वयौ D^2, करण्डौ द्वयो F^1.

वारुणे षोडशे मध्ये चत्वारि कलशान्न्यसेत्॥ ११५॥
महातिलं च सिद्धार्थं कार्पासं च कपित्थकम्[१]।
वायव्ये द्वादशे मध्ये मातुलुङ्गद्वयं न्यसेत्॥ ११६॥
सौम्ये तु द्वादशे मध्ये पुन्नागद्वयकं न्यसेत्।
[२]ईशाने द्वादशे मध्ये जपाकं चटकं न्यसेत्[३] ॥ ११७॥
शेषांस्तु कलशान्सर्वान्शिवतोयेन पूरयेत्[४]।

[९.८. ईशानव्यूहः]

ईशे शते पदे मध्ये षोडशस्य तु मध्यमे॥ ११८॥
व्याघ्रनखी तमाली च द्रोणपुष्पं चतुर्दली।
अभितो द्वादशे कोष्ठे स्थाप्य गोघृतमुत्तमम्[५] ॥ ११९॥
[६]तत्पूर्वे द्वादशे मध्ये मार्जनं परिमार्जनम्[७]।
[८]आग्नेयां नवके मध्ये मेघं विन्यस्य देशिकः ॥ १२०॥
[९]याम्ये च द्वादशे मध्ये कुमुदौ द्वौ तु विन्यसेत्।
नैर्ऋतौ नवके मध्ये वस्त्रतोयं सुविन्यसेत्॥ १२१॥
वरुणे द्वादशे मध्ये मुरमञ्जी च विन्यसेत्।
[१०]वायव्ये नवके मध्ये देवदारुं च विन्यसेत्॥ १२२॥
सौम्ये तु द्वादशे मध्ये जीरकौ द्वौ तु विन्यसेत्[११]।

---

१. 116a °तिलं च सिद्धार्थं] A, G, °तिलसिचाकूर्चा C^1, °नीली सिचा कूर्चा C^2, °तलसि चाकूर्चा D^1, °तिलसि च कूर्च° D^2, °र्थी सीचक्लीसी E, °सिम्बीं चैव F^1 ; 116b कपित्थकम्] A^2 (etc.), कपट्टिकम् A^1.

२. D^1 répète 116ab-117ab après 117ab.

३. 117d न्यसेत्] A, G, तथा C, D, E, F^1.

४. 118a कलशान्°] A (etc.), विन्यसेत्° C^1.

५. 119d स्थाप्य गो°] F^1, स्थाप्यादौ A, G, स्थाप्य द्वौ C, D^1, E.

६. C^1, C^2 et D^1 répètent 117d-120a entre 120a et 120b.

७. 120b मार्जनं] A, C, D^1, F^1, G, मार्जनी D^2, E.

८. F^1 omet 120c-123a.

९. A^1, A^2 et G omettent 121b-122c.

१०. C^1 omet 122cd.

११. 123b जीरकौ द्वौ तु विन्यसेत्] A, F^1, जीवकौ द्वौ तु विन्यसेत् C, D, E, न्यसेद्दै जीरकद्वयम् G.

ईशाने नवके मध्ये धात्रीचूर्णं तु विन्यसेत्[१] ॥ १२३ ॥
शेषांश्च कलशान्सर्वाञ्शिवाद्भिः परिपूरयेत्[२] ।
[३]सकूर्चान्सापिधानांश्च सवस्त्रान्साधिदैवतान् ॥ १२४ ॥

[१०. पूजा]

[४]व्यूहानामधिपा ये च त एव कलशाधिपाः[५] ।
गन्धैः पुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत्[६] ॥ १२५ ॥
पद्ममुद्रां बीजमुद्रां सुरभीं च प्रदर्शयेत् ।
पुण्याहं वाचयेत्तत्र पवमानसमन्वितम् ॥ १२६ ॥

[११. होमः]

कुण्डे वा स्थण्डिले वापि होमं कुर्याद्यथाविधि ।
पलाशोदुम्बराश्वत्थखादिरबिल्वमेव च[७] ॥ १२७ ॥
प्लक्षन्यग्रोधमायूरं पूर्वादिसमिधः क्रमात्[८] ।
समिदाज्यचरुं लाजांस्तिलं च यव एव च[९] ॥ १२८ ॥
प्रत्येकं शतमर्धं वा जुहुयात्क्रमशः पुनः ।
त्रियम्बकेन समिधो घृतं हुत्वा हृदा बुधः[१०] ॥ १२९ ॥
देवस्य त्वा चरुं हुत्वा शिखया लाजमेव च ।
यज्ञेन यज्ञं तिलस्योक्तं कवचेन यवं हुनेत्[११] ॥ १३० ॥
मिन्दाहुतिं च कूष्माण्डं महाव्याहृतिमेव च ।

---

१. 123d °चूर्णं] A^1 (etc.), °पूर्णं A^2 ; तु विन्यसेत्] A, G, न्यसेत्बुधः C, D, E, F^1.

२. 124b परिपूरयेत्] A, G, पुरयेत्क्रमात् C, D, E, F^1.

३. F^1 remplace 124cd par सकूर्चानिति पूर्ववत्। (glose de copiste ?).

४. E ajoute avant 125ab : सरत्नान्सपिधानांश्च स औषधिसमन्वितान्।

५. 125ab ये च त एव] A^1, G, एव तावेव A^2, lacune C^1, ये च त एते C^2, ये च स एव D, E, ये च तदेव F^1.

६. 125d °र्घ्यैश्च] A, E, G, °र्घ्यं च C, D.

७. 127c पलाशो°] A^2 (etc.), पलाशौ° A^1 ; 127d °खादिर°] A^1, °खादिरो A^2, D, C^1, F^1, °खादिरा C^2, E, G ; °बिल्वमेव च] C, D^1, E, F^1, G, °प्लक्ष एव च A, lacune D^2.

८. 128a °मायूरं] A (etc.), °माधूरं D^1 ; 128b क्रमात्] A, G, स्मृताः C^1, D, E, F^1.

९. 128d च यव एव च] A (etc.), सर्षपमेव च G.

१०. 129c त्रियम्बकेन समिधो] F^1, त्र्यम्बकेन समिधं हुत्वा (*v.f.*) C^2, D^1, त्रियम्बकं समिद्धुत्वा A, D^2, G, त्रियम्बकेन मन्त्रेण C^1, त्र्यम्बकेन समिधुत्वा E.

११. 130c यज्ञेन यज्ञं] A, G, यत्ते यमं C^1, D, E, घन्ते यमं C^2, धते मन्त्रं F^1.

ब्रह्माङ्गं च ततो हुत्वा स्विष्टान्तं होममाचरेत्[१] ॥ १३१ ॥

[१२. द्वारपूजादि]

द्वारपूजां ततः कृत्वा प्रविश्याभ्यन्तरं तथा[२]।
लिङ्गपीठस्थलानां च शुद्धिं कृत्वा विशेषतः ॥ १३२ ॥
निर्माल्यं तु विसृज्याथ कल्पयेदासनं क्रमात्[३]।
आवाहयेत्ततो देवं पूर्वोक्तविधिना सह[४] ॥ १३३ ॥

[१३. अभिषेकः]

सर्वातोद्यसमायुक्तं नृत्तगेयसमन्वितम्[५]।
ब्रह्मघोषसमायुक्तं शिवकुम्भं समुद्धरेत्[६] ॥ १३४ ॥
[७]शिवकुम्भाच्छिवबीजं लिङ्गमूर्ध्नि तु विन्यसेत्।
वर्धन्यां वर्धनीबीजं पिण्डिकायां तु विन्यसेत्॥ १३५ ॥
पाद्यं पादे हृदा दत्वा वक्त्रेणाचमनं ददेत्[८]।
संस्नाप्य पञ्चगव्यादि महाव्योम्नेति मन्त्रतः[९] ॥ १३६ ॥
ब्रह्माङ्गैर्दशबीजैश्च रुद्रसूक्तैर्विशेषतः।
[१०]स्नाप्य पूर्वोक्तमार्गेण द्वारं प्रति विशेत्पदे[११] ॥ १३७ ॥
शिवकुम्भं पुरोद्धृत्य वर्धनीं च ततः परम्[१२]।

---

१. 131d स्विष्टान्तं] A (etc.), स्विष्टाहुतिं F^1 ; होममाचरेत्] A, C, D^1, G, हि समाचरेत् D^2, E, अथाचरेत् F^1.

२. 132b तथा] A (etc.), द्विजः E.

३. 133a तु विसृज्याथ] A, C^2, F^1, G, विस्रजयित्वा C^1, विसर्जत्वा D, E ; 133b कल्पये°] C (etc.), कलये° A.

४. 133c देवं] A (etc.), देवीं C^2.

५. 134b °समन्वितम्] A, C, D, °समाकुलम् E, F^1, G.

६. 134d समुद्धरेत्] A^1 (etc.), समुघरेत् A^2.

७. F^1 intercale entre 135ab et 135 cd les vers 6d-46ab du chapitre 62.

८. 136a पादे] A (etc.), पादौ F^1 ; 136b वक्त्रेणा°] A (etc.), lacune C^1 , वक्त्रे वा° F^1.

९. 136c संस्नाप्य] A, C, G, सुस्नाप्य D, E, F^1.

१०. F^1 remplace 137d par : उद्धारं प्रवदाम्यहम्।

११. 137c स्नाप्य] Eds, स्थाप्य A (etc.) ; 137d °पदे] C^2, D, E C^2, D, E, °पथे A, G, lacune C^1.

१२. 138a पुरोद्धृत्य] A^2 (etc.), पुरे घृत्य A^1.

विद्येशकुम्भशक्तीश्च तेषामावरणादि च[१] ॥ १३८ ॥
उद्धृत्य स्नापयेदीशं ; पूज्य व्यूहान्तरे बुधः[२]।
इन्द्रव्यूहं समारभ्य ईशव्यूहान्तमेव च ॥ १३९ ॥
अनन्तावरणमारभ्य परितश्चोद्धरेत्क्रमात्[३]।
उद्धृत्य प्रणवेनैव दशावरणमूर्तिपः[४] ॥ १४० ॥
यजेदावाहनान्ते तु गन्धपुष्पैः सधूपकैः[५]।
कलशं वामहस्ते तु न्यस्तव्यं दक्षिणेन तु ॥ १४१ ॥
पिधाय कुम्भवक्त्राणि गोशृङ्गाग्रप्रमाणतः[६]।
अभिषेकं च कर्तव्यं लिङ्गमूर्धनि देशिकः[७] ॥ १४२ ॥
प्राप्तायां सन्ध्यावेलायां स्नानकाले त्वहर्निशम्[८]।
सन्ध्याकर्माणि सर्वाणि बल्यन्तं हि समाचरेत्[९] ॥ १४३ ॥
सन्ध्यान्ते स्नापयेत्पश्चाच्छेषाणि कलशानि वै[१०]।

[१४. अर्चनम्]

अर्चनोक्तं समभ्यर्च्य सर्वस्यान्ते विशेषतः ॥ १४४ ॥
पायसं कृसरं गौल्यं मौद्गं शुद्धान्नमेव च[११]।
शुद्धान्नं पूर्ववक्त्रे तु मौद्गं वै दक्षिणे मुखे[१२] ॥ १४५ ॥

---

१. 138c °शक्तीश्च] D, F^1, °शक्तिं च A, C^1, E ; 138d °वरणादि च] A, G, °वरणानि च C, D, E, F^1.

२. 139b पूज्य] A (etc.), व्यूह° F^1.

३. 140b °चोद्धरेत्°] C^1, D^2, °चोर्ध्वरे A^1, G, °चोर्ध्ववत्° A^2, °चोत्तरेत्° D^1, E, °चोत्तरे F^1.

४. 140d °मूर्तिपः] Eds, °मूर्तिपम् A (etc.).

५. 141a °वाहनान्ते] A, °वारणान्ते C, D, E, F^1, lacune G ; 141b °पुष्पैः] A^1, C^2, °पुष्पं A^2, G, °पुष्प° C^1, D, E, F^1.

६. 142a कुम्भवक्त्राणि] F^1, वस्त्रकुम्भानां A (etc.).

७. 142c च कर्तव्यं] A, G, प्रकर्तव्यं C, D, E, F^1.

८. 143a प्राप्तायां] A (etc.), संप्राप्त° F^1 ; सन्ध्या°] Eds, सिद्ध° A (etc.) ; 143b त्वहर्निशम्] A, F^1, G, त्वहर्निशौ C, D, E.

९. 143c सन्ध्या°] Eds, सिद्ध° A (etc.), सिद्धि° G.

१०. 144a सन्ध्यान्ते] Eds, सिद्ध्यन्ते A, G, सिद्धान्ते C, D, सन्ध्यन्ते E, F^1.

११. 145a कृसरं] A (etc.), तु सरं A^2 ; गौल्यं] A^2, F^1, G, गुल्यं A^1 गौक्यं C^1, कौल्यं C^2, D^2, गौत्रं D^1, सौम्यं E.

१२. 145c पूर्ववक्त्रे तु] A^1 (etc.), पूर्ववक्त्रेण A^2, पूर्वके दत्त्वा F^1 ; दक्षिणे मुखे] C^2, दक्षिणेन तु A (etc.), दक्षिणे ददेत् F^1.

पायसं पश्चिमे वक्त्रे कृसरं चोत्तरे ददेत्[१]।
ऊर्ध्ववक्त्रे गुलान्नं तु हृदयेन विनिक्षिपेत्[२] ॥ १४६ ॥
पुनराचमनं दद्यात्ताम्बूलं हृदयेन तु[३]।

[१५. महास्नपनफलम्]

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥ १४७ ॥
सुभिक्षं गोबहुत्वं च राजराष्ट्रविवर्धनम्[४]।
महास्नपनमाख्यातं पञ्चाशत्स्नपनं शृणु[५] ॥ १४८ ॥

॥ इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनविधिपटलः [एकषष्टितमः][६] ॥

---

१. 146a वक्त्रे] A (etc.), भागे F^1.

२. 146c गुलान्नं तु] A (etc.), ददेद्गौलं F^1 ; 146d हृदयेन विनिक्षिपेत्] A (etc.), हृदयेनैव मन्त्रतः F^1.

३. 147b हृदयेन तु] A (etc.), हृदि दापयेत् F^1.

४. 148a °भिक्षं] A^2 (etc.), °भिक्षुं A^1 ; गोबहुत्वं च] A, D, E, F^1, G, गोवहत्यं च C^1, गोः प्रवृद्धिं च C^2.

५. 148c °स्नपनमाख्यातं] A, °भिषेकं समाख्यातं (*v.f.*) C^1, D, °भिषेक आख्यातः C^2, °भिषेकसंख्यातं E, °भिषेकमाख्यातं G ; 148d शृणु A, E, F^1, G, कुरु C, D.

६. A^2, E : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनपटलः।
C^1 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनविधिः चतुश्चत्वारिंशः पटलः।
C^2 : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनविधिश्चत्वारिंशः पटलः।
D : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनपटलः पञ्चचत्वारिंशतितमः।
F^1 : इति दीप्तशास्त्रे प्रतिष्ठायां महास्नपनपञ्चाशत्पटलः।
G : इति दीप्तशास्त्रे प्रतिष्ठातन्त्रे महास्नपनपटलः।

[द्विषष्टितमः पटलः]
[पञ्चाशत्स्नपनविधिः[१]]

अतः परं प्रवक्ष्यामि पञ्चाशत्स्नपनं परम्[२]।
भुक्तिमुक्तिप्रदं चैव सर्वव्याधिनिवारणम्[३]॥ १॥

[१. स्नपनकालः]

उत्सवान्ते प्रतिष्ठान्ते ग्रहणे चन्द्रसूर्ययोः[४]।
सङ्क्रान्तौ विषुवे चैव षडशीतिमुखेषु च[५]॥ २॥
अमायां तु तथाष्टम्यामार्द्रायां चैव कारयेत्[६]।

[२. अङ्कुरार्पणम्]

निर्दिष्टदिनपूर्वे तु सप्ताहे वाथ पञ्चमे॥ ३॥
[७]अङ्कुराण्यर्पयेद्धीमान्पूर्वोक्तविधिना सह।

[३. स्नानमण्डपः]

मण्डपे वा प्रपायां वा स्नपनं सम्यगाचरेत्[८]॥ ४॥
मण्डपे मध्यमे धीमान्वितानध्वजमालया[९]।
दर्भमालासमायुक्तं मुक्तादामैरलङ्कृतम्[१०]॥ ५॥
[११]गोमयालेपनं कृत्वा सूत्रपातनमाचरेत्[१२]।

---

१. Manuscrits utilisés : A^1, A^2, C^1, C^2, D^1, E, F^1, G.

२. 1b पञ्चाशत्स्नपनं] A (etc.), न्यूनपञ्चशतं F^1.

३. 1c °प्रदं चैव] A (etc.), °मदजाते F^1.

४. 2b चन्द्रसूर्ययोः] A, F^1, G, सोमसूर्ययोः C^1, D^1, सूर्यसोमयोः C^2, E.

५. 2c सङ्क्रान्तौ] C^2, G, सङ्क्रान्ते A^1 (etc.), सङ्क्रान्ति A^2.

६. 3a अमायां तु तथाष्टम्या°] G, अमावास्या तथा षष्ट्या° A^1, अमावास्यां तथाष्टम्या° A^2 (etc.).

७. C et D^1 omettent 4ab-5ab.

८. 4d स्नपनं] A, G, स्थपनं E, F^1.

९. 5a मध्यमे] A, E, G, मण्डपं F^1.

१०. 5d °दामैरलङ्कृतम्] A, C, D^1, E, °मालैरलङ्कृतम् F^1, °दामविभुषितम् G.

११. F^1 : lacune 6ab-6c, les vers 6d-46ab étant intercalés entre les vers 135ab et 135cd du chapitre 61).

१२. 6b सूत्रपातनमाचरेत्] A, सूत्रपादनमाचरेत् C^1, D^1, E, सूत्रोत्पादनमाचरेत् C^2, सूत्रपातनमारभेत् G.

[३.१. मण्डलकल्पनम्]

प्रागग्रं दशसूत्रं स्यादुदगग्रं तथैव च[१] ॥ ६ ॥
मध्ये नवपदं पद्ममष्टपत्रं सकर्णिकम् ।
लेपयेत्षोडशं बाह्ये पदं गोमयवारिणा ॥ ७ ॥
शक्रादिसोमपर्यन्तं द्वारं द्वे द्वे पदे न्यसेत्[२] ।
उभयोरपि पार्श्वाभ्यां द्वे द्वे तु पदे आहरेत्[३] ॥ ८ ॥
प्रत्येकमष्टमं कोणं कल्पयेत्कल्पवित्तमः ।
एवं कृत्वा विधानेन ततः स्थण्डिलमारभेत्[४] ॥ ९ ॥

[३.२. स्थण्डिलकल्पनम्]

[५]शालिभिर्व्रीहिभिश्चाथ प्रत्येकं प्रस्थसंमितम्[६] ।
[७]द्रोणं तु शिवकुम्भं स्याद्द्रोणार्धं वर्धनी भवेत्[८] ॥ १० ॥
तदर्धं तण्डुलैर्भूष्य तिलदर्भसमन्वितम्[९] ।

[३.३. अक्षरस्थानम्]

अक्षराणि लिखेत्पश्चात्पद्माद्यावरणे बुधः[१०] ॥ ११ ॥
कर्णिकायां न्यसेत्कूटं बिन्दुनादसमन्वितम्[११] ।

---

१. 6d °दगग्रं] A (etc.), °दग्रं (*v.f.*) C^2.

२. 8a शक्रादि°] A (etc.), चक्रादि° E ; 8b द्वारं द्वे द्वे पदे] Eds, द्वारे द्वौ द्वौ पदं A, द्वारेण द्वौ पदं C^1, द्वारेण द्विपदे C^2, द्वारे द्वौ पद D^1, द्वारे द्वौ द्वौ पदे E, द्वाभ्यां द्वाभ्याम् पदं F^1, द्वारे द्वे द्वे पदे G ; न्यसेत् A (etc.), भवेत् F^1.

३. 8c पार्श्वाभ्यां] A^1, E, F^1, G, पार्श्वे स्याद्° A^2, बाह्याभ्यां C^1, बाहुभ्यां C^2, बाह्वाभ्यां D^1 ; 8d द्वे द्वे] C^2, द्वौ द्वौ A (etc.) ; पदे आहरेत्] Eds, पदमारभेत् A (etc.) वतुमाहरेत् F^1.

४. 9c विधानेन] A (etc.), विधाने तु C^1.

५. F^1 : lacune 10ab-10c (début).

६. 10a °व्रीहिभिश्चाथ] A^2, °व्रीहिभिर्वाथ A^1, E °व्रीहिभिश्वाथ C, G, °विभिभिर्वाथ D^1 ; 10b प्रस्थसंमितम्] C (etc.), वा प्रसमितम् A.

७. Les demi-vers 10cd et 11ab sont sans doute à intervertir.

८. 10c शिवकुम्भं स्याद्°] A, शिवकुम्भस्य C, E, G, शिवशिवकुम्भस्य (*v.f.*) D^1.

९. 11a तदर्धं] A (etc.), तदर्धेस्° F^1.

१०. 11d °पद्माद्याव°] A (etc.), °दद्यादाव° F^1.

११. 12a न्यसेत्°] A, C^1, G, यजेत्° C^2, D^1, E, लिखेत्° F^1.

[१]यकारं पूर्ववक्त्रे तु रकारं दक्षिणे लिखेत्[२] ॥ १२॥
लकारं पश्चिमे वक्त्रे वकारं चोत्तरे लिखेत्[३]।
तवदेशे शकारं स्यात्षकारं नैरृतगोचरे[४] ॥ १३॥
सकारं वायुदेशे तु हकारं चेशगोचरे[५]।
कर्णिकायां न्यसेत्पत्रे स्वर्णवर्णान्यनुक्रमात्[६] ॥ १४॥
[७]तद्बाह्यावरणे कोष्ठे स्वरं पूर्वादितः क्रमात्[८]।
तद्बाह्यावरणे धीमान्पूर्वादीनि प्रदक्षिणम्[९] ॥ १५॥
ककारादिभकारान्तं न्यस्त्वा कूटे मकारकम्[१०]।

[४. कलशसादनम्]

स्थण्डिलस्योत्तरे देशे कलशान्सादयेत्क्रमात्॥ १६॥
[११]सौवर्णं राजतं वापि ताम्रं वा मृण्मयं तु वा।
सूत्रेण वेष्टयेत्सर्वान्गवाक्षसदृशान्तरम्[१२] ॥ १७॥
[१३]प्रक्षाल्य चास्त्रमन्त्रेण पूजयेद्धृदयेन तु[१४]।

---

१. F^1 remplace 12cd-13ab par यकारं पूर्वपत्रे तु रकारं चोत्तरे लिखेत्। G remplace 12cd-14ab par : मकारम्वायुदेशे तु हकारं चेशगोचरे।

२. 12c यकारं] A^1 corr., मकारं A, C, D^1, E.

३. 13a वक्त्रे] A, C, D^1, पत्रे E.

४. 13c तव°] A, C, D^1, नव° E, वह्ने F^1 ; 13d नैरृतगोचरे] C^1, D^1, नैरृते यजेत् A, नैऋर्तिगोचरे C^2, E, विकारनिर्रृतिगोचरे F^1.

५. 14b चेशगोचरे] A^1, C^2, चैशगोचरे A^2, E, चैव गोचरे C^1, D^1, चैशगोचरेत् F^1.

६. 14c न्यसेत्पत्रे] C^2, D^1, E, न्यसेत्पत्रं A, G, न्य+मत्रे C^1, च पत्रेषु F^1 ; 14d स्वर्ण°] A, G, न्यस्त्वा C, D^1, E स्यस्त्वा (?) F^1.

७. A^2 omet 15ab-16cd. C^2 omet 15ab.

८. 15a तद्बाह्यावरणे] C^1 (etc.), तद्बाह्ये वारुणे A^1, G ; कोष्ठे] A^1 (etc.), कोष्ठ° F^1 ; 15b स्वरं पूर्वादितः] A^1 (etc.), सुरं पूर्वदितः C^1 ; क्रमात्] A^1 (etc.), न्यसेत् F^1.

९. 15c °बाह्यावरणे] C, D^1, E, F^1, °बाह्ये वारुणे A^1, G.

१०. 16a ककारादि°] C (etc.), अकारादि° A^1, G ; °भकारान्तं] Eds, °हकारान्तं A (etc.).

११. F^1 donne cette version de 17ab : हैमकान्राजतान्यात्रान्ताम्रजान्मृण्मयानपि।

१२. 17c °सर्वान्°] A (etc.), °तत्रा° C^2 ; 17d °सदृशान्तरम्] A^2, C^2, E, F^1, G, °सदृशाक्षरम् A^1, °सदृशान्नरः C^1, lacune D^1.

१३. D^1 omet 18ab-42cd.

१४. 18a चास्त्र°] A, C^1, E, G, शास्त्र° A^2, F^1 ; 18b °धृदयेन] A (etc.), °धष्टवेन C^2.

[५. कलशन्यासः]

गन्धतोयेन सम्पूर्णं पञ्चरत्नसमायुतम्[१] ॥ १८ ॥
कूटमध्ये न्यसेत्कुम्भमीशानेन तु मन्त्रतः ।
[२]सकूर्चं सापिधानं च सवस्त्रं बीजसंयुतम् ॥ १९ ॥
[३]आवाहयेत्ततो देवं त्रिणेत्रं च चतुर्भुजम् ।
[४]कृष्णापरशुसंयुक्तं वरदाभयहस्तकम्[५] ॥ २० ॥
दिव्याम्बरधरं देवं दिव्यस्रग्गन्धभूषितम्[६] ।
वर्धनीं विन्यसेद्वामे गौरीगायत्रिमन्त्रतः[७] ॥ २१ ॥
[८]सकूर्चां सापिधानां च सवस्त्रां वारिपूरिताम्[९] ।
दिव्याम्बरधरां देवीं दिव्यगन्धानुलेपनाम्[१०] ॥ २२ ॥
सुस्तनां चारुवदनां किंचित्प्रहसिताननाम् ।
गन्धपुष्पादिना पूज्य स्वस्वबीजमनुस्मरन्[११] ॥ २३ ॥
मुकुलीं पद्ममुद्रां च बीजमुद्रां च दर्शयेत् ।

[६. अक्षरकलशन्यासः]

[६.१. यकारादि]

[१२]यकारे विन्यसेत्पाद्यं दूर्वोशीरं च चन्दनम्[१३] ॥ २४ ॥

---

१. 18c °तोयेन सम्पूर्णं] A (etc.), °तोयैः समभ्यर्च्य C^2 ; 18d पञ्चरत्न°] A (etc.), नृत्तगेय° C^2 ; °समायुतम्] A (etc.), °समन्वितम् F^1.

२. A, D^1 et G mettent 19cd au pluriel. C^2 et F^1 en font autant pour 19c.

३. C^1 omet 20ab.

४. G répète 18cd entre 20ab et 20cd.

५. 20c कृष्णा°] A^2 (etc.), कृष्णं A^1.

६. 21b °स्रग्गन्ध°] A (etc.), °गन्धवि° E.

७. 21d °गायत्रिमन्त्रतः] A (etc.), °बीजसमन्विताम् F^1.

८. C omet 22ab-24ab.

९. 22a सकूर्चां सापिधानां] A^2, सकूर्चान्सापिधानांश्° A^1 (etc.) ; 22b सवस्त्रां वारिपूरिताम्] A^1, सवस्त्रां हेमपूरिताम् A^2, सवस्त्रान्हेमसंपुतान् E, वस्त्रां हेमसंयुताम् F^1, सवस्त्रान्हेमसंयुतान् G.

१०. 22c °धरां देवीं] A^2, E, F^1, °धरं देवं A^1, G ; 22d °नुलेपनाम्] A^2, E, F^1, °नुलेपनम् A^1, G.

११. 23c स्वस्वबीज°] A (etc.), स्वपूज° (*v.f.*) F^1.

१२. A^2 omet 24cd-26ab.

१३. 24c यकारे] F^1, मकारं A^1 (etc.) ; °पाद्यं] F^1, °पूर्वे A^1, G, °पद्ये C, E ; 24d दूर्वोशीरं च चन्दनम्]

एवं फलत्रयैर्युक्तं रेफं चाचमनीयकम्[१]।
आपःक्षीरकुशाग्राणि अक्षतैर्यवतण्डुलैः ॥ २५ ॥
